प्रश्नोत्तरप्रकरणे परिवाराभ्यर्थने स्वगुरुभक्त्या ।
अतिभक्तधर्मचंद्राभिधगणिना भागिनेयेन ॥ १५

भणितैः श्रीमलयप्रभसूरिभिरेषा विचित्रदृष्टांतैः ।
संवेगाय यथामति जगति जयंतीकथा प्रथिता ॥ १६

हंसोयं गगने प्रभातमुखतः क्रीडासरस्यन्वहं
यावत्सांद्रतमिस्रसैवलमलं दूरे व्युदस्य क्षणात् ।
धत्ते सर्वदिशां मुखांबुजवने संचारलीलायितं
संतोषं सुधियां ददात्वविकलं तावज्जयंतीकथा ॥ १७

द्वादशवर्षशतेषु श्रीविक्रमतो गतेषु षष्टितमे ।
वर्षे ज्येष्ठे मासे श्रवणे भे कृष्णपंचम्यां ॥ १

जीवादिविषयसंशयतमोपहारैकतरणिरुचिरुचिरे ।
योगे चैंद्रे सिद्धाख्ये जयंतीकथा रचिता ॥ २

मोहमहीपतिविजये चतुरंगबलेन शुचिगुणस्यूता ।
इह जगति वैजयंती जयतु जयंतीकथा सुचिरम् ॥ ३ ॥

छ ॥ मंगलमस्तु ॥

दिव्यश्रीसदनं सदा क्षितिधराधारः सुपात्रास्पदं
क्षोणीमंडलमंडनं सुविदितः प्राग्वाटवंशोस्ति सः ।
यत्र छत्रपरंपरावति तते संप्राप्य पर्वस्थितिं
जायंतेद्भुतमत्र वांछितफलैः सौहित्यभाजो जनाः ॥ १
मुक्तावत्तत्र वंशे समजनि विदितो धाहडः श्रेष्ठिवर्यः
सद्वृत्तः कांतकांतिः प्रवरगुणगणः प्रास्तनिःशेषदोषः ।
आनंदाधायिमूर्त्तिस्त्रिभुवनभवनोत्संगरंगत्सुकीर्त्तिः
स्फूर्जत्पुण्यप्रवाहोद्भवविशदयशोभवत्स्फूर्त्तिमूर्त्तिः ॥ २
नयविनयवितितिव्रिटपितसितांशुसितकीर्त्तिधवलितदशाशः ।
पुण्याचारपवित्रस्तत्पुत्रो धवलनामासीत् ॥ ३
अजनीह मरुसंज्ञा मरुस्थली पापपंकजवनस्य ।
तस्य प्रवरा जाया विशुद्धशीला विगतमाया ॥ ४
तत्पुत्री ठक्कुराणी समभवदसमक्षांतिविस्तीर्णशीला
नाऊनामा शशांकद्युतिधवलितगुणैः[1] साधुशस्यैर्विशाला ।
धर्मानुष्ठाननिष्ठो[2] विधिवशविकसत्कीर्त्तिसंभारसारा
प्राज्यस्फूर्जद्विवेकप्रतिहतवितथोद्दामदुर्वारमारा ॥ ५ ॥

इतश्च ॥

संजातोऽत्रैव वंशे निरुपममहिमा भाग्यसौभाग्यभूमिः
श्रीपालष्ठक्कुराभ्यः प्रथितशुचियशाः पालितप्राज्यनीतिः ।
दिव्यश्रीकेलिगेहं समजनि परमं मंडनं धाम लक्ष्म्याः
श्रीदेवी तस्य पत्नी विकृतिकलुषतालोलतानां सपत्नी ॥ ६

---

[1] °धवलगुणैः ? [2] धर्मानष्ठाननिष्ठा ?

तयोः सुतः शोभनदेवनामा
मुख्यो यशोदेव इति द्वितीयः ॥
जातोभिजातो नृपमान्यतादि-
गुणैरशेषैर्भुवि सुप्रसिद्धः ॥ ७

तत्र शोभनदेवस्य ठक्कुरस्य गृहाद्वयं ।
सूहवमहणूसंज्ञं सोढूनामा सुता पुनः ॥ ८

नाऊकायाः पाणिग्रहणं कृतवानसौ यशोदेवः ।
तत्रातिरत्नभूतेति रत्नदेवीति विदितेयं ॥ ९

या शीतेव कलौ कलंकविकलप्रोल्लासिशीलोज्ज्वला
धर्मानुष्ठितिनिष्ठया त्रिभुवने प्राप्तप्रतिष्ठा हि या ।
लब्धागण्यवरेण्यपुण्यनिवहा या चैत्यकृत्यादिभि-
र्ग्लानास्थानपुरादिधार्मिकसभाप्रख्यातनामा च या ॥ १०

ज्ञानं मोहमहांधकारदलने रत्नप्रदीपायते
ज्ञानं दुर्गतिदुर्गकूपपतने हस्तावलंबायते ।
गंभीरे भववारिधौ भवभृतां ज्ञानं सुपोतायते
ज्ञानं कामितवस्तुलाभविषये सत्कामधेनूयते ॥ ११

इत्येवं शुभदेशनां बहुविधां श्रुत्वा गुरूणां मुखा-
देषा दोषपराङ्मुखी जिनमते रक्ता विरक्ता भवे ।
सप्तक्षेत्रनिजार्थबीजवपनासक्ता विशेषात्पुन-
र्ज्ञानपुस्तकलेखने कृतमतिर्ज्ञाऊरिह श्राविका ॥ १२

इतश्चतुर्भिः संबंधः ।

श्रीशीलगणसुरीशपूज्यपट्टप्रतिष्ठितैः ।
बाल्यादपि महापुण्यश्रेण्या नित्यमधिष्ठितैः ॥ १३

श्रीमानतुंगसूरिभिरारार्ध्यैस्तत्र यज्जयंत्याख्यं ।
प्रकरणमकारि शुभदं भगवत्यंगान्मनोहारि ॥ १४

तस्योपरि गुरुभक्त्या विदधे सुधिया मनोरमा वृत्तिः ।
श्रीमलयप्रभसूरिभिरिह या पूज्यैः प्रसन्नतमैः ॥ १५

तामिह सा नाऊका ज्ञानाराधनधिया सुगुरुभक्त्या ।
लेखितवती गुणवती महासती शुद्धशुभभावा ॥ १६

यावच्चारुमरीचिसंचयचिते चंद्रार्कयोर्मंडले
राजेते गगनश्रियो मणिमये दिव्ये चलत्कुंडले ।
ताराश्रेणिरियं पुनः सुकुसुमालंकारशोभावहा
तावत्पुस्तकमेतदद्भुततमं व्याख्यायतां सूरिभिः ॥ १७

स्वस्ति श्रीविक्रमनरेंद्रसंवत् १२६१ वर्षे अश्विनवदि ७ रवौ पुष्यनक्षत्रे शुभयोगे श्रीमदणहिलपाटके महाराजाधिराजश्रीभीमदेवकल्याणविजयराज्ये प्रवर्त्तमाने श्रीप्राग्वाटज्ञातीयश्रेष्ठिधवलमरूपुत्र्या इ० नाऊश्राविकया आत्मश्रेयोर्थं पंडितमुंजालहस्तेन मुंकुशिकास्थाने जयंतीवृत्तिपुस्तकं लेखयित्वा श्रीअजितदेवसूरीणां निजभक्त्या समर्पितमिति ॥ शुभं भवतु ॥ मंगलमस्तु ॥ मंगलं महाश्रीः ॥

221. **A collection of books in one manuscript** [पञ्चाशमित्यादि].

Folios 3 to 285 : 17½ inches long, 1½ inches broad. 6 to 10 lines in a folio. 61 to 70 aksharas in a line. Numbered as 183. See separate entries which follow.

221, 1. **Panchasaka** by ABHAYADEVA [पञ्चाशकम् । अभयदेवः]. Ends on Folio 77. R. $\frac{\text{ध्}}{\text{गा}}$ L. ७७.

Ends :

जइ मुरकसुहमणहं ॥ ५० ॥ उवहाणपंचासयं सम्मत्तं ।
॥ श्रीमदभयदेवसूरेः कृतिरियं ॥

221, 2. **Upadesapada** by HARIBADRASÛRI [उपदेशपदम्। हरिभद्रसूरिः].

Ends on Folio 158. R. सु ० ऽ्रा. L. १५८.

Begins:

नमिऊण महाभागं तिलोयनाहं जिणं महावीरं ।
लोयालोयमयंकं सिद्धं सिद्धोवएसत्थं ॥ १
वोच्छं उवएसपए ...

Folio 92:

महगिरिअज्जसुहत्थीदिट्ठंतो कालमासज्ज ॥ २
पाडलिपुत्त महागिरि अज्जसुहत्थी ययसेट्ठि वसुभूइ ।
वइदिसज्जेणीए जियपडिमाए लगत्थं च ॥ ३
दो थूलभद्दसीसा ज होइया आइमो घइघरंति ।
ठविउं गच्छ अतीउ कप्पोत्ति तमासिउ किरियं ॥ ४
एसणसुद्धातिजुउ वसुभूइ गिहमि कारणगएण ।
दिट्ठो गोयरवतीइ पारणवुट्ठिउ विहिणा ॥ ५
सेट्ठिस्स विम्हउ खलु तग्गुणकहणाए तउय बहुमाणो ।
ठितिसवणुज्झियधमं[1] पापमणा भोगसद्धाए ॥ ६ ॥

Ends:

लेसुद्देसेणेते उवदेसपया इहं समखाया[2] ।
समया उद्धरिऊण मंदमतिविबोहणट्ठाए ॥ ३९
जाइणिमयहरियाए रइता एतेउ धम्मपुत्तेण
हरिभद्दायरिएणं भवविरहं इच्छमाणेण ॥ १०४० ॥

कृतिरियं हरिभद्रसूरेः ॥

221, 3. **Vrihatsamgrahani** [बृहत्संग्रहणी].

Ends on Folio 190. R. सु ६३ ० ० L. १९०. In 520 gâthâs.

---

[1] ०धम्मं. [2] समरक्काया.

221, 4. Upadesamala by HEMACHANDRA [उपदेशमाला। हेमचन्द्रः].

Ends on Folio 223. R. L. २२३. In 505 gâthâs.

Gâthâ No. 501 :

हेममणिचंददप्पणसूररिसिप्पढमवन्ननामेहिं ।
सिरि अभयदेवसीसेहिं विरइयं परगणं इणमो॥५०१

An anagram on the author's name.

221, 5. Karmastava [कर्मस्तवः].

Ends on Folio 227. In 57 gâthâs.

221, 6. Karmavipaka [कर्मविपाकः].

Ends on Folio 237. In 168 gâthâs.

221, 7. Sataka [शतकम्].

Ends on Folio 244. In 111 gâthâs.

221, 8. Sattariya [सत्तरिया].

Ends on Folio 250. R. L. २५०. In 91 gâthâs.

Ends :

गाहा य सत्तरीए चंदमहत्तरवयाणुसारेण ।
टीकाए नियमियाणं पगहिया होइ नउईए ॥ ९१

सत्तरिया संमत्ता ॥ प २५०

221, 9. Prasamaratiprakarana by UMÂSVÂTIVÂCHAKA [प्रशमरतिप्रकरणम् । उमास्वातिवाचकः].

Ends on Folio 270. R. L. २७०.

In 313 âryâ verses.

Begins :

नाभेयाद्याः सिद्धार्थराजसूनुचरमाश्चरमदेहाः ।
पंचनवदशदशविधधर्मविधिविदो जयंति जिनाः ॥ १

जिनसिद्धाचार्योपाध्यायान्प्रणिपत्य सर्वसाधूंश्च ।
प्रशमरतिस्थैर्यार्थं वक्ष्ये जिनशासनात्किंचित् ॥ २

Ends:

जिनशासनार्णवादाकृष्टां धर्मकथिकामिमां श्रुत्वा ।
रत्नाकरादिव जरत्कपर्दिकामुद्धृतां भक्त्या ॥ ३१०

सद्भिर्गुणदोषज्ञैर्दोषानुत्सृज्य गुणलवा ग्राह्याः ।
सर्वात्मना च सततं प्रशमसुखायैव यतितव्यं ॥ ३११

यद्व्यासमंजसमिह च्छंदःशब्दसमयार्थतो मयाभिहितं ।
पुत्रापराधवत्तन्मर्षयितव्यं बुधैः सर्वं ॥ ३१२

सर्वसुखमूलबीजं [1]सर्वार्थविश्चयप्रकाशकरं ।
सर्वगुणसिद्धिसाधनधनमर्हच्छासनं जयति ॥ ३१३

प्रशमस्थितेन येनेयं कृता वैराग्यपद्धतिः ।
तस्मै वाचकमुख्याय नमो भूतार्थभाषिणे ॥ ३१४

इति श्रीमदुमास्वातिविरचितं प्रशमरतिप्रकरणं समाप्तमिति भद्रं भवतु लेखकवाचकस्य ॥ छ

221, 10. **Ekkavisathanapagarana** by SIDDHASENA [एक्कवीसट्ठाणापगरणम् । सिद्धसेनः].

Ends on Folio 274. R. सू १ थू १ एक्क L. २७४. In 66 gâthâs.

221, 11. **Chhaththanapagarana** [छट्ठाणापगरणम्].

Ends on Folio 281. R. सु ७ १ L. २८१. In 102 gâthâs.

---

[1] सर्वार्थनिश्चय°?

221, 12. **Atmanusasana** [आत्मानुशासनम्].

Ends on Folio 285. R. $\frac{\text{सू}}{\text{नृ}}$ L. २८९. In Mâgadhi. Incomplete.

222. **Commentary** on the **Dasavaikalikasutra**, by TILAKÂCHÂRYA [दशवैकालिकटीका। तिलकाचार्यः].

Folios 1 to 269 : 23½ inches long, 2 inches broad. 8 to 10 lines in a folio. 60 to 65 aksharas in a line. Numbered as 183. Folio 269.

R. $\frac{\text{सू}}{\text{उ}}$ L. २६९. Illustrated. Dated Samvat 1314 = A.D. 1258.

Begins:

५० ॥ नमः श्रीपंचपरमेष्ठिभ्यः ॥

अर्हतः प्रथयंतु मंगलममी शृंगारयंतः सदा...

शय्यंभवस्य श्रुतरत्नसिंधोः
सर्वस्वभूतं दशकालिकं यत् ।
उद्धाटच बह्वर्थसुवर्णकोशं
तद्भव्यसुग्राह्यमहं करोमि ॥ ५

Ends:

मोक्षं महानंदपदं समासादयति ॥ इति समाप्तौ ब्रवीमीति पूर्ववत् ॥

इति श्रीश्रीतिलकाचार्यविरचितायां दशवैकालिकटीकायामुत्तरचूलिकायाष्टीका समाप्ता ॥

223. **Kammapayadi** with **Commentary** by MALAYAGIRI [कम्मपयडी सटीका। टी० मलयगिरिः].

Folios 1 to 276 : 14½ inches long, 1½ inches broad. 8 to 10 lines in a folio. 100 to 108 aksharas in a line. Numbered as 183. Folio 275.

R. $\frac{\text{सू}}{\text{एर्क}}$ L. २७५. Dated Samvat 1451 = A.D. 1395.

Commentary begins :

॥ ॐ नमो वीतरागाय ॥

प्रणम्य कर्मद्रुमचक्रनेमिं
नमत्सुराधीशमरिष्टनेमिं ।
कर्मप्रकृत्याः कियतां पदानां
सुखावबोधाय करोमि टीकां ॥१

Text begins :

सिद्धं सिद्धत्थसुयं वंदिय निद्धोयसव्वकम्ममलं ।
कम्मट्ठगस्स करणट्ठगुदयसहिताणि वोच्छामि ॥ १

Text ends :

जस्स वरसासणवयवलवफरिसविकसियविमलमइकिरणो ।
विमलंति कम्ममइले सो मे सरणं महावीरो ।

Commentary ends :

कर्मप्रकृतिनिधानं बह्वर्थं येन मादृशां योग्यं ।
चक्रे परोपकृते श्रीचूर्णिकृते नमस्तस्मै ॥ ५

एतामतिगंभीरां कर्मप्रकृतिं विवृण्वता कुशलं ।
यदवापि मलयगिरिणा सिद्धिं तेनाश्रुतां लोकः ॥ ६

अरहंता मंगलं मे स्युः सिद्धाश्च मम मंगलं ।
मंगलं साधवः सम्यक् जैनो धर्मश्च मंगलमिति ॥ ७

संवत् १४९१ वर्षे फागणवदि १२ बुधे अद्येह स्तंभतीर्थे कर्मप्रकृतिवृत्तिपुस्तकं लेखितमस्ति ॥ शुभं भवतु ॥

**224 Parisishtaparva** by HEMACHANDRA [परिशिष्टपर्व । हेमचन्द्रः].

Folios 1 to 225 : 24½ inches long, 1¾ inches broad. 4 to 8 lines in a folio. 80 to 85 aksharas in a line. The last eleven leaves (paper) have been added to complete the book. The palm-leaf folios are numbered as 183. Folio 214. R. सू ल्ल एर्क L. २१४.

Ends:

इत्याचार्यश्रीहेमचंद्रविरचिते परिशिष्टपर्वणि स्थविरावलीचरिते महाकाव्ये आर्यरक्षितव्रतग्रहणपूर्वाधिगमवज्रस्वामिस्वर्गगमनतद्वंशविस्तारवर्णनो नाम त्रयोदशः सर्गः समाप्तः ॥ समाप्तं परिशिष्टपर्व ॥ ग्रंथसंख्या ३५०० ॥

**225. Kalpasutra** [कल्पसूत्रम्].

Folios 1 to 156 : 13½ inches long, 1¾ inches broad. 6 to 10 lines in a folio. 42 to 45 aksharas in a line. Numbered as 183. Folio 156. R. सु ऊ र्फु L. १५६. Dated Samvat 1247 = A. D. 1191.

Ends:

पज्जोसवणा कप्पदसा अट्ठमज्झयणं समत्तं ॥

संवत् १२४७ वर्षे आषाढसुदि ९ बुधेऽद्येह श्रीभृगुकच्छे समस्तराजावलीविराजितमहाराजाधिराज उमापतिवरलब्धप्रसादजंगमजनार्दनप्रतापचतुर्भुजश्रीमद्भीमदेवकल्याणविजयराज्ये एतत्प्रसादादवाप्तश्रीलाटदेशे निरूपितदंडश्रीसोभनदेवे अस्य निरूपणया मुद्राव्यापारे रत्नसीहप्रतिपत्तौ इह श्रीभृगुकच्छे श्रीमदाचार्यविजयसिंहसूरिपट्टोद्धरणश्रीमज्जिनशासनसमुच्चयआदेशनामृतपयःप्रपापालक आबाधजनपथिकाज्ञानश्रमपीलिनकर्णपुटपेयपरमभोक्षास्पदविश्रामश्रीमदाचार्यश्रीपद्मदेवसूरिशिष्याणां हेतोः परमार्थमंडपपर्यूषणाकल्पं पं० साजणेन लिखितेति ॥ मंगलं महाश्रीः ॥ ग्रं. २२००[1]

[1] १२०० ?

**226. A collection of books in one manuscript** [दशवैकालिकसूत्रमित्यादि].

Folios 1 to 174: 14 inches long, 2½ inches broad. 8 to 10 lines in a folio. 45 to 50 aksharas in a line. Numbered as 183. See separate entries which follow. Dated Samvat 1284 = A.D. 1228.

**226, 1. Dasavaikalikasutra** [दशवैकालिकसूत्रम्].

Ends on Folio 53. R. $\frac{६}{३}$ L. ९३.

**226, 2. Pakshikasutra** [पाक्षिकसूत्रम्].

Ends on Folio 78. R. $\frac{४}{हो}$ L. ७८.

**226, 3. Ughaniryukti** [ओघनिर्युक्तिः].

Folios 79 to 174. Folio 174. R. $\frac{सु}{एक्क}$ L. १७४.

Ends:

एसा अगुग्गहत्था फुडवियडविसुद्धवंजणा इणमो ।
एक्कारससएहिं अट्ठहिं अहिएहि संगहिया ॥ गा० ११०८

॥ संमत्ता ओहनिजुत्ती ॥ छ

संवत् १२८४ वर्षे फाल्गुनामावस्यां सोमे अद्येह श्रीमदाघाटदुर्गे समस्तराजावलीसमलंकृतमहाराजाधिराजश्रीजैत्रसिंहदेवकल्याणविजयराज्ये तन्नियुक्तमहामात्यश्रीजगत्सिंहे समस्तमुद्राव्यापारान् परिपंथयतीत्येवं काले प्रवर्त्तमाने सा० उद्धरसूनुना समस्तसिद्धांतोद्धारैकधुरंधरेण विशुद्धसिद्धांतश्रवणसमुद्भूतप्रभूतश्रद्धातिरेकेण परमार्हत सा० हेमचंद्रेण दशवैकालिकपाक्षिकसूत्रओघनिर्युक्तिसूत्रपुस्तिका लेखिता लिखिता च ठ० साहडसुतश्रवणोपासक ठ० महिलणसुतखेमसिंहेन ॥ छ ॥ शिवमस्तु संघस्य ॥

**227. Abhidhanachintamani** by HEMACHANDRA [अभिधानचिंतामणिः । हेमचन्द्रः].

Folios 1 to 190: $13\frac{1}{4}$ inches long, $1\frac{1}{2}$ inches broad. 8 to 10 lines in a folio. 40 to 44 aksharas in a line. Numbered as 183. Folio 190. R. सु ७७ ० L. १९०.

**228. Danaprakasa** [दानप्रकाशः].

Folios 12 to 113: 12 inches long, $1\frac{1}{2}$ inches broad. 8 to 10 lines in a folio. 90 to 94 aksharas in a line. Numbered as 183. Folio 113. R. सु ला ३ L. ११३. Incomplete, the beginning and end alike being wanting.

**229. Dharmabindu** by HARIBHADRASÛRI, with the **Commentary** of MUNICHANDRASÛRI [धर्मबिंदुः सटीकः । मू० हरिभद्रसूरिः टी० मुनिचन्द्रसूरिः].

Folios 1 to 227: $13\frac{1}{4}$ inches long, $1\frac{1}{2}$ inches broad. The last four folios are broken. Numbered as 183. Folio 217. R. सूं ० ० ल्ल र्मा L. २१७.

A form of इ in this MS. is ०°०. Dated Saṃvat 1181 = A.D. 1125. Commentary begins:

ए ॥ ॐ नमः सर्वज्ञाय ॥

शुद्धन्यायवशायत्तीभूतसद्भूतसंपदे ।
पदे परे स्थितायास्तु श्रीजिनप्रभवे नमः ॥

जयंतु ते पूर्वमुनीशमेघा
यैर्विश्वमाश्वेव हतोपतापं ।
चक्रे [1]वृहड्वर्मप्वसिंधुपान-
प्रपन्नतुंगातिगभीररूपैः ॥

यन्नामानुस्मृतिमनयनयं सज्जतश्चित्रचक्षुः-
क्षेपाद्दिव्यांजनमनुसरन् लब्धशुद्धावलोकः ।

[1] वृहत्पार्वणसिंधु° ?

सद्यः पश्यत्यमलमतिहन्मेदिनीमध्यमग्रं
गंभीरार्थं प्रवचननिधिं भारतीं तां स्तवीमि ।
विदधामि धर्मबिंदोरतिविरलीभूतगर्भपदबिंदोः ।
भव्यजनोपकृतिकृते यथाबोधं विवृतिमेनां ॥

Text begins:

प्रणम्य परमात्मानं समुद्धृत्य श्रुतार्णवात् ।
धर्मबिंदुं प्रवक्ष्यामि तोयबिंदुमिवार्णवात् ॥

Text ends:

स तत्र दुःखविरहादत्यंतसुखसंगतः ।
तिष्ठत्ययोगो योगींद्रवंद्यस्त्रीजगतीश्वर[1] ॥ इति ।

Commentary ends:

जगत्त्रयपरमेश्वर इति ॥ ६५

इति श्रीमुनिचंद्रसूरिविरचितायां धर्मबिंदुप्रकरणवृत्तौ विशेषतो — — ध्यायः समाप्तः ॥ संवत् ११८१ वैशाखवदि ५ — — — लिखितं — — ग्रं० ३००० ॥

**230. Suktavali** by LAKSHMAṆA [सूक्तावलिः । लक्ष्मणः]

Folios 1 to 96: 12½ inches long, 1½ inches broad. 8 to 12 lines in a folio. 73 to 78 akṣharas in a line. Incomplete.

Begins:

॥ नमः सर्वज्ञाय ॥

सूक्तिरत्नसुधासिंधुं ध्यात्वा श्रीश्रुतदेवतां ।
सूक्तानां संग्रहं चक्रे लक्ष्मणो लक्षसूक्तिकं ॥ १ ॥

अथ जिनस्तुतिः ...

[1] °त्रिजगतीश्वरः ?

अथ कविः

कवेः श्रीवामदेवस्य कामदेवस्य धन्विनः ।
वाणीव पंचबाणीव न लग्ना कस्य मानसे ॥ १

कवींद्राश्च करींद्राश्च मदमंथरगामिनः ।
वने च स्थातुमिच्छंति भवने वावनीभृतः ॥ २

कवेः श्रीकालिदासस्य तस्य किं स्तुमहे वयम् ।
यस्य काव्यत्रयीं श्रुत्वा मर्त्योपि विबुधो भवेत् ॥ ३

स्तोतुमेककविं न श्रीवाल्मीकिमृषयो विदुः ।
द्वितीयो यस्य नास्त्येव स कथं प्रथमः कविः ॥ ४

स एव पदविन्यासस्ता एवाक्षरपंक्तयः ।
वक्रे वक्रे मनुष्याणां क्वापि क्वापि विदग्धता ॥ ५

सुभाषितरसास्वादबद्धरोमांचकंचुकाः ।
विनापि कामिनीसंगं कवयः सुखमासते ॥ ६

लंघिताः कवयः स्थाने पदन्यासैर्मुरारिणा ।
पुराप्येष त्रिपद्यापि त्रिलोकीमप्यलंघयत् ॥ ७

जीयाद्बंधुसुधाधुन्याः सुबंधुःप्रभवाचलः ।
यद्भंगाश्लेषमासाद्य भंगः कविभिराश्रितः ॥ ८

आहतप्रतिभाः केचित्केचिदाहतनिःप्रभाः ।
घटदीपनिभाः केचित्केचिट्टंथानुसारिणः ॥ ९

कवयः कालिदासाद्याः कवयो वयमप्यमी ।
मेरौ च परमाणौ च पदार्थत्वव्यवस्थितिः ॥ १०

कवीनामगलद्गर्वो नूनं वासवदत्तया ।
शक्त्येव पांडुपुत्राणां गतया कर्णगोचरम् ॥ ११

निःश्वासोऽपि न निर्याति बाणे हृदयवर्त्तिनि ।
किं पुनर्विकटाटोपपदबंधा सरस्वती ॥ १२

संति श्वान इवासंख्या जातिभाजो गृहे गृहे ।
उत्पादका न बहवः कवयः सरभा इव ॥ १३

उच्छ्वासांतेष्यखिन्नास्ते येषां वक्त्रे सरस्वती ।
कथमाख्यायिकाकारा न ते वंद्या कवीश्वराः ॥ १४

अथ काव्यम्

लक्ष्मीः सुवर्णरूपापि पाणिपादे विलंबते ।
भूषयत्यंतरात्मानं वर्णरूपाऽपि भारती ॥ १

अपूर्वसूक्तिसद्वल्ल्याः कोपि काव्यफले रसः ।
चर्वणे सर्वसामान्ये स्वादुज्ञो विरलो जनः ॥ २

अपूर्वः सूक्तिकोशोयं दृश्यते तव भारति ।
अव्यये व्ययमायाति व्यये याति च विस्तरम् ॥ ३

धरित्र्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखंडेषु रत्नसंज्ञा नियोजिता ॥ ४

ते धन्यास्ते महात्मानस्तेषां लोके स्थिरं यशः ।
यैर्निबद्धानि काव्यानि ये च काव्येषु कीर्त्तिताः ॥ ५

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमंगे सुभाषितम् ॥ ६

किं कवेस्तस्य काव्येन किं कांडेन धनुष्मता ।
परस्य हृदये लग्नं न घूर्णयति तच्छिरः ॥ ७

काव्यं किमपि तद्वाच्यमर्वाचीनं करोति यत् ।
श्रुतमात्रममित्राणां वक्त्राणि च शिरांसि च ॥ ८...

अथ नृपाः

भवतस्तुल्यतामेति न सोमो न दिवाकरः ।
यस्य दातुः परिश्रांतो न रात्रौ न दिवा करः ॥ १
क्षणमप्यनुगृह्णाति यं दृष्टिस्तेनुरागिणी ।
ईर्ष्ययेव त्यजत्याशु तं नरेंद्र दरिद्रता ॥ २
दरिद्रान्सृजतो धातुः कृतार्थान्कुर्वतस्तव ।
श्रीकीर्त्तीश न जानीमः कः श्रमेण विरंस्यति ॥ ३
राजंस्तवासिपत्रस्य राजते पुष्करावली ।
कालाहूतद्विषल्लेखलिखितेवाक्षरावली ॥ ४
अमी पानकरंकाभाः सप्ताऽपि जलराशयः ।
त्वद्यशोराजहंसस्य पंजरं भुवनत्रयम् ॥ ५
सर्वदा सर्वदोसीति मिथ्या संस्तूयसे बुधैः ।
नारयो लेभिरे पृष्ठं न वक्षः परयोषितः ॥ ६
अगम्यगमनात्पापः प्रायश्चित्तीयते जनः ।
अगम्यं त्वद्यशो याति सर्वत्राऽपि प्रपूज्यते ॥ ७
इयता स द्युसद्गोपि विचिकित्सां चिकित्सति ।
श्रुतिर्न यदहल्यादौ जारेत्येनं जुगुप्सते ॥ ८
उष्मायमाणया तन्वा दृशा बाष्पायमाणया ।
नद्यः शुष्यंति पुष्यंति विंध्ये यस्यारियोषिताम् ॥ ९
दिशः पटपटायंते गगनं लोहितायते ।
कर्णतालास्तसिंदूरे हास्तिके यस्य सर्पति ॥ १०
भयमेकमनेकेभ्यः शत्रुभ्यो युगपत्सदा ।
ददासि तच्च तेनास्ति राजंश्चित्रमिदं महत् ॥ ११

सौकरं रूपमास्थाय हरिणाप्युद्धृता मही ।
असौकरं त्वया कृत्वा राजंश्चित्रमिदं महत् ॥ १२

चित्रं कारणमन्यत्र कार्यमन्यत्र दृश्यते ।
महान्प्रतापो देवस्य दाहस्तु हृदि विद्विषाम् ॥ १३

दोषाणां च गुणानां च त्वयि संख्या न विद्यते ।
गुणानामप्रमेयत्वाद्दोषाणामप्यसंभवात् ॥ १४

भूभृद्वंशप्रसूतानां धनुषां च द्विषां च यः ।
जीवापकर्षणं चक्रे समं समरसीमनि ॥ १५

आशंकितभुनाशीरे नाशीरे यस्य सर्पति ।
स्पर्द्धयेव प्रसर्पति प्राणाः प्रत्यर्थिभूभृताम् ॥ १६

सोमेश्वरस्येतौ ।

मन्ये वास्तव्यमेवासीत्त्वच्चापंहृदि विद्विषाम् ।
रणभूमौ नमत्यस्मिन्नेमुस्ते कथमन्यथा ॥ १७

वाहडस्य ।

प्रायेण सर्वे पश्यंति विपरीतं विनश्वराः ।
यतः कांचनगोरोपि काल एवासि विद्विषां ॥ १८

तुलामारुह्य रविणा वृश्चिके निहितं पदम् ।
भवता शिरसि न्यस्तमयत्नेनैव भोगिनाम् ॥ १९

विचरेदेकपाद्धर्मः कथमस्मिन्कलौ युगे ।
यदि वंशस्त्वदीयोयं न स्यादस्यावलंबनम् ॥ २०

असिदूरेण सीमंता माभूत्तेयोषितामिति[1] ।
त्यक्त्वा प्रयांतु सीमंतादसिं दूरेण तेरयः ॥ २१

[1] मा भूवन्योषितां ?

किं कृतेन न यत्र त्वं यत्र त्वं किमसौ कलिः ।
कलौ चेद्भवतो जन्मकृतिरस्तु कृतेन किं ॥ २२

पद्मानां नालदंडेषु देहदंडेषु कामिनाम् ।
दृश्यंते यदि नान्यत्र त्वयि रक्षति कंटकाः ॥ २३

कीर्त्तिस्ते जातजाड्येव चतुरंभोधिमज्जनात् ।
आतपाय जगन्नाथ गता मार्त्तंडमंडलम् ॥ २४

अपूर्वेयं धनुर्विद्या भवता शिक्षिता कुतः ।
मार्गणौघः समभ्येति गुणो याति दिगंतरम् ॥ २५...

**231. Uvaisutra** [उवाईसूत्रम्].

Folios 1 to 48: 28½ inches long, 2¼ inches broad. 8 to 10 lines in a folio. 120 to 130 aksharas in a line. Numbered as 183. Folio 47. R. सु / मो L. ४७. Dated Samvat 1326 = A.D. 1270.

**232. Vritti** on the **Uvaisutra** by ABHAYADEVA [उवाईसूत्रस्य वृत्तिः । अभयदेवः].

Folios 1 to 105: agreeing in all respects with 231, and of same date. Folio 105. R. सु / ० / र्ह L. १०५.

**233. Rayappasenai** [रायप्पसेणइ].

Folios 1 to 66: agreeing in all respects with 231, and of same date. Folio 66. R. सु / कृ L. ६६. The "granthâgra" is given as 2078.

**234. Commentary** on the foregoing by MALAYAGIRI [तस्या एव टीका । मलयगिरिः].

Folios 1 to 193: agreeing in all respects with 231, and of same date.

Ends:

ताडनानि कशाघाताः ॥

इति श्रीमलयगिरिविरचिता राजप्रश्नीयोपांगस्य वृत्तिका समर्थिता ॥ यादृशं० ॥ संवत् १३२६ माघ - - -

**235. Jnatadharmakatha** [ज्ञाताधर्मकथा].

Folios 1 to 154: agreeing in all respects with 231. Dated Samvat 1307 = A. D. 1251. Folio 153. R. $\frac{\text{सु}}{\text{६ ३}}$ L. १५३. The "granthâgra" is given as 5065.

**236. Commentary** on the foregoing by ABHAVADEVASÛRI [तस्या एव टीका। अभयदेवसूरिः].

Folios 1 to 120: agreeing in all respects with 235, and of same date. Folio 120. R. $\frac{\text{सु}}{\text{६ ०}}$ L. १२०.

Ends:

अनुष्टुभां सहस्राणि त्रीणि सप्तशतानि च ॥ ७ ॥

संवत् १३०७ वर्षे ॥

अस्तीह श्रेष्ठपर्वप्रचयपरिचितः क्ष्माभृदाप्तप्रतिष्ठः
सच्छायश्चारुवर्णः सकलसरलतालंकृतः शास्त्रवृत्तः ।
पल्लीवालाख्यवंशो जगति सुविदितस्तत्र मुक्तेव साधुः
साधुव्रातप्रणंता वरहुडिरिति सत्ख्यातिमाञ्जेमडोऽभूत् ॥ १

तस्योच्चैस्तनया विशुद्धविनयास्तत्रादिमो राहडो
जज्ञेऽतः सहदेव इत्यभिधिया लब्धप्रसिद्धिर्जने ।
उत्पन्नो जयदेव इत्यवहितस्वांतः सुधर्मे तत-
स्तत्राद्यस्य सदा प्रिया प्रियतमा लक्ष्मी तथा नाइकिः ॥ २

आद्याया जिनचंद्र इत्यनुदिनं सद्धर्मकर्मोद्यतः
पुत्रश्चाहिणिसंज्ञिता सहचरी तस्य त्वमी सूनवः ।
ज्येष्ठोऽभूत्किल देवचंद्र इति यो द्रव्यं व्ययित्वा निजं
सत्तीर्थेषु शिवाय संघपतिरित्याख्यां सुधीर्लब्धवान् ॥ ३

नामंधराख्योऽथ महाधराख्यो-
ऽतो [1]वीरधवलाभिधभीमदेवौ ।

[1] वीरधवलाभिध ?

पुत्री तथा धाहिणिनामिकाभू-
त्सर्वेपि जैनांघ्रिसरोजभृंगाः ॥ ४
श्रीदेवभद्रगणिपादसरोरुहाले-
र्भक्त्या नमद्विजयचंद्रमुनीश्वरस्य ।
देवेंद्रसूरिसुगुरोः पदपद्ममूले
तत्रांतिमौ जगृहतुर्यतितां शिवोक्तौ[1] ॥ ५
नाइकेस्तु सुता जातास्तत्र जेष्ठो धनेश्वरः ।
खेत्तनाम्नी प्रिया तस्य अरसिंहादयः सुताः ॥ ६
द्वैतीयीकः सुसाधुश्रुतवचनसुधास्वादनातृप्तचित्तः
श्रीमज्जैनेंद्रबिंबप्रवरजिनगृहे प्रोल्लसत्पुस्तकादौ ।
सप्तक्षेत्र्यां प्रभूतव्ययितनिजधनो लाहडो नामतोभूत्
लक्ष्मश्रीरित्यभिख्या सुचरितसहिता तस्य भार्या सदार्या ॥ ७
अभयकुमाराभिख्यस्तृतीयोऽजनि नंदनः ।
यो दधे मानसं धर्मश्रद्धासंबंधबंधुरं ॥ ८
धर्मे सहाया सहदेवसाधोः
सौभाग्यदेवीति बभूव जाया ।
पुत्रौ च षेढाभिधगोसलाख्यौ
प्रभावकौ श्रीजिनशासनस्य ॥ ९

किं च ।

यौ कृत्वा गुणसंघकेलिभवनं श्रीसंघमुच्चैस्तरां
श्रीशत्रुंजयरैवतप्रभृतिषु प्रख्याततीर्थेषु च ।
न्यायोपार्जितमर्थसार्थनिवहं स्वीयं व्ययित्वा भृशं
लेभाते सुचिराय संघपतिरित्याख्यां स्फुटां भूतले ॥ १०

[1] शिवोक्तौ ?

आद्यस्य जज्ञे किलषी च देवी
नाम्ना कलत्रं सुविवेकपात्रं ।
तथा सुता जेहडहेमचंद्र-
कुमारपालाभिधपासदेवाः ॥ ११
अभवद्गोसलसाधोर्गुणदेवीति वल्लभा ।
नंदनो हरिचंद्राख्यो देमतीति च पुत्रिका ॥ १२
जयदेवस्य तु गृहिणी जाल्हणदेवीति संज्ञिता जज्ञे ।
पुत्रस्तु वीरदेवो देवकुमारश्च हाभूश्च ॥ १३
शुभशीलशीलनपरा अभवंस्तेषामिमाः सधर्मिण्यः ।
विजयसिरी देवसिरी हरसिणिसंज्ञा यथासंख्यं ॥ १४
एवं कुटुंबसमुदय उज्ज्वलवृषविहितवासनाप्रचयः ।
सुगुरोर्गुणगणसुगुरोः शुश्राव सुदेशनामेवं ॥ १५
दानशीलतपोभावभेदाद्धर्मश्चतुर्विधः ।
अग्रणी यः सदा भव्यैर्भाव्यो मोक्षपदप्रदः ॥ १६
विषयजसुखमिच्छोर्गेहिनः क्वास्ति शीलं
करणवशगतस्य स्यात्तपो वापि कीदृक् ।
अनवरतमदशरंभिणो[1] भावनाः किं
तदिह नियतमेकं दानमेवास्य धर्मः ॥ १७
ज्ञानाभयोपग्रहदानभेदा-
त्तच्च त्रिधा सर्वविदो वदंति ।
तत्रापि निर्वाणपथैकदीपं
संज्ञानदानं ------

[1] अनवरतमहाशारंभिणो ?

**237. Commentary** on the **Uttaradhyayana**, by ŚÂNTYÂCHÂRYA [उत्तराध्ययनस्य टीका । शान्त्याचार्यः].

Folios 1 to 395: 28½ inches long, 2¼ inches broad. 12 to 14 lines in a folio. 133 to 140 aksharas in a line.

Begins:

ॐ ॥ नमो वीतरागाय ॥

शिवदाः संतु तीर्थेशा विघ्नसंघातघातिनः ।
भवकूपोद्धृतौ येषां वाग्वरत्रायते नृणां ॥ १

**238. Commentary** on the **Vyavaharasutra** by MALAYAGIRI [व्यवहारसूत्रस्य टीका । मलयगिरिः].

Folios 1 to 314: 31½ inches long, 2 inches broad. Numbered as 183. Folio 314. R. सू ल्ल एक्क L. ३१४. Contains the ṭîka on the first khaṇḍa of the work. The "granthâgra" is given as 10,878.

Begins:

नमः सर्वविदे ॥

प्रणमंत नेमिजिनेश्वरमखिलप्रत्यूहतिमिररविबिंबं ।
दर्शनपथमवतीर्णं शशिवद्दृष्टेः प्रसत्तिकरं ॥ १

Ends:

तत्रापि निर्वाणपथैकदीपं
सज्ज्ञानदानं प्रवरं वदंति ॥ १८
कालानुभावान्मतिमांद्यतश्च
तद्यावुना पुस्तकमंतरेण ।
न स्यादतः पुस्तकलेखनं हि
श्राद्धस्य युक्तं नितरां विधातुं ॥ १९
इत्याकर्ण्य सकर्णस्ततश्च निजभुजसमर्जितधनेन ।
व्यवहाराद्यसुखंडस्य पुस्तकं लेखयामास ॥ २०
यावद्व्योमसरोवरे॰ ॥ २१ ॥ मंगलमस्तु ॥ ग्रं॰ १०८७८

**239. Parsvanathacharitra** by DEVABHADRAGAṆI [पार्श्वनाथचरित्रम् । देवभद्रगणिः].

Folios 1 to 313 : 31⅓ inches long, 2¼ inches broad. 10 to 12 lines in a folio. 135 to 141 aksharas in a line. Numbered as 183. Folio 313. R. स्ता ३ र्त्ता L. ३१३.

Begins:

॥ ॐ नमो वीतरागाय ॥

वम्ममहामहिमुद्धरिउ मिच्छुणो जस्स विहियसत्तसिरो ।
दोउं साहेज्जं पिवउ वद्धिउ सहइ भुयगवइ ॥ १

Ends:

तित्थंमि वहंत तस्स भयवउं तियसवंदणिज्जंमि ।
चंदकुलंमि प्रसिद्धो विउलाए वइरसाहाए ॥
सिरिवद्धमाणसूरी अहेसितव[र]णाणचरणरयणनिही ।
जस्सवि सुमरंतो लोगो रोमंचमुव्वहइ ॥
तस्सासि दोन्नि सीसा जयविक्काया दिवायरसमिव्व ।
आयरियजिणेसरबुद्धिसागरायरियनामाणो ॥
तेसिं च पुणो जाया सीसा दो महियलंमि सुपसिद्धा ।
जिणचंदसूरिनामो बीउं ऽभयदेवसूरित्ति ॥
सिद्धंतविचित्तिविरयणपगरणउवयरियभव्वलोयाण ।
को ताण गुणलवंपि हु होज्ज समत्थो पवित्थरिउं ॥
तेसिं विणेयस्स पसन्नचंदसूरिस्स सव्वगुणनिहिणो ।
पयपउमसेवगेहिं सुमइउवज्झायसिस्सेहिं ॥
संवेगरंगमालाराहणसत्थं जगंमि वित्थरियं ।
रइयं च वीरचरियं जेहिं कहारयणकोसा य ॥
सोवन्निंडियमंडियमुणिसुव्वयवीरभवणरमणीए ।
भरुयत्थे तेहिं ठिए मंदिरे आमदत्तस्स ॥

सिरिदेवभद्दसूरीहिं विरइयं पासनाहचरियमिमं ।
लिहियं पढमिल्लुय पोत्थयंमि गणिअमलचंदेण ॥
इह इं जे उ वयरिया मुणिगिहिणो ते सवि नंदंतु ।
कारावियं च एयं जेहिं ते पुण निसामेह ॥
जयपयडवियडवायडकुलमंदिरजयपडायपडितुल्लो ।
कप्पडवाणिज्जपुरे सेठी गोवद्धणो आसि ॥
वावन्नसिहरमणहरसुवन्नवरकलससोहमाणसिरं ।
जिणवासपहुभवणं जेणं कारावियं तुंगं ॥
तस्स सुउ सोट्ठाकुच्छिसंभवो सेट्ठि जज्जणागोत्ति ।
छत्तावल्लिनिवासी अहेसि सावयगुणाणुगउ ॥
तस्स सुआ सुंदरिकुच्छिसंभवा सिद्धसेट्ठिवीरो य ।
अन्नो य भाइणेज्जो सुउ जसणागसेट्ठित्ति ॥
जिणभवणबिंबपोत्थयसंवत्थसुतित्थजत्तकरणेण ।
नियजम्मजीवियाणं फलमुवलद्धं जए जेहिं ॥
अह हेममयं व विभूसणेहिं णेगेहिं सेट्ठीवीरेण ।
सिरिपासनाहबिंबं सुहु पइट्ठावियं लद्धं ॥
पित्तियसुयगग्गयसेट्ठिआमसहिएण परमरिद्धीए ।
काऊण तित्थजत्तं निव्विग्घं संघजुत्तेणं ॥
वीरसुएण य जसदेवसेट्ठिणा नन्नइकुरेणं च ।
कारावियं सुहबोहं परमेसरपासचरियमिमं ॥
काले वसुरसरुद्दे विक्कमाउ सिद्धमिमं ।
अणुचियमिह सूरीहिं खमियव्वं सोहियव्वं च ॥
इय विमलकेवलालोयलोइयालोयलोयभावस्स ।
बहुसत्थसमुद्धरिए पासजिणिंदस्स व वरचरिए ॥

नेव्वाणलाभनामो विहुणियसव्वंगिवग्गसंतावो ।
पंचमउ पंचमउ समत्थिउ एस पत्थावो ॥

निप्पत्तिमुवगयमिमं मुणिसुव्वयसामिणो पसाएण ।
अंबासुदरिसणावंभसंतिसुयदेवयाणं च ॥

एयं तिलोयपहुपासजिणेसरस्स
जे सुंदरं चरियमेक्कमणा कहिंति ।
जे वा पढंति निसुणंति धरंति चित्ते
[1]भत्तिभरेक्कहियया सइ संथुणंति ॥

ते रोगसोगधणनासपवासवेरि-
भूयाइसंभवमहादुहविप्पमुक्का ।
भोत्तूण वंछियसुहाइ जणाण हुज्जा
सज्जो लहंति सुरलोयसिरिं सिवं च ॥

मंगलमस्तु ॥ इति श्रीप्रसन्नचंद्रसूरिपादसेवकश्रीदेवभद्राचार्यविरचितं पार्श्वचरितं समाप्तम् ॥ छ छ

240. **Tilayasundarirayanachudakaha** by DEVENDRAGAṆI [तिलयसुंदरिरयणचूडकहा । देवेंद्रगणिः].

Folios 1 to 109: 27 inches long, 2¼ inches broad. 8 to 10 lines in a folio. 136 to 140 aksharas in a line. Numbered as 183. Folio 109. R. सु ० उ L. १०९.

Begins:

९० ॥ नमो जिनाय ॥

नमह नयनभिरनरवइसरिसरुहवियासणं भुवणपणयं ।
निहयतमतिमिरनियरं वीरजिणदिणेसरं सिरसा ॥ १

[1] भत्ती° ?

जयइ मुहकंतिनिज्जियसारयरयणीयरा सुयदेवी ॥
दुत्तरसुयरयणायरतरणतरंडोवमपसाया ॥ २
इय नमिउं वीरजिणं थोऊण सरस्सइं च भावेण ।
भवियजणबोहत्थं उवएसं किंचि वोछामि ॥ ३

Ends :

देहे संपत्तमहंतचक्कवट्टिभोगो महाकुलुप्पन्नाइंहिं पुव्वभवभारियाहिं संगउं । घेत्तूण सामंनं अहिज्जिऊण सुत्तं काऊण समणगुणपरिवालणं । उप्पाडिऊण सयललोयालोयप्पयासयं केवलनाणं जंमजरामरणरोयसोयपरंमुहं[1] विगयनिस्सेसदुहं निरुपमसासयसोखं पाविही मोखंति । ता भो महाराय समासएउ एयं साहियं रयणचूडचरियं जं तए मुइंति[2] भणिऊण उवसंहरिया धम्मकहा भगवया गोयमसामिणा । सेणिउवि राया परितुट्ठचित्तो मुहो जिणपूयणाईणं थेवाणवि महंतो सुहाण बंधोत्ति सक्कोउगो विंदिऊण गोयमसामीसपरियणो गउं सनयरंति ।

सोऊण चरियमेयं तु रयणचूडाइयाण सत्ताणं ।
जिणपूयाइसु जुत्तो कायव्वो भव्वसत्तेहिं ॥
मिच्छत्तमोहमहणं भवसायरतरणपवहणं परमं ।
[3]कुसुमयविणेसणं सिरिजिणिंदवरसासणं जयउं ॥
सयलजयजंतुपत्थियसुहफलया कप्पपायवलयत्त[4] ।
सग्गोवसग्गसंगमनिबंधणं जयइ जिणपूया ॥
सयलसुहसिद्धिकरणो दुहहरणो पयडपावविसहरणो ।
जिणसासणस्स सारो जयइ सया पंचनवकारो ॥

---

[1] °परंमुहं ? [2] पुइंति ? [3] कुसमय° ? [4] °ह्यव्व ?

धणउ धणकामीणं कामत्थीणं च सव्वकामकरो ।
दाणाइउवि धम्मो जिणिंदभणिउ जए जयइ ॥
भइं सरस्सईदेवीए समणुभावउ जीमे[1] ।
मंदमइविउसाणं तहा सुविउसायए पुरिसो ॥
सिरिदेवसूरी दुव्वहसीलंगगुणगणाधरणो ।
उज्जयविहारनिरउ तग्गच्छे तयणु संजाउ ॥
सिरि नेमिचंदसूरी कोमुइचंदोव्व जणमणानंदो ।
तयणु महिवलयपसरियनिम्मलकित्ती विमलचित्तो ॥
समणगुणदुव्वहधुराधारणधोरेयभावमणुपत्तो ।
सिरिउज्जोयणसूरी सोमतणू सोमदिट्ठी य ॥
धम्मोव्व मुत्तिमंतो पयपंकयरेणुनासियतमोहो ।
जसदेवसूरिनामो रविव्व नवतेयसा जुत्तो ॥
दूरविणिज्जियमयणो रूवेण मणेण सयलगुणनिलउ ।
आणंदियसयलजणो पवरो पज्जुन्नसूरिवरो ॥
निविडमइमुणियदुग्गमकव्व जीवोव्व नायसत्थत्थो ।
मुणुसूरियमयमयणो सरिवरो माणदेवोत्ति ॥
उद्दामकित्तिसद्दो मणहरदेहो महामई कुसलो ।
दंसणमेत्ताणंदियजिणवयणपउट्ठलोगोवि ॥
पयडियवरसत्थत्थो वयणट्ठियसरसइ व्व पटुवयणो ।
सिरिदेवसूरिनामो समत्थलोगम्मि विक्काउ ॥
तह चेव तम्मि गच्छे उज्जोयणसूरिणो पवरसीसो ।
जाउ गुणरयणनिही उवज्झाउ अंबदेवोत्ति ॥

[1] जीये ?

कोमुइमयंकमंडलसोमसरीरस्स संतचित्तस्स ।
वरमइणो धम्मसहोदरेण मुणिचंदसूरिस्स ॥
गणिणा देविंदेणं [1]सासावयवेण तस्स तणुमइणा ।
एसा कहिया २ अक्करबंधेण संखित्ता[2] ॥
आणंदियविउसासु अन्नासु कहासु विज्जमाणासु ।
एसा हासढाणं जाणंतेणेवि विउमाणं[3] ॥
कलहंसगमविलासेणं संवरं[4] नोहु घइवलिपुड्डो ।
हासट्ठाणं जायइ जणंमि निस्संसयं जेण ॥
किं तु इह सुयणुरयणा हासो च्चियमवि हसंति न कयावि ।
अवि य कुणंति महग्घं गुणाणसारोवणेणेत्थ[5] ॥
इइ भवति - - - - - - - - - - - - ।
एसा कहिया रइया तेण प्पणो णुसरणत्थं । ६१
तोणुग्गहं कुणंतो सुणंतु गिण्हंतु निग्गुणंपि इमं ।
सोहंतु दोसजालं दक्खिन्नमहोयही सुवणा ।
पज्जुन्नसूरिणो धम्मनच्चुएणं व सुवणुसारेण ।
गणिणा जसदेवेणं उद्धरिया पढमपई ॥ - - - - -

विण्णनफलं समाप्तं रत्नचूडकहा ॥ ६१

संवत् १२२१ ज्येष्ठसुदि ९ शुक्रदिने अद्येह श्रीमदणहिलपाटके महाराजाधिराजजिनशासनप्रभावकपरमश्रावकश्रीकुमरपालदेवराज्ये श्रीवड्डापल्यां च श्रीकुमरपालदेवप्रसादास्पदश्रीधारावर्षनरेंद्रराज्ये श्रीचक्रेश्वरसूरिश्रीपरमानंदसूरिप्रभूपदेशेन वड्डापल्लिपुरीवास्तव्य श्रे० पूमाश्रावकेण आशाचंद्रआशाधरपोइणिछाहिणिराजूप्र-

[1] सीसा°? [2] संखित्ता? [3] विउसाणं? [4] संचरं? [5] गुणाणमारोवणेणेत्थ?

मुखमानुषमानुषसमेतेन[1] इदं ज्ञाताधर्मकथांगरत्नचूडकथापुस्तकं लेखितमिति ॥ शिवमस्तु०

श्रीचक्रेश्वरसूरिश्रीपरमानंदसूरिश्रीयशःप्रभसूरीणां - - - -

**241. Prasnavyakaranadisutratikah** [प्रश्नव्याकरणादिसूत्रटीकाः].

Injured. The folios are 32½ inches long, 2¼ inches broad.

**242. Sukritangasutra** with its **Niryukti** and a **Commentary** by ŚILÂCHÂRYA. [सुकृतांगसूत्रं निर्युक्तिटीका च । टी० शीलाचार्यः].

Folios 1 to 463 : 32½ inches long, 2¼ inches broad. 8 to 10 lines in a folio. 122 to 132 aksharas in a line. Numbered as 183. Folio 463. R. स्तो र्ह्रु ३ L. ४६३. The "granthâgra" is given as 13,000.

Ends :

समाप्ता चेयं सुकृतांगसूत्रस्य टीका कृता चेयं शीलाचार्येण वाहरिगणिसहायेन ॥

**243. Karmagrantha** by DEVEDRASURI with the **Commentary** of ŚRÎ MALAYAGIRI [कर्मग्रंथः सटीकः । देवेंद्रसूरिः].

Folios 1 to 271 : 32½ inches long, 2 inches broad. 6 to 10 lines in a folio. 112 to 163 aksharas in a line. Numbered as 183. Folio 119. R. स्तु र्ल्ह उ L. ११९. Folio 271. R. स्तु र्ह्रु उ L. २७१. The "granthâgra" is given as 3880. Dated Saṃvat 1447 = A. D. 1391.

Begins :

आग्रयणीयपूर्वाद्युद्धृत्य परोपकारसारधिया ।
येनाभ्यधायि शतकः स जयतु शिवशर्मसूरिवरः ॥ २

अनुयोगधरान्सर्वान्धर्माचार्यान्मुनींस्तथा नत्वा ।
स्वोपज्ञशतकसूत्रं विवृणोमि यथाश्रुतं किंचित् ॥ ३

---

[1] °मानुषमानुषीसमेतेन ?

Ends:

इति श्रीमलयगिरिविरचिता सप्ततिटीका समाप्ता संवत् १४४७ वर्षे भट्टारकरदेवसुंदरसूर्युपदेशेन कर्मग्रंथवृत्तिपुस्तकं लेखयामास ॥

244. **Upadesamala,** with **Commentary** [उपदेशमाला सटीका].

Folios 1 to 53: $35\frac{1}{3}$ inches long, $2\frac{1}{4}$ inches broad. 8 to 10 lines in a folio. 140 to 151 aksharas in a line. Incomplete.

Text begins:

सिद्धमकम्मविग्गह

Commentary begins:

येन प्रबोधपरिनिर्मितवाग्गरत्राः...

245. **Upadesamala** with **Commentary,** by HEMACHANDRA [उपदेशमाला सटीका। हेमचन्द्रः].

Injured. About 150 folios: agreeing in all respects with No. 244.

246. **Uttaradhyayana Sutra** with the **Commentary** called **Subodha** of NEMICHANDRA [उत्तराध्ययनसूत्रं सटीकम्। नेमिचन्द्रः].

Folios 1 to 341: $34\frac{1}{2}$ inches long, $2\frac{1}{2}$ inches broad. 10 to 12 lines in a folio. 120 to 130 aksharas in a line.

Begins:

प्रणम्य विघ्नसंघातघातिनस्तीर्थनायकान् ।

Ends:

तस्य च मिथ्या दुःकृतमस्तु कृतमसंस्कृतं यदिह ॥

मंगलं महाश्रीः ॥

प्राग्वाटवंशोजनि मोहणाख्यः
श्रेष्ठी प्रिया तस्य सुहागदेवी ।
तयोः सुतो नागडनामकोभू-
त्तस्यापि भार्या सलषू प्रसिद्धा ॥ १
तयोस्तु नारायणनामधेयः
पुत्रोभवत्स्फूर्जितभागधेयः ।

चित्रं गुरुत्यागकृतादरोपि
यः सर्वदा धार्मिकलोकधुर्यः ॥ २
तस्याभूत्कडुयाभिख्योनुजो धरणिगस्तथा ।
तयोः प्रियतमा लाषू जासलेति. यथाक्रमं ॥ ३
नारायणस्य संजज्ञे हंसलेति सधर्मिणी ।
रत्नपालोभिधानेन पुत्रोभूत् हृदयप्रियः ॥ ४
जैनधर्मधुराधुर्यः श्रेष्ठी नारायणोन्यदा ।
श्रीमद्देवेंद्रसूरीणामिति वाक्यामृतं पपौ ॥ ५ ।
तथाहि ।
विषयसुखपिपासोर्गेहिनः क्वास्ति शीलं
करणवशगतस्य स्यात्तपो वापि कीदृक् ।
अनवरतमदभ्रारंभिणो भावनाः किं
तर्हि नियतमेकं दानमेवास्य धर्मः ॥ ६
तच्च द्विधा सर्वविदो वदंति
ज्ञानाभयोपग्रहदानभेदात् ।
तत्रापि विश्वैकविकासनेन
सद्ज्ञानदानं प्रवरं वदंति ॥ ७
कालादिदोषान्मतिमांद्यतश्च
तच्चाधुना पुस्तकमंतरेण ।
न शक्यते कर्तुमतोत्र युक्तं
भव्यस्यसत्पुस्तकलेखनं हि ॥ ८
एवं निशम्य सम्यक् श्रेष्ठी नारायणो विमलबुद्धिः ।
इदममलमुत्तराध्ययनपुस्तकं लेखयामास ॥ ९
यावद्व्योमसरोवरे &c., ॥ छ छ

**247. Upasakadivipakantasutrapanchaka,** with a **Commentary** [उपासकादिविपाकान्तं सूत्रपञ्चकं सटीकम्].

Folios 1 to 308 (of which folios 1 to 112 contain the text of the five sûtras): 34½ inches long, 2½ inches broad. 8 to 10 lines in a folio. 140 to 150 aksharas in a line. The "granthâgra" of the text is given as 1226. Numbered as 183. Folio 112. R. सू ल्ह २ L. ११२. Folio 308. R. सु ० र्झा L. ३०८. Dated Saṃvat 1301 = A.D. 1245.

Ends:

कृतिरियं संविग्नमुनिजनप्रधानश्रीजिनेश्वराचार्यचरणकमलचंचरीककल्पस्य श्रीमदभयदेवाचार्यस्येति ग्रंथाग्रं ९८० संवत् १३०१ वर्षे फाल्गुणवदि १ शनौ अद्येह वीजापुरे पंचांगी सूत्रवृत्तिपुस्तकं ठ० अरसीहेण लिखितं ॥ उभय ११२८० ॥ संवत् १३०१ वर्षे फाल्गुणवदि १३ शनौ इहैव प्रल्हादनपुरे श्रीनागपुरीयश्रावकेण पोषधशालायां सिद्धांतशास्त्रं पूज्यश्रीदेवेंद्रसूरिश्रीविजयचंद्रसूरिउपाध्यायश्रीदेवभद्रगणेर्व्याख्यानतः संसारासारतां विचिंत्य सर्वज्ञोक्तशास्त्रं प्रमाणमिति मनसा विचिंत्य श्रीनागपूरीयवहुडियासंताने सा० आसदेवसुतसाहु नेमडसुतराहडजयदेव सा० सहदेवतत्पुत्र संघ० सा० षेढा संघ० सा. गोसल० राहडसुत सा० जिणचंद्रधरणसरलाहडदेवचंद्रप्रभृतीनां चतुर्विधसंघपठनार्थं वाचनार्थं आत्मश्रेयोर्थं पंचागीसूत्रवृत्तिपुस्तकं लिखापितमिति ॥ छ छ

**248. Vritti** on the **Jnatadharmakathanga,** by ABHAYADEVA [ज्ञाताधर्मकथांगस्य वृत्तिः । अभयदेवः.]

Folios 108 to 208: agreeing in all respects with No. 247. The "granthâgra" is given as 3800.

**249. Yogasastra** with **Commentary** by HEMACHANDRA [योगशास्त्रं सटीकम्-हेमचन्द्रः].

Folios 1 to 393 : 31½ inches long, 2¼ inches broad. 8 to 10 lines in a folio. 110 to 120 aksharas in a line. Ordinary numerical characters on both sides.

Begins :

॥ अर्हं ॥

प्रणम्य सिद्धाद्भुतयोगगम्यं...

Ends :

तेन जिनबोधिलाभप्रणयी भव्यो जनो भवेत् ॥

इति परमार्हतश्रीकुमारपालभूपालभुभूषित आचार्यहेमचंद्रविरचिते अध्यात्मोपनिषन्नाम्नि संजातपट्टबंधे श्रीयोगशास्त्रे स्वोपज्ञं द्वादशप्रकाशविवरणं ॥ ग्रंथश्लोक १२००० संपूर्ण योगशास्त्रविवरणमिति ॥ मंगलं महाश्रीः ॥ छ

भृंगीणामिव पक्षपातललितैर्लीलागृहं सुश्रियां
सुच्छायो वितनोतिविस्मयकरः श्रीमालवंशोस्त्यसौ ।
उद्यत्पर्वमनोहरक्षितिधरप्राग्प्रतिष्ठोदये
यत्र च्छत्रपरंपरा ननु परा दृश्यन्त एवानिशं ॥ १
आसीद्वंशे वरगुणगणे तत्र मुक्तानुकारी
कांत्युल्लासैर्निरुपमतमः साधुवृत्तानुसारी ।
शुद्धध्यानोपचितसुतो देवपूजादिनिष्ठः
श्रेष्ठी श्रेष्ठः सुनयविनयैः सातदेवो गरिष्ठः ॥ २
पासिलाख्यः सुतस्तस्मादत्यद्भुतसुवैभवात् ।
सुमनोवर्गमुख्योभूज्जयंत इव वासवात् ॥ ३
अगण्यपुण्यलावण्या तस्य पूनाविनामिका ।
शीतेव रामचंद्रस्य जाता पत्नी पतिव्रता ॥ ४

तौ सर्वदेवसाभाख्यौ तत्कुलव्योममंडनं ।
जज्ञाते ज्ञातमाहात्म्यौ चंद्रार्काविव विश्रुतौ ॥ ५
एतयोः सेहिणिर्भेजे भग्नकंदर्पशासना ।
जिनशासनधरा जज्ञे सद्ज्ञानांभोजदीर्घिका ॥ ६
श्रेष्ठिनः सर्वदेवस्य पार्श्वनागः सुतोऽजनि ।
लक्ष्मीकुक्षिभवा शांता तस्य स्वामिणिरात्मजा ॥ ७
जाते सधर्मचारिण्यौ धर्मकर्मातिकर्मठे ।
साभाकस्य सदा भक्ते वीरीवयजसंज्ञिते ॥ ८
वीरीकायाः सुते जाते जातिश्लाघ्योपमान्विते ।
शीताजस्यौ[1] जिनाधीशधर्माराधनतत्परे ॥ ९
सत्पुत्रस्तत्र शीताया आसदेवाभिधोऽभवत् ।
ततो भूतौ सुतावाभूशोभनदेवनामकौ ॥ १०
अभूतां नंदनौ जास्यास्तुबूटडियशोधरौ ।
जिंदायर्शकुमाराख्यौ बभूवतुस्तयोः सुतौ ॥ ११
वयजाख्यातु तत्पत्नी पंचास्तत्सुतोत्तमात्[2] ।
कुंतीव पांडवान् पांडुयशःशुभ्रितभूतलान् ॥ १२
तेषामाम्रप्रसादाख्य आद्यो देवधरस्ततः ।
रामदेवस्ततश्चांडूयशोधवलसंज्ञितौ ॥ १३
पंचाप्यद्भुतधर्मकर्मनिरताः पंचापि पुण्यांचिताः
पंचाप्युग्रभवप्रपंचविमुखाः पंचापि सत्यप्रियाः ।
एते पंचमहाव्रतैकरुचयः पंचापि शुद्धांशयाः
प्रापुः पंचजनौघमौलितिलका पंचापि कीर्त्तिं परां ॥ १४

---

[1] शीताजास्यो? [2] पंचासूत सुतोत्तमान्?

अभूदान्नप्रसादस्य सज्जनी वरगेहिनी ।
ज्ञानविज्ञानयोः पात्रं तनूजः सोहडस्तयोः ॥ १५
जाया देवधरस्यासीच्छ्रेष्ठिनः श्रेष्ठतानिधेः ।
सांतूकायाः सुता माहूः शमकैरवकौमुदीं ॥ १६
आभडो नरसिंहश्च जज्ञिरे सूनवस्तयोः ।
जगद्देवाख्यलाखाकचाहडाः श्रुतशालिनः ॥ १७
आद्या प्रियमतिनामा संजाता तदनु कुमरदेवीति ।
लच्छी त्वविहवदेवी वधूटिका तस्य विनययुता ॥ १८
भार्याभूद्रामदेवस्य पदमी नंदनास्त्वमी ।
शंबो वयरसिंहश्च पुण्यश्च जयतूः सुता ॥ १९

अन्यच्च ।

येन जिग्ये जगद्देवगुरुभक्त्याऽखिलं भृशं ।
जगद्देवस्य तस्यासीद्दैवांग्लानिकारणं[1] ॥ २०

इतश्चतुर्भिःसंबंधः ।

ज्ञात्वा येन लघीयसापि सहसा स्वस्यांतकालं क्षणा-
दानाय्य व्रतिनः स्वयं तदखिलं कृत्वांत्यकृत्यं स्फुटं ।
त्यक्त्वा स्नेहमशेषमात्मवदनेनोच्चार्य धर्मक्षयं
जिग्ये मोहमहामहीपतिरतिप्राज्यप्रभावोप्यसौ ॥ २१
आबाल्यादपि येन पूर्वविधिना भक्त्यार्चितः श्रीजिन-
स्तात्पर्यादतिसेवितः[2] सुगुरवोभ्यस्तं च शास्त्रं परं ।
आत्मीयैर्विनयादिभिर्वरगुणैराचंद्रकालं कलौ
चंद्रांशूज्ज्वलकांतकीर्त्तिरतुला स्वल्पैर्दिनैरर्जिता ॥ २२

---

[1] दैवाच्च ग्लानिकारणं ? [2] °सेविताः ?

श्रीयोगशास्त्रवृत्तेर्देवधरेणात्मपुत्रसहितेन ।
निस्संगचित्तमुनिवत्सावद्यारंभरहितेन ॥ २३

साधुजनजनिततोषं निर्दोषं पुस्तकप्रवरमेतत् ।
तस्यात्मश्रुतस्य जगद्देवस्य श्रेयसेऽलेखि ॥ २४

यद्दोषैरकलंकितं गुणगणैर्युक्तं मनोहारिभि-
र्नित्याभ्यासवसेन निर्वृतिकरं दिव्योक्तसाधुक्रियं ।
श्रीभूपालकुमारपालसहितं श्रीहेमचंद्रप्रभोः
कर्मव्याधिविबाधकं विजयतां तद्योगशास्त्रं सदा ॥ २५

सूर्याचंद्रमसोर्यावद्द्योतयंति भुवं रुचः ।
अभ्रांतं पुस्तकं तावत्कोविदैर्वाच्यतामिदं ॥ २६

स्वस्ति श्रीविक्रमनृपतेः संवत् १२९१ वर्षे कार्तिकसुदि १२ शुक्रे रेवतीनक्षत्रे सिद्धयोगे महाराजश्रीभीमदेवविजयराज्ये अवनिवनिता-प्रशस्तकस्तूरिकातिलकायमानलाटदेशालंकारिणि सकलजनमनोहारिणि विविधधार्मिकविराजमानदर्भवतीस्थाने श्रीमालवंशीयश्रे० सभानंदनेन जगदानंदनेन निर्मलतमसम्यक्त्वधरेण श्रे० देवधरेण सकलधर्मकर्मावहितेन उ० आभडनरसिंहादिसुतसहितेन निजपुत्रजगदेवश्रेयोनिमित्तं श्रीवटपद्रकपुरप्रसिद्धप्रबुद्ध पं० केशवसुत पं० वोसरिहस्तेनाशेषविशेषज्ञानवतश्चमत्कारीदमप्रतिमप्रतापश्रीजिनशासनप्रभावकश्रीकुमारपालभूपालविधायितस्य श्रीहेमचंद्रसूरिरचितस्य श्रीयोगशास्त्रस्य वृत्तिपुस्तकं लिखितमिति ॥ मंगलं महाश्रीः । शुभं भवतु लेखकपाठकवाचकानामिति ॥ छ

**250. Uttaradhyayanasutra** with the **Commentary** of NEMICHANDRASÛRI [उत्तराध्ययनसूत्रं सटीकम्। टी० नेमिचन्द्रसूरिः].

Folios 1 to 477: 34½ inches long, 2 inches broad. 6 to 10 lines in

a folio. 110 to 115 aksharas in a line. Numbered as 183. Folio 476. R. स्तो ६ ६ L. ४७६. Dated Samvat 1296 = A.D. 1240.

**251. Akhyanamanikosa** by AMRADEVASŪRI, with the **Commentary** of NEMICHANDRASŪRI [आख्यानमणिकोशः सटीकः । मू० नेमिचन्द्रसूरिः । टी० आम्रदेवसूरिः ].

Folios 1 to 482 : 34 inches long, $2\frac{1}{4}$ inches broad. 8 to 12 lines in a folio. 105 to 116 aksharas in a line. Numbered as 183. Folio 482. R. स्तो ७ २ L. ४८२.

Commentary begins :

९० ॥ नमः सर्वज्ञाय ॥

स्वर्न्नाथभीतघनभूवरसेव्यमूर्त्ति-
र्लावण्यधाम बहुवीवरलब्धमध्यः ।
आख्यानकाख्यमणिकोशमहार्थरूपो
जीयाद्युगादिजिननायकनीरनाथः ॥ १

Text begins :

नमिऊण जिणं वीरं सुरमहियं केवलपवरवाणिं ।
अक्काणयमणिकोसं भव्वजणविबोहयं वोच्छं ॥ १

Book ends :

इति श्रीमदाम्रदेवसूरिविरचितवृत्तावाख्यानकमणिकोशे विवेकिजनस्वकृतकर्मोदयोपनतदुःखादिसहनो नाम एकचत्वारिंशोधिकारः समाप्त इति ॥ इदानीं शास्त्रकारः शास्त्रवक्तव्यतामुपसंहरन् शास्त्रगतपठनादिफलं च दिदर्शयिषुरिदमाह ॥

अक्काणयमणिकोशं एयं जो पढइ कुणइ जहजोगं ।
देविंदसाधुमहियं अइरा सो लहइ अपवग्गं ।

व्याख्या आख्यानकमणिकोशं . . .

देवेंद्रिरिति[1] साध्ववस्थायां निजनामविशेषणं मध्ये विरचितमिति कृतिरियं सैद्धांतिकशिरोमणिश्रीमन्नेमिचंद्रसूरेरिति आख्यानमणिकोशवृत्तिः समाप्ता ॥

वृत्तिं विधाय यदिमां महतीं मयाप्तं
पुण्यं पवित्रितजगच्चयचित्तवृत्ति ।
तेनाशु भव्यनिवहो लभतां भवाब्धौ
सद्यानपात्रमिव बंधुरबोधिबीजं ॥

ज्ञानादिरत्नवसतिर्जनमान्यलक्ष्मी-
र्जन्माभ्यभूमिरभितो बहुसत्त्वसेव्यः ।
निर्द्धौतकर्ममलनिर्मलधर्मनीरः
क्षोणीभृदाश्रितगरिष्ठगभीरमध्यः ॥ १

अच्युतप्रवणो वासो मर्यादानतिवर्त्तकः ।
अस्ति स्वच्छो वृहद्वच्छः श्रीमान्नाथ इवांभसां ॥ २

इति नीरधितुल्यगुणे दयासुधापास्तजन्मरुद्भरुणो[2] ।
क्वचिदतिशायिनि समये शिस्ता[3] निशमयत यज्ज्ञातं ॥ ३

मुनिविबुधवृतजिनमतमंदरमथिमथ्यमानतन्मध्यात् ।
स्फूर्जन्महाप्रभावः प्रादुरभूद्रम्यरत्नचयः ॥ ४ ॥

तथाहि ।

श्रीदेवसूरिः सुमनःसमृद्धः
समुल्लसत्संत्फलपत्रशाखः ।
कुतोप्ययो आविरभूदमुष्मा-
त्सुरावगीतोपथि परिजातः ॥ ५

---

[1] देवेंद्र इति ? [2] °जन्मरुग्मरणे? [3] शिष्टा ?

अनेकविकृतिक्रियाकुटिलकर्मभूपामया-
पहारकरणक्षमः श्रुतिविचारदक्षः शुचिः ।
प्रवृद्धकरुणामृतस्समुदपादि धन्वंतरिः
श्रियां पदमनागसामजितसूरिरर्यः सतां ॥ ६

रुचिरचरणयोगाद्वर्यरैरावतोभू-
दनुपममदवारिप्रोल्लसत्कीर्त्तिघंटः ।
प्रकटितसकलागो मोहसैन्याप्रवृद्ध्यै
विबुधपतिनिषेव्यः श्रीमदानंदसूरिः ॥ ७

समुच्चत्याधारः स्वरगलसल्लक्षणधरः[1]
[2]श्रुतिश्रेयानंशिरईवदपरचिह्नानि नितरां ।
विनिर्यत्सद्धेतौ [3]सुविषमनद्धावादिसमरे
स्फुरत्तेजोदृप्यत्तरलभवनोइश्च[4] निरगात् ॥ ८

श्रीनेमिचंद्रसूरिर्यः कर्त्ता प्रस्तुतप्रकरणस्य ।
सर्वज्ञागमपरमार्थवेदिनामग्रणीः कृतिनां ॥ ९

अन्यां च सुखावगमां यः कृतवानुत्तराध्ययनवृत्तिं ।
लघुवीरचरितमथ रत्नचूडचरितं चतुरमतिः ॥ १०

[5]स्वपांडित्यमंडलीकुमुदिनीकांताप्रमोदावहः
सर्वज्ञागमदेशनामृतकरैर्निर्वापयन्मेदिनीं ।
भास्वत्सन्मुनितारकेषु नियतं यच्चायकत्वं दध-
त्स श्रीमानुदियाज[6] यो निजकुलव्योमांगणालंकृतिः ॥ ११

---

[1] स्वरगतलसल्लक्षणधरः ? [2] श्रुतिश्रेयोनंशिरइवदपरचिह्नानि ? [3] सुविषमनद्धादिसमरे ?
[4] °भवनोऽभश्च ? [5] सूरिपंडितमंडली° ? [6] श्रीमानुदियाय ?

सूरिः श्रीजिनचंद्रश्चंद्रो निःशेषजनमनोदयितः ।
सौम्यत्वकलाविच्चत्वप्रभृतिगुणानां स्वकुलभवनं ॥ १२
तच्छिष्यः प्रथमपदे [1]श्रीपटवानाम्रदेवसूरिरभूत् ।
अपरोपि तत्कनिष्ठः श्रीमान् श्रीचंद्रसूरिरभूत् ॥ १३

इतश्च ।

यो मेदपाटाध्युषितोपि धीमान्
दयाघनो धार्मिकमध्यवर्त्ती ।
तत्साधुताधर्मकृताभिलाषः
सुश्रावकत्वं परिपाति सम्यक् ॥१४

The page containing the next nine verses is much damaged and in parts wholly illegible. The verses refer to a visit to Abu.

श्रीपदसंगतनाम्ना श्रीमज्जिनचंद्रसूरिशिष्येण ।
रचिताम्रदेवमुनिपेन वृत्तिरेषा स्वबोधेन ॥ २४

व्याख्याप्रज्ञप्तावि[व] लब्धवरायामिहापि सद्वृत्तौ ।
श्रुतिसुखदवर्णरुचिरा विचित्रगमभंगरमणीयाः ॥ २५

सुव्यक्तमेकचत्वारिंशदनूना भवेयुरधिकाराः ।
तत्र [2]सतानीचविचारश्रुता अग्र्यवृत्ताश्च ॥ २६

सत्स्वपि नानारूपेषु पूर्वकविभिर्विशिष्टमतिविभवैः ।
रचितेषु शास्त्रविवरणकथाप्रबंधेषु सरसेषु ॥ २७

कीदृगिदं मत्काव्यं तदपि ग्राह्यं कृतप्रचुरकरणैः [3] ।
मयि वल्लभमाध्यस्थ्ये माध्यस्थ्यगुणान्वितैः सद्भिः ॥ २८

---

[1] श्रीपद°? [2] सतामनीच°? [3] कृतप्रचुरकरुणैः?

छंदोलक्षणविकलं समयोत्तीर्णं च यत्किमपि लिखितं ।
तच्छोध्यं विद्वद्भिः कृतांजलिः प्रार्थये भवतः ॥ २९

अन्यच्च ।

नेमिचंद्रो गुणाकरः[1] पार्श्वदेवनामानः ।
एते त्रयोपि गणयो विपश्चितो मुख्यजिनशिष्याः ॥ ३०

साहाय्यं कृतवंतो मम लेखने शोधनादिकृत्येषु ।
आधानोद्धरणे च प्रमादविकलाः कलाकुशलाः ॥ ३१

नवत्या युक्तेषु प्रथितयशसो विक्रमनृपा-
च्छतेषु क्रांतेषु त्रिनयनसमानेषु शरदां ।
अजय्ये सौराज्ये जयति जयसिंहस्य नृपते-
रियं स्थानीयेगाद्धवलकपुरे सिद्धिपदवीं ॥ ३२

श्रेष्ठियशोनागस्यारब्धा वसतावेव स्थितैः सद्भिः ।
वसतां सम्यगवसिता वसतावच्छुभ्रसत्कायां ॥ ३३

भुवनानीव चतुर्दश धातुर्ममरस्य[2] वर्णपदभाजि ।
अक्षरगणनाद्गाथाजातानुष्टुप्सहस्राणि ॥ ३४

मानसगर्भे स्थितो लक्षणयुगयं सपादनवमासैः ।
आख्यानकमणिकोशः सुतमव[3] समपादि सद्वृत्ति[4] ॥ ३५

यावच्चं ॥ ३७ ॥

इति श्रीमदाम्रदेवसूरिविरचितवृत्तावाख्यानकमणिकोशवृत्तिः समाप्तेति ॥

प्राग्वाटवंशतिलको... १४ ॥ मगलं महाश्रीः ॥

---

[1] गुणाकरः २ ? [2] धातुरमरस्य ? [3] °सुतमिव ? [4] सद्वृत्तिः ?

**252. Tattvarthatika** by SIDDHASENAGANI [तत्त्वार्थटीका। सिद्धसेनगणिः].

Folios 1 to 380: 26½ inches long, 2 inches broad. 12 to 16 lines in a folio. 140 to 150 aksharas in a line. Numbered as 183. Folio 61. R. ई १ L. ६१. Folio 107. R. सु मो L. १०७. Folio 339. R. स्ता ला ई L. ३३९. Folio 343. R. स्ता प्र ३ L. ३४३. Folio 349. R. स्ता प्र ई L. ३४९.

Begins:

॥ ॐ नमः सिद्धेभ्यः ॥

वीरं प्रणम्य सर्वज्ञं तत्त्वार्थस्य विधीयते ।
टीका संक्षेपतः स्पष्टा मंदबुद्धिविबोधिनी ॥ १

सम्यगर्हत्प्रवचनमधिगम्य कालसंहननश्रद्धामुरादेः[1] परिहाणिमवलोक्य सत्त्वानुकंपया समासतो मोक्षमार्गमुपदेष्टुकाम आचार्य इदमाह ॥

सम्यग्दर्शनशुद्धं यो ज्ञानं विरतिमेव चाप्नोति ।

अत्र सम्यग्दर्शनशुद्धमिति कतरो विग्रह आस्थीयते यदि तावत्सम्यग्दर्शनेन शुद्धमिति करोति करणे तृतीया परश्वादीनामिव प्राङ्निवृत्तिर्वक्तव्या उत कर्त्तरि तदा दर्शनज्ञानयोरभेदात्मनो य आप्नोतीत्ययुक्तं...

Folio 61:

इति भाष्यानुसारिण्यां तत्त्वार्थटीकायां प्रथमोध्यायः समाप्तः ॥

Folio 107:

भाष्यानुसारिण्यां तत्त्वार्थटीकायां द्वितीयोध्यायः ॥

---

[1] °श्रद्धासुरादेः ?

Folio 339:

संप्रति वाचकॊ निजाचार्यान्वयं द्विप्रकारमप्यावेदयते । तत्रायं प्रव्राजकान्वयः । शिवश्रीर्नाम वाचकः पितामहः संग्रहकारस्य । तस्य शिष्योप्येष नंदिक्षमणस्तस्यायं संग्रहकारकः शिष्यः । संप्रति वाचनाचार्यान्वयो मुंडपादो नाम महावाचकक्षमणः सोस्य पितामहः संग्रहकारस्य । तस्य शिष्यो मूलनामा वाचकस्तस्यायं संग्रहकारकः शिष्यः । संप्रत्यात्मीयजन्मान्वयस्थानमाचष्टे । न्यग्रोधिका नाम ग्रामस्तत्र जातेन पाटलिपुत्रे कुसुमपुरनाम्नि विरहतां कौभीषणिनेति गोत्राह्वानं स्वातितनयेनेति पितुराख्यानं चाप्सीसुतेनेति गोत्रेण नाम्ना उमेति मातुराख्यानं संप्रदायाविच्छेदेनायातमर्हद्वचनं सम्यगवधार्य शारीरैर्मानसैश्च दुःखैरार्त्तं दुरागमैरैहिकसुखोपदेशप्रायैश्चयैः प्रभूतिभिः प्रमाणविघट्टनायामक्षमैर्विहतमुपहतविज्ञानमवलोक्य लोकमुच्चैर्नागरवाचकेनेति स्वशाखासूचकं तत्त्वार्थाधिगमाख्यं शास्त्रं भव्यसत्त्वानुकंपया विरचितं स्फुटार्थमुमास्वातिनेति । तदेतच्छास्त्रं जीवादितत्त्वाधिगमार्थं यो बभोत्स्यते सूत्रतोर्थतश्चानुष्ठास्यति तत्रोक्तं सोव्याबाधसुखलक्षणमनंतमनुपमं परमार्थं मोक्षमचिरेण प्राप्स्यतीति ॥

आसीद्दिनगणी क्षमाश्रमणतां प्रापत्क्रमेणैव यो
विद्वत्सु प्रतिभागुणेन जयिना प्रख्यातकीर्त्तिर्भृशं ।
वोढा शीलभरस्य सच्छ्रुतनिधिर्मोक्षार्थिनामग्रणी-
र्जज्वालामलमुच्चकैर्निजतपस्तेजोभिरव्याहतं ॥ १

यत्र स्थितं प्रवचनं पुस्तकनिरपेक्षमक्षतं विमलं ।
शिष्यगणसंप्रदेयं जिनेंद्रवक्त्राद्विनिष्क्रांतं ॥ २

तस्याभूत्परवादिनिर्जयपटुः सैंहीं दधच्छूरतां
नाम्ना व्यज्यत सिंहसूर इति च ज्ञाताखिलार्थागमः ।

शिष्यः शिष्टजनप्रियः प्रियहितव्याहारचेष्टाश्रया-
द्भव्यानां शरणं भवौघपतनक्लेशार्दितानां भुवि ॥ ३

निर्द्धूततमःसंहतिरखंडमंडलशशांकसच्छाया ।
अद्यापि यस्य कीर्त्तिर्भ्रमति दिगंतानविश्रांता ॥ ४

शिष्यस्तस्य बभूव राजतशिरोरत्नप्रभाजालक-
व्यासंगच्छुरितस्फुरन्नखमणिप्रोद्भासिपादद्वयः ।
भास्वामीति विजित्य मामजगृहे यस्तेजसां संपदा
भास्वंतं भवनिर्जयोद्यतमतिर्विद्वज्जनाग्रेसरः ॥ ५

क्षमया युक्तोतुलया समस्तशास्त्रार्थविन्महाश्रमणः ।
गच्छाधिपगुणयोगाद्गणाधिपत्यं चकारार्थ्यं ॥ ६

तत्पादरजोऽवयवः स्वल्पागमशेमुषीकबहुजाड्यः ।
तत्त्वार्थशास्त्रटीकामिमां व्यधात्सिद्धसेनगणिः ॥ ७

अष्टादशसहस्राणि द्वे शते च तथापरे ।
अशीतिरधिका ह्याभ्यां टीकायाः - - संग्रहः ॥ ८

ग्रंथाग्रं १८२८२ तत्त्वार्थटीका समाप्ता ॥

Then begins the Mûlasûtra :

ॐ० सिद्धिः ॥ ॐ नमो वीतरागाय ॥

मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृतां ।
ज्ञातारं विश्वतत्त्वानां वंदे तद्गुणलब्धये ॥ १

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥ १

तत्त्वार्थश्रद्धानं सम्यग्दर्शनं ॥ २

तन्निसर्गादधिगमाद्वा ॥ ३

जीवाजीवाश्रवबंधसंवरनिर्जरामोक्षास्तत्त्वं ॥ ४

नामस्थापनाद्रव्यभावतस्तन्न्यासः ॥ ५ ...

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे प्रथमोध्यायः ॥

Mûlasûtra ends folio 343:

इति तत्त्वार्थाधिगमे मोक्षशास्त्रे दशमोध्यः ॥

Then begins the Mûlasûtrabhâshya:

॥ ६० ॥ ॐ नमः सिद्धेभ्यः ॥

सम्यग्दर्शनशुद्धं यो ज्ञानं विरतिमेव चाप्नोति ।

दुःखनिमित्तमपीदं तेन सुलब्धं भवति जन्म ॥ १ ॥...

Folio 349:

तत्त्वार्थाधिगमे भाष्यतः प्रथमोध्यायः समाप्तः ॥

Ends:

तत्त्वार्थाधिगमे जिनप्रवचनसंग्रहे भाष्यतः दशमोध्यायः समाप्तः॥ संवत् १४४९ वर्षे आश्विनशुदि ४ गुरौ अद्येह स्तंभतीर्थे - - - - - - - - - -

**253. Commentary,** called **Subodha** on the **Uttaradhyayana** by NEMICHANDRA [उत्तराध्ययनस्य टीका].

Folios 1 to 413: 33 inches long, 2¼ inches broad. 8 to 12 lines in a folio. 120 to 135 aksharas in a line. Numbered as 183. Folio 413. R. स्तो ल्हे ३ L. ४१३. Dated Samvat 1380 = A.D. 1324.

Begins:

॥ ॐ नमो जिनशासनाय ॥

प्रणम्य विघ्नसंघातघातिनस्तीर्थनायकान् ॥...

Ends:

इत्येवमादिसकलं साढाकस्य कुटुंबकम् ॥ २७ ॥

इतश्च ।

श्रीमान्सत्त्वगृहं गभीरिमनिधिर्निःशेषभूभूषणै-
र्व्याकीर्णः शुचिसाधुरत्ननिकरैः पाठीनपीठान्वितः ।
संसेव्यः सुमनोभिरक्षयगुणज्ञानामृतोत्कंठितै-
र्नैद्याद्दूरमपारसंवरवरः श्रीचंद्रगच्छार्णवः ॥ १ ॥

आद्यः श्रीनन्नसूरिः समजनि जनिताशेषदोषप्रमोषः
सद्वादींद्रैरजय्यो गुरुरमितयशोवादिसूरिस्ततश्च ।
सूरिः श्रीसर्वदेवस्तदनु समभवद्वादिवृंदैकवंद्यः
श्रीमान्प्रद्युम्नसूरिः सकलकलिमलक्षालने वारिपूरः ॥ २

इत्येवमादिप्रमुखेषु सूरि-
वर्येषु गच्छत्सु कथावशेषं ।
भद्रेश्वरः सूरिरजायतास्मि-
न्मुनीश्वरस्तारितभव्यलोकः ॥ ३

तच्छिष्योप्यथ चंद्रगच्छतिलकः श्रीदेवभद्राभिधः
सूरिर्भूरिगुणालयः सुविहितश्रेणीधुरीणोभवत् ।
अक्लेशेन बभार मारविजयी श्रामण्यभारं पृथग्
भागीकृत्य सुदुर्वहं स्ववपुषा सैकादशांगेन यः ॥ ४

श्रीसिद्धसेनसूरिस्तत्पट्टविशेषको जयति यस्य ।
कलिकोपमानसहिता दशनावलिरेव न तपःश्रीः ॥ ५

जिग्ये देवगुरुर्येन विद्यया निरवद्यया ।
आचार्यवर्यः समभूद्यशोदेवगुरुस्ततः ॥ ६

अदृष्टदोषस्तमसां निहंता
भरविंदप्रबोधहेतुः[1] ।

[1] भव्यारविंदप्रतिबोधहेतुः ?

ततो विवस्वानिव मानदेवः
सूरिर्यशःपूरितदिग्वितानः ॥ ७ ॥
ततोभूच्चारुचारित्रचर्यामर्यादयांबुधिः ।
श्रीमद्रत्नप्रभाचार्यो धुर्यो माधुर्यशालिनां ॥ ८
तत्पादांभोजभृंगः प्रवरगुणयुतः सर्वसिद्धांतवेत्ता
ज्ञानादिश्रीनिवासः स्मरकरिदमने सिंहपोतः सतेजाः ।
मायाद्यैर्दोषजालैः प्रवरहितवपुः शर्करामिष्टवाक्य-
न्यासः श्रेयः शिवश्रीं दिशतु भुवि सदा सूरिदेवप्रभोथ ॥९
व्याख्यास्यतस्तस्य गुरोर्मुखाब्जा-
द्येनागमं संसदि साधुवृत्तः ।
कुटुंबयुक्तः कटुको महात्मा
शुश्राव सिद्धांतरहस्यमेतत् ॥ १०
चक्रे मुक्तिवधूः स्वहस्तकलिता त्रैलोक्यलक्ष्मीरपि
स्वायत्ता विदधे च दुर्गतिगतिस्तेनैव रुद्धात्मनः ।
येन स्वं भुजपंजरार्जितमिदं वित्तं गुरोराज्ञया
सिद्धांताद्भुतपुस्तकस्य लिखने साफल्यमारोपितं ॥ ११
इत्याकर्ण्य वचःसुधाकवलितं वक्त्रांबुजात्सद्गुरोः
साधुः साधितमुक्तिमार्गमतिकः सद्भावनाभावितः ।
वर्षे सिद्धिवियत्कृशानुविधुभिः संख्याकृते श्रेयसे
पित्रोः सुंदरमुत्तराध्ययनकं ग्रंथं मुदालीलिखत् ॥ १२
न केवलं पुस्तकमेकमेव
विलेखयामास गुरोर्भणित्या ।
निवेशयामास गुरोः पदे च
रत्नाकरं सूरिवरं गुरुं यः ॥ १३

नक्षत्राक्षतपूरितं . . .

मंगलमस्तु ॥ प्रशस्तिरियं कृता लिखिता च श्रीरत्नाकरसूरिभिः ॥

मंगलमस्तु श्रीश्रमणसंघस्य ॥

**254. Upadesamala** with **Commentary**, by HEMACHANDRA [उपदेशमाला सटीका । हेमचंद्रः].

Folios 1 to 413 : 32½ inches long, 2 inches broad. 6 to 10 lines in a folio. 120 to 130 aksharas in a line.

Commentary begins :

ॐ नमो जिनाय ॥

येन प्रबोधवरनिर्मितवाग्वरत्रा . . .

Text begins :

सिद्धमकम्ममविग्गह . . .

**255. Acharangasutra** with its **Niryukti** [आचारांगसूत्रं तस्य निर्युक्तिश्च].

Folios 1 to 92 : 33½ inches long, 2½ inches broad. 8 to 10 lines in a folio. 120 to 130 aksharas in a line. The "granthâgra" is given as 2644. Numbered as 183. Folio 80. R. पु L. ८०. Folio 92. R. ६३/२ L. ९२.

Niryukti begins :

वंदित्तु सव्वसिद्धे जिणे य अणुउरादायएसव्वे ।

आयारस्स भगवउ निजुत्तिं कित्तइस्सामि ॥ १

आयारस्स भगवउ चउत्थमूला एस निजुत्ती ।

Niryukti ends :

पंचमचूलनिसीहं तस्स य उवरिं भणीहामि ॥३६३॥ गाथा ॥

आयारंगनिज्जुत्ती समत्ता ॥ शुभं भवतु ॥

**256. Commentary** on the **Acharangasutra** by ŚILÂNGASÛRI [आचारांगसूत्रस्य टीका । शीलांगसूरिः].

Folios 1 to 369 : agreeing in all respects with 255. Folio 369. R. स्ता/र्थु/र्नं L. ३६९.

Ends:

१२००० शकनृपकालातीतसंवत्सरशतेषु सप्तसु चतुरशीत्यधिकेषु वैशाखपंचम्यां आचारटीका दृब्धेति ॥

शीलाचार्येण कृतांगनूतायां[1] स्थितेन टीकैषा ।
सम्यगुपयुज्य शोध्या मात्सर्यविनाकृतैरार्यैः ॥२॥ इति भद्रं ॥

संवत् १३२७ वर्षे पौषशुदि १० भौमे आचारांगपुस्तकं ठ०विक्रमसिंहेन लिखितमिदमिति ॥ ॥ मंगलमस्तु ॥

**257. Amamasvamicharitra** by MUNIRATNASÛRI [अममस्वामिचरित्रम् । मुनिरत्नसूरिः].

Folios 1 to 282: $30\frac{1}{4}$ inches long, $2\frac{1}{4}$ inches broad. 10 to 12 lines in a folio. 115 to 128 aksharas in a line. Numbered as 183. Folio 282. R. सू ७ २ L. २८२.

Begins:

॥ ६० ॥ अर्हं ॥

भव्यांबुजन्मनां गोभिर्बोधलक्ष्मीप्रदाः सदा ।
सर्वक्षेत्रेषु युगपज्जिनादित्याः पुनंतु वः ॥ १...
स्तौमि श्रीगौतमादींस्तानेकादशमहाकवीन् ।
यैरपूरि द्वादशांगैः समस्या त्रिपदी गुरोः ॥ १३
शय्यंभवोस्तु वो भूत्यै चक्रे सर्वागमूर्त्तिभृत् ।
येनादुःप्रसभाचार्यकालिकं दशकालिकं ॥ १४
श्रीभद्रबाहुर्वः प्रीत्यै सूरिः शौरिरिवास्तु सः ।
यस्माद्दशानां जन्मासीन्निर्युक्तीनामृचामिव ॥ १५

---

[1] The akshara following कृतांग is नू as in text. A form of रू?

वाक्यैर्विशेषातिशयैर्विश्वसंदेहहारिभिः ।
जिनमुद्रं जिनभद्रं किं क्षमाश्रमणं स्तुवे ॥ १६

उमास्वातेर्वाचकस्य वाचः कस्य न चेतसि ।
ध्वनंत्यद्यापि घंटावत्तारटंकारसुंदराः ॥ १७

उदितोर्हन्मतव्योम्नि सिद्धसेनदिवाकरः ।
चित्रं गोभिः क्षितौ जह्रे कविराजबुधप्रभाः ॥ १८

स्तौमि श्रीहरिभद्रं तं येनार्हद्गीर्महत्तरा ।
चतुर्दशप्रकरणशत्यागोप्यत मातृवत् ॥ १९

व्योम्नश्च भद्रकीर्त्तेश्च प्रेंखत्तारागणस्य कः ।
बहुधामराजमित्रराद्धस्यावैतु वैभवं ॥ २०

अद्याप्युपमितिग्रंथच्छलाद्यज्जयडिंडिमः ।
विश्वे धुनत्यसौ जीयात्सिद्धर्षिः कविकुंजरः ॥ २१

पालित्तसूरिः स श्रीमानपूर्वः श्रुतसागरः ।
यस्मात्तरंगवत्याख्यं कथाश्रोतो विनिर्ययौ ॥ २२

मानतुंगदेवभद्रसूरी स्तुत्यौ मरालवत् ।
ऊषतुर्मानसे यौ श्रीशातवाहनभोजयोः ॥ २३

गुरुर्गुर्जरराजस्य चातुर्विद्यैकसृष्टिकृत् ।
त्रिषष्टिनरसद्वृत्तकविर्वाचां न गोचरः ॥ २४

गोभिर्दर्शनशुद्धिं यः कषायस्वादुभिर्व्यधात् ।
सोपूर्वाभ्युदयः श्रीमान्नंद्याच्चंद्रप्रभः प्रभुः ॥ २५

चैत्रवद्धनपालो न कस्य राजप्रियः प्रियः ।
सकर्णाभरणं यस्माज्जज्ञे तिलकमंजरी ॥ २६

जयंतु सूरयोन्येपि येषां वाग्ब्रह्मवैभवं ।
ग्रंथसृष्टौ महाकाव्यसर्गेषु च नवं नवं ॥ २७
वंद्यास्ते रामवत्संतो यैर्व्यस्तखरदूषणैः ।
क्रियते विबुधैः सेव्यो निष्कलंकाकृतिः कविः ॥ २८
नरोत्तमः स वैकुंठः पुरारातिश्च शंकरः ।
धाता पद्मासनस्तत्स्यात्समानः केन सज्जनः ॥ २९
वृत्तरम्येण पीयूषवर्षिणा सत्कलावता ।
नेंदुनापि समः साधुः कालकूलसजन्मना ॥ ३०
अनेकपस्य भद्रस्य गर्जतश्च स्थिरैः पदैः ।
साधोः कुर्यात्खुवंशस्य किं श्वेव पिशुनो भषन् ॥ ३१
कवेर्यशःशरीरे यः काव्ये दोषं कुदृष्टिजं ।
हंति स्यादहितः क्षुद्रः स मषीबिंदुवत्कथं ॥ ३२
परस्यासाधुशब्दं यो द्विधादाय निजं पुनः ।
साधुशब्दं द्विधादत्ते स दुर्वाच्यः कथं जनः ॥ ३३
विदुषां सत्कविग्राममार्गे प्रस्थितिकारिणां ।
कुर्वन्वामः स्वरैरर्थलाभं शस्यः खरः खलः ॥ ३४
रसोचितपदन्यासे प्रबंधे खलखेलितं ।
व्यर्थं वश्यात्मनीव स्यात्कामिनीकिलिकिंचितं ॥ ३५
सुकुमारपदा स्फारवृत्ता विजयतां परं ।
रीतिः कवीनी[1] वैदर्भी न लसद्विग्रहाश्रया[2] ॥ ३६
शुक्लपक्ष इवारोहत्सुधाकरकलः शुभैः ।
सत्कविः स्यात्तदन्यस्तु कृष्णपक्ष इवाशुभैः ॥ ३७

[1] कवीनां ? [2] "anyapakshe" सत्सद्विग्रहाश्रया.

शुद्धा कर्पूरवत्सद्भिरंतर्भावेन गृह्यते ।
मृगनाभिरिवाशुद्धालीकेन तु कवेः कृतिः ॥ ३८
प्रतिमेव नवा कृष्णिः प्रतिष्ठामेति सूरिभिः ।
विज्ञैस्तेजःपुनर्भावव्यंजितां रंगनायकैः ॥ ३९
शुद्धा प्रबुद्धा सामोदा नंदतात्सुमनस्तुतिः ।
या सभाभूषणं मालावृत्तिश्चित्रं तु संमुखी ॥ ४०
रसं विपच्य रुच्यं ये वाक्ये भूते च तन्वते ।
प्रवर्द्धतां चिरं श्रोतृजना ग्रीष्मदिनाश्च ते ॥ ४१
सभामलंकरोत्येकश्चिद्रूपो लक्षितः[1] परैः ।
अंतरात्मेव मध्यस्थः कलापात्रं तनूमिव ॥ ४२
परिश्रमविदो वाक्यै रज्यंतेनर्थकैरपि ।
[2]विघ्नेत्साः किं न तुष्यंति शकलैर्जीर्णवाससः ॥ ४३
येषां प्रसत्तिर्व्युत्पत्तिरोजःकांतिसमाधयः ।
श्रोतारः कवितारश्च युज्येरन्सुकृतैरिमे ॥ ४४
रसोत्कर्षप्रवर्द्धिष्णुसुपर्वोल्लासिवैभवा ।
नंद्यादपास्तसंभेदाः[3] स्वर्द्धुनीव सभा चिरं ॥ ४५
रत्नकंकणवद्देव्या ब्राह्मया ग्रंथकृतः क्षितौ ।
नंदंतु यत्कृतौ लोकोत्तरं शब्दार्थगौरवं ॥ ४६
तेषां प्रबन्धैर्माणिक्यैरिव बद्धार्थबंधुरैः ।
सुहृदां कर्णपूरेषु निर्मितेषु पुरा भृशं ॥ ४७
अल्पार्थापि स्फुटामोदा जातिस्रगिव निर्मला ।
कंठालंकृतिमातन्वत्येषा मान्यास्तु मत्कृतिः ॥ ४८
युग्मं ॥

---

[1] "anyapakshe" अलक्षितः. [2] विघ्नेछाः? [3] °संभेदा?

सेविताः प्रागवस्थासु फलंति स्वामिनोधिकं ।
पदारूढाः प्रणयिनां द्विजातेर्ब्रह्मदत्तवत् ॥ ४९
ध्यात्वेति भाविनोप्येतदममस्वामिनः प्रभोः ।
चरित्रोत्कीर्त्तनव्याजान्मयोपास्या विधीयते ॥ ५०
भ्रातरौ प्रथमे जन्मन्यभूतां कुलपुत्रकौ ।
द्वितीये राजललितगंगदत्तौ वणिक्सुतौ ॥ ५१
तार्त्तीयीके सुरौ तुर्ये रामकृष्णौ यदूद्वहौ ।
पंचमे वालुकाजन्मा कनीयानभवत्तयोः ॥ ५२
संपूर्णसप्तवाद्धर्यायुस्तदुद्भूत्तो नृपान्वये ।
षष्ठे भविष्यति श्रीमानममो द्वादशो जिनः ॥ ५३
ब्रह्मलोके सुरो भूत्वा रामस्तीर्थेस्य सेत्स्यति ।
संक्षेपोयं चरित्रस्य विस्तरस्त्वेष वर्ण्यते ॥ ५४
चतुर्भिः कलापकं ॥

Ends:

४० ॥ इत्याचार्यश्रीमुनिरत्नविरचिते महाकाव्ये श्रीअममस्वामिचरिते भाविश्रीअममस्वामिसंघादिसंख्यानिर्वाणमहोत्सवतद्भ्रातृबलदेवजीवनिर्वाणतत्समयभाविविष्णुबलदेवस्वरूपवर्णनो विंशः सर्गः ॥ छ

संपूर्णं चेदं श्रीअममस्वामिचरित्रं नव्यं महाकाव्यं ॥ ग्रंथाग्रं १९१

अपूर्वा यस्य पूर्वेयं चतुर्वर्णमनोहरा ।
चकास्ति क्ष्मा शिलापट्टे श्रीवीरः सोस्तु वः श्रिये ॥ १
जयतात्तत्पंचमगणनायकसंताननंदनप्रभवात् ।
कोटिकगणकल्पद्रोः प्रसृता श्रीवज्रमुनिशाखा ॥ २
अतुच्छः पुष्पगच्छश्रीश्चंद्रगच्छस्तदुद्भवः ।
नंद्यात्सौरभ्यसंलुभ्यत्साधुरोलंबचुंबितः ॥ ३

श्रीमांश्चंद्रप्रभः सूरिस्तस्माद्दार्द्धरिवोदगात् ।
चक्रे कलाभिर्यः पूर्णः पूर्णिमां प्रकटां जने ॥ ४
सूरिः श्रीधर्मघोषोभूत्तत्पट्टे देवताकृतिः ।
सिद्धराजस्तुतः कर्त्ता स्वमूर्त्तेः सूरिविंशतेः ॥ ५

निष्ठामतीतविषयामपि वर्तमाने
व्युत्पादयन्विरचयन्गुणवत्सुवृद्धिं ।
सूत्रार्थयुक्तिकलनासु विशुद्धबुद्धि-
र्यः शब्दसिद्धिमकरोदपरप्रकारां ॥ ६

तेन स्वगच्छे प्राधान्यं दत्वाचार्यपदे स्वयं ।
प्रतिष्ठितः श्रीसमुद्रघोषसूरिरजायत ॥ ७

यो मालवोपात्तविशिष्टतर्क-
विद्यानवद्योपशमप्रधानः ।
विद्वज्जनालिश्रितपादपद्मः
केषां न विद्यागुरुतामधत्त ॥ ८

धारायां [1]नरवर्मदेवनृपतिं श्रीगोह्रदक्ष्मापतिं
श्रीमत्सिद्धपतिं च गुर्जरपुरे विद्वज्जने साक्षिणि ।
स्वैर्यो रंजयति स्म सद्गुणगणैर्विद्यामविद्याशयो
लब्धीः प्राक्तनगौतमादिगणभृत्संवादिनीर्द्धारयन् ॥ ९

मुख्यस्तदीयशिष्येषु कवींद्रेषु बुधेषु च ।
सूरिः सूरप्रभः श्रीमानवंतीख्यातसद्गुणः ॥ १०

दुर्वादिकैरवकुले ददतास्यमुद्रा-
मन्वर्थतां गमयता निजमत्र नाम ।

---

[1] नरवर्मदेव° ?

गोभिर्न भव्यकमलाकर एव बोधं
सच्चक्रपर्षदपि हर्षमलंभि येन ॥ ११

अथापरः श्रीमुनिरत्नसूरि-
नामा निकामाद्भुतमूर्त्तिकीर्त्तिः ।
कैः पौनरुक्त्येन न यद्गुणौघः
श्लाघाचलन्मौलिभिरभ्यवर्णि ॥ १२

सिद्धांतसाहित्यपदप्रमाण-
स्कंधत्रयज्योतिषशास्त्ररूपान् ।
सप्तापि वार्द्धीन्भजतो यदीये
स्पर्द्धानुबंधादिव बुद्धिकीर्त्ती ॥ १३

तार्त्तीयीकः श्रीतिलकचंद्रसूरिरजायत ।
सूरिस्तिलकयामास नभो यद्बुद्धिनिर्जितः ॥ १४

पट्टे स्वे जिनसिंहसूरिसुगुरुं सूरप्रभस्य प्रभोः
पट्टे किं च जिनेश्वराभिधगुरुं संस्थाप्य मध्ये तयोः ।
आसीनो मुनिरत्नसूरिगणभृद्राजे जगच्चंदिनो-
र्मेरुः सूर्यशशांकयोरिव लसज्जात्याश्वयोर्वा रथः ॥ १५

इतश्च ।

वाराहीं नगरीं तनूमिव शुचिर्मुक्तोपमो भूषयन्
श्रीश्रीमालकुले यशोधवल इत्यासीत्स कोशाधिपः ।
निश्छिद्रोपि गुणान्वितस्ततलसत्तेजाः सुवृत्ताग्रणी-
र्यश्चौलुक्यपुरश्रियो विहितवान्सीमंतशृंगारणं ॥ १६

तत्सूनुर्धिषणानिरस्तधिषणारंभोस्ति दंभोज्झित-
स्त्रैविद्यो विदुषां स्थितो धुरि जगद्देवो नृदेवार्चितः ।

बालत्वे स्वकवित्वरंजितहृदः श्रीहेमसूरेर्मुखा-
द्वैतीयीकमवाप बालकविरित्युद्दामसन्नाम यः ॥ १७
प्राक् चक्रे किल धर्मघोषगणभृद्यान् षोडश श्रावकान्
गच्छे स्वे व्रतिनां जिनागमविधिं व्यालुंपतां शासकान् ।
धर्मस्थीयविशारदो नयपटुर्विद्याब्धिपारंगम-
स्तेष्वप्येष यथावशेषविबुधानुल्लंघ्य वाग्मुख्यतां ॥ १८
यत्प्रभाशंकया शंके सरस्वत्यपि पुस्तकं ।
हस्ते यत्सर्वदा धत्ते तत्सूरीणां कथैव का ॥ १९
आचार्याः कति माम[1] नामरगुरुस्पर्द्धिष्णवः प्रज्ञया
विद्यंते प्रभुधर्मघोषगणभृद्गच्छे गुणैरुल्बणैः ।
किं तु [2]श्रीमुनिरत्नसुगुरोर्वृत्तैरुदात्तैर्द्विधा
चेतः केतकसौरभैर्भ्रमरवद्यस्याध्यवास्यद्भृतं ॥ २०
श्रीरुद्रस्य कुमारभूपतिमहामौहूर्त्तिकस्यात्मजो
मंत्री निर्नय इत्युदात्तचरितो विप्रोपि सुभ्रद्धवत् ।
भट्टः सूदनसंज्ञितश्च सुगुरोस्तस्यैव बोधाद्यधा-
त्सार्द्धं येन जिनेंद्रशासनधनोन्नत्यं धनस्य व्ययात् ॥ २१
मंत्रिणा बालकविना विद्वज्जनसभे स्थितः ।
प्रार्थ्यत श्रीमुनिरत्नसूरिस्तेनान्यदा मुदा ॥ २२
चतुर्भिः कलापकं ।
विद्यावल्लिफलं कवित्वमथ यद्वक्तृत्वमाहुर्बुधाः
पार्षद्यैर्नरवर्मदेवनृपतेः श्रीउज्जयिन्यां पुरि ।
तद्विद्याशिववादिनः किल महाकालात्मतो निर्जये
यौष्माकं गुरुसाक्षिकं परिमलाद्भुष्टैर्मुहुस्तुष्टुवे ॥ २३

[1] नाम? [2] श्रीमुनिरत्नसूरिसु°?

श्रीनेमिना यदुकुलाधिपतिर्मुकुंदो
भावी जिनोस्ति कथितोममसंज्ञया यः ।
कृत्वा नवं चरितमस्य सदस्यसाक्ष्यं
व्याख्याय तत्फलयुगं मम दत्त पूज्याः ॥ २४

युग्मं ।

इत्यार्थितो मंत्रिवरेण भक्त्या
तेनाममस्वामिजिनेश्वरस्य ।
भविष्यतश्चारुरसैः पवित्रं
संपल्लताचैत्रसमं चरित्रं ॥ २५

समुद्रसूरेश्चरणैकरेणुः
समग्रविद्यासरसीकरेणुः ।
स्वान्योपकृत्य[1] श्रुतरत्नभूरि-
र्विनिर्ममे श्रीमुनिरत्नसूरिः ॥ २६

युग्मं ।

स्वयं भगवता तेन जैनान्विद्वज्जनान्प्रति ।
अभ्यर्थनेयं विदधते विबुधेश्वरचित्रकृत् ॥ २७

विद्वांसः सकलश्रुतार्णवनवागस्त्याः स्वमध्यस्थिताः
प्रख्याताः सुहृदः परिश्रमविदो युष्मासु बद्धांजलिः ।
यद्विद्यासु [2]विभद्धमागमगमासिद्धं निबद्धं मया
ग्रंथेस्मिंस्तदिदं विशोध्यमधिकं कृत्वा प्रसन्नं मनः ॥ २८

गूर्जरवंशोद्योतनपुत्रोदयराजमंत्रितनुजन्मना[3] ।
विद्वान्सागरचंद्रः प्रथमादर्शं लिलेखास्य ॥ २९

---

[1] स्यान्योपकृत्यै [2] °विरुद्धम्? [3] °तनुजन्मा!?

एतद्विक्रमतो द्विपंचदिनकृद्वर्षे कृतं पत्तने
सम्यक्शोधितवाचनापटलाध्यक्षः कुमारः कविः ।
सद्वैयाकरणाग्रणीर्विधिरुचिः श्रीपूर्णपालो यशः-
पालो बालकविस्तथा मणमहानंदौ च सभ्याग्रिमौ ॥ ३०

[1]श्रीशांतेर्मुनिरत्नसूरिगुरून्व्याख्यापयन्मंदिरे
तस्मिन्नेव पुरे महर्द्धिकसभे संलेख्य तत्पुस्तके ।
मंत्री बालकविर्विधाप्य च धनैरर्थव्ययैरुत्सवा-
न्प्रीतः कौतुकमार्जयज्जयमयं कल्याणकोटिश्रियः ॥ ३१

यावत्तीर्थशकीर्त्तेस्त्रिभुवनभवनोत्संगरंगे नटंत्याः
सर्वाशादेवतास्ताः सलिलनिधिमहामर्दलान्वादयंति ।
व्योमश्रीधार्कचंद्रौ कलयति सततं तालवत्तावदेष
ग्रंथः प्राबोधिकश्रीर्जनयतु कृतिनां मंगलान्युज्ज्वलानि ॥ ३२

मंत्री बालकविः सदा नवसुतानंदी चिरं नंदता-
द्घोषानुच्चपदस्थितो हरति यो लग्नेषु दत्ते श्रियं ।
चित्रं साभ्युदयो जयोत्सवकरो यत्संमुखो यत्पुन-
स्त्रेधा श्रीमुनिरत्नसूरिसुगुरौ लीनस्तदत्यद्भुतं ॥ ३३

विद्यासु यः श्रीमुनिरत्नसूरि-
गुरुप्रसादेन मनागधीती ।
स निर्ममे सूरिषु लब्धरेखः
प्रशस्तिमेतां जिनसिंहसूरिः ॥ ३४

इति प्रशस्तिः ॥ ॥ मंगलं महाश्रीः ॥ ॥

---

[1] मुनिरत्नसूरिसुगुरून्?

258. **Commentary** on the **Sthananga** by ABHAYADEVA [स्थानांगटीका । अभयदेवः].

Folios 1 to 320 : 32½ inches long, 2 inches broad. 8 to 10 lines in a folio. 146 to 158 aksharas in a line. The "granthâgra" is given as 14,250.

259. **Commentary** on the **Prajnapanasutra** by MALAYAGIRI [प्रज्ञापनासूत्रटीका । मलयगिरिः].

Folios 1 to 357 : 35½ inches long, 2½ inches broad. 10 to 12 lines in a folio. 138 to 150 aksharas in a line. Numbered as 183. Folio 357. R. सू १ मा L. ३६७. Dated Samvat 1387 = A.D. 1331.

Ends :

इति मलयगिरिविरचितायां प्रज्ञापनाटीकायां षट्त्रिंशत्तमं पदं समर्थितं । समर्थिता प्रज्ञापनाटीका ॥ शुभं भवतु समस्तसंघस्य ॥ मंगलं महाश्रीः ॥ संवत् १३८७ वर्षे वैशाखवदि १ गुरौ श्रीस्तंभतीर्थे प्रज्ञापनापुस्तकं लिखितं ॥

260. **Vivekamanjari** by ÂSAḌA, with the **Commentary** of BÂLACHANDRA [विवेकमञ्जरी सटीका । मू० आसडः । टी० बालचन्द्रः].

Folios 1 to 242 : 32¾ inches long, 2½ inches broad. 10 to 12 lines in a folio. 102 to 115 aksharas in a line. Numbered as 183. Folio 240. R. सू १९६ L. २४०. Dated Samvat 1322 = A.D. 1266. The text in 144 gâthâs.

Begins :

अर्हं ॥

श्रीनाभिनंदनविभोर्वदनं मुदेस्तु
श्रीसारदासदनमक्षिगवाक्षरम्यं ।
स्कंधाचलोपरि कलभ्रुतिदोलयोर्य-
त्पर्यंतयोरुपवनीयति कुंतलाली ॥ १...

॥ ७ ॥ इह हि महितगुणमहिमकुमुदहिमकरस्य मकरकेतुबाणविचस्तजनपरित्राणवचपंजरस्य गूर्जरवसुंधरावदनमंडलीनगरमंडनश्रीमहावीरचैत्यप्रतिष्ठाकृतः सुकृतचरितचमत्कृतदेवेंद्रस्य श्रीदेवेंद्रगुरुस्वहस्तस्वपदविनिवेशितस्य भुवनभद्रंकरस्य श्रीभद्रेश्वरसूरिगुरोः पट्टनभस्तलालंकरणकिरणमालिना प्रवादिदैत्यदमनशौरिणा श्रीमदभयदेवसूरिणा समुपदिष्टसकलसिद्धांतसारः संसारवैराग्यरसप्रसरपुष्टचेताः शिष्टसमयसरसिजवनीविकाशनैकरविः श्रीमदासडकविः कविसभाशृंगार इत्यपरनामधेयः श्रेयःप्रवृत्तिसुभगं भावुकभविकसमस्तजनचक्रप्रमोदसंपादनच्छेकरुचिर्विवेकमंजरीप्रकरणकरणमभीष्टदेवतानमस्कारपुरःसरं प्रतिजानीते यथा ॥ सिद्धिपुरसत्थवाहं ...

Ends:

श्रीभिल्लमालाभिधया प्रसिद्धो
वंशावतंसो जगतीतलस्य ।
समस्ति पाथोधिरिवाच्युतश्री-
सरस्वतीवासनिवास एकः ॥ १

तस्मिन्नवो रजनिजानि[1] इवाजनिष्ट
भासा पटुः कटुकराज इति प्रतीतः ।
यो जैनदर्शनमयो भवमूर्द्धि चक्रे
लीलास्पदं पदमखंडितवृत्त एव ॥ २

सुधांशो रोहिणीवास्य बुधपुत्रप्रसूप्रिया ।
बभूवानलदेवीति सतीजनमतल्लिका ॥ ३

---

[1] रजनिजानिरिव ?

103476

तयोरजनिषातां द्वौ सुतावासडजासडौ ।
सत्पथं न व्यलंघेतां धुर्यौ धर्मरथस्य यौ ॥ ४

आसडः कालिदासस्य यशोदीपमदीपयत् ।
मेघदूतमहाकाव्ये टीकास्नेहनिषेचनात् ॥ ५

भुक्त्वा नवरसोद्गारकिरोऽस्य कवितागिरः ।
राजसभ्याः कविसभाशृंगार इति यं जगुः ॥ ६

जिनस्तोत्रस्तुतीः पद्यगद्यबंधैरनेकशः ।
चक्रे यः क्रूरकर्माहिजांगुलीमंत्रसंनिभाः ॥ ७

येनोपदेशकंदल्याह्वानप्रकरणच्छलात् ।
कृतं मोक्षाध्वनीनेभ्यः पाथेयातिथ्यमक्षयं ॥ ८

आसडस्य मृडस्येव गौरीगंगे बभूवतुः ।
पृथिवीदेविजैतल्लदेव्यौ ह्रे तस्य वल्लभे ॥ ९

जैतल्लदेव्यां तनयावभूतां
ह्रावेतयो राजडनामधेयः ।
ज्येष्ठः कनिष्ठः कलिकालकुंभि-
द्विड्वैत्रसिंहः किल जैत्रसिंहः ॥ १०

अरिसिंह इति पृथिवीदेव्यां करपुष्करभ्रवहानः ।
गुरुगिरिपरिणयकर्मा गज इव कलभोंगजः समभूत् ॥ ११

पुत्रे राजडनाम्नि बालकदलीकांडोपमे स्वःपुरीं
याते बालसरस्वतीति विदिते तच्छोकमूढाशयः ।
संबुद्धोभयदेवसूरिसुगुरोर्यैरेव वाक्यैरसौ
तैरेवेदमसूत्रयत्प्रकरणं श्रीआसडः सत्कविः ॥ १२

एतामासडिजैत्रसिंहसचिवेनात्यर्थमभ्यर्थितो
वृत्तिं श्रीहरिभद्रसूरिसुगुरोः शिष्यप्रशिष्यावधिः ।
वाग्देवीप्रतिपन्नसूनुरकृत श्रीबालचंद्राख्यया
विख्यातोधिपतिर्गणस्य गणिनीरत्नश्रियो धर्मजः ॥ १३

नागेंद्रगच्छार्णवपार्वणेंदु-
रेतां वृहद्गच्छनभोरविश्च ।
श्रीमान्विपूर्वो जयसेनसूरिः
श्रीपद्मसूरिः समशोधयेतां ॥ १४

देवानंदमुनींदुगच्छगगनालंकारशीतद्युतेः
शिष्यः श्रीकनकप्रभाभिधगुरोस्त्रैविद्यचूडामणेः ।
वाग्देवीसुतबालचंद्रसुकवेराप्तप्रतिष्ठः सुधी-
रेतस्यां सहकारिकारणमभूत्प्रद्युम्नसूरिः पुनः ॥ १५

उत्सूत्रं यदसूत्रि सूत्रविकलेनालक्षणं लक्षण-
न्यूनेन श्रथरीति रीतिरिपुणा व्यर्थं हतार्थेन च ।
किंचित्कापि मया वचः प्रलपितं स्वच्छंदमच्छंदसा
तच्छोध्यं विबुधैः परैरपि परं कृत्वा प्रसादं मयि ॥ १६

श्रीधातुर्लेखशाली त्रिदशपथमहालेखिनीदंडशाली
सायं सायं किलायं शितकरखटिनीपात्रमादाय कालः ।
यावद्यौपट्टिकायामुडुलिपिविपुलं हस्तलेखं विधत्ते
तावद्भावच्यमाना कृतिभिरतितरां वर्त्ततां वृत्तिरेषा ॥ १७

इत्याचार्यबालचंद्रविरचितायां विवेकमंजरीवृत्तौ भावनाविवरणं नाम चतुर्थः परिमलः ॥

उद्दंडशैलमयदंडधृतस्य धात्री-
छत्रस्य वारिधिदुकूलवृतस्य मौलौ ।
स्वर्णाचलः कलशतामयमेति याव-
त्तावज्जयं कलयतादिह जैत्रसिंहः ॥ १

समाप्ता चेयं विवेकमंजरीप्रकरणवृत्तिः ॥ मंगलं महाश्रीः ॥

Praśasti of the donor of the book:

ॐ नमः श्रीवीतरागाय ॥
यन्नाममात्रवशतोपि शरीरभाजां
नश्यंति सामजघटा इव दुष्कृतौघाः ।
पादाग्रलांछनमृगेंद्रभुवा भियेव
देवः स वः शिवसुखानि तनोतु वीरः ॥ १

विस्तीर्णोयं क्षितिरुह इव श्राव्यमूलप्रतिष्ठः
प्राग्वाटाख्यो गरिमगुणवानन्वयोस्ति प्रधानः ।
लक्ष्मीर्यस्मिन्नवकिसलयश्रेणिशोभां बिभर्त्ति
ज्योत्स्नाकारा विकचकुसुमस्तोमसाम्यं च कीर्त्तिः ॥ २

आद्यस्तत्रानवद्यश्रीः सीदः श्रीद इवाभवत् ।
विभ्राणनेन यश्चित्रं तत्याज न कुलीनताम् ॥ ३

वीरदेव्यभिधया शुभलीला
तस्य शीलपरिपालनशीला ।
गेहिनीव कमला विमलाभू-
द्गेहिनी सुकृतनिर्मलबुद्धेः ॥ ४

चंद्र इव पूर्णदेवः सुतस्तयोः सुगुणकिरणसंपूर्णः ।
दोषाश्रितो न चित्रं कलंकितां न भजते यस्तु ॥ ५

लोकोपकारकरणाद्विजयाद्यसिंह-
सूरेरुपास्तिजननाज्जिनबिंबकृप्तेः ।
पुत्रद्वयव्रतविधापनतश्च चक्रे
यः सार्थकं द्रविणमायुरपि स्वकीयम् ॥ ६

तस्य च प्रियतमाजनि रम्या
वाल्हिविः शशिसमुज्ज्वलशीला ।
वीतरागचरणार्चनचित्ता
क्षेत्रसप्तकवितीर्णसुवित्ता ॥ ७

कृत्तोषतापनिधनं विधिनोपधाना-
भिख्यं तपः शिवसुखाय विधाय धैर्यात् ।
मालाधिरोपणमकारयदात्मनो या
द्वेषद्विषो विजयसिंहगुरोः करेण ॥ ८

त्रपामणिक्षोणिरसावसूत
सूतान्दिगीशान्स्फुटमष्टसंख्यान् ।
ये पुण्यकाष्टाश्रितचेतसोपि
चित्रं न संक्रदनयोगमापुः ॥ ९

भोगिभोगायितभुजस्तंभः कुलगृहं श्रियः ।
आद्यस्तत्राभिरामश्रीर्ब्रह्मदेवोऽभवत्सुतः ॥ १०

अभिरामगुणग्रामद्रुमारामवसुंधरा ।
दयिता पोहणिस्तस्य बभूव प्रियसंभवा ॥ ११

वासनावासितस्वांतश्चंद्रावत्यां महत्तमे ।
यश्चैत्ये कारयामास बिंबं वीरजिनेशितुः ॥ १२

या पद्मदेवसूरेर्गुरोः कृते शुभमतिः स्वचित्तेन ।
चरितं त्रिषष्टिमध्यादलेखयत्प्रथमतीर्थकृतः ॥ १३

द्वैतीयीको बोहडिरभवत्तनुजो गुणव्रजनिकेतम् ।
एतस्यांबीति[1] कुटुंबिनी च चंचद्गुणकदंबा ॥ १४

स्वकीयवंशे भुवनावतंसे
ध्वजानुकारं दधदंगजन्मा ।
सद्धर्मनिर्मापणदत्तचित्त-
[2]चित्तस्वयोर्विल्हणसंज्ञ आद्यः ॥ १५

सती सतीसंहतिशीर्षरत्नं
तस्य प्रिया जैनपदाब्जभृंगी ।
बभूव दानादिगुणप्रधाना
सन्मानसा रूपिणिनामधेया ॥ १६

द्वितीय आल्हणश्चाभूद्भाग्यसौभाग्यजन्मभूः ।
अनन्यजनसामान्यसौजन्यमणिरोहणः ॥ १७

जल्हणस्तृतीयसूनुश्चतुर्थो मल्हणाभिधः ।
समभून्मोहिनी चापि सुता स्वजनमोहिनी ॥ १८

जल्हणस्य तृतीयस्य नाऊजा या शुभाशया ।
वीरपालो वरदेवो वैरिसिंहः सुतास्तयोः ॥ १९

वहुदेवस्तु तृतीयो यश्चारित्रं च सूरिपदवीं च ।
संप्राप्य नाम लेभे सूरिः श्रीपद्मदेव इति ॥ २०

चतुर्थ आमणश्चारुगुणमाणिक्यमंडितः ।
पंचमो वरदेवाख्यः सत्सख्यविहितोद्यमः ॥ २१

---

[1] एतस्यांबेति? [2] चित्तस्तयो?

षष्ठः पंडितसंहतिचतुरः स्फूर्ज्जद्यशा यशोवीरः ।
आचार्यपदे लेभे श्रीपरमानंद इत्यभिधाम् ॥ २२

सप्तमो वीरचंद्राख्यो जज्ञेनूनगुणावलिः ।
समभूज्जिनचंद्राद्यः प्रकृष्टवपुरष्टमः ॥ २३

बोहडिजविल्हणस्य च पुत्रचतुष्टयमनूनगुणरूपम् ।
रूपिणिकुक्षिसरोवरकलहंसनिभं विवेकयुतम् ॥ २४ ।

आशापालः कीर्त्तिवल्लचालवालः
सीधूनामा भूरिधामा द्वितीयः ।
तार्त्तीयीकोभूज्जगत्सिंघसंज्ञ-
स्तुर्यः सूनुः पद्मसिंहाभिधानः ॥ २५

बीरीति पुत्री सुगुणैः पवित्रा
मनोहरा सा हरिणीसुनेत्रा ।
अभूच्छुभाचारपवित्रपात्रा
सद्रूपलावण्यविशुद्धगात्रा ॥ २६

जग्राह यः पुत्र इह तृतीयः
कामप्रदां संयमराज्यलक्ष्मीं ।
क्षिप्रं तथा सूरिपदं च लेभे
सुदुर्लभं पुण्यवतापि पुंसा ॥ २७

प्रथमस्यासपालस्य खेतुकाकुक्षिसंभवाः ।
सज्जनोभयसिंहाख्यस्तेजाकः सहजः सुताः ॥ २८

सीधुकाख्यद्वितीयस्य सोहरेत्यभवद्वधूः ।
अगण्यपुण्यदाक्षिण्यलावण्यादिगुणान्विता ॥ २९

तुर्यस्य पद्मसिंहस्य वालूनाम्नी प्रियाभवत् ।
सुतस्तयोः समुत्पन्नो नागपालाभिधः सुधीः ॥ ३०

किं च ।

रूपं बलं च विभवो विषयाभिषंगो
नीरोगता लवणिमा प्रियसंप्रयोगः ।
वातावधूतपटचंचलमेव सर्वं
विज्ञाय धर्मनिपुणैर्भविभिर्विभाव्यं ॥ ३१

अंगुष्ठमात्रं यो बिंबं कारयत्यर्हतां बुधः ।
सिद्धिनारीपरीरंभभवं स लभते सुखं ॥ ३२

न मनःपर्ययमवधि न केवलज्ञानमत्र नैवास्ति ।
पुस्तकलिखनमेतत्तद्यष्टिर्दृष्टिहीनानां ॥ ३३

श्रीरत्नप्रभसूरेर्गुरोः सकाशान्निजस्य सद्बंधोः ।
संसारांभोधितरीं श्रुत्वेत्यथ देशनां विशदां ॥ ३४

डाहापद्रपुरे चैत्ये कारयामास भावभाक् ।
श्रीमतः सुमतेर्बिंबमर्हतान्निजगत्पतेः ॥ ३५

आलेखयत्सैष किलासपालः
श्रेयःश्रिये स्वस्य पितुः प्रधानं ।
विवेकमंजर्यभिधां दधानं
सत्पुस्तकं निर्वृतिदीपकल्पं ॥ ३६

यावत्पूर्वाद्रिशृंगोदित इह जगति स्वप्रतापेन हंति
प्रोद्यन्नीलीविनीलं तिमिरभरमरं तापनस्तत्समंतात् ।
यावच्छेषाहिराजः क्षितिवलयमसौ स्फूर्त्तिमान्संबिभर्त्ति
श्रेयोधिष्ठानयानप्रवररभः[1] पुस्तकस्तावदास्तां ॥ ३७

[1] °प्रवररसनिभः ?

चक्षुर्लोचनविष्टपात्रिनयनप्रोद्भूतसंवत्सरे
मासे कार्तिकनाम्नि चंद्रसहिते कृष्णाष्टमीवासरे ।
वृत्तिर्निर्वृतिमार्गदीपकलिकातुल्या विनीतात्मना
रामेण स्वयमादरेण लिखिता नंद्यादनिंद्याक्षरा ॥ ३८

प्रशस्तिः समाप्ता ॥ शुभमस्तु ॥ पूज्यश्रीप्रद्युम्नसूरिभिः प्रशस्तिः शोधितेति ॥ छ

261. **Nirayavalisutra** [निरयावलिसूत्रम् ].

Injured. 37 folios.

262. **Abidhanachintamani** with **Commentary**, by HEMACHANDRA [अभिधानचिन्तामणिः सटीकः । हेमचन्द्रः].

Folios 1 to 250 : 37½ inches long, 2½ inches broad. 10 to 12 lines in a folio. 140 to 145 aksharas in a line. The "granthâgra" is given as 10,000. Dated Samvat 1376 = A.D. 1220.

263. **Pratyekabuddhacharitra** by TILAKÂCHÂRYA [प्रत्येकबुद्धचरित्रम् । तिलकाचार्यः].

Folios 1 to 110: 2½ inches long, 1½ inches broad. 6 lines in a folio. 40 to 43 aksharas in a line. In 671 gâthâs.

264. **Nyayavataravivriti** [न्यायावतारविवृतिः].

Folios 1 to 151 : 14½ inches long, 1½ inches broad. 6 to 8 lines in a folio. 40 to 43 aksharas in a line. Numbered as 183. Folio 151.

R. $\frac{\text{सू}}{\text{१}}$ L. १५१. Incomplete. Compare No. 216.

Begins :

॥ नमो वाग्देवतायै ॥

अविप्लुतसामान्यविशेषदेशिनं वर्द्धमानमानम्य ।
न्यायावतारविवृतिः स्मृतिबीजविवृद्धये क्रियते ॥ १

तस्येदमादिवाक्यं ॥ प्रमाणेत्यादि ॥

**265. Haimavyakarana** with **Commentary** by HEMACHANDRA [हैमव्याकरणं सटीकं त्रु० । हेमचन्द्रः].

Injured. 295 folios.

**266. Sutrapatha, Unadi** and **Linganusasana** by VÂMANÂCHÂRYA [सूत्रपाठः । उणादिः । लिंगानुशासनम् । वामनाचार्यः].

Folios 1 to 66 : 15¾ inches long, 1½ inches broad. 6 lines in a folio 62 to 70 aksharas in a line. Numbered as 183. Folio 62 R. र्दु/२ L. ६२, Dated Saṃvat 1287 = A.D. 1231.

Begins :

I. Sûtrapâṭha.

८० ॥ उपकारीदमत्यंतं पंजिकायामतो बुधैः ।
शास्त्रांतरात्समादत्तं परसूत्रकदंबकम् ॥ १

ह्रस्वं लघु । संयोगे गुरु । दीर्घं च । ...

Folio 46 :

इति अष्टमः पादः समाप्तः ॥ परसूत्राणि समाप्तानि ॥

नवौ श्रमेः । न धात्वैकदेशलोपे गुणवृद्धी । वृद्धिरादैच् । गुण्यनः स्यात् । लोकस्य प्रीणेः।...

Folio 52 :

कृत्परसूत्राणि समाप्तानि ॥

II. Unâdi.

आद्यरयोखनिस्वभ्यां दुः । मद्यंकिवासिमथिवतिभ्य उरः ।

Folio 54 :

इत्युणादौ प्रथमः पादः समाप्तः ॥

Folio 62 :

प्रथेरमचमंगेरलच् ॥ इत्युणादौ षष्ठः पादः समाप्तः ॥
उणादिः समाप्ता इति ॥

III. Lingânuśâsana. *

॥ इ० ॥

सिद्धं विबुधजनेष्टं विदिताखिलवाङ्मयं प्रणम्याप्तं ।
लिंगानुशासनमहं वच्म्यार्याभिः समासेन ॥ १

* Corrected *yathâśakti*. See remarks in body of Report.

नाम नपुंसकलिंगं तत्रनलस्तुत्वशब्दपर्यंतं ।
मन्नंतो हितदितमपि सांतं हल्पूर्व-रुजातं ॥ २

भवनस्य रजतहांतं चार्थरणापत्यहृदयतालुपुराः ।
रांतं च तमोर्वारुकतमसामव्यक्तलिंगोक्तौ ॥ ३

दलपलबिलहिमखामृतभयसुखदुःखपुण्यपापविशां ।
प्रसवाभरणविलेपव्यंजनफललवणजातीनां ॥ ४

दार्व्यस्त्रौषधजलधनुरुदराजिरशिखरवस्त्रपिच्छानां ।
द्विगुरपि पात्राद्यंतः क्रियाव्ययविशेषणं चैक्ये ॥ ५

छायासभाबहूनां संघे राजार्थराक्षसादीनां ।
भवने च तत्समासे द्वंद्वैकत्वाव्ययीभावौ ॥ ६

कृतषष्ठ्यंतसमासे तदादिकथने ह्युपक्रमोपज्ञे ।
कंथोशीनरदेशे नाम्न्यव्ययपूर्वकश्च पथः ॥ ७

भावेऽचिन्नणकांतो ऽदंतो हि समूहभावकर्मार्थाः ।
धर्मार्द्धसारमित्रा ह्स्वांगदलन्यायसुहृदर्थे ॥ ८

कुहकं चिबुकं लिंगं क्रकचं वीजं ललाटशृंगाटं ।
चटपिटलोष्टकरोटं पीठं पृष्ठं च कुष्ठं च ॥ ९

कुंडांडभांडकारणशरणमृणक्षूणमुष्णतीर्थोक्थं ।
गुदवृंदकुसीदानि श्राद्धान्ने रत्नचिह्ने च ॥ १०

रूपं तल्पं शिल्पं समीपकूर्पोडुपांतरीपाणि ।
बिंबकुटुंबे कुंकुमसिध्मेध्मयुग्मगुल्मं च ॥ ११

किशलयशिशिरकुकुंदुरचामरकांतारतीरदूराणि ।
वैराक्षरांतरोखरकिण्वशरावाणि दैवं च ॥ १२

कणिशं वडिशं पलिशं शीर्षे वर्षे च साहसं सबुसं ।
पुण्याहं सुदिनाहं जक्षत्पुरीतं जगद्भवनं ॥ १३
नीडं गृहशशयूविस्थूणोण्णं गंधमादनास्थक्षि ।
शक्तयररिकशिपु जानु च कशेरुतोरणविशाद्दटचाहः ॥ १४

इति नपुंसकलिंगाधिकारः समाप्तः ॥ ७

पुल्लिंगमृदुदंतो वुभ्यक्त्यंतः स्यदनदाध्वकूपानां ।
सर्वज्ञपरिसरधर्मखघनघृणिरदपुष्यवलयानां ॥ १
ध्वनितरुविषमासासुरवर्णमरुत्प्राणिनो विशेषाणां ।
धान्यानां रात्राह्नचसमाहारे दुंदुभिरनक्षे ॥ २
ग्रंथिकलिकोलिवलिगिरिवृतिराशि च मौलिकुक्षिपाण्यंघ्रिः ।
अंजलिहाहाहूहूसंकेतव्रातपोतयुताः ॥ ३
सूनवातायनहायनजनौदनाभिजनफेनवेमाश्रम ।
श्लेष्मोष्मपाप्मयक्ष्मोत्सवद्वंद्वं मद्राश्च मंत्रयुताः ॥ ४
गर्त्तो वटो निकाय्योस्ताच्छादपटस्तथोत्तरासंगः ।
नूपुरहारकलापा रैकोशस्वार्थविभवाश्च ॥ ५
बहवः सक्तुबल्वजदारालाजासुगृहा दशावासाः ।
नाट्यनयादिजनाः प्रपराणि व्रणयुगपदांगानि ॥ ६
मलखलकपोलकंवलचखालकल्लोलकालकीलगलाः ।
तरलप्रवालतंदुलकलमलोपलतूलफालगोलनलाः ॥ ७

इति पुल्लिंगाधिकारः समाप्तः ॥

स्त्रीलिंगं योनिमंतं प्रागुदीर्घांत उदितोप्यनुक्त इह ।
हृदलिल्लिदंतदीधतिजात्यादिदरद्यविटछर्दिः ॥ १

भा द्वाः पूरुडकाकुप्रियंगुकुत्सनायुरज्जुचंचुतनुः ।
बहवश्च समासिकतावर्षाप्सुमनोजलौकसोप्सरसः ॥

इति स्त्रीलिंगाधिकारः समाप्तः ॥

विषकुलिशकलत्राणि त्रिपिष्टपात्रे नपुंसके पर्व्व ।
प्रसवाश्ववडववाक्च्छेदगरुदुच्चारवेधसः पुंसि ॥ १
विंशत्याद्येकार्थाः स्त्रियां तु नित्यं नपुंसकेदंता ।
संख्या शतादिरिष्टा द्वित्वाद्यर्थे च संख्यायां ॥ २
स्त्रीलिंगनपुंसकयोराबंतोत्तरपदोद्विगुर्धार्चिः ।
षट्चादिपदाच्छाया शाला सेना सुरा सनिशा ॥ ३
पुल्लिंगस्त्रीलिंगा मरीचिमणियष्टिमुष्टितोण्याणि— ।
तुटिमाखिपाटलिशाल्मलितरणिभोण्यूर्मयो वसतिः ॥ ४
अरणीषुधीषुतिथयः समृत्यु कर्कंधुबाहुकंटु तथा ।
संज्ञाबहुलं वाच्यं दशरत्रित्वं ह्यनेकलिंगार्थाः ॥ ५
स्वत आमलकविभीतकवटभल्लातकहरीतकाख्रिषु ।
हिञ्चंताः स्त्रियामथांताः शृंगलसविषाणनखरवल्लराः ॥ ६
परवल्लिंगं द्वंद्वे तत्पुरुषे च द्विगौ हि वाच्यमिव ।
अर्थांतरे च प्राज्यलमापन्नप्राप्तपूर्वे च ॥ ७
दृश्यंते अर्द्धर्चाद्या अपि पुंसि च शंखपद्ममंभोजे ।
भूतो ग्रहेथ लवणासैंधवमित्यनुदितं जनाज्ज्ञेयम् ॥ ९

व्याडिप्रणीतमथ वाररुचं सचांद्रं
जैनेंद्रलक्षणगतं विविधं तथान्यत् ।
लिंगस्य लक्ष्म हि समस्य विशेषयुक्त-
मुक्तं मया परिमितं नृदृशा हृदार्याः ॥ ९

अद्यापि संशयगतार्थमनिष्टसंग-
लिंगानुशासनमिहाज्ञतया मया तत् ।
प्रोक्तं हि किंचिदविचार्य तदार्यवर्यैः
संस्कार्यमस्ति यदि कार्यमुतावधीर्यं ॥ १०

Ends :

लिंगानुशासनमिदं कृतमुन्नतेन
शुभ्रैर्गुणैः कविहितं भुवि वामनेन ।
बुद्ध्वाऽखिलं विमलशब्दगतप्रमेयं
नातःपरं स्फुटतरं शुभमस्ति लोकाः ॥ ११

इति श्रीवामनार्यकृतं लिंगानुशासनं समाप्तमिति ॥ छ

संवत् १२८७ वर्षे वैशाख सुदि गुरावद्येह वीजापुरीयश्रावकपोषधशालायां पूज्यश्रीदेवेंद्रसूरिविजयचंद्रसूरिउपाध्यायश्रीदेवभद्रगणे सद्गुरूणां धर्मोपदेशतः सा० रत्नपाल सा० लाहड श्रे० वील्हण ठ० आसपाल परसूत्रपुस्तिका लिखापिता ॥

**267. Hemavyakaranasutradi** [हेमव्याकरणसूत्रादिः].

Folios 1 to 161 : 14½ inches long, 1⅔ inches broad. 6 to 8 lines in a folio. 55 to 60 aksharas in a line. Numbered as No. 183. Folio 97. R. ६३ आ L. ९७. Folio 113. R. सू ल्ह ३ L. ११३. Folio 138. R. सू ला ह्ना L. १३८. Folio 161. R. सू घु १ L. १६१. Dated Saṃvat 1293 = A.D. 1237.

Begins :

॥ अर्हं ॥

सिद्धिः स्याद्वादात् । लोकात् ऊदात्ताः स्वराः...

Folio 97:

शेषं संस्कृतवत्सिद्धम् ॥

इत्याचार्यहेमचंद्रानुस्मृते सिद्धहेमचंद्रनाम्नि शब्दानुशासने अष्टमाध्यायस्य चतुर्थः पादः समाप्तः ॥ अष्टमोध्यायः समाप्तः । समाप्तं चेदं सिद्धहेमचंद्राभिधशब्दानुशासनमिति ॥

पुस्तिकं कटण...

Folio 113:

अनुशासनानि लिंगानां ॥ छ ॥ लिंगानि समाप्तानि ॥

॥ अर्हं ॥ भू सत्तायां । पा पाने...

Folio 138:

इत्याचार्यहेमचंद्रानुस्मृताधुरादयो णितो धातवः समाप्ताः ॥

॥ कृवापाजिस्वदिसाध्य...

Ends:

अनेसोवहेः क्विप् सश्च डः । छ ॥

इत्याचार्यहेमचंद्रानुस्मृता उणादयः समाप्ताः ॥ ग्रंथाग्रं २०९० ॥

संवत् १२९३ वर्षे आश्विनशुदि १५ सोमे स्तंभतीर्थे श्रीनरेश्वरियोग्या श्रीहेमव्याकरणसूत्रपुस्तिका लिखापिता ॥

268. **Sabdanusasana** by HEMACHANDRA [शब्दानुशासनम् । हेमचन्द्रः].

Folios 1 to 90: 15½ inches long, 2 inches broad. 4 to 8 lines in a folio. 52 aksharas in a line. Incomplete.

Begins:

पणम्य परमात्मानं श्रेयः शब्दानुशासनम् ।

आचार्यहेमचंद्रेण श्रुत्वा किंचित्प्रकाश्यते ॥ १

269. **The same, with Commentary** [तदेव सवृत्ति].

Folios 1 to 316. Numbered as 183. Folio 316. R. $\frac{\text{सुं}}{\text{कुं}}$ L. ३२६. Incomplete.

**270. The same,** with **Great Commentary** [तदेव सबृह-द्वृत्ति].

Folios 1 to 188: 8 to 10 lines in a folio. 45 to 50 asksharas in a line. Numbered as 183. Folio 198. R. सु ६३ र्ज्ञा L. १९८.

Begins:

अर्हं ॥

अनुमोत्यादिः कृत् ॥ धातोर्विधीयमानस्त्यादिवर्जितो वक्ष्यमाणः प्रत्ययस्तुममभिव्याप्य कृत्संज्ञो भवति ॥

Ends:

पंचमोध्यायः समाप्तः ॥

क्षुण्णाः क्षोणिभृतामनेन कटका भग्नाथ धारा ततः
कुंठः सिद्धपतेः कृपाण इति रे मामंसत क्षत्रियाः ।
आरूढप्रबलप्रतापदहनः संप्राप्तधारश्चिरा-
त्पीत्वा मालवयोषिदश्रुसलिलं हंतायमेधिष्यति ॥

संव १३०० वर्षे वीजापुरपोषधशालायां समस्तश्रावकैः कृद्बृह-द्वृत्तिपुस्तिका लिखापिता । सा०रत्नपाल श्रे० वील्हण० ठ० आसपाल-सा० लाहडेन लिखापितं ॥

**271. The same** with **Commentary** [तदेव सवृत्ति। हेमचन्द्रः].

Folios 1 to 253: 15 inches long, 2 inches broad. 10 to 15 lines in a folio. 68 to 75 aksharas in a line.

Begins:

अर्हं ॥

वृद्धिरारैदौत् ॥...

Ends:

इत्याचार्यश्रीहेमचंद्रविरचितायां सिद्धहेमचंद्राभिधानस्वोपज्ञश-ब्दानुशासनवृत्तौ पंचमाध्यायस्य चतुर्थः पादः ॥ पंचमोध्यायः । ग्रं. ४६३ मंगलं महाश्रीः ॥

**272. The same** [तदेव].

Folios 1 to 330; agreeing in all respects with No. 271. Numbered as 183. Folio 330. R. स्ता ला L. ३३०. Contains the sixth and seventh adhyâyas of the work.

Begins:

॥ अर्हं ॥

तद्धितोणादिः । अणादिप्रत्ययो य इत ऊर्ध्वं वक्ष्यते ।...

Ends:

. शास्त्रप्रवृत्तिरिति ॥

इत्याचार्यश्रीहेमचंद्रविरचितायांसिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ सप्तमस्याध्यायस्य चतुर्थः पादः ॥ सप्तमोध्यायः समाप्तः ॥ ग्रं० १९२ ॥ मंगलं महाश्रीः ।

क्षितिधव भवदीयं क्षीरधारावलक्षै
रिपुविजययशोभिः श्वेत एवासिदंडः ।
किमुत कवलितैस्तैः कज्जलैर्मालवीनां
परिणतमहिमानं कालिमानं तनोति ॥ २८ ॥ छ

**273. The same, with Commentary** [ तदेव सवृत्ति ].

Folios 1 to 192: 14½ inches long, 1¾ inches broad. 8 to 10 lines in a folio. 45 to 50 aksharas in a line. Numbered as 183. Folio 192. R. सु ६३ मो L. १९२. Contains the sixth adhyâya of the work.

Ends:

इत्या° षष्ठाध्यायस्य चतुर्थपादः समाप्तः ॥

भूमिं कामगवि [1]श्वगोमयरसैरासिंच रत्नाकर
मुक्तास्वस्तिकमातनु त्वमुडुप त्वं पूर्णकुंभी भव ।

---

[1] स्वगोमय?

धृत्वा कल्पतरोर्दलानि सरलैर्दिग्वारणास्तोरणा-
न्याधत्त स्वकरैर्विजित्य जगतीं नन्वेति सिद्धाधिपः ॥ ४ ॥

संवत् १२९८ वर्षे द्वितीयभाद्रपदवदि ७ गुरौ लिखितेयं ॥ शुभं भवतु ॥ वीजापुरे पोषधशालायां तद्धितप्रथमखंडं समस्तश्रावकैर्लिखापितं ॥

**274. The same** (तदेव).

Folios 98 to 121: 14½ inches long, 1¾ inches broad. 6 to 8 lines in a folio. 50 to 54 aksharas in a line. Contains the eighth adhyâya of the work.

**275. A Commentary** on the **Avasyaka** [आवश्यकस्य विवृतिः टीका]

Folios 1 to 366: 29½ inches long, 2¾ inches broad. 12 to 14 lines in a folio. The "granthâgra" is given as 14,940. Numbered as 183.

Folio 364. R. सू र्थू र्क्क L. ३६४. Dated Saṃvat 1294 = A.D. 1238.

Begins:

ॐ नमः सिद्धेभ्यः ॥

प्रणिपत्य जिनवरेंद्रं वीरं श्रुतदेवतां गुरून्साधून् ।
आवश्यकस्य विवृतिं गुरूपदेशादहं वक्ष्ये ॥
यद्यपि मया तथान्यैः कृतास्य विवृतिस्तथापि संक्षेपात् ।
तद्रुचिसत्वानुग्रहहेतोः क्रियते प्रयासोयं ॥

**276. Samaradityacharitra** by HARIBHADRASÛRI [समरादित्यचरित्रम् । हरिभद्रसूरिः].

Folios 1 to 317: 34 inches long, 2½ inches broad. 6 to 7 lines in a folio. 120 to 130 aksharas in a line. Numbered as 183. Folio 316.

R. स्ता ल नृ L. ३१६. Dated Saṃvat 1299 = A.D. 1243.

Begins:

ॐ नमो वीतरागाय ॥

पणमह विजियसुदुज्जयाणिज्जियसुरमणुयविसमसरपसरं ।
तिहुयणमंगलनिलयं वसहगइगयं जिणं उसभम् ॥
परमसिरिवद्धमाणं पणट्ठमाणं विसुद्धवरनाणं ।
गयजोयं जोईसं सयंभुवं वद्धमाणं च ॥
सेसे चिय वावीसे जाइजरामरणबंधणविमुक्के ।
तेलोक्कमत्थयत्थे तित्थयरे भावउ नमह ॥
उवणेउ मंगलं वो जिणाण मुहलालिजालसंवलिया ।
तित्थपवत्तणसमए तियसविमुक्का कुसुमवुट्ठी ॥
देउ सुहं वो सुरसिद्धमणुयचंदेहिं सायरं नमिया ।
तित्थयरवयणपंकयविणिग्गया मणहरा वाणी ॥
अलं पवित्थरेण सुणह...

Ends:

एयं जिणदत्तायरियस्स उ अवयवभूएण चरियमिणं ।
जं विरइऊण पुन्नं महाणुभावचरियं मए पत्तं ॥
तेणं गुणाणुराउ होइ इहं सव्वलोयस्स ॥
गंथग्गमिमीए इमं छंदेणाणुट्ठएण भणिऊण ।
पाएणदससहस्सा हंदिसिलोयाण संठविया ॥ १०००० ॥

Praśasti:

वंशः श्रीपल्लिपालोस्ति सशाखः सत्यर्ववान्[1] ।
भूभृतोप्यधरीचक्रे येनैकच्छत्रितात्मना ॥
अजनि विनयपात्रं तत्र पुंरत्नचूडा-
मणिरमलिनकीर्तिः साढदेवाभिधानः ।

[1] सत्यपर्ववान्.

निरुपमजिनराजस्मेरपादारविंदा-
र्चनचलविहितसेवावाप्तविश्वप्रतिष्ठः ॥ २

शीलव्रतदृढा साढूसंज्ञिता तस्य वल्लभा ।
जिनक्रमयुगांभोजे यन्मनो हंसकायते ॥ ३

भ्राताऽभूत् साढदेवस्य दोसलः सत्यशालितः ।
पद्मीनामधेयाथ प्रिया तस्य विवेकिनी ॥ ४

आसीत् श्रेष्ठिकसाढदेवतनुभूर्जाजाकनामा जिन-
श्रेणिध्याननिशाणशोणितमतिप्राकाश्यनश्यत्तमाः ।
शश्वद्यस्य यशःप्रसूनमसमं राकानिशानायक-
ज्योतिःक्षालितनिर्मलांबरतलामोदाय यज्जातवान् ॥ ५

जाया तस्य जयत्नुका समभवद्दीनानुकंपारसा
सारासिक्तविवेककंदलवनप्रस्तारबद्धादरा ।
नित्यध्यातजिनेश्वरांघ्रिनखरुग्ध्वस्तांधकारांकुरो
यस्याश्चित्तगृहोदरे प्रतिपदं धर्मः सुखं खेलति ॥ ६

पुत्रो लाषणसंज्ञितोऽजनि तयोः पुण्यैकपात्रं कृती
नीतिज्ञो विनयी नयी सुकुलजो दक्षः क्षमादक्षिणः ।
येनोत्तुंगनिजान्वयाब्धयमहाप्रासादमूर्द्धि स्फुटं
दिग्विस्तारियशःसुकेतनपटः प्रस्तारयामासिवान् ॥ ७

जाजाकस्याभवद्भ्राता जसपालाभिधः सुधीः ।
संतुकासंज्ञिता तस्य दयिता दानशालिनी ॥ ८

जातौ तयोः सुतौ रत्नधणसिंहाभिधावुभौ ।
भगिनी नाउका नाम्नी बभूवाम्नायभूषणं ॥ ९

अथ ।

जायाऽजायत लाषणस्य कुलजा दानोद्यता रुक्मिणी
नाम्ना दीनसुवच्छलाऽन्वयविनी पुण्यैंदिरा मंदिरे ।
यस्या मानसपंकजं त्यजति नो पक्षद्वयीनिर्मलो
धर्मो हंसयुवा युतो वरलया तीर्थेशभक्त्याख्यया ॥ १०

नरपतिरितिनामा लाषणस्यांगजन्मा
तदनु भुवनपालाख्यो यशोदेवसंज्ञः ।
क्रमश इह तनूजा जज्ञिरे तस्य तीर्था-
ऽधिपतिसुगुरुपूजालब्धलक्ष्मीविकाशाः ॥ ११

जाल्हणदेवीति सुता जासीनामा तथापरा पुत्री ।
सद्धर्मकर्मनिपुणा क्रमादिमा दुहितरोभूवन् ॥ १२
आसीत्कुलीनचरिता नायिकदेवीति नरपतेर्दयिता ।
अपरा च गौरदेवी तनुभूः सामंतसिंमाख्यः[1] ॥ १३

प्रिया भुवनपालस्य पउदेवीति संज्ञिता ।
बभूव भाग्यभूः शीलरत्नरत्नाकरावनिः ॥ १४
यशोर्णवस्य पत्नी सोहरासंज्ञा पतिव्रता जज्ञे ।
तस्याः समभवत्पुत्रः सांगणनामा स्फुरद्धामा ॥ १५

मातुस्तातो राजपालाभिधानो
मातुर्माता यस्य राणीति नाम्नी ।
मातुर्भ्राता राणिगो वूढडिश्च
मातुः पक्षो लाषणस्येत्थमुक्तः ॥ १६

---

[1] °सिंहाख्यः ?

श्रीमज्जिनेशप्रभुहस्तपद्मा-
धिवासतो लाषणनामधेयः ।
तीर्थेशयात्रादिककर्मनिर्मलः
कुलप्रदीपः सुजनोपकारी ॥ १७
अथान्यदा लाषण एष हृष्टः
सुदृष्टशास्त्रार्थविनीतचेष्टः ।
भवस्वरूपं क्षणदृष्टनष्टं
विभावयामास निशावसाने ॥ १८
प्रातः प्रयातः सुगुरोः समीपे
तदेव तत्रैव तथा निशम्य ।
ततः [1]प्रयोधार्कसुदृष्टवस्तुना
समाधिना ध्यायति सर्वमप्यदः ॥ १९

तथाहि ॥

देहं दुःखैकगेहं जलनिधिलहरीचंचलं जीवितव्यं
संपत्तिः प्राणभाजां प्रसृमरपवनोद्भूतकेतूपमेया ॥
सौंदर्यं सुभ्रुनेत्रांचललुलितसमं बंधुसंगोप्यनित्यो
जैनं धर्मं विनान्यन्नहि मनुजभवे शाश्वतं किंचिदस्ति॥१९ (sic)
दानशीलतपोभावभेदैर्धर्मश्चतुर्विधः ।
मुख्यतो यतयो दानमेवैकं संप्रचक्ष्यते ॥ २०
यद्यपि त्रिविधं शास्त्रं तद्दानं न तु विश्रुतम् ।
तथापि ज्ञानदानान्नो दानमन्यत्प्रशस्यते ॥ २१
ज्ञानं श्रुताश्रितं प्रोक्तं श्रुतं शास्त्रमिति स्मृतम् ।
तच्च द्विधा समाख्यातं कल्पिताचरितक्रमात् ॥ २२

[1] प्रबोधार्क°?

तद्वयोद्योतितं किंचिच्चरितं सुनिरूपये ।
इति चिंतयतस्तस्य स्मृतिगोचरतां गतम् ॥ २३
चरित्रं समरादित्यभूभुजः प्रशमास्पदम् ।
[1]संसारिजीववैरायरसनिस्यंदभाजनं ॥ २४
द्वेषव्याघ्रहुताशनं शमधुनीपूरार्णवं दुर्णय-
ध्वांतध्वंसनभास्करं कलिमलप्रक्षालनैकामृतम् ।
एतत्सच्चरितं सुचारु समरादित्येशतुः शास्त्रतो
बद्धं श्रीहरिभद्रसूरिगुरुणा संवेगसंगाय नः ॥ २५
यदिष्टं वसु[2] संसारे तदिष्टेषु नियोज्यते ।
अन्यदिष्टं हि नो दृष्टं मातरं पितरं विना ॥ २६
इति मातृजयतुकाया निजपितृजाजाह्वयस्य पुण्याय ।
समरादित्यचरित्रं विलेखितं लाषणेनैतत् ॥ २७
येन द्रव्यमुपार्जितं शुभवशादेकांतवीरेण तत्
क्षेत्रे सप्तमिते निवेश्य विहिता सद्वृत्तिरूपा वृतिः ।
तत्सीम्नि प्रकटो जिनेशगुरोरादेशतः शाश्वतो
जैनः श्रीसमरार्कपुस्तकतया घाटः समारोपितः ॥ २८
नंदनवभानुवर्षे पित्रोः सुकृताय लाषणः कुलजः ।
समरादित्यचरित्रव्याख्यानं कारयामास ॥ २९
यावच्चालति नागराट् नलिनति क्षोणीतलं दिग्ततिः
र्यत्र स्तोमति केसरत्यहिमरुक् किंचांबरं भृंगति ।
तावत्तत्समरार्कभूपचरितं चैतन्यविस्तारकं
श्रोतृणां समसंपदं वितनुतां व्याख्यायमानं बुधैः ॥ ३०

---

[1] संसारिजीववैराग्य° ? [2] वस्तु ?

नंदनवभानुवर्षे श्रीरत्नप्रभसूरिणा शुभध्यानात् ।
श्रीस्तंभतीर्थनगरे व्याख्यातं कार्तिके मासि ॥ ३१

**277. Trishashtisalakapurushacharitra** by HEMACHANDRA [ त्रिषष्टिसलाकापुरुषचरित्रम् । हेमचन्द्रः].

Folios 2 to 223 : 15½ inches long, 2 inches broad. 5 to 6 lines in a folio. 65 to 70 aksharas in a line. Numbered as 183. Folio 223. R. सु ष ३ L. २२३. Contains the third parva of the work.

Ends :

श्रीशीतलस्वामिचरितवर्णनो नामाष्टमः सर्गः । समाप्तं तृतीयं पर्व ।

श्रीसंभवप्रभृतितीर्थकृतां तृतीये
ऽष्टानां चरित्रमिह पर्ववरेषु सर्गः ।
ध्येयं पदस्थमिव वारिरुहेषु पत्रे-
ऽनुध्यायतो भवति सिद्धिरवश्यमेव ॥ ६ ॥

मंगलं महाश्रीः ॥ ढ ॥ ढ १२९९ वर्षे आश्विनवदि २ रवौ ऽद्येह श्रीवीजापुरपत्तने समस्तराजावलीपूर्वकं तपाकीयश्रीपोषधशालायां चरित्रगुणनिधानसमस्तसिद्धांतकलोन्मानेन पारगेन तपादेवभद्रगणिमलयकीर्त्तिपंडितकुलचंद्रपंडि० देवकुमारमुनिनेमिकुमारमुनिप्रभृतिसमस्तसाधून् तच्चरणकमलान् भक्तपरमश्रावकसाधु० रतनपालसमस्तसिद्धांतपुस्तकानां पौषधशालाभारनिर्वाहकपरमश्रावकश्रेष्ठिवील्हणद्वितीयभारनिर्वाहकसाधर्मिकानां वात्सल्यतत्परे परमश्रावक ठ० आसपालतृतीयभारनिर्वाहकनिरंतरं पुस्तकसिद्धांतनिर्विकल्पभक्त्या सारतत्परपरमश्रावकसाधु० लाहडप्रभृतीन् समस्तश्रावकैः त्रिषष्टिपुस्तकं समस्तसाधून् श्रावकाणां पठनवाचनपुण्यश्रेयोर्थं लिखापितं ॥ ढ ॥ ढ ॥ लेखकपाठकानां शुभं भवतु ॥ ढ मंगलं महाश्रीः ॥ शिवमस्तु ॥ आचंद्रार्कं अयं पुस्तकं नंदतु ॥ ॥ - - - - मगलं महाश्रीः ॥ ढ ॥ ढ

278. **Nagakumaracharitra** by RATNAYOGÎNDRA [नागकुमारचरित्रम् । रत्नयोगीन्द्रः].

Folios 1 to 14: 15¼ inches long, 1¾ inches broad. 8 lines in a folio. 70 to 75 aksharas in a line. Numbered as 183. Folio 14. R एक L. १४.

Begins:

ॐ नमः सिद्धेभ्यः ॥

श्रीमान्व्यवहितारोपी वृत्तिं धर्मरथस्य यः ।
चक्रे भ्रांतेर्विनाक्रांतस्तं नमीनं नमीम्यहं ॥

अथ दिग्वदनांभोजमंडनेन मनोमुदं ।
प्रतन्वता प्रसादेन सहसा लब्धजन्मना ॥

द्युसद्दुंदुभिनादेन नभस्तलविसर्पिणा ।
दिव्यगंधभरेणेव मंदप्रस्थानवायुना ॥

वृंदारकनिकायस्य वंदनायै जिनेशिनः ।
सप्रुताह्याननादेन देवान् दूरस्थितानपि ॥

पूर्वमेव [1]परिक्किनसंनिधेर्मगधाधिपः ।
व्यबोधि विपुलाद्रिस्थं वीरं [2]यतिनिवेदकान् ॥

प्रमादनिद्रानिर्विण्णान् पौरान् प्रतिविबोधयन् ।
नादः प्रादुरभूदद्रेस्तदाव्याप्तदिगंतरः ॥

पर्युपासितमर्हंतं परिवारपरिष्कृतिः ।
चचाल चेलिनीनाथस्तदा शक्रसमद्युतिः ॥

Ends:

ततोसौ श्रेणिकः श्रीमान्नत्वा त्रैलोक्यपूजितं ।
देवं श्रीवर्द्धमानाख्यमगमत्स्वास्पदं मुदा ॥

---

[1] परिच्छिन्न°? [2] यतिनिवेदकात्?

श्रीपंचम्युपवासस्य फलोदाहरणात्मकं ।
एवं नागकुमारस्य समाप्तिं चरितं ययौ ॥ ७९
इति श्रीरत्नयोगींद्रेणोपसंगृह्य कीर्त्तितं ।
सहस्रार्द्धमितग्रंथमेतच्चरितमुच्चकैः ॥ ७९

इति नागकुमारचरिते श्रीपंचमीमहोपवासफलोदाहरणे पंचमः सर्गः ॥ मंगलं महाश्रीः ॥

**279. Pravachanasaroddharavishamapadavyakhya** by UDAYAPRABHASÛRI [प्रवचनसारोद्धारस्य विषमपदव्याख्या । उदयप्रभसूरिः].

Folios 1 to 187 : 9½ inches long, 2 inches broad. 10 to 12 lines in a folio. 61 to 63 aksharas in a line. Numbered as 183. Folio 187. R. ७ L. १८७. The "granthâgra" is given as 3303.

Begins :

८० ॥ प्रवचनसारोद्धारे विषमपदार्थावबोधमाधत्ते ।
श्रीउदयप्रभसूरिः श्रीपार्श्वाधीशमानम्य ॥ १

Ends :

सर्वप्रकारसाहाय्यकारिणः क्षांतिशालिनः ।
जयप्रभस्य कृतिनः प्रयत्नादेष निर्मितः ॥ ८
अवधानवंध्यबुद्धिर्यदत्र न समंजसं ।
उक्तवानहमुत्सूत्रं तत्र मिथ्या कृतं मम ॥ ९
यद्वा यदत्र किंचित्तनुमतिभिर्दुष्टमुदितमस्माभिः ।
प्रीतास्तद्धीमंतः संतः कुर्वंतु निर्दोषम् ॥ १०

ग्रंथाग्रं ३३०३ ॥

मुनिचंद्रसूरिपंडितगुणचंद्राभ्यां भरादिहोपकृतं ।
प्रथमोत्साहनवाचनलेखनकर्मप्रकर्षेण ॥ ११

आकाशकमलं यावन्मेरुनालं हरिद्दलं ।
भास्वान् विकाशयत्येष तावन्नंद्यादसौ भुवि ॥ १२

**280. Avasyakaniryukti** [आवश्यकनिर्युक्तिः].

Folios 1 to 255: 13½ inches long, 1¾ inches broad. 4 to 10 lines in a folio. 45 to 50 aksharas in a line. Numbered as 183. Folio 255.

R. सू ८ वृ. L. २५५.

**281. Panchasutra** [पञ्चसूत्रम्].

Folios 1 to 16: 18 inches long, 2 inches broad. Numbered as 183. Folio 16. R. र्ल्ल ह्रा L. १६.

Begins:

नमो वीतरागाणं सव्वन्नूणं देविंदपूइयाणं जहट्ठियवत्थुवाईणं तेलोक्कगुरूणं अरुहंताणं भगवंताणं

Ends:

अविराहणाफला तिलोगनाहबहुमाणेणं निस्स्येयस्स साहिगित्ति ॥

पवज्जफलसुत्तं समत्तं ॥ ठ ॥ समत्तं पञ्चसूत्रम् ॥

**282. Two books in one manuscript.**

Folios 1 to 44; agreeing in all respects with No. 281. Folio 43. R. प्त ३ L. ४३.

**282, 1. Samgrahini** [संग्रहिणी].

Begins:

निट्ठवियअट्ठकम्मं.....

Ends:

३८३ संग्रहणी प्रकरणं समाप्तेति ॥

**282, 2. Pratikramana** [प्रतिक्रमणम्].

Begins:

नमिऊण महावीरं दंसणमूलं गिहत्थधम्ममहं ।
गिह्णामि सव्वभवकयमिच्छत्ताविरइपडिकमणो ॥ १

Ends:

पडिवज्जए सम्मं ॥ ६०

Then follows the verse नमिऊण महावीरं repeated, and 42 gâthâs, ending: वारह सत्तसिए पडिवज्जइ लखमसिरी सम्मं ॥ ४२

**283. Commentary** on the **Pakshikasutra,** by YASODEVASÛRI [पाक्षिकसूत्रवृत्तिः । यशोदेवसूरिः].

Folios 1 to 199; 18 inches long, 2 inches broad. 8 to 12 lines in a folio. Numbered as 183. Folio 199. R. सूत्रं ६३ L. १९९.

Begins:

ॐ नमो वीतरागाय ।

शिवशर्मैकनिमित्तं विघ्नौघविघातिनं जिनं नत्वा ।
वक्ष्यामि सुखविबोधां पाक्षिकसूत्रस्य वृत्तिमहम् ॥ १
एतच्चूर्ण्यनुसाराद्ग्रंथांतरविवरणानुसाराच्च ।
प्रायो विवरणमेतद्विधीयते मंदमतिनापि ॥ २

Ends:

समाप्ता चेयं शास्त्रानुसारिणी पक्षप्रतिक्रमणवृत्तिरिति ॥
चंद्रकुलांबरशशिनो भव्यांबुजबोधनैकदिनपतयः ।
गुणगणरत्नसमुद्रा आसन् श्रीवीरगणिमिश्राः ॥ १

ये च ।

शुद्धध्यानजलापनीतकलिलाः [1]सक्तानदीपालया
निःसंगव्रतभारधारणरतास्तीव्रे तपस्युद्यताः ।

[1] सज्ज्ञान°?

ग्रीष्मेष्वातपवेदनां गुरुतरां जेतुं सदोपस्थिता
हेमंतेषु च शार्वरं हिमभरं सोढुं सदा निश्चलाः ॥ २
श्रीचंद्रसूरिनामा तेषां शिष्यो बभूव गुणराशिः ।
आनंदितभव्यजनः शंसितसंशुद्धसिद्धांतः ॥ ३
कलिकालदुर्लभानां गुणरत्नानां निधानमनवद्यं ।
समयावदातशुद्धिस्तथापरो देवचंद्रगणिः ॥ ४
श्रीचंद्रनाम्नः सूरेः[1] पादपंकजसेविना ।
वृध्येयं प्रसृता वृत्तिः श्रीयशोदेवसूरिणा ॥ ५
गँभीरमेतदार्षं न चोहने शक्तिरस्ति मम दक्षा ।
नापीह संप्रदायः सम्यग्बहवश्च पाठगमाः ॥ ६
शास्त्रानुसारात्सुखबोधपावै-[2]
रात्मीयशक्त्या निवृतं तथापि ।
यच्चेह किंचिद्वितथं निबद्धं
तत्रास्तु मिथ्या मम दुःकृतं हि ॥ ७
अणहिलपाटकनगरे सौवर्णिकनेमिचंद्रसत्कायां ।
वरपौषधशालायां राज्ये जयसिंहभूपस्य ॥ ८
विशारदैः सूरिवरैर्विहारिभि-
र्विशोधितो यत्नपरायणैरियं ।
तथापि यत्र्यूनमुताधिकं पदं
तत् शोधनीयं कुशलैः कृपापरैः ॥ ९
शुभाशयवशाच्चेह यन्मया सुकृतं कृतं ।
तेन भूयान्ममाभ्यासः सर्वदैव जिनागमे ॥ १०

---

[1] सूरेश्च on सूरेः सु°? [2] पाठै-?

एकादशशतैरधिकैरशीत्या विक्रमाब्दतैः ।
द्वे सहस्रे शतैरधिके सप्तभिर्ग्रंथमानतः ॥ ११

मंगलं महाश्रीः ॥ शुभं भवतु लेखकपाठकयोः ॥ संवत् १३०१ वर्षे मांघवदि १४ सोमे स्वस्ति श्रीमदाघाटे महाराजाधिराजभगवन्नारायणदक्षिणउत्तराधीशमानमर्दनश्रीजयतसिंहदेवतत्पट्टविभूषणराजाश्रिते जयसिंघविजयराज्ये तत्पादपद्मोपजीविनि महं० श्रीतल्हणप्रतिपत्तौ श्रीश्रीकरणादिसमस्तव्यापारान्परिपंथयतीत्येवं काले प्रवर्त्तमाने ठ० वयजलेन पाक्षिकवृत्तिर्लिखितेति ॥ शिवमस्तु ॥

**284. Sraddhapratikramanasutravritti** by KULAPRABHÂCHÂRYA [श्राद्धप्रतिक्रमणसूत्रवृत्तिः । कुलप्रभाचार्यः].

Folios 1 to 60: $13\frac{1}{2}$ inches long, $1\frac{1}{2}$ inches broad. 6 to 8 lines in a folio. Numbered as 183. Folio 60. R. थू ००० L. ६०.

**285. Commentary** on the **Upadesamala** of **Dharmadasagani** by SIDDHASÂDHU [उपदेशमालाया धर्मदासगणिकृताया विवरणम् । सिद्धसाधुः].

Folios 1 to 204: $19\frac{1}{2}$ inches long, 2 inches broad. 8 to 10 lines in a folio. 65 to 68 aksharas in a line.

Commentary begins:

नमः सर्वज्ञाय ॥

हेयोपादेयार्थोपदेशभाभिः . .

Text begins:

जगच्चूडामणीभूर्ज . . .

Book ends:

विषं विनिर्द्धूय कुवासनामयं
व्यचीचरद्यः कृपया मदाशये ।
अचिंत्यवीर्येण सुवासनासुधां
नतोस्मि तस्मै जिनधर्मसूरये ॥ १

उत्सूत्रमत्र विवृतं मतिमांद्यदोषा-
द्गांभीर्यभाजि वचने यदनंतकीर्तेः ।
संसारसागरमनेन तरीतुकामै-
स्तत्साधुभिः कृतकृपैर्मयि शोधनीयम् ॥ २
तोषाद्विधाय विवृतिं गिरिदेवतायाः
पुण्यानुबंधिकुशलं यदिमां[1] मयाप्तं ।
सर्वोपि तेन भवतादुपदेशमाला-
प्रोक्तार्थसाधनपरः खलु जीवलोकः ॥ ३
॥ उपदेशमालाविवरणं समाप्तं ॥

भगवद्गीर्देवतायानिभमात्रदुर्गस्वामिगुरुशिष्यसद्गर्षचरणरेणो सिद्धसाधोः ॥ ग्रंथाग्रं ३९०० ॥ संवत् १३८३ वर्षे कार्तिकशुदि १३ शनौ अद्येह श्रीदेवगिरौ साधुराजसीहसुतसाधुतिहुणसिंहेन श्रीमदुपदेशमालालघुवृत्तिपुस्तिका लिखापिता ॥ यादृशं पुस्तके दृष्टं० ॥ मंगलमस्तु ॥

**286. Acharangachurni** [आचारांगचूर्ण्णिः].

Folios 1 to 292: 15½ inches long, 2 inches broad. 8 to 12 lines in a folio. 79 to 82 aksharas in a line. Numbered as 183. Folio 191. R. सू ६३ १ L. १९१. The "granthâgra" is given as 8300. Dated Samvat 1303 = A.D. 1247. The donor of this copy is celebrated in a prasasti of 21 slokas.

**287. Pandavacharitra** by DEVAPRABHASÛRI [पाण्डवचरित्रम् । देवप्रभसूरिः].

Folios 1 to 263: 34½ inches long, 2½ inches broad. 10 to 14 lines in a folio. 130 to 135 aksharas in a line. Numbered as 183. Folio 263. R. सू ६३ L. २६३.

[1] यदिदं?

The first folio is defective, and the beginning is supplied on paper as follows :

ॐ नमः सर्वज्ञाय ।

श्रियं विश्वत्रयत्राणनिष्णः पुष्णातु वः प्रभुः ।
शंकरः पुंडरीकाक्षः श्रीमन्नाभिसमुद्भवः ॥ १

पुण्यप्रसूतिः श्रीनेमेः पातु वो देशनागवी ।
घासः स्मरादयो यस्याः क्षीरं मोक्षसुखं पुनः ॥ २

पार्श्वनाथः स वः पायाद्यदंगद्युतिसागरे ।
प्रवालकंदलायंते फणिरत्नप्रभांकुराः ॥ ३

जयंति वर्द्धमानस्य जितदंभोलिवैभवाः ।
मोहांधतमसध्वंसहेलयः सत्त्वकेलयः ॥ ४

चरित्रं पांडुपुत्राणां पवित्रमभिदध्महे ।
श्रुतं हितोपदेशाय यज्ज्ञाने पर्यवस्यति ॥ ५

Ends :

महाकाव्यमेतद्धिनोतु ॥ २८

इति मलधारिश्रीदेवप्रभसूरिविरचिते पांडवचरिते महाकाव्ये बलदेवस्वर्गगमनश्रीनेमिनाथपांडवनिर्वाणवर्णनो नाम अष्टादशः सर्गः ॥

श्रीकोटिकाख्यगणभूमिरुहस्य शाखा
या मेध्यमेत[1] विदिता विटपोपमेस्याः ।
श्रीप्रभवाहनकुले सुमनोभिरामः
ख्यातोस्ति स्वच्छ इव हर्षपुरीयगच्छः ॥ १

तत्राजनि श्रुतसुधांबुधिरिंदुरोचिः-
स्पर्द्धिष्णुकीर्त्तिविभवोऽभयदेवसूरिः ।

[1] मध्यमेति ?

शांतात्मनोप्यहह निस्पृहचेतसोपि
यस्य क्रियाखिलजगज्जयिनी बभूव ॥ २

बद्धक्रीड इवावतीर्य परमज्योतिर्विवर्त्तः क्षितौ
तत्पट्टे वरचंद्रमाः समजनि श्रीहेमसूरिप्रभुः ।

चित्रं यद्वचनामृतानि नृपतिः श्रीसिद्धराजः पपौ
विश्वेषामपि लेभिरे तनुभृतामायूंषि वृद्धिं पुनः ॥ ३

तस्यापदे[1] मदनादिद्विषि जयी विजयसिंहसूरिरभूत् ।
यद्वपुषि स्पर्द्धाभूल्लावण्यामृतशमामृतयोः ॥ ४

श्रीचंद्रसूरिरभवत्तदीयपदभूषणं गुणैकनिधिः ।
विद्यायाश्च मदस्य च येन वितेने चिरवियोगः ॥ ५

धर्मज्ञानविवेकसंयमतपःसंकेतकेलीगृहं
स श्रीमान्मुनिचंद्रसूरिरभवत्तत्पट्टभूषामणिः ।

ब्रूमस्तस्करपुष्करस्य महिमा किं नाम यत्सौरभै-
र्गण्यंते वत सादृशा अपि[2] जनैः संख्यासु संख्यावतां ॥ ६

श्रीदेवप्रभसूरिर्बभूव तच्चरणकमलरोलंबः ।
येन कलैः कीर्तिरवैरभितो मुखरीकृतं भुवनं ॥ ७

मुनिचंद्रसूरिपट्टे श्रीदेवानंदसूरयोभूवन् ।
स्तोत्राय यद्गुणानां ध्रुवं न वेधा अपि सुमेधाः ॥ ८

तेषां [3]कल्पतरुत्रिपिष्टपगवीचिंताश्मवैहासिका-
दादेशात्कविमार्गवल्गनकलानैपुण्यभून्यैरपि ।

---

[1] तस्य पदे? [2] बत मादृशा अपि? [3] कल्पतरुत्रिविष्टपगवी° ?

श्रीदेवप्रभसूरिभिः पोडोश्चरित्रं[1] किम-
प्येतद्विबुधादिशिष्यहृदयोल्लासार्थमभ्यर्थ्यते[2] ॥ ९
श्रीयशोभद्रसूरीणां तथात्र व्यातृतादृशः[3] ।
यथैतदगमत्सर्वं विद्वल्लोकावलोक्यतां ॥ १०
ज्ञानैकमयमूर्त्तनामस्मिन्नवरसान्विते ।
श्रीनरचंद्रसूरीणां प्रज्ञया कतधाधितं[4] ।
प्रीत्यावलोकनेनैव कर्णक्रोडनवातिथेः ।
कर्तुमातिथ्यमर्हति ग्रंथस्यास्य मनीषिणः ॥ १२

मंगलं महाश्रीः ॥

**288. Katharatnakosa** by DEVABHADRASÛRI [कथारत्नकोशः । देवभद्रसूरिः].

Folios 1 to 317 : 34¼ inches long, 2¾ inches broad. 8 to 10 lines in a folio. 120 to 135 aksharas in a line. Numbered as 183. Folio 308. R. स्ता ० र्शो L. ३०८. Dated Samvat 1286 = A.D. 1230.

Begins :

ॐ नमो जिनागमाय ॥

पडिबिंबियपणयजणनिलीणभवभीरुभव्वलोयच्च ।
उम्मुहमऊहनिवहसिवभवणारोहसेणिव्व ॥ १
भीमभवोयहिलंघणसज्जासज्जाणवत्तपत्तिव्व[5] ।
चरणनहमालिया सहइ जस्स सो जयइ पढमजिणो ॥ २
सुमणोभिरामरूवो चारुयई सुरहिवयणसयवत्तो ।
जयइ सिवनयरिपत्थियमंगलकलसोव्व वीरजिणो ॥ ३

---

[1] पोडोश्चरित्रं is evidently for पांडोश्चरित्रं. But the pâda is also defective in four syllables. Some such word as सुकृतिभिः may have followed, and been by the scribe confounded with सूरिभिः.

[2] °ग्रंथ्यत ? [3] व्यातृता दृशः ? [4] कतकायितं ? [5] पंत्तिव्व ?

स जयइ पुणोवि दुज्जयकसायसरहोलिविहलिउच्छाहो ।
लंठणछलेन भीउव्व केसरी जं समल्लीणो ॥ ४

भववारयबंधं बंधुणोव्व अवणिं तुवोवसेवावि ।
जिणवइणो मोहमहंधयारहरणंमि रविणो व्व ॥ ५

पासस्स फणामणिणो उंमुहपसरंतकंतिणो दूरम् ।
विहियावट्टियदीवूसवव्व तिमिरं हरंतु ममं ॥ ६

जयइ विलसंतनिंमलमऊहमंडलपसाहियसरीरा ।
पग्गहियपारिवेसव्व ससिकला भयवई वाणी ॥ ७

ससिरीया सच्चाहिट्ठिया य सच्चक्कनंदया सुगया ।
गुरुणो हरिणो व्व कुणंतुं वंछियं निच्छियं मज्झ ॥ ८

इत्थं थोयव्वथुइईसामत्थेणं जडोवि जंपेमि ।
संमत्ताइपयत्थप्पडिबद्धकहारयणकोसं ॥ ९

एत्थय जिणिंदसमयंमि संमया मुत्तिपहपवित्तीए ।
सुमुणी सुसावगो चिय जहुत्तकिरियाकलावन्नू ॥ १०

सुमुणित्तणं च पायं सुसावगत्तं विणा न संभवइ ।
पत्तसिय देसचरित्तो हि सव्वविरइंपि काउमलं ॥

सामन्नविसेसगुणन्निउ य सुसावगत्तणं लहइ ।
सो पुण सामन्नगुणी नेउ संमाइदारेहिं ॥ १२

Folio 10. R. ल्ल/० L. १०. इति श्रीकथारत्नकोशे सम्यक्त्वाधिकारे नरवर्मनृपकथानकं समाप्तं ।...

Folio 13. R. ल्ल/३ L. १३. इति० सम्यक्त्वातिचारचिंतायां शंकादोषे धनदेवकथानकं समाप्तं ।...

Folio 15. R. र्लृ नृ L. १५. इति० सम्यक्त्वचिंतायां द्वितीयातिचारप्रक्रमे नागदत्तकथानकं समाप्तं ॥...

Folio 18. R. र्लृ ह्ना L. १८. इति स० तृतीयातिचारप्रक्रमे गंगवसुमत्याः कथानकं समाप्तं ॥...

Folio 27. R. थ र्मा L. २७. इति श्रीक० पंचमातिचारे रुद्राचार्यकथानकं समाप्तं ॥...

Folio 33. R. ला ३ L. ३३. इति श्रीक० षष्ठातिचारप्रक्रमे भवदेवराजर्षिकथानकं समाप्तं ॥...

Folio 39. R. ला ड्ड L. ३९. इति० सप्तमातिचारे धनकथानकं समाप्तं.

Folio 46. R. प्त फु L. ४६. इति० अष्टमातिचारे अचलकथोक्त्या सम्यक्त्वपटलं समाप्तं ॥...

Folio 55. R. ८ र्नृ L. ५५. इति० पंचनमस्कारे श्रीदेवनृपकथानकं समाप्तं ॥...

Folio 64. R. र्थु एक L. ६४. इति० चैत्याधिकारे विजयकथानकं समाप्तं ॥...

Folio 75. R. र्थू र्नृ L. ७५. इति० जिनबिंबप्रतिष्ठाप्रक्रमे महाराजपद्मकथानकं समाप्तं ॥...

Folio 85. R. ७ र्नृ L. ८५. इति० पूजाधिकारे प्रभंकरकथानकं समाप्तं ।.

Folio 90. R. ६३ ० L. ९०. इति० देवद्रव्यचिंताधिकारे भ्रातृद्वयकथानकं समाप्तं ॥...

Folio 98. R. ६३ ह्ना L. ९८. इति० शास्त्रश्रवणाधिकारे श्रीगुप्तकथानकं समाप्तं ॥...

Folio 105. R. सु० नृ० L. १०५. इति० ज्ञानदानावसरे धनदत्तकथानकं समाप्तं ॥...

Folio 111. R. सु लं १ L. १११. इति० अभयप्रदानप्रस्तावे जयराजर्षि-कथानकं समाप्तं ॥...

Folio 118. R. सु लं फ्रं L. ११८. इति० यत्यवष्टंभदाने सुजयराजर्षिक-थानकं समाप्तं ॥...

Folio 125. R. सु थ ह्रं L. १२५. इति० कुग्रहत्यागे विमलोपाख्यानकं स-माप्तम् ॥...

Folio 131. R. सु ला १ L. १३१. इति० माध्यस्थगुणचिंतायां पुरोहितसुत-नारायणकथानकं समाप्तं ॥...

Folio 136. R. सु ला फुं L. १३६. इति० सामर्थ्यगुणचिंतायाममरदत्तक-थानकं समाप्तं ।...

Folio 142. R. सु न २ L. १४२. इति० धर्मार्थव्यतिरेकचिंतायां सुंदरक-थानकं समाप्तं ॥...

Folio 147. R. सु न र्मा L. १४७. इति० आलोचकपुरुषव्यतिरेके धर्मदेव-कथानकं समाप्तं ॥...

Folio 155. R. सु ए नृ० L. १५५. इति० उपायचिंतायां विजयदेवकथानकं समाप्तं ॥...

Folio 162. R. सु थु २ L. १६२. इति० उपशांतप्रक्रमे सुदत्तकथानकं स-
समाप्तं ॥ २५...

Folio 167. R. सु थु मो L. १६७. इति० दक्षत्वगुणचिंतायां सुरशेखरराज-
पुत्रकथानकं समाप्तं ॥ २६...

Folio 171. R. सु थु १ L. १७१. इति० दाक्षिण्यचिंतायां भवदेवकथानकं
समाप्तं ॥ २७...

Folio 176. R. सु थु फू L. १७६. इति० धैर्यगुणचिंतायां महेंद्रनृपकथानकं
समाप्तं ॥ २८...

Folio 180. R. सु ७ ० L. १८०. इति० गांभीर्यगुणचिंतायां विजयाचार्य-
कथानकं समाप्तं ॥ २९...

Folio 185. R. सु ७ रै L. १८५. इति० इंद्रियपंचकविजयव्यतिरेकवर्त्तना-
यां सुजसश्रेष्ठिसुतकथानकं समाप्तं ॥ ३०...

Folio 192. R. सु ६३ २ L. १९२. इति० पैशून्यगुणदोषचिंतायां धनपाल-
बालचंद्रकथानकं सामाप्तं ॥

Folio 199. R. सु ६३ फू L. १९९. इति० परोपकारद्वारचिंतायां भरतकथा-
नकं नमाप्तं ॥ ३२...

Folio 206. R. सु ० फू L. २०६. इति० विनयद्वारव्यावर्तनायां सुलसकथा-
नकं समाप्तं तत्समाप्तौ धर्माधिकारिसामान्यगुण-
कथनापि त्रयस्त्रिंशद्वारप्रमाणा समाप्तेति ॥...

Folio 212. R. सू० लं० २ L. २१२. इति० प्रथमाणुव्रतचिंतायां यज्ञदेवकथानकं समाप्तं ॥...

Folio 219. R. सू० लं० ३ L. २१९. इति० द्वितीयाणुव्रतचिंतायां सागरकथानकं समाप्तं ॥...

Folio 225. R. सू० लं० ४ L. २२५. इति० तृतीयाणुव्रतगुणचिंतायां फरुसरामकथानकं समाप्तं ॥ २६...

Folio 232. R. सू० ला० २ L. २३२. इति० चतुर्थाणुव्रतचिंतायां सुरप्रियकथानकं समाप्तं ॥...

Folio 240 R. सू० प० L. २४०. इति० पंचाणुव्रतविचारणायां धरणकथानकं समाप्तं ॥ ..

Folio 249. R. सू० पू० L. २४९. इति० प्रथमगुणव्रतचिंतायां शिवभूतिस्कंदयोराख्यानकं समाप्तं ॥ ..

Folio 256. R. सू० दि० L. २५६. इति० भोगोपभोगव्रतचिंतायां सकुटुंबमेहश्रेष्टिकथानकं समाप्तं ॥...

Folio 263. R. सू० थु० १ L. २६३. इति० अनर्थदंडविरतिचिंतायां चित्रगुप्तकथोक्त्या गुणव्रतत्रयं समाप्तं ॥...

Folio 269. R. सू० थु० २ L. २६९. इति० शिक्षाव्रतविचारणायां सामान्यप्रक्रमे [1]धरथकथानकं समाप्तं ॥...

[1] धनरथ०?

Folio 275. R. सू थू तृ L. २७५. इति० शिक्षाव्रतविचारणायां देशावकाशिकविषये पवनंजयकथानकं समाप्तं ॥...

Folio 280. R. सू ७ ० L. २८०. इति० तृतीयशिक्षाव्रतविचारणायां ब्रह्मदेवकथानकं समाप्तं ॥...

Folio 287 R. सू ७ र्थो L. २८७. इति० अतिथिसंविभागव्रतविषये नरदेवकथानकमुक्तं ॥...

Folio 292. R. सू ६३ २ L. २९२. इति० द्वादशावर्त्तवंदनकफलवर्त्तनायां शिवचंद्रचंद्रदेवकथानकं समाप्तं ॥...

Folio 296. R. सू ६३ फुं L. २९६. इति० प्रतिक्रमणगुणचिंतायां सोमदेवकथानकं समाप्तं ॥...

Folio 303. R. स्ता ० ३ L. ३०३. इति० कायोत्सर्गविधानचिंतायां सशिराजकथानकं समाप्तं ॥...

इति० प्रत्याख्यानव्यतिरेकचिंतायां भानुदत्तकथानकं समाप्तं ॥...

Ends:

सूरीपसन्नचंदो न नामउं अत्थउंवि परं ।
तस्सेव गेहिं सिरिसुमइवायगाणं विणेयलेसेहिं ।
सिरिदेवभद्दसूरीहिं पसरइउं कहाकोसो ।
संघधुरंधरसिरिसिद्धवीरसेट्ठीण वयणउं ।
जेहिं चरियं चरिमजिणिंदस्स व रइयं वीरनाहस्स ॥

परिकम्मिऊण विहियं च जे हिंसइ भव्वलोगपाउग्गं ।
संवेगरंगसालाभिहाणमाराहणारयणं ॥

कंचलकलसविहूसियमुणिसुव्वयभुवणमंडियंमि पुरे ।
भरुयत्थे तेहिं ट्ठिएहिं एस नीउ परिसमत्ति ॥
वसुबाणरुद्दसंखे वच्चंते विक्कमाउ कालंमि ।
लिहिउ पउमंमि य पोत्थयंमि गणिअमलचंदेण ॥

अलं बहुभणिएण ॥

यदिह जगदे किंचिन्मोहान्मया समयाद्वहि-
र्यदपि सुकविक्षुद्मार्गाद्वचोभिदधेऽन्यथा ।
तदुदितकृपैः सद्भिस्त्यक्त्वात्तथैष विशोध्यतां
भवति कथिकाकोशः पंथा यथा सिवसद्मनः ॥ १

यत्कृत्वेदं त्रिकरणजयात्पुन्यमस्माभिराप्तं
तेनैवैतच्छ्रवणपठनाख्यानचिंतैकचित्ताः ॥
संतः संतु प्रतिसभमितश्चाप्तमोहव्यपोहा
भूयो भूयो जिनपतिमते बोधिसिद्धिं लभंताम् ॥ २

जीयासुः शशिनीलकांचनजपामेघोपमांगत्विषः
श्रीमन्नाभितनूद्भवप्रभृतयः सर्वेपि तीर्थेश्वराः ।
गीरंबा च सुदर्शना च विदिता देव्योपि काल्यादयो
भूयासुर्जिनसासनस्य सततं प्रोत्सर्पणाद्धेतवे ॥ ३

इति बहुविधवाक्यानेकमाणिक्यपूर्ण्णा-
गमजलनिधिलब्धैरर्थलेशैर्निबद्धः ।
तदपि निहतभूतिप्राणिदौर्गत्यदुःखो
जयतु सततमेष श्रीकथारत्नकोशः ॥ ४

इति प्रव्रज्यार्थचिंतायां श्रीप्रभप्रभाचंद्रचरितमुक्तं तदुक्तौ च सम्यक्त्वादिपंचाशदर्थाधिकारसंबद्धः कथारत्नकोशोपि समाप्तः ॥

मंगलं महाश्रीः ॥ शिवमस्तु सर्वजगतः ० ॥

संवत् १२८६ वर्षे श्रावणसुदि ३ बुधेऽद्येह प्रल्हादनपुरे कथारत्नकोशपुस्तकमलेखीति भद्रमिति ॥

289. **Avasyakachurni** [आवश्यकचूर्णिः].

Folios 1 to 268: 37 inches long, 2¾ inches broad. 10 to 12 lines in a folio. 115 to 120 inches in a line. Contains the first khanda of the work.

290. **Dasasrutaskandhachurni** [दशाश्रुतस्कन्धचूर्णिः].

Folios 1 to 164: 27 inches long, 2 inches broad. 8 to 10 lines in a folio. 91 to 95 aksharas in a line. Numbered as 183. Folio 164. R. ख L. १६४. Dated Samvat 1328 = A.D. 1272.

Begins:

ॐ नमः सर्वज्ञाय ॥

नमो अरहंताणं । णमो सिद्धाणं णमो आयरियाणं । णमो उवज्झायाणं । नमो लोए सव्वसाहूणं । सुतं मे आउसंतेणं भगवता एवमक्खातं इह खलु थेरेहिं भगवंतेहिं असमाहिट्ठाणा पन्नत्ता ॥

Ends:

जात्यंधाः ससंकंठाः जावणयावि । जावकरणणयो ॥ सव्वेसिंपि-णयाणं गाधा ॥ दशानां चूर्णी परिसमाप्ता ॥

अनुष्टुप्छंदोहेशेन श्लोक २२२९

संवत् १३२८ वर्षे आषाढशुदि १२ गुरौऽद्येह षयरोदुग्रामवास्तव्य ठ० चंडसुत ठ० लक्ष्मणेन दशाश्रुतस्कंधस्य चूर्णिर्लिखिता ॥

**291. Yogasastravivarana** by HEMACHANDRA [योगशास्त्र-विवरणम् । हेमचन्द्रः].

Folios 1 to 323 : 34½ inches long, 2⅝ inches broad. 10 to 16 lines in a folio. 110 to 115 aksharas in a line. The "granthâgra" is given as 12,000. Numbered as 183. Folio 323. R. स्ता ध ३ L. ३२३.

**292. Siddhaprabhrita** with **Commentary** [सिद्धप्राभृतं सटीकम्].

Folios 1 to 20 : 34 inches long, 2½ inches broad. 10 to 12 lines in a folio. 145 to 162 aksharas in a line.

Text begins :

तिहुयणपणए तिहुयणगुणाहिपति

Text ends :

वीसुत्तरसयमंगं गाधाबंधेण पुव्वणिस्संदं ।
विस्थारेण महत्थं सुयाणुसारेण णेयव्वं ॥ ११८

वीसुत्तरसयगणणाम सिद्धपाहुडं सम्मत्तं ॥ अग्गेण पुव्वणिस्संदं ॥

Commentary begins :

ॐ नमः सर्वज्ञाय ।

सकलभुवनेशभूताञ्जिखिलातिसयान् जिनान् गुरून् स्तुत्वा ।
सिद्धप्राभृतटीका तदर्थहितकाम्यया क्रियते ॥ १

Commentary ends :

णवरं पूर्वस्यामेणीयाख्यस्य निष्यंद इदं सिद्धप्राभृतमिति ।
गाथासंयोजनार्थोयं प्रयासः केवलो मम ।
अर्थः सूक्तः स्फुटो ह्येष टीकाकृद्भिश्चिरंतनैः ॥
सिद्धप्राभृतं समाप्तं ॥ मंगलं महाश्रीः ॥

**293. Munisuvratacharitra** by MUNIRATNA [मुनिसुव्रतचरित्रम् । मुनिरत्नः].

Folios 1 to 193: 34 inches long, 2½ inches broad. 8 to 10 lines in a folio. 140 to 150 aksharas in a line.

Begins:

॥ ॐ नमः सर्वज्ञाय ॥

पायात्पदनखश्रेणिर्मणिस्वच्छा जिनोस्य[1] वः ।
धर्मस्य दशरूपस्य या क्रीडा दर्पणायते ॥ १

Ends:

८३ इत्याचार्यश्रीमुनिरत्नविरचिते श्रीमुनिसुव्रतचरिते महाकाव्ये अश्वावबोधस्कंदकाचार्यकार्त्तिकयथाविस्तारिविहारस्वामिनिर्वाणस्वरूपवर्णनस्त्रयोविंशः सर्गः ॥ समाप्तं चेदं मुनिसुव्रतचरितं । मंगलं महाश्रीः ॥ ६८०६

**294. Jambudvipaprajnaptichurni** [जंबूद्वीपप्रज्ञप्तिचूर्णिः].

Folios 2 to 122: agreeing in all respects with No. 293.

Ends:

जंबूद्वीवपण्हकरणाणं चूर्ण्णी सम्मता ॥ ग्रंथसर्वसंख्याश्लोक ६३२३.

**295. Trishashtisalakapurushacharitra** by HEMACHANDRA [त्रिषष्टिशलाकापुरुषचरित्रांतर्गतमष्टमं पर्व । हेमचन्द्रः].

Folios 1 to 129: 35¾ inches long, 2½ inches broad. 6 to 12 lines in a folio. 102 to 110 aksharas in a line. Numbered as 183. Folio 129, R. सु थ र्ज्ञा L. १२९. Dated Samvat 1391 = A.D. 1335. Contains the eighth parva of the work.

Ends:

समस्तनिर्ग्रंथचक्रचूडामणिश्रीकृष्णराजर्षिगच्छे सुविहितशिरोमणिश्रीपद्मचंद्रोपाध्यायान्वये भट्टारकश्रीपृथ्वीचंद्रसूरयस्तत्पट्टांबरदिनकरश्रीप्रभानंदसूरीणां सदुपदेशेन समस्तपृथ्वीतलाख्ये सुचिंतितगो-

[1] जिनस्य?

पवित्रिते सा० क्षेमंधरपुत्रः सा० धनचंद्रमुनिचंद्रदेपालाभिधाः धनचंद्रसुतौ धीमसींहकालाभिधौ मुनिचंद्रसुताः । छीहिल नोलू सोमसीह हालाभिधा धीमसीहपुत्रौ लाडणनरपालौ सोमसीहपुत्राः सा० धरणिग-आसपाल दूलह काल्ह पारश्वाभिधानाः तैः सद्गुरूणामुपदेशलेशं निशम्य संसारासारतां विचार्य संवत् १३९१ वर्षे स्वमातुः सोमश्री-श्रेयोर्थं गृहीतमिदं नंदतादाचंद्रार्कं वाचकग्रहकैः सह ॥

296. The same [तदेव सप्तमं पर्व].

Folios 1 to 223: agreeing in all respects with No. 295. Folio 223.

R. $\frac{\text{सू}}{\text{र्व}}$ L. २२३. Contains the seventh parva of the work.

297. Sabdanusasana by HEMACHANDRA [शब्दानुशासनम् । हेमचन्द्रः].

Folios 1 to 212: 7¾ inches long, 1½ inches broad. 8 to 10 lines in a folio. 32 to 34 aksharas in a line. Numbered as 183. Folio 212.

R. $\frac{\text{सू}}{\text{त्रे}}$ L. २१२. Goes down to the second pâda of the third adhyâya of the work.

298. Commentary on the above portion of the Sabdanusasana (तस्यैव टीका).

Folios 1 to 228: 10½ inches long, 2 inches broad. 8 to 16 lines in a folio. 40 to 44 aksharas in a line.

299. Samyaktvaprakarana by CHANDRAPRABHASÛRI with the Great Commentary [सम्यक्त्वप्रकरणम् सबृहद्वृत्ति । चन्द्रप्रभसूरिः].

Folios 1 to 200: 34 inches long, 2⅝ inches broad. 8 lines in a folio. 105 to 115 aksharas in a line. Incomplete and injured.

Commentary begins:

नमः श्रीपंचपरमेष्ठिभ्यः ॥

यद्वक्त्रांभोजवाप्याः स्फुटवचनघटीयंत्रचारेण निर्य-
त्सूरिश्रेणिप्रणालीप्रणयिगुणगणप्रोच्छलच्छीकरौघं ।

तत्त्वांभोऽद्यापि सिंचत्सफलयतितमां शासनोद्यानमेत-
त्तं भक्त्या नौमि नम्रस्त्रिजगदधिपतिं श्रीजिनं वर्द्धमानं ॥

Text begins:

पत्तभवन्नवतीरं दुहदवनीरं सिवंबतरुकीरं ।
कंचणगोरसरीरं नमिऊण जिणेसरं वीरं ॥ १

वुच्छं तुच्छमईणं अणुग्गहत्थं समत्थभव्वाणं ।
संमत्तस्स सरूवं संखेव — — — — महं ॥ २

**300. Jnatasutrapramukhashadangavritti** by ABHAYADEVASÛRI [ज्ञातासूत्रप्रमुखषडंगवृत्तिः । अभयदेवसूरिः].

Folios 1 to 472: 36 inches long, 2½ inches broad. 8 lines in a folio. 138 to 145 aksharas in a line. Numbered as 183. Folio 472. R. स्तै २ L. ४७२. Dated Samvat 1292 = A. D. 1236.

**301. Upamitibhavaprapancha Katha** by SIDDHARSHI [उपमितिभवप्रपञ्चा कथा । सिद्धर्षिः].

Folios 1 to 393: 32½ inches long, 2½ inches broad. 10 to 12 lines in a folio. 115 to 123 aksharas in a line. Numbered as 183. Folio 393. R. स्ता ३ L. ३९३.

Begins:

ॐ नमः सिद्धेभ्यः ॥

नमो निर्नाशिताशेषमहामोहाहिमार्त्तये ।
लोकालोकामलालोकभास्वते परमात्मने ॥ १

Ends:

तत्साधुभिः कृतकृपैर्मयि शोधनीयं ॥
पार्श्विलसाधोरपि लिखितं तथा ॥

इत्युपमितभवप्रपंचायां कथायां पूर्वसूचितमीलकवर्णनो नामाष्टमः प्रस्तावः समाप्तः ॥ समाप्ता चेयमुपमितभवप्रपंचा कथेति ॥

द्योतिताखिलभावार्थः सद्भव्याब्जप्रबोधकः ।
सूराचार्योऽभवद्दीप्रः साक्षादिव दिवाकरः ॥

आचारपंचकोद्युक्तः प्रसिद्धो जगतीतले ।
अभूद्भूतहिते धीरस्ततो देल्लमहत्तरः ॥

ज्योतिर्निमित्तशास्त्रज्ञः प्रसिद्धो देत्सविस्तरः[1] ।
ततोभूदुल्लसत्कीर्तिर्ब्रह्मगोत्रविभूषणः ॥

दुर्गस्वामिमहाभागः प्रख्यातः पृथिवीतले ।
प्रव्रज्यां गृह्णता येन गृहं सद्धनपूरितं ॥

हित्वा सद्धर्ममाहात्म्यं क्रिययैव प्रकाशितं ।
यस्य तच्चरितं वीक्ष्य शशांककरनिर्मलं ॥

बुद्धास्तत्प्रत्ययादेव भूयांसो जंतवस्तदा ।
सद्दीक्षादायकं तस्य स्वस्य चाहं गुरूत्तमं ॥

नमस्यामि महाभगं गर्गार्षिमुनिपुंगवं ।
क्लिष्टेपि दुःखमाकाले यः पूर्वमुनिचर्चया ॥

विजहारेह निःसंगो दुर्गस्वामी धरातले ।
सद्देशनांशुभिर्लोके द्योतित्वा भास्करोपमः ॥

श्रीभिल्लमाले यो धीरो गतोस्तं सद्विधानतः ।
तस्मादतुलोपशमः सहार्षिरभूदनाविलमनस्कः ।
परहितनिरतैकमतिः सिद्धांतनिधिर्महाभागः ॥

विषमभवगर्त्तनिपतितजंतुशतालंबदानदुर्ललितः ।
दलिताखिलदोषकुलोपि सततकरुणापरीतमनाः ॥

---

[1] देशविस्तरः?

यः संग्रहकरणरतः सदुपग्रहनिरतबुद्धिरनवरतं ।
आत्मन्यतुलगुणगणैर्गणधरबुद्धिं विधापयति ॥
बहुविधमपि यस्य मनो निरीक्ष्य कुंदेंदुविशदमद्यतनाः ।
मन्यंते विमलधियः सुसाधुगुणवर्णनं सत्यं ॥
उपमितिभवप्रपंचा कथेति तच्चरणरेणुकल्पेन ।
गीर्देवतया विहिताऽभिहिता सिद्धाभिधानेन ॥

अथवा ।

आचार्यहरिभद्रो मे धर्मबोधकरो गुरुः ।
प्रस्तावे भावतो हंत स एवाद्ये निवेदितः ॥

विषं विनिर्द्धूय कुवासनामयं
व्यचीचरद्यः कृपया सदाशये ।
अचिंत्यवीर्येण सुवासनासुधा-
न्नतोस्मि तस्मै हरिभद्रसूरये ॥

अनागतं परिज्ञाय चैत्यवंदनसंश्रया ।
मदर्थेन कृता येन वृत्तिर्ललितविस्तरा ॥
यत्रातुलरथयात्राधिकमिदमिति लब्धवरजयपताकम् ।
निखिलसुरभुवनमध्ये सततप्रमदं जिनेंद्रगृहं ॥
यत्रार्याष्टंकशालायां धर्मः सहेवधामसु ।
कामो लीलावतीलोके सदास्ते त्रिगुणो मुदा ॥
तत्रेयं तेन कथा कविना निःशेषगुणगणाधारे ।
श्रीभिल्लमालनगरे गदिता जिनमंडपस्थेन ॥
प्रथमादर्शे लिखिता साध्व्या श्रुतदेवतानुकारिण्या ।
दुर्गस्वामिगुरूणां शिष्यिकयेयं गणाभिधया ॥

संवत्सरशतनवके द्विषष्टिसहितेतिलंघिते चास्याः ।
ज्येष्ठेसितपंचम्यां पुनर्वसौ गुरुदिने समाप्तिरभूत् ॥
मंगलं महाश्रीः ॥

Praśasti of the donor of the book :

॥ श्रीमालाचलमौलिमूलमिलितस्त्रैलोक्यसुश्लाघितः
पर्वालीकलितः सुवर्णनिलयः प्रासादलब्धालयः ।
लीनाभ्यकुलः (sic) प्रलीनकलुषः शुभ्रातपत्रानुगो
वंशोस्ति प्रगटः सदौषधनिधिः श्रीधर्कटानां पटुः ॥ १
सारासारविचारचारुचतुरः सारार्थबद्धादरः
संसारोदरवर्त्तिजंतुशरणश्रीमज्जिनार्चापरः ।
कारुण्याकरसद्गुरुस्तुतिवशप्राप्तार्थदानोद्यत-
स्तत्रात्मीयकुलक्रमोचितरतः सन्नेमिचंद्रोभवत् ॥ २

तस्यानघा घनपयोधरयुग्मरम्या
रामानुरूपगुणरंजितभर्तृचित्ता ।
चिंताव्यतीतफलदायकधर्मलीना
निर्वाणनामविदिता जनतासु पत्नी ॥ ३

जीवाजीवपदार्थसार्थवचनः संपूर्णचंद्राननः
सर्वाधीनधनः सलीलगमनः क्रोधेभपंचाननः ।
नैपुण्यार्जितसज्जनः प्रतिदिनप्रारब्धदानावनः
सूनुः श्लाघितसर्वदेवभुवनख्याताभिधानस्तयोः ॥ ४

देवेन केनापि कदाचिदेष
नीतो रजन्यां स्वगृहात्प्रसुप्तः ।
अष्टापदे वंदितवान् जिनेंद्रान्
प्रातः स्वहस्ते कुसुमं ददर्श ॥ ५

सदा दानाशक्ता[1] स्वकुलविमलाचारनिरता
सुशीलप्रख्याता परहितरता दैन्यरहिता ।
अमानातिक्रांता गुणगणयुता सज्जनमता
सदच्छुप्रानामा वरसहचरी तस्य च तयोः ॥ ६

लक्ष्मीपतिः सुतनयोऽजनि यक्षदेवः
श्रीराजिनीनयनसंमद अम्रदेवः[2] ।
धीधीमनोभवनदीपकचांदिगाख्या-
स्तुर्या[3] यशोमतिवधूप्रियपुंडरीकः ॥ ७

चतुर्भिरेभिर्जिनधर्मलीनै-
र्विभावितागाधभवाब्धिभावैः ।
व्यधायि धंधाणकसंनिवेशे
शरण्यचंद्रप्रभदेवहर्म्यं ॥ ८

प्रत्याख्यानं येन कृत्वौदनादेः
पद्भ्यां निर्गत्योज्जयंते नगेंद्रे ।
श्रीमन्नेमिर्वंदितः पूजितश्च
क्षिप्रं भूयाद्यक्षदेवः ससौख्यं ॥ ९

यक्षदेवस्य तस्याद्यमी[4] जातवान्
चारुपुत्रः प्रियः शांतनामादिमः ।
धर्मकर्मा सुशीलाम्रदत्ताभिधः
क्रोधकोपोजितः [5]कमरुःपोजितः ॥ १०

धर्मार्थादिचतुःप्रकारपुरुषास्वार्थोद्यतस्यान्यदा
द्वौ द्वौ सुंदरभार्ययोर्वरसुतौ श्राद्धाम्रदेवस्य तौ ।

---

[1] दानसक्ता ? [2] आम्रदेवः? [3] चांदिगाख्यस्तुर्यो? [4] तस्माद्यमी ? [5] कामरूपो ?

संजातौ कुलजप्रियः[1] सुसरलौ पार्श्वाख्यमूणागकौ
राजन्या बुधलक्ष्मणो [2]गणनिधिर्नागेंद्रनामानघः ॥ ११

सन्नेमिचंद्रगुणमंदिरदेवचंद्र-
सूनुद्वयं व्यजनि चांदिगनामधेयः ।
प्रद्युम्नशंवकृतनामकमुज्ज्वलांगं
सत्पुंडरीकसुतयाजनि पुत्रयुग्मं ॥ १२

नागेंद्रः शुभधर्मकर्मनिरतः सन्मोहिनीभार्यया
पद्मावत्यभिधानया सरलया स्वस्त्रीयया संयुतः ।
वाहिन्या सुतया सुतेन गुणिना सुश्रीकुमारेण वै
शांतापत्ययशःप्रियानघयशोदेवेन धर्मार्थिना ॥ १३

अथान्यदा दानतपोविधान-
सुभावनाशीलसनाथधर्मे ।
जिनप्रणीते विदधन् प्रयत्नं
शृणोति धर्म्यं वचनं गुरुभ्यः ॥ १४

तद्यथा ।

निरवधिभवबार्द्धौ कर्मदोषाद्भ्रमंतः
प्रवरशरणहीनो योनिलक्षेषु जीवाः ।
कथमपि त्रुटियोगान्मानुषं जन्मरत्नं
सकलगुणविशिष्टं कष्टलक्षैर्लभंते ॥ १५

प्राप्य तत्प्राणिभिः प्रार्थितार्थप्रदं
प्रेरणाप्रोद्यतप्रांजलप्रेरितैः ।
प्रत्यहश्चिंतयित्वा धनाद्यस्थिरं
कर्तुमेवोचितं चारु जैनं वचः ॥ १६

[1] कुलजप्रियौ? [2] गुणनिधिः?

प्राणातिपातविरतिप्रमुखानि यानि
जैनागमे निगदितानि महाव्रतानि ।
तानि क्षमो यदि न कर्त्तुमशक्तियोगा-
द्यूयं कुरुध्वममलं गृहिधर्ममेनं ॥ १७

कर्त्तव्यं जिनपुंगवस्य महनं स्तोत्रैश्च तत्संस्तवः
सेव्यः साधुजनः प्रसन्नवदनैः श्रव्यं जिनेंद्रोदितं ।
चिंत्या द्वादशभावना निजहिते कार्यः प्रयत्नो महान्
शक्त्या चान्यहिते भवाब्धितरणप्रत्युद्यतैः प्राणिभिः ॥ १८

मोहादिद्विपकुंभभेदनविधौ येषां सदा पौरुषं
कामित्वं कमनीयमुक्तिललनापीनस्तनस्पर्शने ।
न्यायोपात्तधनं गतं जिनमतक्षेत्रेषु सप्तस्वहो
तेषां पौरुषकामिता विभविता मन्ये कृतार्था भुवि ॥ १९

रम्ये श्रीजिनपुंगवस्य सदने बिंबे तदीयेऽनघे
संघे श्लाघ्यतमे प्रसस्तचरिते पूज्ये चतुर्वर्णके ।
सर्वज्ञागमलेखने विनिहितं वित्तं भवेदिष्टदं
सत्क्षेत्रे विधिनोप्तमिष्टसमये शाल्यादिबीजं यथा ॥ २०

ये कृत्वा जिनमंदिराणि विधिना संपूज्य वस्त्रादिभिः
श्रीसंघं समुपात्तनीतिविभवाः श्रद्धापराः श्रावकाः ।
स्याद्वादप्रतिबद्धवाक्यजनकश्रीचीररागेण[1] य-
च्चिर्नीतं किल लेखयंति भविनः किं किं न तैः सत्कृतं ॥ २१

श्रुत्वा पुस्तकवाचनामनुदिनं गृह्णंति केचिद्व्रतं
देवाधीशजिनेंद्रपूजनपरा श्राद्धा भवेयुः परे ।

---

[1] श्रीवीतरागेण ?

अन्ये भद्रकभावभावितमनःसद्धर्मयोग्या नरा
जायंते खलु यस्य पुस्तकमिदं हेतुः स तच्छ्रेयसः ॥ २२ ॥

इत्याकर्ण्य जिनप्रणीतमनघं धर्मं गुरुभ्यस्ततः
पर्यालोच्य कुटुंबकेन गुणिना नागेंद्रनामा गृही ।
सिद्धाख्येन कृतां कथांमुपमितिं सिद्धांतसारोद्धृतां
तोषादेष सुधीर्व्यलीलिखदिमां स्वश्रेयसे पुस्तके ॥ २३

यावन्मेरुः प्रतपति रविर्द्योतते यावदिंदु-
र्यावद्वायुः स्फुरति गगने तारकाः संति यावत् ।
यावद्भूमिः प्रवहति पयः सागरे यावदेत-
त्तावन्नंद्याद्गुणिभिरनिशं पुस्तकं वाच्यमानं ॥ २४

मंगलं महाश्रीः ॥

**302. Kalpabhashya** and **Kalpasutra** [कल्पभाष्यं । कल्पसूत्रं च].

Folios 137 to 252 : $33\frac{1}{2}$ inches long, $2\frac{1}{4}$ inches broad. 10 to 14 lines in a folio. 120 to 130 aksharas in a line. Numbered as No. 183.

Folio 252. R. $\frac{\text{सू}}{२}$ L. २५२.

Kalpabhâshya begins :

॥ नमः श्रीवर्धमानाय ॥

•परिसए खित्तम्मीउ एस्स एक्केरिसंमि वसियव्वं ।
पुवुत्तदोसरहिए वीयाइ जढेससंबंधो ॥ १

Kalpabhâshya ends :

दीवणाय आराधणछिन्नसंसारी ॥ सर्वसंख्या ग्रंथाग्रं ३९७०॥
कल्पभाष्यं समाप्तं ॥ मंगलमस्तु ॥

Kalpasûtra begins :

॥ उवस्सयस्स अंतोवगडा यसालीणि वावी हीणिव ...
वितिउद्देश उसम्मत्तो ॥

Kalpasûtra ends :

णोकप्पति निग्गंथाणं निग्गंथीणं उवस्सए आसइत्तए वा चिट्ठित्तए वा ।

जिणकप्पट्ठिई थेरकप्पट्ठित्तीत्ति बेमि ॥ छ
कप्पे छट्ठो उद्देसउ सम्मत्तो ॥ ग्रंथाग्रं ३२१ सूत्रं ॥

**303. Avasyakatika** by HARIBHADRÂCHÂRYA [आवश्यकटीका। हरिभद्राचार्यः].

Folios 1 to 227; agreeing in all respects with No. 302.

**304. Chandraprajnaptitika** by MALAYAGIRI [चन्द्रप्रज्ञप्तिटीका। मलयगिरिः].

Folios 1 to 249 : 34½ inches long, 1⅓ inches broad. 6 to 8 lines in a folio. 135 to 145 aksharas in a line. The "granthâgra" is given as 9500. Dated Samvat 1445 = A.D. 1389.

**305. Chandraprajnaptisutra** [चन्द्रप्रज्ञप्तिसूत्रम्].

Folios 1 to 50; agreeing in all respects with No. 304. The "granthâgra" given as 1854.

**306. Laghusamgrahini** by CHANDRASÛRI [लघुसंग्रहिणी। चन्द्रसूरिः].

Injured. 50 folios.

**307. Strimokshavivada** [स्त्रीमोक्षविवादः].

Injured. 25 folios.

**308. Commentary** on the **Abhidhanachintamani** by HEMAÇHANDRA [अभिधानचिन्तामणेटीका। हेमचन्द्रः].

Folios 1 to 323 : 31½ inches long, 1⅓ inches broad. 6 to 8 lines in a folio. 140 to 150 aksharas in a line. The "granthâgra" is given as 10,000. Numbered as 183. Folio 323. R. स्ता व ३ L. ३२३.

**309. Bhavabhavana**, by HEMACHANDRA, with **Commentary** [भवभावना सटीका। हेमचन्द्रः].

Folios 1 to 325 : 29 inches long, 2½ inches wide. 14 lines in a folio. 120 to 135 aksharas in a line. The "granthâgra" is given as 12,950. Dated Samvat 1249 = A.D. 1193.

श्रीप्रभवाहनकुलांबुनिप्रसूनः[1]
क्षोणीतलप्रथितकीर्तिरुदीर्णशाखः ।
विश्वप्रसाधितविकल्पितवस्तुरुच्चै-
श्छायाश्रितप्रचुरनिर्वृतभव्यजंतुः ॥ १

ज्ञानादिकुसुमनिचितः फलितः श्रीमन्मुनींद्रफलवृंदैः ।
कल्पद्रुम इंव गच्छः श्रीहर्षपुरीयनामास्ति ॥ २

[2]तस्मिन् गुणमणिरत्नरोहणगिरिर्गांभीर्यपाथोनिधि-
स्तुंगत्वानुकृतक्षमाधरपतिः सौम्यत्वतारापतिः ।
सम्यग्ज्ञानविशुद्धसंयमतपःस्वाचारचर्यानिधिः
शांतः श्रीजयसिंहसूरिरभवन्निःसंगचूडामणिः ॥ ३

रत्नाकरादिवैतस्माच्छिष्यरत्नं बभूव तत् ।
स वागीशोपि नो मन्ये यद्गुणग्रहणे प्रभुः ॥ ४

श्रीवीरदेवविबुधैः सन्मंत्राद्यतिशयप्रवरतोयैः ।
द्रुम इव यः संसिक्तः कस्तद्गुणकीर्त्तने विबुधः ॥ ५

तथा हि ।

आज्ञा यस्य नरेश्वरैरपि शिरस्यारोप्यते सादरं
यं दृष्ट्वापि मुदं व्रजंति परमां प्रायोतिदुष्टा अपि ।
यद्वक्त्रांबुधिनिर्यदुत्कलवचःपीयूषपानोद्यतै-
र्गीर्वाणैरिव दुग्धसिंधुमथने तृप्तिर्न लेभे जनैः ॥ ६

---

[1] अंबुनिधिप्रसूतः ? [2] तस्मिन्सद्गुणरत्न° ?

कृत्वा येन तपः सुदुष्करतरं विश्वं प्रबोध्य प्रभो-
स्तीर्थं सर्वविदः प्रभावितमिदं तैस्तैः स्वकीयैर्गुणैः ।
शुक्लीकुर्वदशेषविश्वकुहरं भव्यैर्निबद्धस्पृहं
यस्याशास्वनिवारितं विचरति श्वेतांशुशुभ्रं यशः ॥ ७

यमुनाप्रवाहविमलश्रीमन्मुनिचंद्रसूरिसंपर्कात् ।
अमरसरितेव सकलं पवित्रितं येन भुवनतलं ॥ ८

विस्फूर्जत्कलिकालदुस्तरतमःसंतानलुप्तस्थितिः
सूर्येणेव विवेकभूधरशिरस्यासाद्य येनोदयं ।
सम्यग्ज्ञानकरैश्चिरंतनमुनिक्षुण्णः समुद्योतितो
मार्गः सोभयदेवसूरिरभवत्तेभ्यः प्रसिद्धो भुवि ॥ ९

निजशिष्यलवश्रीहेमचंद्रसूरिमुखेन विवृतिरियं ।
सूत्रयुता तैरेव हि विहिता श्रुतदेवतावचसा ॥ १०

सप्तत्यधिकैकादशवर्षशतैर्विक्रमादतिक्रांतैः ।
निष्पन्ना वृत्तिरियं श्रावणवदि पंचमीदिवसे ॥ ११

आसीन्मेढतकस्थाने बोधिस्थः श्रावको धनी ।
याहिका नाम तद्भार्या शीलादिगुणसंयुता ॥ १२

सौवर्णिकः प्रसिद्धोत्र समायातः सुतस्तयोः ।
[1]सासनासान्यतात्मा तु साधारणसमाह्वयः ॥ १३

सोहिणिनाम्नी भार्या पुत्रो लक्ष्मीधरोस्ति तस्येह ।
छत्रापल्यां च तथा वीरश्रेष्ठचंगसंभूतः ॥ ३

श्रेष्ठी यशोदेव इति प्रसिद्धो
यदेतयोर्वृत्तिरियं समग्रा ।

[1] सासनात्सोन्यनाम्ना ?

स्थितैर्गृहे चेल्लकनामकस्य
श्रेष्ठेस्तथा वीरकनंदनस्य ॥ ४
निष्पादितास्माभिरतोप्यमीषां
निःशेषकाणामपि मुक्तिहेतुः ।
संपद्यतां शीघ्रमसौ सहाय-
कर्माश्रितानामपरांगिनां च ॥ ५
प्रत्यक्षरगणनया ग्रंथाग्रं १२९९० मंगलं महाश्रीः ।
संवत् १२४९ श्रावणवदि ८ सोमे ॥ छ

**310. Commentary** on the **Vyavaharasutra** by MALAYAGIRI [व्यवहारसूत्रस्य टीका । मलयगिरिः].

Folios 1 to 374 : 32½ inches long, 2 inches broad. 10 to 12 lines in a folio. 145 to 150 aksharas in a line. Numbered as No. 183. Folio 374. R. सू ६ ऊ L. ३७४. The "granthâgra" is given as 33,625. Dated Samvat 1,309 = A.D. 1253.

**311. Vyavaharasutrasya Dasamoddesaka** [व्यवहारसूत्रस्य दशमोद्देशकः].

Folios 385 to 392: agreeing in all respects with No. 310. The "granthâgra" is given as 688. Dated as 310.

**312. Parsvanathacharitra** by MÂNIKYACHANDRA [पार्श्वनाथचरित्रम् । माणिक्यचन्द्रः].

Folios 1 to 187 : 33 inches long, 2½ inches broad. 10 to 12 lines in a folio. 145 to 156 akshâras in a line. Numbered as 183. Folio 186. R. सू ६ फु L. १८६.

Begins :

॥ ॐ नमो वीतरागाय ॥ अर्हं ॥
ॐ नमो विश्वमित्राय जैत्राय परमात्मने ।
लोकः कोक इव[1] स्तोकप्रीतिः संपद्यते यतः ॥ १ ॥

[1] इवास्तोक°?

Ends :

॥ ८१ ॥ इत्याचार्यश्रीमाणिक्यचन्द्रविरचिते महाकाव्ये श्री-पार्श्वनाथविहारनिर्वाणवर्णनो नाम दशमः सर्गः समाप्तः ॥

सद्वृत्तिलक्ष्मीरचलप्रतिष्ठा-
निकेतनस्फारसरस्वतीकः ।
मनुष्यलोकेप्रतिमः पृथिव्यां
श्रीकोटिकः स्फीतगणः समस्ति ॥१

सदापि नाकिश्रितपादभूमेः
कैलासकांतेरिह वज्रसूरेः ।
सदौषधीभेदविभासमाना
वज्राह्वया संततिचूलिकास्ति ॥ २

अस्ताघलक्ष्मीसुभगंभविष्णुः
कलाविलासिद्विजपुंडरीकः ।
श्रीराजगच्छः शुचिमांनसश्री-
स्तत्रास्ति गच्छः पृथ्वीपवित्रः ॥ ३

पुंसां विग्रहजं विकारमखिलं निर्मूलमुन्मूलयं-
स्तत्राद्यः समभूद्भवाभयभिषक् प्रद्युम्नसूरिर्गुरुः ।
येन स्वेदयता प्रयुज्य तरलां तर्कोज्ज्वलां भारतीं
वादीन्द्राः प्रविलापिनो घनतरं दर्पज्वरं त्याजिताः ॥ ४

दिगंबरसमाक्रान्तवैकपट्टं समाददे ।
यः प्रत्यक्षं नरेंद्रस्य जगतस्तद्यशः पुनः ॥ ५

तर्कग्रंथविचारदुर्गमवनीसंचारपंचानन-
स्तत्पट्टेभयदेवसूरिरजनि श्वेताम्बरग्रामणीः ।

सद्वाक्यश्रुतिलालसा मधुकरीकोलाहलाशंकिनी
हित्वा विष्टरपंकजं श्रितवती ब्राह्मी यदीयाननम् ॥ ६

दृङ्मिगाः सत्पथभेदमेता
ध्रुवं करिष्यंति जडैः समेताः ।
इतीव रोधाय चकार तासां
मन्थं नवं वादमहार्णवं यः ॥ ७

विद्वन्मंडलमौलिमंडनमणिः प्रेंखत्तपोहर्मणि-
र्निर्ग्रन्थोपि जिनेश्वरः समजनि श्रीमांस्ततः सद्गुरुः ।
यः स्फूर्जद्गुणपुंजमुंजजगतीजिष्णोः पुरः प्रज्ञिला-
न्वादे वादिवरान्विजित्य विजयश्रीसंग्रहं स व्यधात् ॥ ८

तत्पट्टपूर्वपर्वतमंडनमार्त्तंडमंडलश्रीकः ।
श्रीअजितसेनसूरिर्दूरितमस्तोमहज्ज्ञातः[1] ॥ ९

तर्कग्रंथपथप्रथापृथुमतिः क्ष्मापीठवाचस्पतिः
सूरिर्भूरिनयस्ततः समजनि श्रीवर्द्धमानाह्वयः ।
आस्थाने विदुषां यदीयवचनैरुत्कंटके वादिभि-
र्लेशेनापि भियेव नाम न पदोल्लासप्रयासः कृतः ॥ १०

श्रीसिद्धांतव्यवहृतिपटुस्तत्पदांभोजभृंगः
सूरिः श्रीमानजनि जगतीमंडनं शीलभद्रः ॥
अंगीकृत्या सकलसुमनःसाक्षिकं दीयमाना
व्यस्तव्याजं यदमलवचःसंपदाप प्रवृद्धिम् ॥ ११

अतुच्छराजगच्छश्रीसमुल्लासनलालसः ।
सूरिः कृपांबुधिरभूत्तत्पट्टे भरतेश्वरः ॥ १२

---

[1] °दूरितमस्तोमहत्?

द्राक्षे ख्यापय शक्तिमान्मविभवं[1] पीयूषपोषं नय
प्रख्याता भव सर्करे तव मधो माधुर्यमत्यस्फुटं (sic)।
खर्जूर प्रभवं प्रपञ्चय रसं सत्काव्य येनाधुना
न श्रोत्राणि पवित्रयन्ति कृतिनामस्मद्गुरूणां गिरः । १३

तत्पट्टपूर्णकलशाः श्रीवैरस्वामिसूरयो गुरवः ।
विकिरंतु दुरितनिकरं वितरंतु समीहितां सिद्धिं ॥ १४

ज्योतिःशास्त्रमहर्निशं गणयतां नैमित्तकान्पृच्छतां
चर्चां शाकुनिकैः समं कलयतां क्लेशो भवेत्केवलः ।
पूज्यानां यदि नाममंत्रकलना मैत्री पवित्रीकृता
नो मिथ्या शृणुतामुवन्ति परमां ते कार्यसिद्धिं जनाः ॥१५

षड्तर्कीललनाविलासवसतिश्चंचत्तपोहर्षति-
स्तत्पट्टोदयचंद्रमाः समजनि श्रीनेमिचंद्रप्रभुः ॥
निःसामान्यगुणैर्भुवि प्रसृमरैः प्रालेयशैलोज्ज्वलै-
र्यश्चक्रे कणभोजिनो मुनिपतेर्व्यर्थं मतं सर्वतः ॥ १६

यस्याश्रावसुधाकिरः सुचिगिरः श्रीभारती शृण्वती
कामं कंपयती स्म विस्मयरसाकीर्णापि न स्वं शिरः ।
मंदारप्रभृतिप्रभूतकुसुमश्रग्दामलीनालिनां
यद्वाणीश्रवणांतरायजननः कोलाहलः खेलति ॥ १७

यत्र प्रातिभशालिनामपि नृणां संचारमातन्वतां
संदेहैः प्रतिभाकिरीटपटली सद्यः समुत्सार्यते ।
नीरंध्रं विषमप्रमेयविटपिव्रातावकीर्णे सदा
तस्मिंस्तर्कपथे यथेष्टगमना यज्ञे[2] यदीया मतिः ॥ १८

---

[1] शक्तिमात्मविभवं? [2] जज्ञे?

शिष्यस्तस्य प्रशस्यः समजनि जगदानंदकंदांबुदश्रीः
सूरिः श्रीसागरेंदुर्वचनरसभरैर्यस्य सिक्तां जनौघः ।
रोमोद्भेदांकुराढ्यां सिरसि युतकरांभोजपत्रां प्रमोदा-
दभ्रांभोबिंदुपुष्पां सुकृतफलवतीं कायवल्लीं बिभर्ति ॥ १९

निर्व्याजं घनदानयोग्यजडतावस्त्वन्विता मन्मति-
र्यत्पादप्रभवप्रसादविलसत्सद्यक्षरैः[1] स्वीकृतैः ।
संदेहोल्वणसौक्ष्मिकैः प्रतिपदं बाधामनासादिता
ग्रंथाली पथकांतराणि परितः स्पष्टं समुज्जृंभते ॥ २०

गुरुप्रसादविगलज्जडिमैकतमस्तमः ।
सूरिर्माणिक्यचंद्रोभूत्तत्पादाब्जमधुव्रतः ॥ २१

वंशः सत्त्वगुरुस्थितिः समहिमा सद्धर्मकर्मोदया-
दस्ति स्वस्तिनिबंधनं मतिमतां श्रीभिल्लमालाह्वयः ।
आमूलं भुवनाद्भुतैकगुणभूः श्रीमेहिलस्यांगजो
बीरस्तत्र पवित्रवृत्तसदनं मुक्ताफलश्रीरभूत् ॥ २२

विमलमतिमृणालिनीमरालः
सकलकलाकमलावलीविवस्वान् ।
निरुपममहिमावनीभू[2]-
त्समजनि सूनुरमुष्य वर्द्धमानः ॥ २३

कुमारपालक्ष्मापालाजयपालमहीभुजोः ।
यः सभाभूषणं चित्रं जैनं मतमरोचयत् ॥ २४

त्रिभुवनपालः श्रीमान्मल्हः सद्मक्रमंदकः ।
प्रियसत्यः श्रीदेहड इत्यस्याः पुरुषोत्तमाः ॥ २५

---

[1] °सद्याक्षरैः ? [2] °महिमाहिमावनीभू° ?

सतीसीमंतमाणिक्यश्रीमादूकुक्षिसंभवाः ।
सच्चरित्राख्यः पुत्रास्तस्य शस्यधियोभवन् ॥ २६

प्रज्ञावता सत्कविपुंगवेन
श्रीपल्हणानात्मसुतेन साकं ।
माणिक्यसूरिं गुरुमन्यदेति
श्रीदेहडोजल्पदनल्पभक्तिः ॥२७

नीरागतानिधी राजगच्छभूर्गुणवारिधिः ।
सूरिः प्रद्युम्नसूर्याख्यः पूर्वं वः पूर्वजोऽभवत् ॥ २८

स पादलक्षगोपालत्रिभुवनगिर्यादिदेशगोपालान् ।
ययुश्चतुरधिकासीत्या (sic) वादजयैरंजयामास ॥ २८

श्रीअभयदेवसूरिस्तच्छिष्यस्तर्कभूरभूत् ।
भमासनालितुमुलाद्गीर्यदास्यमशिश्रियत् ॥ २९

जडोल्लासेन सन्मार्गभेदिनी दृक्तरंगिणी ।
रोद्धुं चकार स नवं ग्रंथं वादमहार्णवं ॥ ३०

तदाम्नायपुषां युष्मादृशानामपि युज्यतां ।
सद्ग्रंथकरणे स्फीतपरोपकरणे मतिः ॥ ३१

माणिक्यचंद्राचार्येण तस्येति प्रार्थनावशात् ।
श्रीपार्श्वनाथचरितं वाचां पथि विपंचितं ॥ ३२

गगनवसनमासायंत्रगं शीतरोचिः
सितकृमिजगुलुंछोदात्तरुक्तंतुजालैः ।
विरचयति विरंचिर्यावदुल्लासितारा-
कुसुमकमिह शास्त्रं नंदतात्तावदेतत् ॥ ३३

तमो विघटयन्नलिप्रतिममंबरारामतः
सदा दिनमुखे [1]विशाविकसदृक्षपुष्पोत्करं।
करैः किरणमालिकश्चटति यावदुल्लासिभि-
र्मतं जिनपतेर्मतं जयतु तावदेतत्क्षितौ ॥ ३४
श्रीसंघेन मयि क्रमांबुजरजःकल्पे पयःकल्पया
दृष्ट्या वाप इव प्रसादविटपी न्यस्तः परं पुष्यतां।
यस्माद्विश्वजनानुरागमहिमश्रीमंजरीसद्यसः-
पुष्पोल्लासि परोपकारकरणैश्वर्यं फलं चाप्यते ॥ ३५
रसर्षिरविसंख्यायां समायां दीपपर्वणि।
समर्थितमिदं वेलाकूले श्रीदेवकूपके ॥ ३६
ग्रंथाग्रं ९२७८ मंगलमस्तु ॥

श्रीपार्श्वनाथाय नमः ॥

यत्रानेकबुधा अनेककवयो धिष्ण्यानि भूयांस्यलं
चंद्रास्यापचयः[2] कलंकविकलः संजायते सर्वदा।
वक्रः कोपि न दृश्यते न च गुरुर्मित्रोदये निःप्रभः
पल्लीपालजनान्वयो नवनभोलक्ष्मीं दधानोस्ति सः ॥ १
तत्रोल्लासितलोकभूरिकमलः श्लिष्यत्प्रतापाकृती
राजा मंडलवृद्धिकारणतया प्रीतिं समुत्पादयन्।
दोषातिक्रमजातकांतिसुभगो बिभ्रत्सुवृत्तां तनुं
मार्त्तंडो जसदूर्धनी समभवच्चंदाणिपूर्भेडनं ॥ २
तद्भार्या योषितां वर्या परिचर्यापरायणा।
जिनेशचरणद्वंद्वे शोभना शोभनाजनि ॥ ३

---

[1] निशा°? [2] चंद्रस्योपचयः?

महाव्रतानीव सुताः स्युस्ताभ्यां पंच विभुताः ।
गुप्तित्रयमिवावद्यं पुत्रीत्रयं च जज्ञिरे ॥ ४

तेषां च ज्येष्ठः किल पूर्णचंद्रो
धर्मानुरक्तो यशश्चंद्रनामा ।
औचित्यचर्याचतुरस्त्वाभड-
नाहडजाल्हणश्च तथापरे ॥ ५

शीलमती च सहजू रत्नी च श्रावकव्रतं ।
श्रीयशोभद्रसूरीणां चरणांते प्रपेदिरे ॥ ६

कल्हणाल्हणरत्नश्च राजपालश्चतुर्थकः ।
पूर्णस्यागण्यपुण्यस्य तनयां मुनया अमी[1] ॥ ७

कल्हणाल्हणरत्नानां सुताः संति यथाक्रमं ।
अजयोऽद्यारिसिंहश्च[2] गुरुदेवार्चने रतौ ॥ ८

सुगुणसुवर्णशाली वित्राणेनैव गुरुगणाक्रमणं ।
सुकवेः श्लोक इव स्तनंधयस्तिहुणपालोभूत् ॥ ९

यशश्चंद्रजगद्देवोभूत्ततोपि वरदेवः ।
आभडः श्रीमानतुंगचरणांभोजषट्पदः ॥ १०

आभडस्य सुता एतेभयश्रीकुक्षिसंभवाः ।
पांडवा इव विख्याताश्चित्रं कौरवसंगताः ॥
प्रथमः पद्मसिंहाख्यो वीरचंद्रो द्वितीयकः ।
आसलो मूलदेवश्च देदलश्चाथ पंचमः ॥ - - - - - - -

---

[1] तनया मुनयोप्यमी ? [2] अजयश्चारिसिंहश्च ?

**313. Dasavaikalikaniryukti** [दशवैकालिकनिर्युक्तिः].

Folios 1 to 16: 30½ inches long, 2 inches broad. 6 to 10 lines in a folio. 140 to 150 aksharas in a line. The "granthâgra" is given as 445. Numbered as 183. Folio 16. R. ल्हे फु L. १६.

**314. Commentary** on the **Dasavaikalika** by HARIBHADRA [दशवैकालिकनिर्युक्तिटीका। हरिभद्रः].

Folios 1 to 173; agreeing in all respects with No. 313. Folio 167. R. सु मो L. १६७.

Begins:

॥ नमः श्रुतदेवतायै ॥

जयति विजितान्यतेजाः सुरासुराधीशसेवितः श्रीमान्। ...

Ends:

महत्तराया याकिन्या धर्मपुत्रेण चिंतिता।
आचार्यहरिचंद्रेण टीकेयं शिष्यबोधिनी ॥

दशवैकालिकटी

**315. Santinathacharita** by MUNIDEVASÛRI [शान्तिनाथचरित्रम्। मुनिदेवसूरिः].

Folios 1 to 245: 28¾ inches long, 1½ inches broad. Incomplete. Contains six sargas and part of the seventh.

**316. Upadesamala** by DHARMADÂSAGAṆI, with the **Commentary** of RATNAPRABHASÛRI [उपदेशमाला विशेषवृत्तिसहिता। मू० धर्मदासगणिः। टी० रत्नप्रभसूरिः].

Folios 1 to 311: 36 inches long, 2¼ inches broad. 8 to 10 lines in a folio. 142 to 146 aksharas in a line. Numbered as 183. Folio 311. R. स्ता र्दे १ L. ३११.

Commentary begins:

नमः श्रीदेवसूरिगुरुपादुकाभ्यः ॥

यस्यारघट्टस्य घनोपदेश-
मालार्पितध्यानघटाघटीभिः ।
संसारकूपाद्भवभृज्जलाना-
मूर्द्धं गतिः स्यात्स जिनोक्तताद्दः ॥

रागादिक्षपणपटुः स केवलश्री-
र्जैभारिव्रजमहितो यथार्थवाक्यः ।
नाभेयः स भवतु भूतये सदा न-
स्तीर्थस्याधिपतिरयं च वर्द्धमानः ॥

पायं पायं प्रवचनसुधां प्रीयते या प्रकामं
स्वैरं स्वैरं चरति कृतिनां कीर्त्तिवल्लीवनेषु ॥
दोग्ध्री कामाञ्चवनवरसैः सा भृशं प्रीणयंती
मादृग्वत्सान् जयति जगति श्रीगवी देवसूरेः ॥

विशुद्धसिद्धांतधुरं दधानां
संसारनिस्सारकृतावधानाम् ।
श्राद्धः सुधासिंधुमिमां विशालां
प्राप्नोति पुण्यैरुपदेशमालाम् ॥

सत्यामपि सद्वृत्तौ वृत्तिममुष्याः करोम्यहृदयोपि ।
त्वरयति यस्मान्मामिह सविशेषकथार्थिनां यत्नः ॥

तत्रादौ मंगलाभिधेयादिप्रतिपादनायाह ।

नमिऊणगाहा ॥

Commentary ends :

इति श्रीरत्नप्रभसूरिविरचितायामुपदेशमालाविशेषवृत्तौ चतुर्थो विश्रामः ॥

नानारूपनरोत्तमैकवसतिर्नीरागतासंगतः
पातालं परितः स्फुरन्निह वृहद्गच्छोस्ति रत्नाकरः ।
स श्रीमन्मुनिचंद्रसूरिसुगुरुस्तत्राभवद्भूरिभिः
शाखाभिर्भुवि यः प्रयागवटवद्विस्तारमुद्रामगात् ॥

साहित्यतर्कागमलक्षणेषु
यद्ग्रंथवीथीकविकामधेनुः ।
कस्योपकारं न चकार सम्यक्
निःशेषदेशेषु च यद्विहारः ॥

शिष्यः श्रीमुनिचंद्रसूरिगुरुभिर्गीतार्थचूडामणिः
पट्टे स्वे विनिवेशितस्तदनु स श्रीदेवसूरिप्रभुः ।
आस्थाने जयसिंहदेवनृपतेर्येनास्तदिग्वाससा
स्त्रीनिर्वाणसमर्थनेन विजयस्तंभः समुत्तंभितः ॥
तत्पट्टप्रभवोभवन्नथ गुणग्रामाभिरामोदयाः
श्रीभद्रेश्वरसूरयः शुचिधियस्तन्मानसप्रीतये ।
श्रीरत्नप्रभसूरिभिः शुभकृते श्रीदेवसूरिप्रभोः
शिष्यैः सेयमकारि सम्मदकृते वृत्तिर्विशेषार्थिनाम् ॥
श्रीदेवसूरिशिष्यभ्रातॄणां विजयसेनसूरीणां ।
आदेशस्यानृणभावमगममेतावताहमिह ॥
यदीयमुपदेशमाला आवलोकस्य[1] मूलसिद्धांतः ।
प्रायेण पठति चायं तदिहास्माभिः कृतो यत्नः ॥

[1] आबाललोकस्य?

व्याख्यातृचूडामणिसिद्धनाम्नः
प्रायेण गाथार्थ इहाभ्यधायि ।

क्वचित्क्वचिद्या तु विशेषरेखा
सद्भिः स्वयं सा परिभावनीया ॥

यदिह किंचिदनागमिकं क्वचि-
द्विरचितं मतिमंदतया मया ।

तदखिलं सुधियः क्षमयामि च
कृतकृपाः परिशोधयतादरात् ॥

स्वस्य परस्य च सूक्तैकवृत्तिर्विस्तारिता चकास्तीयम् ।
मणिखंडमंडलैरिव सुवर्णपूजा जिनेंद्राणाम् ॥

प्रकृता समर्थिता च श्रीवीरजिनाग्रतो भृगुपुरेसौ ।
अश्वावबोधतीर्थे श्रीसुव्रतपर्युपास्तिवशात् ॥

संशोधिता च संनिहितकतिपयैः सहृद्यैरियं प्रायः ।
पुनरपि कंटकशुद्धिः कार्या वः प्रार्थये सर्वान् ॥

भास्वद्भास्वरकांतकांततिलकं प्रक्षिप्तवच्चावृतं
निर्यन्नीलशिलातलांशुपटलीदूर्वारदूर्वांकुरं ।

यावन्मेरुमहीभृतं प्रतिकरोत्यारात्रिकोत्तारणं
ताराभिर्द्युविलासिनी विजयतां तावन्नवैषा कृतिः ॥

विक्रमाद्वसुलोकार्कवर्षे माघे समर्थिता ।
एकादशसहस्राणि मानं सार्धं शतं तथा ॥ १११५०

नमः श्रीवर्द्धमानाय वर्द्धमानाय वेदसा ।
वेदसारं परं ब्रह्म ब्रह्मबद्धस्थितिश्च यः ॥ १

स्वबीजगुप्तं कृतिभिः कृषीवलैः
क्षेत्रेषु सिक्तं शुभभाववारिणा ।
क्रियेत यस्मिन् सफलं शिवश्रिया
पुरं तदत्रास्ति दयावटाभिधम् ॥ २

ख्यातस्तत्रास्ति वस्तुप्रगुणगुणगणः प्राणिरक्षैकदक्षः
सज्ज्ञाने [1]लब्ध जिनवचनरुचिश्चंचदुच्चैश्चरित्रः ।
पात्रं पात्रैकचूडामणिर्जिनसुगुरूपासनावासनायाः
संघः सुश्रावकाणां सुकृतमतिरमी संति तत्रापि मुख्याः ॥३

हेनाकः सज्जनज्येष्ठः श्रेष्ठी कुमरसिंहकः ।
सोमाकः श्रावकः श्रेष्ठः शिष्टधीररिसिंहकः ॥ ४

कडुयाकश्शुश्रेष्ठी सोंगाक इति सत्तमः ।
खीस्वाकः सुहडाकश्च धर्मकर्मैककर्मठः ॥ ५

एतन्मुखः श्रावकसंघ एषो-
न्यदावदान्यो जिनशासनः सः ।
सदा सदाचारविचारचारु-
क्रियासमाचारशुचिव्रतानाम् ॥ ६

श्रीमज्जगच्चंद्रमुनींद्रशिष्य-
श्रीपूज्यदेवेंद्रमुनीश्वराणाम् ।
तदाद्यशिष्यत्वभृतां च विद्या-
नंदाख्यविख्यातमुनिप्रभूणाम् ॥ ७

तथा गुरूणां सुगुणैर्गुरूणां
श्रीधर्मघोषाभिधसूरिराजां ।

[1] लब्धलक्षो ?

सद्देशनामेवमपापभावां
शुभ्राव भावावनतोत्तमांगः ॥ ८

विषयसुखपिपासोर्गेहिनः क्वास्ति शीलं
करणवशगतस्य स्यात्तपो वापि कीदृक् ।
अनवरतमदभ्रारंभिणो भावनाः का-
स्तदिह नियतमेकं दानमेवास्य धर्मः ॥ ९

किंच ।

धर्मः स्फूर्ज्जति दानमेव गृहिणां ज्ञानाभयोपग्रहै-
स्त्रेधा तद्वरमाद्यमत्र यदि तौ निःशेषदानोदयः ॥
ज्ञानं चाद्य न पुस्तकैर्विरहितं दातुं च लातुं च वा
शक्यं पुस्तकलेखनेन कृतिभिः कार्यस्तदर्थोऽर्थवान् ॥ १०

श्रुत्वेति संघसमवायविधीयमान-
ज्ञानार्चनाद्भुतधनेन मिथः प्रवृद्धिं ।
नीतेन पुस्तकमिदं श्रुतकोशवृद्ध्यै
बद्धादरश्चिरमलेखयदेष हृष्टः ॥ ११

[1]यावज्जिनमतभानुप्रकाशिताशेषवस्तुविस्तारः ।
जगति जयतीह पुस्तकमिदं बुधैर्वाच्यतां तावत् ॥ १२

शुभं भवतु ॥

317. **Kalpachurni** [कल्पचूर्णिः].

Folios 1 to 136 : 34½ inches long, 2½ inches broad. 8 to 10 lines in a folio. 120 to 145 aksharas in a line.

Begins :

॥ ६॥ भद्दं सरस्सतीए सत्तस्सरकोसवयणवसहीए ।
जीय गुणेहिं कविवरा मयाविणासेहिं जीवंति ॥

[1] °भानुः?

उवस्सयस्स अन्तोवगडाए सुत्तं उच्चारयव्वं । अंतोवगडा नाम उवस्सगस्स अब्भंतरं अंगणं वा...

Ends:

संसारसंतर्तिं छेत्तुं मोक्कं पावतीति ॥ कल्पचूर्णी समाप्ता ॥

318. Vyavaharachurni [व्यवहारचूर्णिः].

Folios 1 to 270: 34½ inches long, 2½ inches broad. 8 to 10 lines in a folio. 120 to 140 aksharas in a line. Numbered as 183. Folio 270. R. थू L. स्ता २७०.

Begins:

॥ ॐ नमः सिद्धेभ्यः ॥

णमो जिणाणं ॥

उक्तः कल्पः अधुना व्यवहारस्यावसरः प्राप्तः तत्र कल्पव्यवहारस्यायं संबंधः ॥

Ends:

व्यवहारस्स भगवतः अर्थविवक्षया प्रवर्त्तनं दक्षं विवरणमिदं श्रमणगुणानाममृतमिति ॥ ॥ ग्रंथाग्रं १०२३० ॥ शुभं भवतु ॥

ले० खीवडेन लिखितं पुस्तकं ॥ मंगलं महाश्रीः ॥

ऊकेशवंशप्रभवे प्रसिद्धः
वाचाकपुत्रो नरसिंहसाधुः ।
सोहीतनूजास्तनयास्तदीयाः
सप्तैव [1]कृप्नोज्ज्वलधर्मकृत्याः ॥ १

तत्राद्यः सांगण इति चीताकस्त्रिभुवनश्च लाखाकः ।
रावणदेदाकावथ धानाक इति क्रमेणामी ॥ २

[1] कृप्नोज्ज्वल° ?

व्यवहारचूर्णिमेनामलीलिखन्निजसुतस्य सोमस्य ।
देवश्रीतनुजस्य श्रेयोर्थं साधुदेदकः ॥
जयति जिनशासनमिदं निर्वृतिपुरमार्गशासनं यावत् ।
मुनिभिरिह वाच्यमानस्तावदसौ पुस्तको नंद्यात् ॥

**319. Commentary** on the **Bhagavatisutra** by ABHAYADEVASÛRI [भगवतीसूत्रस्य टीका । अभयदेवसूरिः].

Folios 1 to 401 : 34½ inches long, 2½ inches broad. 10 to 14 lines in a folio. 135 to 150 aksharas in a line. The "granthâgra" is given as 18,616. Numbered as 183. Folio 401. R. स्ता १ L. ४०१. Dated Samvat 1298 = A.D. 1242.

**320. Commentary** on **Dharmadasagani's Upadesamala** [उपदेशमालाया धर्मदासगणिकृताया विवरणम्].

Folios 1 to 269 : 36 inches long, 2½ inches broad. 10 to 12 lines in a folio. 118 to 125 aksharas in a line. Numbered as 183. Folio 268. R. सू र्ण्ण L. २६८. Dated Samvat 1291 = A.D. 1235.

Begins :

॥ ॐ नमो वीतरागाय ॥
॥ हेयोपादेयार्थोपदेशभाभिः प्रबोधितजनाब्जं ॥

Text begins :

जगचूडामणि

Ends :

कृतिरियं जैनजैमिनिकणभुक्सौगतादिदर्शनवेदिनः सकलग्रंथार्थ-
— — — — — — —चार्यस्येति ॥
सिद्धर्षिकृता विवृतिः कथानकैर्योजिता स्वबोधार्थं ।
प्राक्तनमुनींद्ररचितैश्चारुभिरुपदेशमालायाः ॥

— — — — — — — — — संवत् १२९१ वर्षे आषाढशुदि १३ शनावुपदेशमालायाः पुस्तकं लिखितमिति ॥ मंगलं महाश्रीः ॥

**321. Commentary** on the **Suryaprajnapti**, by MALAYAGIRI [सूर्यप्रज्ञप्तिटीका । मलयगिरिः].

Folios 1 to 385 : $32\frac{1}{2}$ inches long, $1\frac{3}{4}$ inches broad. 6 to 8 lines in a folio. 140 to 150 aksharas in a line. Numbered as 183. Folio 385. R. स्ता ० L. ३८५. ट ●

Begins:

॥ नमः श्रीसर्वज्ञाय ॥

यथास्थितं जगत्सर्वमीक्षिता यः प्रतिक्षणं ।
श्रीवीराय नमस्तस्मै भास्वते परमात्मने ॥
श्रुतकेवलिनः सर्वे विजयंतां तमश्छिदः ।
येषां पुरो विभांति स्म खद्योता इव तीर्थिकाः ॥
जयति जिनवचनमनुपममज्ञानतमःसमूहरविबिंबं ।
शिवसुखफलकल्पतरुं प्रमाणनयभंगगमबहुलं ॥
सूर्यप्रज्ञप्तिमहं गुरूपदेशानुसारतः किंचित् ।
विवृणोमि यथाशक्ति स्पष्टं स्वपरोपकाराय ॥
अस्या निर्युक्तिरभूत्पूर्वं श्रीभद्रबाहुसूरिकृता ।
कलिदोषात्सानेशत् व्याचक्षे केवलं सूत्रं ॥

Ends:

सुकृती ३ ॥ इति मलयगिरिसूरिविरचिता सूर्यप्रज्ञप्तिटीका समाप्ता ।

**322. Suryaprajnaptisutra** [सूर्यप्रज्ञप्तिसूत्रम्].

Folios 1 to 88 ; agreeing in all respects with No. 321. Numbered as 183. Folio 88. R. ॐ ह्रीं L. ८८. The "granthâgra" is given as 2200.

**323. Salibhadracharitra** by DHARMAKUMÂRASÂDHU [शालिभद्रचरित्रम् । धर्मकुमारसाधुः].

Folios 1 to 147: 12¼ inches long, 1½ inches broad. 8 to 10 lines in a folio. 39 to 41 aksharas in a line. Numbered as 183. Folio 145.

R. सु प्त नृ L. १४५. Folio 147. R. सु प्त र्मा L. १४७.

Begins:

|| नमः श्रीसर्वज्ञाय ||

श्रीदानधर्मकल्पद्रुर्ज्जीयात्सौभाग्यभाग्यभूः ।
पूर्वापश्चिमतीर्थेशलक्ष्मीभोगमहाफलः || १
आदौ धनभवे येन घृतमेघायितं तथा ।
यज्ञे यथोर्वीशस्य श्रीः श्रीनाभेयः स वः श्रिये || २

Ends:

श्रीशालिर्गुरुराजकुंजरवराध्यारूढया प्रौढया
श्रीमद्धर्मधराधिपप्रहितया वैराग्यभंग्या स्वयं ।
स्वीचक्रे जगमुद्रयेव सहसा सर्वार्थसिद्ध्यैव य-
स्तस्यैतच्चरितं सतां प्रदिशतां कल्याणमालाश्रियः || ४७
प्रस्तुतं दानधर्मेण श्रीशालिचरितं शुभं ।
गोभद्रेण श्रीविबुधप्रभेण तु विशेषितं || ४८
श्रीमद्भद्रेश्वरवीरपदोपांते समर्थितं भूयात् ।
सकर्णकर्णानाममृतप्रातराशवत् || ४९
श्रीनागेंद्रमुनींद्रवंशविपुलक्षीरार्णवैरावणाः
श्रीहेमप्रभसूरयः प्रसृमरश्रीकीर्त्तिसांराविणः ।
तत्पट्टे प्रभुधर्मघोषगुरवो रेजुः स्फुरद्गौरवाः
श्रीसोमप्रभसूरयस्तरणयस्तत्पट्टपूर्वाचले || ५०

ब्रह्माणः[1] किल भारती श्रितवती यत्कंठपीठे मठी
गोविंदः[2] कमला यदंघ्रिकमलासेवासुहेवाकिनी ।
ईशनाः किमु गंगयेव महिता[3] गौर्या सुकीर्त्या च ये
श्रीसोमप्रभसूरयः सुमनसां मूर्द्धन्यतां ते दधुः ॥ ५१

तत्पट्टाचलचूलिका विजयते दंभाख्यजंभाजित-
श्रीः श्रीमान्विबुधप्रभः प्रभुरसौ सुज्ञानलीनाशयः ।
तस्य प्राप्य निदेशलेशमनिशं गीर्देवता ध्यानत-
श्चक्रे धर्मकुमारसाधुरमलां श्रीशालिलाकथां[4] ॥ ५२

इयं कथा वृद्धिकुमारिकेव[5]
सदूषणा भूषणवर्जितासीत् ।
प्रद्युम्नदेवस्य गुरुप्रसादात्[6]
बभूव पाणिग्रहणस्य योग्या ॥५३

प्रभाचंद्रेण गणिना गुणगौरवशालिना ।
अलेखि प्रथमादर्शे भक्तिव्यक्तिनिदर्शनं ॥ ५४

यावद्गानदिवाकरः शुभदिनश्रीसौविदल्लोहित-
स्तीर्थे पूर्वगिरावुदेति तिमिरध्वंसी विवेकारुणः ।
स्फीता तावदियं यतिक्षितिपतेः श्रीशालिभद्रप्रभो-
र्बुद्धैबोधकरैः सुमंगलकलाभोगावली कीर्त्तितां[7] ॥ ५५

श्रीशालिभद्रचरिते धर्मकुमारसुधिया कृते ।
श्रीप्रद्युम्नधियां सुदे[8] सप्तमधिक्रमोभवत् ॥ ५६

---

[1] ब्रह्माणं? [2] गोविंदं? [3] महितो? [4] श्रीशालिलीलाकथां? [5] वृद्धकुमारिकेव?
[6] गुरोःप्रसादात्? [7] कीर्त्यतां? [8] सप्तमाधिक्रमो?

इयं दानमहाधर्मकल्पद्रुम इवाद्भुतः ।
भूयात्समस्तभव्यानां मनोवांछितसिद्धये ॥ ५७
ब्राह्मी निर्मलशब्दसिद्धिकलिता मन्ये पवित्राशया
लक्ष्मीर्वा पुरुषोत्तमप्रियतमा नानार्थजातप्रसूः ।
[1]उद्युन्मंगशालिभद्रचरिता गौरीगिरीशप्रिया
जीयाद्धर्मकुमारपंडितमतिविस्तारिधर्मोन्नतिः[2] ॥ ५८

इति श्रीशालिभद्रचरिते सर्वार्थसिद्धिवर्णनो नाम सप्तमः प्रस्तावः समाप्तः ॥

जिनातिशययक्षाख्यवत्सरे विहिता कथा ।
ग्रंथेन द्वादशशती चतुर्विंशतिसंयुता ॥ १ ॥ छ

**324. Samavayangasutra** [समवायांसूगत्रम् ].

Folios 1 to 97 : 14½ inches long, 2 inches broad. 8 to 10 lines in a folio. 45 to 50 aksharas in a line. The "granthâgra" is given a 1667.

**325. Commentary** on the **Yogasastra** by HEMACHANDRA [योगशास्त्रस्य टीका । हेमचन्द्रः ].

Folios 1 to 258 : 12½ inches long, 1½ inches broad. 4 to 6 lines in a folio. 40 to 43 in aksharas in a line. Incomplete.

**326. Uttaradhyayanasutra** [उत्तराध्ययनसूत्रम् ].

Folios 3 to 139 : 12 inches long, 1½ inches broad. 4 to 6 lines in a folio. 50 to 57 aksharas in a line. Incomplete.

**327. Upadesamalavritti** [उपदेशमालावृत्तिः ].

Folios 3 to 205. Injured. Numbered as 183. Folio 186. R. सु ७ L. १८६. फु

**328. Karmavipakavrittiyadi** [कर्मविपाकवृत्त्यादि ।].

Folios 1 to 200. Injured.

**329. Samavayangavritti** [समवायांगवृत्तिः].

Folios 1 to 100. Dated Saṃvat 1349 = A.D. 1293. Injured.

---

[1] उद्यन्मंगलशालि° ? [2] °मतेर्विस्तारिधर्मोन्नतिः ?

**330. Kalpavrihachchurni** [कल्पवृहच्चूर्णिः].

Folios 1 to 240: 32½ inches long, 2½ inches broad. 8 to 10 lines in a folio. 127 to 130 aksharas in a line. The "granthâgra" is given as 8700. Numbered as No. 183. Folio 92. R. ६३/२ L. ९२. Folio 240. R. सू/ष/० L. २४०.

Begins:

नमः प्रवचनाय ॥

मंगलादीनि सत्थाणि मंगलमज्झाणि मंगलावसाणाणि । मंगलपरिग्गहिया य सिस्सा सुत्तत्थाणं अवग्गहेहावायधारणासमत्था भवंति । तानि चादिमध्यावसानमंगलात्मकानि सर्वाणि लोके विराजंति विस्तारं च गच्छंति ।

अनेन कारणेनादौ मंगलं मध्ये मंगलं अवसाने मंगलमिति । ...

कल्प्पचूर्णीपीठिका परिसमाप्ता ॥ ...

Ends:

एमेव तेल्लिगाहा कंठा ॥ पणित्ति महल्लावणावि पणित्ति दारिद्दावणा एवं दावणे पुच्छा य महगिरिणोत्ति । महागिरिणा अज्जसुहत्थी पुच्छितो अज्जो पउरो अहोरोवही[1] जाणेज्जासि । मा रन्ना लोगो पउत्ततो होज्जा । ताहे अज्जसुहत्थिणा अगविसित्ता चेव भणियं । अह्मं राया ममत्तं करेति । तेण अणुराया जणो लोतियं धम्मं मणुयत्तमाणो देन्ति संभोएत्ति । ताहे अज्जमहागिरिणा अज्जसुहत्थीभणितो । अज्जोउमं णाम एरिसो एवं भणसि । अगविसित्तत्ति । संभोगपत्थद्धं कंठं ॥ एवं पसंगेण गयं सो राया गाहाद्वयं कंठं ॥ ताहे अणुयाणे गाहा कंठा ॥ अणुजाणंति रधो तस्स पत्थतो गच्छंति ।

---

[1] आहारेविहा?

जं च ते करं देतीति याततु संपतिणा भणिया । जतिमं गाहाद्वयं घोसावणत्ति । सरेज्जेसु जे जणवया तेसु घोसावियं । जहा । समणाणं पणमह तेण । साधूणं पत्थद्धं । किंच समणगाहाद्वयं । चारहडसाहुवेसेणं एसणादिजुत्तं भिक्कं हिंडाविया । ते समणभडा सेस कंठं ॥ उदीर्ण्णैर्योधैराकुला सिद्धा सेना यस्य स उदीर्णयोधाकुलसिद्धसेन इति भगवतः कल्पचूर्ण्यां प्रथमोद्देशकः परिसमाप्तः ॥ वृहच्चूर्ण्णिग्रंथाग्रं ८७०० ॥

**331. A collection of books in one manuscript** [महत्पञ्चकल्पमित्यादि].

Folios 1 to 225: 30½ inches long, 2¼ inches broad. 10 to 14 lines in a folio. 145 to 152 aksharas in a line. Numbered as 183. See separate entries which follow.

**381, 1. Mahatpanchakalpabhashya** [महत्पञ्चकल्पभाष्यम् । संघदासः ].

Folios 1 to 67. Folio 43. R. $\frac{\text{ध}}{\text{३}}$ L. ४३. Folio 67. R. $\frac{\text{र्व्वे}}{\text{र्म्मा}}$ L. ६७.

Begins:

॥ नमः सर्वज्ञाय ॥

॥ वंदामि भद्दबाहुं पाईणं चरिमसगलसुयनाणी ।
सुत्तस्स कारगमिसिं दसाणकप्पे य ववहारे ॥ १

कप्पंति णाम निष्पण्णं महत्थं वत्तुकामतो णिज्जूहगस्स भत्तीए मंगलठाए संभूतिं ....

Folio 43:

मोक्खय चेव छिन्नसंसारो ॥ ७ ॥ दसकप्पो सम्मत्तो ॥
वुत्तो दसविहकप्पो अहुणा वीसतिविहं तु वोच्छामि ।
तस्स उ दारा इणमो संगहिया ईहिं गाहाहि कप्पेसु णाम कप्पो ठवणा...

Ends :

चरणकरणविसुद्धे आयरणपरूवणं कुणह ।
आयरियसमासार्उ[1] सोच्चा एच्चा[2] य घेतुमत्थेणं ॥
हियए ववत्थवेउं आपूरणकरणसमग्गो जत्थ जदा ।
गणप्पहाणो उ सो होइ गणथेरी गणचरियवियाणऊ वीरो ॥
पासत्थोसन्नकुसीलट्ठाणपरिरक्खर्उ दुपरक्खेवि ।
सो होइ गणथेरो गुणथेरगुणेहि उवउत्तो ॥

गणपरूषणा कुज्जा ।

कप्पपणगस्सभेदो परूविर्उ मोक्कसाहणट्ठाए ।
जं चरिऊण सुविहिया करेंति दुक्करकयं धीरा ॥
पंचविहमुत्तकप्पाण विभासावित्थरं पमोत्तूणं ।
गहिया सीसहियट्ठा [3]अव्वो—त्तठया चेव ॥ छ

महत्पंचकल्पभाष्यं संघदासक्षमाश्रमणविरचितं समाप्तमिति ॥ छ गाहग्गेणं पंचवीससयाइं चउहत्तराइं ॥ २५०४ सिलोयग्गाणं एगत्तीससयाणि ॥ ३१३० ॥ मंगलं महाश्रीः ॥

**331, 2. Panchakalpachurni** [पञ्चकल्पचूर्णिः].

Folios 68 to 135. Folio 68. R. $\frac{\text{दु}}{\text{फ्रा}}$ L. ६८. Folio 110. R. $\frac{\text{सु}}{\text{ल}}$ L. ११०.

Folio 134. R. $\frac{\text{ला}}{\text{एक}}$ L. १३४. Folio 135. R. $\frac{\text{सू}}{\text{दृ}}$ L. १३५.

Begins :

॥ ॐ नमः सिद्धेभ्यः ॥

मंगलादीणि सत्थाणि पूर्वाभिहितानि मंगलानि पूर्वं मा वास्मिन् तंत्रे कल्पाख्यनामनिष्पन्ने निक्षिपे भगवंतः तीर्थकराः ऋषभाद्याः कृतार्थे[4]-

[1] सगासार्उ ? [2] णच्चा? [3] The letter here looks like ल्ल. [4] कृतार्थाः?

कृतकृत्या इति कृत्वा तेषां नमस्कारः कृतः। अधुना नामनिष्पन्ने निक्षेपे पंचकल्पसंज्ञके येनेदं दशाकल्पव्यवहारसूत्रं प्रवचनमहितार्थं दाहूतं[1] तस्य नमस्कारं करोमि प्रत्येकशः गाहा यस्तत्र कर्त्तुः तत्राद्या गाथा ॥ वंदामि भद्दबाहुं ॥ वदि स्तुत्यभिवादनयोः वंदनं अर्चनं ...

Folio 68 :

गाहा ॥ आयारदसा जम्हा तेण भगवता आयारयस्स कप्पो दसा कप्पववहारा य नवमपूव्वनीसंदभूता निर्ज्जूढा तेनासौ पूजार्हः ...

Folio 110 :

इयाणिं वीसइविहकप्पो दाराणि । नामउवणादव्वकप्पो ३ खेत्तकप्पो ४ कालपकप्पो ५ दंसणकप्पो ६ सुयकप्पो ७ अज्झयणकप्पो ८ चरित्तकप्पो ९ उवहिकप्पो १० संभोगकप्पो ११ आलोयणकप्पो १२ उवसंपयकप्पो १३ अणुन्नकप्पो १४ अट्ठाणकप्पो १५ अणुवासकप्पो १६ ठियकप्पो १७ अट्ठियकप्पो १८ जिणकप्पो १९ अणुपालणकप्पो २० नामस्थापने पूर्ववत् ...

Folio 134 :

कप्पकप्पस्स[2] भेउ परूविउं मोरकसाहणट्ठाए ।
जं चरिऊण सुविहिया करेंति दुरक रकयं धीरा ॥ ७

पंचकल्पचूर्णिः समाप्ता ॥ ग्रंथप्रमाणं सहस्रत्रयं शतमेकं पंचत्रिंशत्युत्तरं ॥ ३१३५ ॥ मंगलं महाश्रीः ॥

Ends :

इत्याकर्ण्य ततो निजविभवैः श्रीकल्पसूत्रभाष्यस्य ।
श्रीपंचकल्पचूर्णेश्च पुस्तकं लेखयामास ॥ २०
यावद्दचोमसरोवरे० २१ ॥ मंगलं महाश्रीः ॥

---

[1] व्याहृतं ? [2] कप्पपकप्पस्सं ?

**331, 3. Dasasrutaskandhachurni** [दशाश्रुतस्कन्धचूर्णिः].

Folios 135 to 221. Folio 175. R. $\frac{\text{सु}}{\text{शु}}$ L. १७५. Folio 176. R. $\frac{\text{सु}}{\text{शु}}$ L. १७६. Folio 190. R. $\frac{\text{ल}}{\text{पृ}}$ L. १९०. Folio 221. R. $\frac{\text{सू}}{\text{१}}$ L. २२१.

Begins :

॥ नमः सर्वज्ञाय ॥

। नमो अरहंताणं । णमो सिद्धाणं । नमो आयरियाणं । णमो उवज्झायाणं । नमो लोए सव्वसाहूणं । सुतं मे आउसंतेण भगवता एवमक्खातं इंध खलु थेरेहिं भगवंतेहिं वीसं असमाहिट्ठाणा पन्नत्ता । इमे खलु ते थेरेहिं भगवंतेहिं वीसं असमाहिट्ठाणा पण्णत्ता तं जहा ॥ दवदवचरियावि भवति । अपमज्जियचारीयावि भवति...

Folio 175 :

आयातिट्ठाणनामं अज्झयणे सभट्ठं सहेउयं सकारणं सूत्तं च अत्थं च तदुभयं च भुज्जो २ उवदरिसित्तित्ति बेमि ॥ छ छ

नेव पावनियाणट्ठाणदसा दसमज्झयणं सम्मत्थं ॥ समत्तो आयारदसाउ ॥ शुभं भवतु ॥ ग्रंथाग्रं श्लो० १८३१ ॥ छ

Folio 176 :

॥ नमः सर्वविदे ॥

मंगलादीणि सत्थाणि मंगलमज्झाणि मंगलावसाणाणि ।
मंगलपरग्गहिता य सिस्सा अवग्गहेहापायधारणासमत्था ॥

अविग्घेण सत्थाणं पारगा भवंति ताणि य सत्थाणि लोगे वियरंति वित्थारं च गच्छंति । तत्थादिमंगलेण निव्विग्घेण सिस्सा सत्थस्स पारं गच्छंति । मज्झमंगलेणं सत्थं थिरपरिजियं भवइ । अवसाणमंगलेण सत्थं सिस्सपसिस्सेसु पचयं गछंति । तत्थादिमंगलं ॥

सुतं मे आउसंतेण भगवता एवमक्खातं इह खलु थेरेहिं भगवंतेहिं वीसं असमाधिट्ठाणा पन्नता । मज्झमंगलं । पज्जोसवणाकप्पो पढमं सुतादारब्भ जाव थेरावलिया परिसम्मत्ता ॥ अवसाणमंगलं । तेणं कालेणं तेणं समएणं समणे भगवंतमहावीरे रायगिहे नगरे गुणसिलए चेइए बहूणं समणाणं जाव आयाति ठाणं नाम अज्झो अज्झयणं सअट्ठं सहेतुयं सकारणं भुज्जो उवदंसेमि त्ति बेमि ॥ तं पुण मंगलं नामादिचतुर्विधं । आवस्सगाणुक्कमेण परूवेयव्वं । तत्थ भावमंगलं निज्जुत्तिकार आह ।

वंदामि भद्दबाहुं गाहा ॥ भद्दबाहुं नामेणं पाईणा गोत्तेण चरिमो अपच्छिमो । ...

Folio 190:

गणिसंपदा चउत्थं अज्झयणं समत्तं ।...

Ends:

जण्ण भणितं तं कंठं ॥ पंचमज्झयणं समाप्तं ।
जात्यंधः सेसं कंठं जावणयावि । जावकरणणयो सव्वेसिंपि णयाणं गाधा ॥ दशानां चूर्णी परिसमाप्ता ॥ छ

संवत् १३२१ वर्षे...श्रेयोर्थं दशाश्रुतस्कंधस्तत्रचूर्णिर्लेखापिता ॥छ

**331, 4. Âyaradasanijjutti** [आयारदसानिज्जुत्ती].

Folios 221 to 225.

Begins:

॥ नमः सर्वज्ञाय ॥

वंदामि भद्दबाहुं०

आउविवागज्झयणाणि भावउं दव्वउं उवत्थदसा ।
दसआउविवागदसा वाससयाउं दसहत्थेत्ता ॥ २...

Ends :

१५ आचारदसाणं निज्जुत्ती सम्मत्ता ॥ १४४ गाथा श्लोक १८० शुभं भवतु ॥

332. Pannavanasutra [पन्नवणासूत्रम्.]

Folios 1 to 161 : 32½ inches long, 2 inches broad. 10 to 14 lines in a folio. 165 aksharas in a line. Numbered as 183. Folio 161. R. सु थु १ L. १६१.

Folio 34:

उमुक्ककम्मकवया अजरा अमरा असंगया णिच्छिन्नसव्वदुक्खे जाइजरामरणबंधणविमुक्का अवावाहं सोक्खं अणुहंती सासयं सिद्धा ॥ द्वितीयपदं समत्तं .....

दिसगतिइंदियकाए जोगे वेदे कसायलेस्सा य ।
सम्मत्तणाणदंसणसंजयउउगआहारो ।...

Folio 37 :

पज्जत्तगा संखेज्जगुणा सकाइया पज्जत्तगा विसेसाहिता । सकाइया विसेसाहिता ॥ ठ ॥ सूत्राणि पंच सामान्येन प्रतिपादितानि । अधुना सूक्ष्मबादराभेदेन पंचदश सूत्राण्याह ॥ एतेसिणंसु भं ते सुहुमाणं सुहुमपुढविकाइयाणं । - - -

333. Avasyakaniryuktichurni [आवश्यकनिर्युक्तिचूर्णी].

Folios 1 to 257 : 33 inches long, 2½ inches broad. 10 to 12 lines in a folio. 110 to 122 aksharas in a line. Numbered as 183. Folio 257. R. सू ८ र्ग्रा L. २५७.

Begins:

॥ ५ ॥ तेणं कालेणं २ दसण्णपुरं नाम नगरं होत्था ।

Ends:

इति आवस्सगनिज्जुत्तिचूर्णी समाप्ता ॥

**334. Upadesamalavritti** [उपदेशमालावृत्तिः].

Folios 1 to 322: 36½ inches long, 2¼ inches broad. 8 to 10 lines in a folio. 148 to 156 aksharas in a line. Numbered as 183. Folio 322. R. स्ता ध २ L. ३२२.

Commentary begins:

॥ अर्हं ॥

हेयोपादेयार्थो॰

Text begins:

जगचूडामणिभूउ उसहो

Book ends:

नमोस्तु तस्मै हरिभद्रसूरये ॥ १

उत्सूत्रमत्र विवृतं॰ २

**335. Vasudevahinda** [वसुदेवहिंडस्य प्रथमखण्डः].

Folios 1 to 308: 36 inches long, 2 inches broad. 8 to 10 lines in a folio. 140 to 156 aksharas in a line. Numbered as 183. Folio 306. R. स्ता ० ङ्कि L. ३०६.

Begins:

॥ ॐ नमो वीतरागाय ॥

॥ णमो विणयपणयसुरिंदविंदवंदियकुमारविंदाणं ।
अरिहंताणं णमो परिसुद्धणाणदंसणसमिद्धाण सिद्धाणं ॥
नमो जिणप्पणीयायारविहिवियक्खणाणं आयरियाणं ।
णमो सीसगणपरमसुयसंपयज्झावयाणं उवज्झायाणं ।
णमो सिद्धिवसहिगमणकारणजोगसाहणाणं साहूणं ॥

एवं पंचणमोक्कारपरममंगलवलत्तिवड्ढिउंच्छाहो ।
अणुउगधरे सिरसा पणमिऊण विण्णवेमि ॥

अणुजाणंतु मं गुरुपरंपरागयं वसुदेवचरियं णाम संगहं वन्नइस्सं । तत्थ इमे अहिगारा । तं जहा । कव्वुपत्ती पेढियामुहं सरीरं उवसंहारो । तत्थ ताव सुहंमसामिणा जंबुणामस्स पढमाणुउगे तित्थय रवव्वावड्ढि[1]दसारवंसपन्नवणागयं वसुदेवचरियं कहियंति । तस्सेव पभवो काहयव्वो । तप्पभवस्स य पभवस्सति ॥ अत्थि मगधाजणवउं धणधन्नसमिद्धदाणधणवतिकुलबहुगगामसयसण्णिमहिउं . . .

Ends:

सच्चभामाघरं णाएहि तं धणुं आरुहेउं अणोहवि कण्हेण आरुहियं आगंत्तण य ममसमीवे एति ताय मम समीवे णिवेएति ता य मया सच्चभामाघरे धणुं विलइयंति । मया भणियं पुत्त सुट्ठु कयं ते धणुं सजीवियं करंतेण एवं पुव्वविवत्थियं जो एयं धणुं सजीवं करेइ तस्स एसा दारिया दायव्वा ॥ समाप्तं प्रथमखंडं ॥ छ ॥ ग्रंथाग्रं ११२००

336. **Anuyogachurni** by JINADÂSAGAṆI [अनुयोगचूर्णिः । जिनदासगणी ].

Folios 1 to 53 : 32½ inches long, 2 inches broad. 10 to 12 lines in a folio. 117 to 120 aksharas in a line. Numbered as 183. Folio 53. R. ७/३ L. ५३. Dated Samvat 1333 = A.D. 1277.

Begins :

ॐ नमो वीतरागाय ॥

कंचि पंचविहायारजाणयं तप्परूवणे अउज्जत्तं तद्धिअं व गुरुं पणमिऊण जातिकुलरूवविणयादिगुणसंपन्नो य सीसो भणाई । भगवं तुभ्भं तिए अणुयोगद्वारक्कमं समोतारं तदत्थं वण्णातुमिच्छामि ।

[1] चक्कवट्टि ?

ततो गुरुत्तं सीसविणयादिगुणसंपन्नं जाणिऊण तदरिहंउ ततो भणाति सुणेहि कहेमि ते अणुउगद्दारत्थं तक्कमं च । जधा य सव्वज्झयणेसु समोया रिज्जंति । तं च कहेकामो गुरू विग्घोवसमणिमित्तं आदीयमंगलपरिग्गहं करेइ ॥ ...

Ends:

तं सव्वं इत्यादि । चरणमेव गुणो चरणगुणो अहवा चरणं चारित्रं गुणा खमादिया[1] अणेगविधा तेसु जो जहट्ठिउ साधू सो सव्वणयसंमतो भवतीति ॥

कृतिः श्रीश्वेतांबराचार्यश्रीजिनदासगणिमहत्तरपूज्यपादानामनुयोगद्वाराणां चूर्णिः ॥ संवत् १३३३ चैत्र शु ११ बुधेद्येह धवलक्कके ।

**337. Anuyogadvarasutra** [अनुयोगद्वारसूत्रम्].

Folios 1 to 55; agreeing in all respects with No. 336. Folio 55. R. $\frac{6}{12}$ L. ५५. Dated Samvat 1301 = A.D. 1245.

Begins:

नमो वीतरागाय ।

नाणं पंचविहं पण्णत्तं । तं जहा । आभिणिबोहियणाणं सुयणाणं ओहिणाणं मणपज्जवणाणं केवलणाणं । तत्थ चत्तारि णाणाइं उप्पाइंउ वणिज्जाइं नो उद्धिस्संति । णो समुद्दिस्संति । णो अणुण्णविज्जंति । सुयणाणस्स उद्देसो समुद्देसो अणुण्ण अणुउगो पवत्तइ । जइ सुयणाणस्स उद्देसो सउद्देसो अणुण्ण आणुउगो पवत्तइ ॥ ...

Ends:

उवएसो नउनामा । सव्वेसिं पि नयाणं०

अणुउगदारा सम्मत्ता ॥ छ

सोलससयाणि चउरुत्तराणि गाहाणं जाण सव्वग्गं ।
दुसहस्समणुहसछंदवित्तपरिमाणउ भणियं ॥

[1] खमादया ?

नगरमहादारा इव कम्मद्दाराणुउगवरदारा ।
अक्खरबिंदुमत्ता लिहिया दुक्खक्खयट्ठाए ॥ छ

सं० १३०१ वर्षे आषाढ शु० १० शुक्रे धवलक्ककनगरनिवासिना प्राग्वाटवंशोद्भवेन व्य० पासदेवसुतेन गंधिकश्रेष्ठिधीणाकेन वृहद्भ्रातासीद्धाश्रेयाऽर्थं सवृत्तिकमनुयोगद्वारसूत्रं लेखयांचक्रे ॥ छ

338. **Prithvichandrarajarshicharitra** [पृथ्वीचन्द्रराजर्षिचरित्रम्].

Folios 152: 29 inches long, $1\frac{3}{4}$ inches broad. 10 to 12 lines in a folio. 152 to 166 aksharas in a line. R. र्ल्ह्रा L. १८. Incomplete.

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

# APPENDIX II.

## EXTRACTS FROM BOOKS PRESERVED IN LIBRARIES AT AHMEDABAD, BOONDI, KOTAH, JHALRA PATHAN, INDORE, AND CAMBAY.

# PAPER MANUSCRIPTS.

## A

*List of the more important Paper MSS. preserved in the Temple of Santinath, Cambay.*

1. **Anekantajayapataka** by HARIBHADRASÛRI. [ अनेकांत-जयपताका । हरिभद्रसूरिः ].

Folios 1 to 97: 26 lines in a folio. 46 aksharas in line. Granthâgra 3350.

Ends:

कृतिरियं श्वेतभिक्षुश्रीहरिभद्राचार्यस्येति ॥

मतिर्बौद्धाः शुद्धा प्रभवति कथं साद्य भवतां
विचारश्चार्वाकाः प्रचरति कथं चारुचतुरः ।
कुतर्कस्तर्कज्ञाः किमपि स कथं तर्कयति वः
सति स्याद्वादांगे प्रकटहरिभद्रोक्तवचने ॥ १

भावग्रंथिप्रमाथिप्रकटपटुरणत्कारवाग्भारतुष्टाः
प्रेंखद्दर्पिष्टदुष्टप्रमददसभुजास्फालनोत्तालवालाः ।
यद्दृष्ट्वा मुक्तवंतः स्वयमतनुमदं वादिनो हारिभद्रं
तद्गंभीरं प्रसन्नं न हरति हृदयं भाषितं कस्य जंतोः ॥ २

यथास्थिताऽर्हद्गतवस्तुवेदिने
निराकृताशेषविपक्षवादिने ।
विदग्धमध्यस्थनृमूढतारये
नमोऽस्तु तस्मै हरिभद्रसूरये ॥ ३

सितपटहरिभद्रग्रंथसंदर्भगर्भं
विदितमभयदेवं निष्कलंकाकलंकं ।
सुगतमतमथालंकारपर्यंतमुच्चै-
स्त्रिविधमपिवतार्कं तेतियं सांख्यभट्टौ ॥ ४

श्रीमत्संगमसिंहसूरिसुकवेस्तस्यांघ्रिसेवापरः
शिष्यः श्रीजयसिंहसूरिविदुषस्त्रैलोक्यचूडामणेः ।
यः श्रीनागपुरप्रसिद्धसुपुरस्थायी श्रुतायागतः
श्लोकान् पंच चकार सारजडिमासौ यक्षदेवो मुनिः ॥ ५

समाप्तं चेदमनेकांतजयपताकासूत्रं संपूर्णमिति ॥ ग्रंथ ३३५०

2. **Jnanabinduprakarana** by YAŚOVIJAYA. [ज्ञानबिन्दुप्रकरणम् । यशोविजयः].

Folios 1 to 32: 30 lines in a folio. 48 aksharas in a line. Dated Samvat 1731 = A.D. 1675.

Begins:

ऐंद्रस्तोमनतं नत्वा वीरं तत्त्वार्थदेशिनं ।
ज्ञानबिंदुः श्रुतांभोधेः सम्यगुध्रियते मया ॥ १

Ends:

गच्छे श्रीविजयादिदेवसुगुरोः स्वच्छे गुणानां गणैः
प्रौढिं प्रौढिमधाम्नि जीतविजयप्राज्ञाः परामैयरुः ।
तत्सातीर्थ्यभृतां नयादिविजयप्राज्ञोत्तमानां शिशु-
स्तत्त्वं किंचिदिदं यशोविजय इत्याख्यानृदाख्यातृवान्[1] ॥ ९

इति श्रीमहोपाध्यायश्रीकल्याणविजय ग० शिष्यमुख्यपंडित-श्रीलाभविजय ग० शिष्यालंकारपंडितश्रीजीतविजय ग० सुतीर्थ्य-

[1] आख्याभृदाख्यातवान्?

तिलकपंडितश्रीनयविजय ग० चरणकमलचंचरीकेण पंडितश्रीपद्मविजयसहोदरेणोपाध्यायश्रीयशोविजयगणिना रचितं ज्ञानबिंदुप्रकरणं संपूर्ण ॥

3. **Vrihatkshetrasamasavritti** by SIDDHASÛRI [बृहत्क्षेत्रसमासवृत्तिः । सिद्धसूरिः].

Folios 1 to 46. 38 lines in a folio. 60 aksharas in a line.

Praśasti :

श्रीमदूकेशगच्छीयश्रीसिद्धाचार्यकृता समाप्तेति ॥

प्रसिद्ध ऊकेशपुरीयगच्छे
श्रीकक्कसूरिर्विदुषां वरिष्ठः ।
साहित्यतर्कागमपारदृश्वा
बभूव सल्लक्षणलक्षितांगः ॥ १

तदीयशिष्योजनि सिद्धसूरिः
सद्देशनाबोधितभव्यलोकः ।
निर्लोभनालंकृतचित्तवृत्तिः
सज्ज्ञानचारित्रदयान्वितश्च ॥ २

श्रीदेवगुप्तसूरिस्तच्छिष्योभूद्विशुद्धचारित्रः ।
वादिगजकुंभभेदनपटुतरनखरायुधसमानः ॥ ३

तच्छिष्यः सिद्धसूरिः क्षेत्रसमासस्य वृत्तिमियमकरोत् ।
गुरुभ्रातृयशोदेवोपाध्यायज्ञातशास्त्रार्थः ॥ ४

उत्सूत्रमत्र किंचिन्मतिमांद्याज्ञानतो मयालेखि ।
निर्व्याजं विद्वद्भिस्तच्छोध्यं मयि विधाय दयां ॥ ५

खैः षण्णवत्यांकैश्चतुःषष्टया द्वात्रिंशताक्षरैः ।
श्लोकः श्लोकमानेन त्रिसहस्री ग्रंथसंख्या तु ॥ ६

अब्दशतेष्वेकादशसु द्विनवत्याधिकेषु विक्रमतः ।
वैशाखशुक्लपक्षे समार्थिता शुक्लपंचम्यां ॥ ७

यावज्जैनेश्वरो धर्मः समेरुर्वर्त्तते भुवि ।
भव्यैः पापठ्यमानो ---- ग्रंथाग्रं २०००

4. **A Short Commentary** on HARIBHADRASŪRI'S **Anekantajayapatakatippana** [अनेकान्तजयपताकाटिप्पणम्].

Folios 1 to 44. 30 lines in a folio. 48 aksharas in a line.

Begins:

शेषमतमतिशयाना यस्यानेकांतजयपताकेह ।
हर्तुमशक्या केनापि वादिना नौमि तं वीरम् ॥ १

कतिपयविषमपदगतं वक्ष्येनेकांतजयपताकायाः ।
वृत्तेर्विवरणमहमल्पबुद्धिबुद्ध्यै समासेन ॥ २

Ends:

इत्यनेकांतजयपताकोद्योतटिप्पणकं समाप्तम् ॥
प्रत्यक्षरगणनायां टिप्पणकस्य मानं ग्रंथः २०००

6. **Mahavirastavana** by YAŚOVIJAYA [महावीरस्तवनम् । यशोविजयः].

Folios 1 to 74. 42 lines in a folio. 58 aksharas in a line. Dated Samvat 1736 = A.D. 1680.

Ends: ॥

महोपाध्यायश्रीयशोविजयगणिभिः कृतमिदं न्यायखंडखाद्यापरनामकं महावीरस्तवनप्रकरणं संपूर्णम् ॥

7. **Padmacharitra** or **Ramacharitra** by VIMALASŪRI [पद्मचरित्रं वा रामचरित्रम् । विमलसूरिः].

Folios 1 to 151. 42 lines in a folio. 52 aksharas in a line. Dated Samvat 1609 = A.D. 1553.

Begins:

सिद्धसुरकिन्नरोरगदणुवइभवणिंदचंदपरिमहिय ।
उसहं जिणवरवसहं अवसप्पिणिआइतित्थयरं ॥ १ ...

नामावलिबनिबद्धं आयरियपरंपरागयं सव्वं ।
वुच्छामि पउमचरियं अहाणुपुव्विं समासेणं ॥ ७८ ...

को वण्णिऊण तीरइ नीसेसं पउमचरियसंबंधं ।
[1]मन्नूण केवलिजिणं तिकालनाणं हवइ जस्स ॥ ९

डाहाले कौशले वा विगलितसलिले जंगले वा तमाले
श्री० ॥ ५ ॥ ...✓
चंपायां चंद्रमुख्यां गजपुरमथुरापत्तने चोज्जयिन्यां
कोशांब्यां कोशकायां कनकपुरवरे देवगिर्य्यां च काश्यां ।
नाशिक्ये राजगेहे दशपुरनगरे भद्दिले तामलिप्यां
श्रीमत्तीर्थंकराणां प्रतिदिवसमहं तत्र चैत्यानि वंदे ॥ ७

---

## B

*List of the more important paper MSS, preserved in the Library of the late Kalyanachandra, Cambay.*

1. **Avasyakasaptati** by MUNICHANDRASÛRI with the **Commentary** of MAHEŚVARÂCHÂRYA [आवश्यकसप्तति: पाक्षिकसप्तत्यपरनाम्नी सटीका । मू० मुनिचन्द्रसूरिः । टी० महेश्वराचार्यः].

Commentary begins :

श्रीगौतमाय नमः ॥
श्रीमते वर्द्धमानाय जिनेंद्राय जगद्विदे ।
सुरासुरनमस्याय वागीशाय नमो नमः ॥ १
अनन्यसाधारणशीलसंपदे
विनम्रविद्वज्जनमुद्रितापदे ।
दिगंबराडंबरभंगसूरये
प्रणम्य तस्मै गुरुदेवसूरये ॥ २

स्वगुरूणामपि श्रीमद्गुरूणामनघा गिरः ।
सिद्धांतगर्भसंदर्भाः किंचित्किंचिद्विवृण्महे ॥ २

इह किल कलिकालबलप्रबलकुतर्ककर्कशप्रादुर्भवत्कुग्रहाग्रहावेशवशीकृतांतःकरणाः केचित्तपस्विनः कष्टानुष्ठानेनात्मानमायासयंतः संतोन्यानपि मुग्धबुद्धीन्व्यामोहयंति ततस्तानेवंविधानवलोक्य अपारकरुणासारसुधारसैकपारावाराः अनेकांतजयपताकाचारुचारीसंचारचतुरनर्तकीनर्तनसूत्रधाराः दुःखमासमयसमुल्लासितप्रमादपातालतलावमज्जन्निःकलंकानुष्ठाननिष्ठाधरणीसमुद्धरणादिवराहरूपाः संसारकांतारांतःपरिभ्रांतनितांतभ्रांतजंतुजातसंतापनिर्वापकसहेनामृतकूपाः कर्मप्रकृत्याद्यखिलखिलग्रंथग्रंथाभिदुरस्वशेमुषीविमुखीकृताखर्वगर्वसुपर्वसूरयः पूज्याः श्रीमन्मुनिचंद्रसूरयः सूर्या इव मूलोन्मूलिततमस्संभारेण स्वगोप्रस्तारेण तेषां सन्मार्गप्रबोधमुत्पादयितुं तद्विप्रतार्यमाणान्यजंतुजातमवबोधयितुमात्मस्मृतिं विधातुं च सिद्धांतोद्धारसारभूतं प्रमाणनिष्पन्ननामकमावश्यकसप्तत्याख्यं प्रकरणमारभमाणाः प्रत्यूहव्यूहापोहाय स्वाभिमतं प्रत्यासन्नोपकारित्वाच्चरमतीर्थाधिपतिं यथार्थाभिधानं श्रीमन्महावीरमभिष्टुवंतः साक्षादभिधेयप्रयोजनाभिधायिकामिमामादावेव गाथां प्राहुः ॥

Text begins:

देविंदविंदवंदियपयपउमं वंदिउं जिणं वीरं ।
आवस्सयस्सरूपं समासउं किंपि जंपेमि ॥ १

Text ends:

मुणिचंदसूरिणा सुमरणत्थमिणमप्पणो पवचणाउ ।
उद्धरियं जुत्तिजुयं परेसि संबोहणत्थं च ॥ ७० ॥

Commentary ends :

श्रीदेवसूरिगुरोः[1] स्फुटनाममंत्र-
नित्यस्मृतिस्तदुपदेशवशेन वृत्तिं ।
श्रीमन्मुनींद्रमुनिचंद्रकृतावमुष्यां
सूरिर्महेश्वर इति प्रकटां चकार ॥ १

सिद्धांततर्कसाहित्यलक्षणेषु विचक्षणैः ।
वज्रसेनसुधीरस्मत्सहाय्यं कृतवानिह ॥ २

मूलग्रंथनिरीक्षणोत्सुकमनाः कृत्वा तदन्वेषणां
प्रादुर्भूतगुरूक्तिनिश्चलमतिर्वृत्तिं यतो निर्ममे ।
तद्युष्माभिरशेषशास्त्रहृदयग्राहि स्फुरन्निर्मल-
प्रज्ञैरज्ञजनैरिवात्र न मनः कार्यं समारोपभूः ॥ ३

विपक्षाक्षेपविक्षेपवलक्षं दिक्षु यद्यशः ।
मतिः सिद्धांतशुद्धा च तत्सद्यः फलमस्य तु ॥ ४

इति श्रीमुनींदुसूरिविरचितायामावश्यकसप्ततिकायां श्रीदेवसूरि-पूज्यपादपद्मोपजीविना श्रीमहेश्वराचार्येण विरचिता सुखप्रबोधिनी वृत्तिः समाप्ता ॥

2. **Jayatihuyanastotra** by ABHAYADEVASÛRI with a **Commentary** [जयतिहुयणस्तोत्रं सटीकम् । मू० अभयदेवसूरिः ].

Folios 1 to 6.

Begins :

॥ ॐ नमः सिद्धं ॥

जय तिहुयणवरकप्परुक्ख जय जिणधन्नंतरि
जय तिहुयणकल्लाणकोस दुरियक्करिकेसरि ।

[1] श्रीदेवसूरिसुगुरोः ?

तिहुयजणअविलंघिआण भुवणत्तयसामिय
कुणसु सुहाइ जिणेस पास थंभणयपुरट्ठिय ॥ १

अत्रायं वृद्धसंप्रदायः ॥

पुरा भगवान् श्रीअभयदेवसूरिर्गूर्जरयात्रायां शंभाणकस्थाने विहृतवान् । तत्र च महाव्याधिवशेनातीव शरीरापाटवे सति प्रत्यासन्ननगरग्रामेभ्यः पाक्षिकप्रतिक्रमणाय समाजिगमिषुर्विशेषेण समाहूतो मिथ्यादुःकृतदानाय सर्वश्रावकसंघः । त्रयोदश्यर्द्धरात्रे चाभाणि शासनदेवतया । प्रभो स्वपिषि जागर्षि वा । ततो मंदस्वरेणोक्तं भगवता । जागर्मि । पुनरूचे तया । प्रभो शीघ्रमुत्तिष्ठत चैताः सूत्रकुकुटिका उन्मोचय । भगवानाह । न शक्नोमि । देवता प्राह । कथं न शक्नोषि । अद्यापि चिरकालं वीरतीर्थं प्रभावयिष्यसि नवांगीवृत्तिं च विधास्यसि । भगवानवोचत् । कथमेवंविधशरीरो विधास्यामि । देवतावादीत् । स्तंभनकपुरे सेढिकानद्युपकंठे खंखरपलासमध्ये श्रीपार्श्वनाथः स्वयंभूरस्ति तत्पुरो वेदान् वंदस्व । येन सुस्थशरीरो भवसि । ततः सा तिरोभूत् । प्रातः क्षणे प्रत्यासन्ननगरग्रामेभ्यः समागत्य श्रावकसंघेन ववंदे भगवान् । भणितं च भगवता । स्तंभनकपुरे श्रीपार्श्वनाथं वंदिष्यामहे । श्राद्धैरचिंति । नूनं कश्चिदुपदेशः प्रभूणां येनेदमावेदयंति । ततस्तैर्भणितं । वयमपि वंदिष्यामहे । ततो वाहनेन गच्छतः प्रभोर्मनाक् शरीरसौस्थ्यमभूत् । ततो धवलक्कपुरात्परतः पादचारेण विहृतवान् । स्तंभनपुरं श्रावकाः सर्वतः पार्श्वनाथमवलोकयंतो गुरुणाभिहिताः खंखरपलासमध्ये अवलोकयत । ते तथा चक्रुः । ततस्तत्र न दृष्टा पार्श्वप्रतिमा । तत्र च प्रत्यहं गौरेका समागत्य प्रतिमामूर्द्ध्नि क्षीरं क्षरति । ततो हृष्टैः श्रावकैर्यथादृष्टं निवेदितं गुरोः पुरः । ततः श्रीअभयदेवसूरिस्तत्र गत्वा दर्शनमात्रे

एव स्तोतुं प्रवर्त्तते । जय तिहुयणेत्यादिभिर्द्वात्रिंशता तात्कालिकैर्नमस्कारैः । ततोत्यं नमस्कारद्वयमतीव देवताकृष्टिपरमवगम्याभिदधे देवतया । भगवंस्त्रिंशतापि नमस्कारैरध्येतृणां भद्रं विधास्ये । अतोत्यनमस्कारद्वयमस्मदाकृष्टिकरत्वेन नः कष्टावहमित्यपसार्यतां । तदनुरोधात्तथा चक्रे । ततोचिंत्यप्रभावत्वात्प्रभुकृतनस्काराणां स्वयं प्रत्यक्षीभूते श्रीपार्श्वनाथे विधिना चैत्यवंदनं संघेन सह विदधे । ततस्तत्र कारितं श्रावकसंघेनोत्तुंगतोरणं देवगृहं । ततो रोगोपशमात्सुस्थीभूतशरीरेण प्रभुणा श्रीअभयदेवसूरिणा स्थापितस्तत्र श्रीपार्श्वनाथः । विदधे च प्रतिष्ठा प्रसिद्धं च महातीर्थमिति । सेयं नमस्कारत्रिंशिका किंचिद्व्याख्यायते ॥

Ends :

अथ विज्ञप्तिकासर्वस्वमाह ।

एय महारिय जत्त देव इहु न्हवणमहूसउ ।
जं अणलियगुणगहणु तुम्हं मुणिजणअणिसिद्धउ ॥
एम पसीय सुपासनाह थंभणयपुरट्ठिय ।
इय मुणिवरु सिरिअभयदेउ विन्नवइ आणंदिय ॥ ३०

एषा मदीया यात्रा देव एष स्नानमहोत्सवो यदनलीकगुणग्रहणं स्तवनं कृतमिति शेषः । युष्माकं मुनिजननिषिद्धं । अन्यस्य हि पाप्मिनो राजादेर्गुणग्रहणं साधूनां निषिद्धं । एवंसति प्रसीद [1] पार्श्वनाथ स्तंभनकपुरास्थित इत्येवं मुनिवरः श्रीअभयदेवसूरिर्नवांगीविवरणकरणानंदितभूरिसूरिः विज्ञपयति आनंदितत्रिलोकः लोकश्लाघितः ।

॥ ३० ॥ इति जयतिहुयणवृत्तिः समाप्ता ॥

---

[1] सुपार्श्वनाथ ?

3. **Meghadutakavya** by MERUTUṄGASÛRI [मेघदूतकाव्यं । मेरुतुंगसूरिः].

Folios 1 to 9.

Begins:

ॐ नमः श्रीवीतरागाय ॥ अर्हं ॥

कश्चित्कांतामविषयसुखानीछुरत्यंतधीमा-
नेनोवृत्तिं त्रिभुवनगुरुः स्वैरमुज्झांचकार ।
दानं दत्वा सुरतरुरिवात्युच्चधामारुरुक्षुः
पुण्यं पृथ्वीधरवरमथो रैवतं स्वीचकार ॥ १ ॥...

॥ ९० ॥ इति श्रीविधिपक्षमुख्याभिधानश्रीमदंचलगच्छेशश्री-मेरुतुंगसूरिविरचिते श्रीमेघदूतकाव्ये प्रस्तावनापरिस्कृतपतिविरहविवशराजीमतीविहितदेवाधिदेवश्रीनमीश्वरबालकेलिवर्णनो नाम प्रथमः सर्गः ॥ १ ॥...

॥ ९० ॥ इति श्री०मेघदूतमहाकाव्ये पतिविरहविवशराजीमती विहितदेवाधिदेवश्रीनेमीश्वरवसंतकेलिवर्णनो नाम द्वितीयः स्वर्गः॥..

॥ ९६ ॥ इति श्री०श्रीनेमीश्वरविवाहमहोत्सवप्रत्यावृत्तिवर्णनो नाम तृतीयः सर्गः ॥...

Ends:

सश्रीचीनां वचनरचनामेवमाकर्ण्य साधोः
पत्युर्ध्यानादवहितमतिस्तन्मयत्वं तथापत् ।
संख्याताहैरधिगति महानंदसर्वस्वसद्मा
तस्माद्भेजेनुपमति यथा शाश्वतीं सौख्यलक्ष्मीं ॥ ४२ ॥

इति श्रीविधिपक्षमुख्याभिधानश्रीमदंचलगच्छेश्वरश्रीमेरुतुंगसूरि-विरचिते श्रीमेघदूतकाव्ये पतिविरहविवशराजीमतीविलीयमाणोपलंभवर्णनो नाम चतुर्थः सर्गः ॥

4. **Commentary** on MERUTUÑGA'S **Meghaduta**, by ŚÎLA-RATNASÛRI [मेघदूतकाव्यस्य टीका । शीलरत्नसूरिः].

Folios 2 to 46.

Ends:

समाधिरलंकारोतिशयोक्त्यनुप्राससंकराश्च ॥ इति चतुर्थसर्गटीका ॥ तथा च ।

सर्वव्याकरणप्रमाणपटवो न्यायस्फुरत्फक्किका-
निष्णाता गुरवोभवन्न तु कृतिस्तेषां हि मिथ्या भवेत् ।
एष प्रत्यय एव मेस्ति सुचिरं तेषां पदाब्जद्वयी-
सेवातो बहुलप्रयोगरचनास्पष्टोपयोगस्पृशां ॥ १
अन्येषां मतिगूढतापहतये व्याख्यामधीतां मुखा-
त्तेषामेव तथा विचार्य विबुधैः सार्वं प्रयत्नेन च ।
स्पष्टार्था लिखिता व्यधीयत परावर्त्तः प्रयोगेषु य-
त्कापि क्वापि तदस्तु मा गुरुवचश्चर्चाव्यलीकं मम ॥ २
व्याख्यालेखि मयामृषान्न खलु या शोध्यैव[1] सद्बुधै-
र्व्यर्थान्यानि प्रकटीकृतान्यनुपदं गूढानि नो यान्यपि ।
नेयानि स्वयमेव तान्यनलसैः स्पष्टं परेषामपि
ज्ञाप्यानि प्रकटोपकारकृतये प्राग्भावनाबैर्भुवि ॥ ३
वर्षे चंद्रनिधानपूर्व१४९१कलिते श्रीविक्रमार्कात्तथा
चैत्रांतर्वदिपंचमीबुधदिने श्रेष्ठानुराधायुते ।
श्रीजैनोज्ज्वलमेघदूतसुवृहत्काव्यस्य पूर्णाभव-
द्टीका श्रीअणहिल्लपाटक इति ख्याते क्षितौ पत्तने ॥ ४
पूज्यश्रीगुरुमेरुतुंगगणभृद्भूर्यैर्व्रतं लंभितः
श्रीमच्छ्रीजयकीर्त्तिसूरिगुरुभिस्तत्पट्टलब्धोदयैः ।

[1] मयकामृषात्र खलु या शोध्यैव सा सद्बुधैः ?

वात्सल्यात्परिपाठितश्च कृतवान् श्रीकाव्यटीकामिमा-
माचार्यः किल शीलरत्न उचितां स्वाल्पिष्टबुद्धेर्मितां ॥ ५
एतस्याः किल वृत्तेः श्रीमन्माणिक्यसुंदराचार्याः ।
विबुधाः शोधनमवहितमतयो बहुसमयतत्त्वज्ञाः ॥ ६

इत्याचार्यश्रीशीलरत्नसूरिविरचितायां श्रीजैनमेघदूतमहाकाव्यटीकायां चतुर्थः सर्गः समाप्तः ॥ तत्समाप्तौ समाप्ता चेयं टीका ॥

5. **Panchalingiprakarana** by JINEŚVARA, with a **Commentary** [पंचलिंगिप्रकरणं सटीकम् । मू० जिनेश्वरसूरिः].

Folios 1 to 40.

Commentary begins:

॥ श्रीवीतरागाय नमः ॥

सम्यक्त्वं नयसारनामविदितः श्रीग्रामचिंताग्रणी-
र्यैः संप्राप्य सुरद्रुमाधिकसहः श्रीसर्वमुख्येंदिराः ।
पत्राभा उपभुज्य जैनकमलामासाद्य पुष्पोपमां
श्रीकैवल्यफलश्रियं निरुपमां भुंक्ते स वीरः श्रिये ॥ १

श्रीजिनेश्वरसूरीणां नत्वा पादसरोरुहं ।
पंचलिंगिप्रकरणविवृतिर्लिख्यते मया ॥ २ ॥

इह गूर्जरवसुंधराधिपश्रीदुर्लभराजसभासभ्यसमाजमहावादिचैत्यवासिकल्पितजिनभवनवाससमासादितविसृत्वरकीर्त्तिकर्पूरपूरसुरभितत्रिभुवनभवनाभोगश्रीजिनेश्वरसूरिविरचितपंचलिंग्याख्यप्रकरणस्य यद्यपि प्रतिवादिदंतिकुंभस्थलकेशरिभिः श्रीजिनपतिसूरिभिर्नानाप्रमाणावतारबंधुरा विद्वज्जनमनोहरा वृत्तिर्निर्मिता तथापि संक्षिप्तरुचिसत्त्वानुग्रहाय तद्व्याख्यानुसारेण किंचिल्लिख्यते मया । तत्र निःश्रेयसकल्पविटपिबीजभूतस्य शक्रचक्रवर्त्तिकमलासंबंधावंध्यनिबंधनि-

बंधनस्य दुर्गतिद्वारनिरोधामोघपरिघायमाणस्य प्रशस्ततत्त्वार्थश्रद्धान-कृपात्मपरिणामविशेषस्य सम्यक्त्वस्य लिंगमभिधित्सुरुपलिंगे[1] मार्गश-दिपंचकसमाहाररूपं पंचलिंग्याख्यप्रकरणमारभमाणः श्रीजिनेश्वर-सूरिः प्रत्यूहापोहाय प्रथमं भावमंगलरूपलिंगपंचकाभिधायिकां गा-थामाह ॥

Text begins:

उपसमसंवेगा चिय निव्वेउ तह य होइ अणुकंपा ।
अत्थिक्कं चिय पंचवि हवंति सम्मत्तलिंगाइं ॥ १

Text ends:

इय भावणासमेउ सम्मदिट्ठी न इत्थ संदेहो ।
इत्तु चिय लिंगमिणं अव्वहिचारी ससज्झेणं ॥ १०१

Commentary ends:

आस्तिक्यत्वात् । अभयकुमारमंत्रिवदिति गाथार्थः ॥ १०१

इति पंचलिंगं विवृतं तद्विवृतौ समाप्तं पंचलिंगिप्रकरणविवरणं ।

6. **Kumarasambhavakavya**, by JAYAŚEKHARASÛRI [कुमा-रसंभवः । जयशेखरसूरिः].

Folios 1 to 19.

Begins:

॥ ६० ॥

अस्त्युत्तरस्यां दिशि कोशलेति
पुरी परीता परमर्द्धिलोकैः ।
निवेशयामास पुरः प्रियायाः
स्वस्या वयस्यामिव यां धनेशः ॥ १ ॥...

---

[1] उपलिंगेनोपशमादि ?

॥ ७७ ॥ इति श्रीजयशेखरसूरिविरचिते श्रीजैनकुमारसंभवमहाकाव्ये कोशलाश्रीऋषभदेवबालकेलियौवनवर्णनो नाम प्रथमः सर्गः ॥...

॥ ७३ ॥ इति० सौधर्मेंद्रागमनप्रभुस्तवनवर्णनो नाम द्वितीयः सर्गः ॥...

॥ ८१ ॥ इति० शक्रविज्ञप्तिविवाहमंडपरचनकन्यालंकारलक्षणस्तृतीयः सर्गः ॥...

॥८०॥ इति० भगवद्विवाहमहोत्सववर्णनो नाम चतुर्थः सर्गः॥...

॥८७॥ इति० सुमंगलासुनंदापरिणायनलक्षणः पंचमः सर्गः॥...

॥ ७४ ॥ इति० निशानिशाकरोदयऋतुवर्णनसुमंगलागर्भसंभवो नाम षष्ठः सर्गः ॥ ...

॥ ७७ ॥ इति० सुमंगलास्वप्नदर्शनो नाम सप्तमः सर्गः ॥ ...

॥ ६८ ॥ इति० चतुर्दशमहास्वप्नावधारणावर्णनो नाम अष्टमः सर्गः ॥ ...

॥ ८० ॥ इति० महास्वप्नव्याख्यानो नाम नवमः सर्गः ॥ ...

॥ ८६ ॥ इत्याचार्यश्री० सुमंगलास्वप्नाभ्युपगमनस्वप्नप्रतिजागरणलक्षणो दशमः सर्गः ॥ ...

Ends:

॥ ७० ॥ इति० सूर्योदयशक्रसमागमवर्णनो नाम एकादशः सर्गः ॥ ग्रंथाग्रं ११२ समस्त १२२५ ॥

सूरिश्रीजयकेसरः कविघटाकोटीरहीरच्छवि-
र्द्धम्मिल्लादिमहाकवित्वकलनाकल्लोलिनीनीरधिः ।

वाणीदत्तवरश्चिरं विजयते तेन स्वयं निर्मिते
सर्गो जैनकुमारसंभवमहाकाव्ये मेकादशः ॥

7. **Rishibhashitani** [ऋषिभाषितानि].

Folios 1 to 16.

Begins:

॥ ॐ नमः सिद्धं ॥

सोयव्व वदती सोयव्वमेव ए दवति ।
जेण समयं जीवे सव्वदुरकाण मुचति ॥ १ ॥
तम्हा सोयव्वातो परं णत्थि सोयंती ।
देवनारदेण अरहता इसिणो पुइयं ॥ २ ॥ ...
॥ १२ ॥ नारदज्झयणं सम्मत्तं ॥

Ends:

एवं सिद्धे बुद्धे विरते विपावे दंते दविए अलंताती ।
णो पुणरवि रज्जत्थं हव्वमागच्छंति त्ति बेमि ॥ ४५ ॥
इसिभासियाइं सम्मत्ताइं ॥ ग्रं. ८१५ ॥

8. **Jambudvipasamgrahini** by HARIBHADRASÛRI with **Commentary** by PRABHÂNANDASÛRI [जम्बूद्वीपसंग्रहिणी सटीका । मू० हरिभद्र सूरिः । टी० प्रभानन्दसूरिः].

Folios 1 to 17.

Begins:

॥ ॐ नमो वीतरागाय ॥

नत्वा वीरजिनं संदर्शितविश्वविश्ववस्तुचयं ।
श्रीक्षेत्रसंग्रहण्या वृत्तिं कुर्वे यथाशक्ति ॥ १ ॥

दत्तैकांतवादिसंदोहविशारदानां गिरा स्वर्गापगानादानुवादानां श्रीहरिभद्रसूरिपादानां कृतेर्व्याचिख्यासायां मादृशस्यात्पमेधसः कोवकाशस्तथाप्यर्थनिपुणप्रकरणरागाच्च शक्तिमजानानोप्युपचक्रमे ।

इह तावत्सूत्रकारः प्रथमं चतुरतिशयस्वरूपभगवन्नमस्कारमंगलाद्य-
भिधायिकां शिष्टोपदिष्टमार्गानुसरणार्थमाद्यगाथामाह ॥ नमिय जिणं
सव्वन्नुं ...

आह चोमास्वातिवाचकः । नद्यो विजयच्छेदिन्यो रोहितादिवत् ।...

Text ends:

खंडाई गाहाए दसहि दारेहिं जेंबुदीवस्स ।
संघयणी संमत्ता रइया हरिभद्दसूरीहिं ॥ २८ ॥

Commentary ends:

कैः कृतेयमित्याह । श्रीहरिभद्रसूरिभी रचितास्तत्र तया निब-
द्धेति भद्रं ॥

नित्यं श्रीहरिभद्रसूरिगुरवो जीयासुरत्यद्भुत-
ज्ञानश्रीसमलंकृताः सुविशदाचारप्रभाभासुराः ।
येषां वासस्नपया[1] प्रसन्नतरया शीलांबुसंपूर्णया
भव्यस्येह न कस्य कस्य विदधे चेतोमलक्षालनं ॥ १

वित्ते श्रीकृष्णगच्छे श्रवणपरिवृढश्रीप्रभानंदसूरिः
क्षेत्रादेः संग्रहण्या अकृत समयगैः संवदंती सदर्थैः ।
एतां वृत्तिं खनंदज्वलनविधुमिते विक्रमाब्दे चतुर्थ्यां
भाद्रस्य श्यामलायामिह यदनुचितं तद्बुधाः शोधयंतु ॥ २ ॥

॥ क्षेत्रसंघयणीवृत्तिः समाप्ता ॥

---

[1] वाग्भवया ?

9. **Rayamallabhyudayamahakavya** by PADMASUNDARA [रायमल्लाभ्युदयमहाकाव्यम् । पद्मसुंदरः].

Folios 1 to 105. Dated Samvat 1625.

Begins:

॥ ॐ नमः सिद्धेभ्यः ॥

स श्रीमान्नाभिसूनुर्विलसदविकलब्रह्मविद्याविभूति-
प्रश्लेषानंदसांद्रद्रवमधुरसुधासिंधुमग्नानुभूतिः ।
यस्यांतर्वैरिवारेंधनदहनशिखाधूमभूमभ्रमाभा
भ्राजंते मूर्द्धि नीलच्छविजटिलजटाः पातु वः श्रीजिनेंद्रः॥१...

उग्राग्रोतकवंशजः शुचिमतिस्तत्त्वार्थविद्यापटु-
र्यस्याभिज्ञमतल्लिकाभिरनिशं गोष्ठी स्फुटं रोचते ।
मान्यो राजसभासु सज्जनसभाशृंगारहारो भुवि
श्रीजैनेंद्रपदद्वयार्च्चनरतः श्रीरायमल्लोभवत् ॥ ७

तेनाभ्यर्थनयार्थितः सविनयं तेजःपुरस्थः — —
—[1] न्यः संसदि पद्मसुंदरकविः षट्तर्कसंक्रांतधीः ।
श्रीनाभेयजिनादिवीरचरमश्रीतीर्थकृत्संकथा-
गर्भं चा — — तां[2] मृदु महाकाव्यं मम प्रीतये ॥ ८

यः पूर्वं श्रुतपंचमीफलकथागर्भं भविष्याह्वयं
काव्यं कारितवान् — ज्ञपदथो[3] नत्वा पुनः सत्कविं ।
नाभेयादिसमस्ततीर्थपमहाकल्याणवृत्तांकितं
सत्काव्यं क्रियतां सतां श्रुतिमनःप्रल्हादनश्रेयसे ॥ ९

चतुर्विंशतितीर्थेशकल्याणचरिताद्भुतं ।
प्रारभ्यते महाकाव्यं महापुरुषसंश्रितं ॥ १०

---

[1] पुरस्थः सदा मान्यः or पुरस्थः सतां मान्यः? [2] चारु विधीयतां?
[3] कारितवान्व्यजिज्ञपदथो?

महाकवीनामालंब्य मतमागमसम्मतं ।
संक्षेपरुचिभव्यांगिप्रीत्यै तदभिदध्महे ॥ ११

Ends :

श्रीवीरनिर्वाणदिने भविता केवलं मम ।
विहृत्याहं कियत्कालं प्रांते तु विपुले गिरौ ॥ ८२
प्राप्स्यामि निर्वृतिं तस्मिन्दिवसेथ गणेश्वरः ।
श्रीसुधर्माभिधो लब्धा केवलज्ञानमुज्ज्वलं ॥ ८३
तन्निर्वाणदिने जंबूनामा भाव्यंतकेवली ।
ततो नंदी नंदिमित्रस्तृतीयोप्यपराजितः ॥ ८४
गोवर्द्धनो भद्रबाहुः पंचैते श्रुतपारगाः ।
क्रमेणैव भविष्यंति विशाखार्यस्ततः परं ॥ ८५
प्रोष्टिलः क्षत्रियांकश्च जयनामा नगाह्वयः ।
सिद्धार्थो धृतिषेणश्च विजयो बुद्धिलस्तथा ॥ ८६
गंगदेवो धर्मसेनो द्वादशांगस्य पारगाः ।
दशपूर्वार्थगास्सर्वे तथा नक्षत्रनामकः ॥ ८७
जयपालश्च पांडुश्च ध्रुवसेनोनुकंपकः ।
एकादशांगवेत्तार एतेभूवन्मुनीश्वराः ॥ ८८
सुभद्रोथ यशोभद्रो यशोबाहुस्तृतीयकः ।
लोहार्योपि चतुर्थः स्यादाचारांगविदोप्यमी ॥ ८९
जिनसेनादयः पश्चाद्भर्त्स्यिष्यंत्यणुश्रुतं ।
पुरूरवाः सुरश्चापि मरीचिर्ब्रह्मकल्पजः ॥ ९०
जटिलब्राह्मणो देवः पुत्रमित्रद्विजस्ततः ।
देवश्चाग्निद्विजो देवश्चाग्निमित्राह्वयो द्विजः ॥ ९१

माहेंद्रोभूत्ततो देवो भारद्वाजो द्विजस्ततः ।
माहेंद्रदेवो मनुजो नरकेषु त्रसेषु च ॥ ९२

स स्थावरेष्वसंख्यातकालं भ्रांत्वा स्वकर्मतः ।
स्थावराख्यो द्विजस्तुर्ये कल्पे देवस्ततोभवत् ॥ ९३

विश्वनंदी महाशुक्रेदेवश्च्युत्वाथ केशवः ।
त्रिपृष्ठाह्वः सप्तमेथ निरये स मृगाधिपः ॥ ९४

प्रथमे नरके तस्मात्केसरी धर्ममर्मवित् ।
आद्ये कल्पे सिंहकेतुः सुरोथ कनकोज्ज्वलः ॥ ९५

खेचरेशः सुरः स्वर्गे सप्तमे हरिषेणराट् ।
महाशुक्रसुरो राजा प्रियमित्रस्ततः सुरः ॥ ९६

सहस्राराभिधे कल्पे राजा नंदाभिधस्ततः ।
अच्युतेंद्रस्ततश्च्युत्वा वर्द्धमानो जिनेश्वरः ॥ ९७

श्रीमद्गौतमवक्त्रतः श्रुतसुधां पीत्वा नृपः श्रेणिकः
प्रापानंदममंदमुज्ज्वलमनाः श्रुत्वाथ नत्वा जिनं ।
प्रह्वीभूय स गौतमं गणधराट् श्रीश्रेणिकः शुद्धधीः
स्वामुत्तंभितकेतनामथ पुरीं धर्मैकतानोविशत् ॥ ९८

यः स्याद्वादसुधासमुद्रलहरीमग्नं निरूप्याखिलं
विश्वं विश्वपदार्थसार्थकलितं प्राबोधयत्सज्जनान् ।
तन्नीराजनवर्द्धमान - निभो द्राग्मुक्तिपूर्यायिनां
भूयान्मंगलकारणं स भविनां श्रीवर्द्धमानः प्रभुः ॥ ९९

आनंदोदयपर्वतैकतरणेरानंदमेरोर्गुरोः
शिष्यः पंडितमौलिमंडनमणिः श्रीपद्ममेरुर्गुरुः ।

तच्छिष्योत्तमपद्मसुंदरकविः श्रीरायमल्लोदयं
काव्यं नव्यमिदं चकार सकलार्हद्वृत्तभव्यांकितं ॥ १००

जनपदेषु महान्कुरुजंगलः
सुकृतिभिः कृतिभिः कृतमंगलः ।
उडुगणेषु निशाकरमंडलः
किमु विभाति विभाकरतुंदिलः ॥ १

यत्रासिधारासत्तीर्थे स्नात्रातं कुरुपांडवैः ।
वसुंधरावधूद्वाहकृते कृतपरिश्रमैः ॥ २

यत्र गंगासरित्पूरधारा हारायते भृशं ।
विलसद्भूमिभामिन्याः शंखकुंदेंदुसुंदरा ॥ ३

तत्र स्तुत्रामपुरवद्धस्तिनामपुरं परं ।
तच्छाखानगरं रम्यं चरस्थावरसंज्ञकं ॥ ४

यच्च नानाद्रुमारामपरिमंडितमंडलं ।
विभ्राजते नु वसुधावनिताकर्णकुंडलं ॥ ५

यत्र रूपाः स्फुरद्रूपवीहपरिमंडलैः ।
पुष्करिण्यः पुष्करौघैः सारसैः परिशीलिताः ॥ ६

यत्र सौधाः सुधाशुभ्राश्चंद्रिकाधौतभूतलाः ।
जनताजनितानंदाः संति संतापहारिणः ॥ ७

नंद्यावर्त्तादयो यत्र नागराणां बभुर्गृहाः ।
स्फुटस्फुटिकपाषाणघटितामलविग्रहाः ॥ ८

यत्सौधशिखरस्थानां मुग्धानां मुखमंडलैः ।
लक्ष्यते पौरवृंदेन शतचंद्रायितं नभः ॥ ९

सुश्रावकाणां यत्र श्रीर्व्ययिता जिनसद्मसु ।
प्रोत्तुंगशिखरव्याजादुच्चैः पदमिवादिशत् ॥ १०

तत्राग्रोतकवंशे गोइलगोत्रे बभूव नरसिंहः ।
सिंहः सत्पुरुषाणां पौरुषवृत्त्या विभाति स्म ॥ ११

तत्पत्नी मदनाही शीलवती धर्मकर्मसु नितांतं ।
कुशलाथ रत्नगर्भा सुतरत्नद्वयमसौ सुषुवे ॥ १२

नानूचसहणपालस्तत्तनयौ विनयनयकलाकुशलौ ।
आस्तां निरस्तकलुषौ जिनधर्मपरायणौ नित्यं ॥ १३

नानूसाधोश्च सुधासुधांशुशुद्धांशुविशदगुणकीर्त्तेः ।
ऊढरहीपढ्यासीन्निजशीलपवित्रितचरित्रा ॥ १३

रोहणभूरिव रत्नं नररत्नं रायमल्लतनयं सा ।
प्रासूत रत्नगर्भा जननी जननयनकुमुदेंदुं ॥ १४

यस्तु जिनचरणपूजापुरंदरः सुंदरः सदा स्वगुणैः ।
दाता ज्ञाता निपुणो जिनधर्मधुरंधरः सततं ॥ १५

एकोनपंचवर्गप्रमितजिनानां चरित्रसंदृब्धं ।
यो रायमल्लपूर्वाभ्युदयं काव्यं च कारितवान् ॥ १६

यस्य धनं धनबीजं सुदेवगुर्वागमादिसत्क्षेत्रे ।
उप्तं श्रद्धांभोभिः सिक्तं स्वर्गादिफलदायि ॥ १७

यस्य भवानीदासः सहोदरः पुण्यवानपि कनीयान् ।
नृपसदसि लब्धमानः सौभाग्यसुभाग्यभोगनिधिः ॥ १८

स च रायमल्लसाधुः सद्धर्मसुधाब्धिवर्द्धननवेंदुः ।
जैनक्रियासु कुशलः कुशलैकशिरोमणिर्जीयात् ॥ १९

ऊधाहीति प्रथमा तद्भार्या दानशीलसंपन्ना ।
धुरि सौभाग्यवतीनां पतिव्रतासीत्कुलगरिष्ठा ॥ २०

तत्पुत्रोमीद्रो दक्षो नयविनयशीलसंपन्नः ।
सद्धर्मकर्मनिरतो जयतादाचंद्रतारार्कं ॥ २१

अथ रायमल्लसाधोर्मीनाहीति द्वितीयभार्यासीत् ।
तत्कुक्षिशुक्तिगर्भे बभुः सुताः शुक्तिजाकृतयः ॥ २२

आद्यस्तूदयसिंहोनुजस्तथा शालिवाहनाभिख्यः ।
अपरोप्यनंतदासो नंदंतु चिरं त्रयस्तनयाः ॥ २३

वर्षे विक्रमराज्यतः शरकलाभृत्तर्कभूसंमिते
ज्येष्ठे मासि सिते च पंचमदिनेर्हद्वृत्तसंदर्भितं ।
काव्यं कारितवानपूर्वरसवद्यो रायमल्लोदयं
जीयादारविचंद्रतारकमयं श्रीरायमल्लाह्वयः ॥ २४

इति श्रीपरमाप्तपरमपुरुषचतुर्विंशतितीर्थकरगुणानुवादचरिते पं० श्रीपद्ममेरुविनेय पं० पद्मसुंदरविरचिते वर्द्धमानजिनचरितमंगलकीर्त्तनं नाम पंचविंशः सर्गः ॥ २५

असुरसुरनरेंद्रव्यूहकोटीरकोटी-
मणिगणकिरणांभोधौतपादारविंदः ।
चरमजिनपतिस्ते वर्द्धमानः समिद्धां
प्रदिशतु शिवलक्ष्मीं राजमल्लाह्वयाय ॥ १ ।

आशीर्वादः ।

**10. Kanadarahasya** by PADMANÂBHA [कणादरहस्यम्। पद्मनाभः].

Folios 1 to 22.

Begins:

॥ श्रीसर्वज्ञाय नमः ॥

जयति पुरनिहंतुः क्षोभपंचेषुबाणो-
जनि रचति पुमर्थानेककल्पद्रुमाणां ।
युगपदसुरजानां तद्गृहां त्रासहास्यौ
निरवधिगुणसीमा कोपि भीमा कटाक्षः ॥ १

स्तंबेरमाग्रणीयं भ्रमरकुलं दानपानरमणीयं ।
प्रद्योतमानगंडस्थलमंडलमंडनं जयति ॥ २

आरचय्य प्रयत्नाद्यैरिहैकाशीतिकारिकाः ।
आचार्यपद्मनाभेन व्याख्या संप्रति तन्यते ॥ ३

विघ्नध्वंसकामनया कृतं मंगलं शिष्यशिक्षायै निबध्नाति । कालिंदीत्यादिना ॥

Ends:

अंतेपि मंगलं शिष्टाचारप्राप्तमिति तनोति । अक्षय्यघटेत्यादिना । अतिरिक्तं तु ग्रंथविस्तरभयान्न लिखितमित्युपरम्यते ॥

न प्रार्थयामि भवतो दुर्वृत्ताः प्रार्थये साधून् ।
अंगीकृतमपि येषां शेषादिभिरप्यहो दूभूष्य [sic] ॥
यद्यदत्र विनिक्षिप्तं नव्यं सिद्धांतवार्त्तिना ।
पद्मनाभेन तैः प्रीतः प्रगल्भोस्तु गुरोर्गुरुः ॥

इति श्रीसन्मिश्रश्रीजगद्गुरुबलभद्रात्मजविश्वनाथानुजविजयश्रीगर्भसंभवसकलशास्त्रारविंदप्रद्योनभट्टाचार्यमिश्रश्रीमत्पद्मनाभकृतौ स्वकृतराद्धांतमुक्ताहारव्याख्याने कणादरहस्यं समाप्तमिति ॥

**11. Pravachanasaroddharavishamapadavyakhya** by UDAYAPRABHASÛRI [प्रवचनसारोद्धारस्य विषमपदव्याख्या । उदयप्रभसूरिः].

Folios 1 to 34. Dated Saṃvat 1526 = A.D. 1470.

Begins:

॥ □ ॥

प्रवचनसारोद्धारे विषमपदार्थावबोधमाधत्ते ।
श्रीउदयप्रभसूरिः श्रीपार्श्वाधीशमानम्य ॥ १
सूत्रेणैव गतार्थे व्याख्या पुनरुक्तदोषपोषाय ।
हीनांग इत्यवज्ञा विज्ञैस्तेनात्र नो कार्या ॥ २

यथा ।

सूत्रेणैष सुसूत्रः कार्यो हार इव योजितविमुक्तः ।
यस्माद्विषमपदार्थासंबंधिर्दुरधिगम्याः[1] ॥ ३

तस्मात् ।

सारस्वतामृतनिषेकविबोधितेषु
प्रेक्षावतामिह मनःकमलाकरेषु ।
क्षीरोदकोद्धरणशास्त्रमराल एष
क्रीडाः प्रमोदमुदिताः सततं तनोतु ॥ ४

नमिऊणमिति वक्ष्ये ।

Ends:

चउरंसेन परिमंडल इत्यादि ॥ ८

समाप्तोयं प्रवचनसारोद्धारस्य विषमपदार्थावबोध इति ॥

सपादलक्षक्षोणीशसमक्षं जितवादिनां ।
श्रीधर्मघोषसूरीणां पट्टालंकारकारकः ॥ १
त्रिवर्गपरिहारेण गद्यगोदावरीसृजः ।
बभूवुर्भूरिसौभाग्याः श्रीयशोभद्रसूरयः ॥ २

[1] °विषमपदार्थावबोधबंधा दु°?

स्वपरसमयज्ञानप्र[1]तीतप्रकृष्टजगज्जना-
श्रुतरवचनामो[2]दापृष्टामरेशगुरुप्रभाः ।
अभिनृपसभं गंगागौरीप्रनर्त्तितकीर्त्तय-
स्तदनु महसः पात्रं जाता रविप्रभसूरयः ॥ ३
एवं प्रवचनसारे तच्छिष्यलवश्चकार टिप्पनकं ।
श्रीउदयप्रभसूरिर्विषमपदार्थावबोधाख्यं ॥ ४
इह संति तेपि सिद्धांतसिंधुपारीणबुद्धयः सुधियः ।
हृद्यात्मभवां[3] येषां कौस्तुभरत्नायते विश्वं ॥ ५
प्रवचनसारोद्धारश्रियः समस्तांगसंगसुभगानां ।
स्यात्तद्विचारचर्चा तेषामेषा प्रमोदाय ॥ ६
प्रवचनसारं सारं विषमपदार्थावबोधसंतप्तः ।
सत्यं उदयात्सवितुं[4] विश्वं विश्वमपि सजीवमाभाति ॥ ७
सर्वप्रकारसाहाय्यकारिणः क्षांतिशालिनः ।
जयप्रभस्य कृतिनः प्रयत्नादेष निर्मितः ॥ ८
अवधानवंध्यबुद्धिर्यदत्र न समंजसं ।
उक्तवानहमुत्सूत्रं तत्र मिथ्या कृतं मम ॥ ९
यद्वा यदत्र किंचित्तनुमतिभिर्दुष्टमुदितमस्माभिः ।
प्रीतास्तद्धीमंतः संतः कुर्वंतु निर्दोषं ॥ १० ग्रंथाग्रं ३३०३
मुनिचंद्रसूरिपंडितगुणचंद्राभ्यां भरादिहोपकृतं ।
प्रथमोत्सहनवाचनलेखनकर्मप्रकर्षेण ॥ ११
आकाशकमलं यावन्मेरुनालं हरिद्दलं ।
भानुर्विकाशयत्येष तावच्चंद्रादसौ भुवि ॥ १२
इति सिद्धांतावचूरिः ॥ संवत् १५२६ वर्षे ० लिखितावचूर्णिः ॥

---

[1] ० ज्ञानातीत०? [2] ० वचनामोदस्पृष्टामरेश०? [3] हृद्यात्मभुवां? [4] सवितुर्विश्वमपि?

12. **Parsvanathashtaka** by INDRANANDI with the **Commentary** of ŚRUTAKÎRTI [पार्श्वनाथाष्टकं सटीकम्। मू० इन्द्रनन्दिः। टी० श्रुतकीर्तिः].

Folios 1 to 20.

Begins:

॥ नमः श्रीपार्श्वनाथाय ॥

श्रीपार्श्वनाथमानम्य धरणेंद्रनमस्कृतं ।
पार्श्वाष्टकसंबद्धां सद्वृत्तिं विदधाम्यहं ॥ १

श्रीमदिंद्रनंद्याचार्यो मंत्रस्तुतिरूपेण श्रीपार्श्वनाथभट्टारकं स्तोतुकाम आह ॥

श्रीमन्नागेंद्रफणिंडस्फुरितफणमणिद्योतिताशामुखश्रीः...
शाकिन्यः श्रींद्रनंदिप्रथितगतिरसौ पातु मां पार्श्वनाथः ॥ ८ ॥

Ends:

लब्धार्थलाभाः श्रुतकीर्त्तयस्ते
यद्वृत्तिरत्नाकरतो भवंतु ॥ १

पंडितश्रीश्रुतविरचितश्रीपार्श्वनाथाष्टकसद्वृत्तिः समाप्ता ॥

13. **Laghustava** with the **Commentary** by RAJAMUKUṬA [लघुस्तवः सटीकः। टी० राजमुकुटः].

Commentary begins:

॥ ॐ नमः श्रीत्रिपुरायै ॥

केवलाक्षरशुद्ध्यर्थमर्थमात्रप्रतीतये ।
लघुस्तवे मया वृत्तिरुद्धृता ज्ञानतो ननु ॥ १

अत्रायं श्लोकः ।

Text begins:

ऐंद्रस्येव शरासनस्य दधती मध्ये ललाटं प्रभां...

Text ends:

त्वद्भक्त्या मुखरीकृतेन रचितं यस्मान्मयापि ध्रुवं ॥ २१ ॥

Commentary ends:

अपिशब्दो विस्मयार्थे ॥ इति महाकविराजमुकुटमणिना विरचितभारतीस्तोत्रस्य स्वनाम्ना चिह्नितस्य लघुस्तवाभिधेयस्य भाष्यं परिसमाप्तमिति ॥

**14. Prakritalakshana** by CHAṆḌA [प्राकृतलक्षणम् । चण्डः ].
Folios 1 to 7.
Begins:

॥ ऐं नमः ॥ स्वस्ति श्रीगुरुभ्यो नमः ॥ अर्हं ॥

प्रणम्य शिरसा वीरं स्वल्पैर्व्यापिभिरक्षरैः ।
लक्षणं प्राकृतं वक्ष्ये किंचिद्बुद्धमनादहं ॥ १

क्वचिल्लोपः क्वचित्संधिः क्वचिद्वर्णविपर्ययः ।
आगमोत्यादिमध्येषु लक्ष्यःस्यात्सुभाषितात् ॥ २

सिद्धं प्राकृतं त्रेधा ।

Ends:

हंसे पथुत्ते ॥ ४० ॥

इति श्रीचंडकृते प्राकृतलक्षणे व्यंजनविधानं तृतीयं समाप्तं ॥ समाप्ता चैषा प्राकृतसारोद्धारवृत्तिः ॥

**15. Pramanamanjari** by SARVADEVASŪRI with an **Avachuri** [प्रमाणमञ्जरी सावचूरिः । सर्वदेवसूरिः].
Folios 1 to 6.
Begins:

॥ अर्हं नमः ॥

कासारतीरसरसीरुहमाददानः
शुभ्रं भ्रमद्भ्रमरमध्यमिवेंदुबिंबं ।
द्वैमातुरश्चिरतरं भवतः स पाया-
त्संजातनिर्मलजलप्रतिबद्धनर्मा ॥ १

अभिवंद्य विधोरर्द्धधारिणं च कणव्रतम् ।
प्रमाणमंजरी शर्वदेवेन क्रियते मया ॥ २ ...
नाकाशे व्यभिचारः तस्यापि साधनात् ॥ इति ।

इति तार्किकसर्वदेवसूरिणा प्रणीतायां प्रमाणमंजर्यामभावपदार्थः सप्तमः ॥

Ends:

आकाशस्य सपक्षत्वान्न व्यभिचार इत्यर्थः ॥
प्रमाणमंजर्यामभावपदार्थावचूरिः सारप्रदर्शिनी ॥

16. **Mahapurushacharita** by MERUTUṄGÂCHÂRYA [महापुरुषचरितम् । मेरुतुंगाचार्यः].

Folios 1 to 9. Incomplete.

॥ ॐ नमः परमात्मने ॥

जयति स परमात्मा केवलज्ञानमूर्त्ति-
र्दलितनिखिलकर्मा शास्वतानंदमग्नः ।
हृदयकमलमंतर्यः सदालोक्यमानः
प्रवितरति मुमुक्षोर्मोक्षलक्ष्मीं प्रसन्नः ॥ १
श्रीऋषभनेमिशांतिश्रीमत्पार्श्वजिनवर्द्धमानानां ।
भवसहितान्यपि रचयिष्यंतेत्र चरितानि ॥ २
शेषमहापुरुषाणामस्मिन्सूत्रे तु संगृहीतानां ।
तद्गुणमात्रग्रहणाद्रचयिष्यंतेत्र चरित्राणि ॥ ३
श्रुतिमार्गाध्वगः प्राय उपदेशो गतागतैः ।
यदि विश्राम्यति श्रावकस्यापि कृतिनो हृदि ॥ ४

तथाहि ।

ग्रंथप्रारंभे इष्टदेवताप्रणिधानप्रधाना प्रेक्षावतां प्रवृत्तिरित्यौचित्यानस्तत्र[1] प्रथमनमस्कारो यथा ।

[1] औचित्यापादनस्तत्र ?

प्रणिधाय परंज्योतिर्नत्वा चंद्रप्रभुं गुरुं ।
उपदेशशतीं कुर्वे सूक्तमुक्ताकलस्रजं ॥ १...

इति श्रीमन्मेरुतुंगाचार्यविरचिते महापुरुषचरिते सपरिकरश्री-युगादिजिनचरितवर्णनो नाम प्रथमः सर्गः ॥ १ ॥

17. Vastuvijnanaratnakosha [वस्तुविज्ञानरत्नकोशः]. Folios 1 to 5.

॥ ॐ नमो वीतरागाय ॥

अथातो वस्तुविज्ञानरत्नकोशं व्याख्यास्यामः ॥

सर्वशास्त्रमयं रम्यं सर्वज्ञानप्रकाशिकं ।
स्वल्पग्रंथं सुबोधार्थं रत्नकोशं समभ्यसेत् ॥ १

तत्र शतेन सूत्राणां संग्रहो यथा ।

१ त्रीणि भुवनानि
२ त्रिविधं लोकस्थानं
३ त्रिविधा भूमिः
४ त्रिविधाः पुरुषाः
५ त्रयः पदार्थाः
६ चत्वारः पुरुषार्थाः
७ षट्त्रिंशद्राजवंशाः
८ सप्तांगं राज्यं
९ षण्णवतिराजगुणाः
१० षट्त्रिंशद्राजपात्राणि
११ षट्त्रिंशद्राजविनोदाः
१२ अष्टादशविधं स्थानं
१३ चतस्रो राजविद्याः
१४ चतस्रो राजनीतयः
१५ षट्त्रिंशद्दंडायुधानि
१६ सप्तविंशतिशस्त्राणि
१७ द्विपंचाशत्तत्त्वानि
१८ द्विसप्ततिकलाः
१९ चतुरशीतिविज्ञानानि
२० चतुरशीतिदेशाः
२१ द्वात्रिंशल्लक्षणास्थानानि
२२ चतुर्विंशतिविधं गृहं
२३ अष्टोत्तरशतं मंगलानां-स्थानानि
२४ त्रिविधं दानं
२५ पंचविधं यशः

२६ सप्तधा कीर्त्तिः
२७ अष्टौ रसाः
२८ एकोनपंचाशद्भावाः
२९ चत्वारोभिनयाः
३० चतस्रो वृत्तयः
३१ चत्वारो महानायकाः
३२ चत्वारो नायकाः
३३ द्वात्रिंशद्गुणनायकाः
३४ त्रिविधा महानायिकाः
३५ अष्टविधा नायिकाः
३६ द्वात्रिंशद्गुणनायिकाः
३७ त्रिविधं सौख्यं
३८ चत्वारि सौख्यस्य कारणानि
३९ नवविधो गंधोपयोगः
४० दशविधं शौचं
४१ द्विविधः कामः
४२ दश कामावस्थाः
४३ विंशती रक्तस्त्रीणां लक्षणानि
४४ एकविंशतिर्विरक्तस्त्रीणां लक्षणानि
४५ द्वाविंशतिः कामिनीनां विकारेंगितानि
४६ चतुर्विंशतिरसतीनां लक्षणानि
४७ षोडश दुष्टस्त्रीणामपलक्षणानि
४८ अष्टौ स्त्रीणामभिसारकारणानि
४९ अष्टौ नार्योगम्याः
५० अष्टविधो मूर्खः
५१ चतुर्विंशतिविधं नागरिकवर्त्तनं
५२ त्रिविधं रूपं
५३ त्रिविधं स्वरूपं
५४ द्वादशविधः प्रमोदोपचारः
५५ पंचविधः परिचयः
५६ दश पुरुषाः स्त्रीणामनिष्टा भवंति
५७ दशभिः कारणैः स्त्रियो विरज्यंते
५८ दशभिः कारणैः कामिन्यः संबध्यंते
५९ सप्तविधाः कामुकानां सुरतारंभाः
६० अष्टविधं विदग्धानां सुरतं
६१ नवविधं सुरतावसानं

६२ नवविधाः शयनगुणाः
६३ दशविधो नृपाणां प्रमोदः
६४ चतुर्विधः प्रबोधः
६५ चतुर्विधा बुद्धिः
६६ अष्टौ बुद्धिगुणाः
६७ चतुर्विधं गांधर्वं
६८ त्रिविधं गीतं
६९ षट्त्रिंशद्गीतगुणाः
७० चतुर्विधं व्याधं
७१ त्रिविधं नृप - - -
७२ षोडशविधं वादलक्षणं
७३ विंशतिविधं विकृत्वं[1]
७४ षड्विधं भाषालक्षणं
७५ पंचविधं पांडित्यं
७६ चतुर्विधं वादलक्षणं
७७ षड्विधं दर्शनलक्षणं
७८ अष्टविधं माहेश्वरं
७९ दशविधं ब्राह्मं
८० चतुर्विधं सांख्यं
८१ सप्तविधं जैनं
८२ दशविधं बौद्धं
८३ चतुर्विधं चार्वाकं
८४ चतुर्विंशतिविधं विचारकत्वं
८५ दशविधं गुरुत्वं
८६ पंचविधं चरित्रं
८७ पंचविधं पालनं
८८ सप्तविधमुत्तमत्वं
८९ नवविधा शक्तिः
९० सप्तविधा भुक्तिः
९१ अष्टविधमभिमानलक्षणं
९२ चतुर्विधं वात्सल्यं
९३ पंचविधो महोत्सवः
९४ सप्तविधा प्राप्तिः
९५ चतुर्विधं शौर्यं
९६ दशविधं बलं
९७ दशविधो जयः
९८ दशविधः संग्रहः
९९ पंचविधः परिच्छेदः
१०० पंचविधं प्रभुत्वं चेति ॥

सूत्राणां शतेन समूहः समाख्यातः ॥

अथ वस्तुविज्ञानरत्नकोशे समासेनैव निर्देशः समारभ्यते ॥

तत्रादौ त्रीणि भुवनानि १ सुरनरनागानां ॥ १ ॥

---

[1] विकृतत्वं ?

Ends:

पंचविधं प्रभुत्वं ॥ कुलप्रभुत्वं १ ज्ञानप्रभुत्वं २ दानप्रभुत्वं३ स्थानप्रभुत्वं ४ अभयप्रभुत्वं ५ ॥ १०० ॥

इति वस्तुविज्ञानरत्नकोशे सूत्रशतेन निर्देशो व्याख्यानं समाप्तमिति ॥

**18. Srutasvadasiksha** by SAHAJAKUŚALA [श्रुतास्वादशिक्षा। सहजकुशलः].

Folios 1 to 5.

Begins:

॥ ६० ॥

सिद्धत्थसुयं सिद्धं बुद्धं नमिऊण वीरमर्हतं ।
देमि नियअप्पसिरकं विविहसुयस्सायसुहजणयं ॥ १ ॥

Ends:

समजिणसुरसुरकं अप्पणो बोहिदरकं
दुहदुरियविपरकं धम्मचिंतासुभिरकं ।
सहजकुसलसिरकं जो सहाणं समरकं
मुणिय धरइ दिरकं सो सुहं जाइ मुरकं ॥ १६८ ॥

॥ इति श्रुतास्वादशिक्षाग्रंथः ॥

**19. Vicharasaraprakarana** by PRADYUMNASŪRI [विचारसारप्रकरणम् । प्रद्युम्नसूरिः].

Folios 1 to 21.

Begins:

॥ श्रीसर्वज्ञाय नमः ॥

पणयजणपूरियासो भयङ्कतासो गुणाण आवासो ।
उवसग्गवग्गनासो जयउ जए जिणवरो पासो ॥ १ ॥
मुणिरायतिलयभूउं अच्चभुयचरियकयचमुक्कारो ।
सिरिधम्मघोससूरी वहियचूडामणी जयउ ॥ २ ॥

तस्स य सीसो गुणरयणजलनिही लद्धिबुद्धिसंजुत्तो ।
पढमो बुहजणणिलउ पंडियपउमप्पहो जयउ ॥ ३ ॥
चारित्तचक्कवट्टी खमदमसहिउ सहाइमियवयणो ।
सिरिदेवप्पहसूरी सुसिद्धहत्थो जए जयउ ॥ ४ ॥
पज्जुन्नसूरिलिहियं वियारलेसं जिणाण समयाउ ।
नमिउं देवं सुगुरुं सपरत्थं ताण सीसेण ५ ॥ ...

Folio 13:

थूलभद्दभगिणी सत्तत्ति ॥

जक्खा १ य जक्खदिन्ना २ भूया तह भूयदिन्ननामा य ।
सेणा ५ वेणा ६ रेणा ७ ताउ एयउ अणुक्कमसो ॥ १९ ॥
सो [1]जयउ थूलभद्दो तिन्नि पमत्ताइ जस्स जायाइं ।
सीहविउव्वणममणं कहणं अत्थस्स मित्ताणं ॥ २० ॥
चउदसपुव्वच्छेउ संघयणं पढमयं च संट्ठाणं ।
सुहममहापाणाणि य छिन्नाइ थूलभद्दंमि ॥ २१ ॥
चरमजिणमुक्कगए चालीसेहिं चउहिं वरिससए ।
वइरो दसपुव्वधरो वइरमुणी तस्स साहाए ॥ २२ ॥
दसपुव्वयस्स छेउ संघयणं चउत्थयस्स तह चेव ।
साहंमि वइरनामे खीरासवलद्धि संपन्ने ॥ २३

किंचोणनवपुर्व्वधर आर्यरक्षितो जातः ।

आरेण अज्जरक्खियकालाणुन्नाउ नत्थि अज्जाणं ।
सामाइयवयमारोवणं च पच्छित्तदाणं च ॥ २४ ॥
पव्वाविउ सुहत्थी अज्जा[1] जक्खदिन्न नामाए ।
पव्वावणनिस्सेहो[2] इत्थिसपरकेवि अप्पाणं ॥ २५ ॥

[1] अजाए ? [2] °निम्मेहो ?

पंचेव य वरिससए सिद्धसेणदिवायरो य जयपयडो ।
छच्चसए वीसहिए सक्कथुई अज्जरक्खिपहू ॥ २६ ॥
सिरिवीरजिणवरिंमि मुक्के पत्तंमि गुरुदुरितदलणे ।
नवसय नऊहिं अहिए कालियसूरी समुप्पन्नो ॥ २७ ॥
सक्किसंथुणिउं । तेन य ।
पज्जुसवणं चउत्थि तह चउद्दसीए पडिक्कमणं ।
विहियं संघसमक्कं दसासुयक्कंधनिद्दिट्ठं ॥ २८ ॥
चउत्थीए पज्जुसवणं कालयसूरीहिं जुगप्पहाणेहिं ।
सिरिसालवाहणकए कथमणुमयमेव संघस्स ॥ २९ ॥
पंचसए पणतीए विक्कमभूयाउक्कत्ति अत्थमिउं ।
हरिभद्दसूरिसूरो धम्मरउं देउ मुक्कसुहं ॥ ३० ॥
अहवा ।
पणपन्न दससएहिं हरिसूरी आसि तत्थ पुव्वकवी ।
तेरसवरिससएहिं अहिएहिंवि बप्पहट्टिपहू ॥ ३१ ॥

Ends:

गाहग्ग नवसयाइं सिलोयमाणेण चउदससयाइं ।
नंदउ जा ससिसूरा पज्जुन्नसूरिवयणेणं १०० ॥
इति विचारसारप्रकरणं समाप्तं ॥

**20. Nyayakandali** by ŚRÎDHARA with the **Panjika** of RÂJAŚEKHARA [न्यायकन्दल्याः श्रीधरकृतायाः पञ्जिका । राजशेखरः]. Folios 1 to 73. Dated Samvat 1480 = A. D. 1424.

Begins:

ॐ नमः सर्वज्ञाय ॥
अनंतदर्शनज्ञानसुवीर्यमयात्मने[1] ।
जिनाय तस्मै कस्मैचित्परस्मै रहसे नमः ॥ १

[1] सवीर्यसमयात्मने ?

श्रीमज्जिनप्रभविभोरधिगत्य न्यायकंदलीं किंचित् ।
तस्यां विवृतिलवमहं करवै स्वपरोपकाराय ॥ २

इह किल पूर्वमजिह्मब्रह्माभ्यासदूरीकृतप्रमादाय मुनये कणादाय स्वयमीश्वर उलूकरूपधारी प्रत्यक्षीभूय द्रव्यगुणकर्मसामान्यविशेषसमवायलक्षणं पदार्थषट्कमुपदिदेश । तदनु स महर्षिर्लोकानुकंपया षट्पदार्थरहस्यप्रपंचनपराणि सूत्राणि रचयांचकार । तेषु सूत्रेषु प्रशस्तकरदेवो भाष्यं सकृद्धुननमात्रेण महोग्रदष्टकविषापहारदृष्टलोकोत्तरवैभवं चकार । तत्र चतस्रो वृत्तयो निवृत्ताः । एकां व्योमवतीनाम्नीं वृत्तिं व्योमशिवाचार्यो जुगुंफ । द्वितीयां तु न्यायकंदल्यभिधानां श्रीधराचार्यः संददर्भ । तृतीयां किरणावलीनाम्नीमुदयनाचार्यस्तनान । चतुर्थीं तु लीलावतीति ख्यातां श्रीवत्साचार्यो बबंध । चतस्रोपि गंभीरार्थाः । तत्रेमां न्यायकंदलीं प्रारभमाणः श्रीधरदेवः शिष्टसमयपरिपालनायेश्वरविष्णुब्रह्मलक्षणामिष्टदैवतत्रयीमेकेनाद्यश्लोकेन प्रणिदधानः प्राह ।

स चायं ।

अनादिनिधनं देवं जगत्कारणमीश्वरं ।
प्रपद्ये सत्यसंकल्पं नित्यविज्ञानविग्रहं ॥ १

Ends :

इति समवायपदार्थः समर्थितस्तत्समर्थनायां च समर्थितेयं भट्टश्रीश्रीधरविरचितन्यायकंदलीवृत्तिरिति ॥

अथ भट्टश्रीधरो ग्रंथप्रशस्तिं प्रस्तौति । सुवर्णेत्यादिपद्यैः । अक्षीणनिजपक्षेष्विति । अक्षीणनिजप्रतीतेषु विद्वत्सु इति यावत् । अच्छुकेति । अंभोकेत्यपि पाठः । षट्पदार्थहितामिति । तर्कपक्षे षड्भ्यः पदार्थेभ्यो द्रव्यगुणकर्मसामान्यविशेषसमवायेभ्यो हितां । द्वितीय-

पक्षे षट्पदार्थं भ्रमरार्थं हितां श्रीपांडुदासेति कायस्थस्याख्या । उपायं करोतीति । अत्रत्यं जल्पं तैरेवार्थैः शब्दपरावर्त्तेन स्वग्रंथांतर्निक्षिपति ततश्च मयेदं रचितमिति वक्तीत्यर्थः । पंचानामिति ब्रह्महत्यासुरापानस्तेयगुर्वंगनागमनतत्संसर्गाख्यानामिति न्यायकंदलीप्रशस्तिः ।

श्रीप्रभवाहनकुले कोटिकनामनि गणे जगद्वंद्ये ।
श्रीमध्यमशाखायां वंशे श्रीस्थूलिभद्रमुनेः ॥ १
गच्छे हर्षपुरीये श्रीमज्जयसिंहसूरिवरशिष्यः ।
षष्ठाष्टमतीव्रतपाः षड्विकृतित्यागसाहसिकः ॥ २
देव्याश्चक्रेश्वर्याः प्रतिपन्नः सुतः श्रुताब्धिगोविंदः ।
श्रीअभयसूरिरवभवन्निःसंगसिद्धबहुविद्यः ॥ ३ ॥

त्रिभिर्विशेषकं ।

परःसहस्रान् भूदेवान् यक्षं कडमडं च यः ।
प्रबोध्य मेडतपुरे वीरचैत्यमचीकरत् ॥ ४
श्रीगूर्जरेश्वरो दृष्ट्वा तीव्रं मलपरीषहं ।
श्रीकर्णो विरुदं यस्य मलधारीत्यघोषयत् ॥ ५
नाथं सुराष्ट्रराष्ट्रस्य खेंगारं प्रतिबोध्य यः ।
उज्जयंततीर्थपथं खिलीभूतमवीवहत् ॥ ६
यस्योपदेशान्निर्मुच्य चतस्रश्चपलेक्षणः ।
प्रद्युम्नो राजसचिवश्चारित्रं प्रत्यपद्यत ॥ ७
श्रीहेमचंद्र इत्यासीत्सूरिर्भूरिगुणः स तु ।
ग्रंथलक्षविनिर्माता निर्ग्रंथानां विशेषकः ॥ ८
प्रतिबोध्य सिद्धभूधवमुद्दंडैः कनकदंडकलसैर्यः ।
उत्तंसितवान् परितः स्वदेशपरदेशचैत्यानि ॥ ९

प्रतिवर्षजीवरक्षामशीत्यहमशीत्यहं ।
यस्योपदेशात्सिद्धेशस्ताम्रपत्रेष्वलीलिखत् ॥ १०

श्रीश्रीचंद्रमुनीद्रो विबुधेंदुमुनिश्च तस्य वंद्यौ द्वौ ।
यौ लाटदेशमुद्रामुज्झित्वा जगृहतुर्दीक्षां ॥ ११

श्रीचंद्रसूरिशिष्यः श्रीमुनिचंद्रः प्रभुः शुचिचरित्रः ।
चौलुक्यमानलनृपं वाग्मी प्रव्राजयामास ॥ १२

तत्क्रमिको देवप्रभसूरिः किल पांडवायनचरित्रं ।
श्रीधर्मसारशास्त्रं च निर्ममे सुकविकुलतिलकः ॥ १३

तदीयसिंहासनसार्वभौम-
सूरीश्वरः श्रीनरचंद्रनामा ।
सरस्वतीलब्धवरप्रसाद-
स्त्रैविद्यमुष्टिंधयधीर्बभूव ॥ १४

टिप्पनमनर्घ्यराघवशास्त्रे किल टिप्पनं च कंदल्यां ।
सारं ज्योतिषमदृभद्यः प्राकृतदीपिकामपि च ॥ १५

तस्य गुरोः प्रियशिष्यः प्रभुर्नरेंद्रप्रभः प्रभावाढ्यः ।
योलंकारमहोदधिमकरोत्काकुत्स्थकेलिं च ॥ १६

राजानः प्रतिबोधिताः कति कति ग्रंथाः स्वयं निर्मिता
वादींद्राः कति निर्जिताः कति तपांस्युग्राणि तप्तानि च ।
श्रीमद्धर्षपुरीयगच्छमुकुटैः श्रीसूरिसुत्रामभि-
स्तच्छिष्यैर्मुनिभिश्च वेत्ति नवरं वागीश्वरी तन्मतिं ॥ १७

नरचंद्रसूरिवंशे सूरिः श्रीपद्मदेव इत्यासीत् ।
सूरिः श्रीश्रीतिलकस्तस्य मूर्गेंद्रासने जयति ॥ १८

तच्चरणरेणुकणिकाभूषितभालस्थलोत्र कंदल्यां ।
श्रीराजशेखरोयं सूरिः श्रीपंजिकामतनोत् ॥ १९
पूज्यश्रीतिलकाभिधानसुगुरोः सामर्थ्यमेतद्ध्रुवं
मादृक्षोपि यदत्र सभ्यपुरतो धत्ते वचश्चापलं ।
यद्विभा अपि शुद्धसंस्कृतगिरः कश्मीरदेशोद्भवा
वाग्देव्याः स खलु प्रभावविभवस्तत्र स्थितायाश्चिरात् ॥ २०
यदत्र दोषकालुष्यं जातं मे मतिमांद्यतः ।
तत्क्षालयंतु संतः स्वबुद्धिगंगांबुधारया ॥ २१

21. **Kshetrasamgrahani** by HARIBHADRASÛRI with the **Commentary** of PRABHÂNANDASÛRI [क्षेत्रसंग्रहणिः सटीका। मू० हरिभद्रसूरिः। टी० प्रभानन्दसूरिः].

Folios 1 to 17.

Begins :

॥ नमो वीतरागाय ॥

नत्वा श्रीवीरजिनं संदर्शितविश्वविश्ववस्तुचयं ।
श्रीक्षेत्रसंग्रहण्या वृत्तिं कुर्वे यथाशक्ति ॥ १ ॥

दत्तैकांतवादिसंदोहविशारदानां गिरा स्वर्गापगानादानुवादानां श्रीहरिभद्रसूरिपादानां कृतेर्व्याचिख्यासायां मादृशस्याल्पमेधसः कोवकाशस्तथाप्यर्थनिपुणप्रकरणरागाच्च शक्तिमजानानोप्युपक्रमे ॥ इह तावत्सूत्रकारः प्रथमं चतुरतिशयस्वरूपभगवन्नमस्कारमंगलाद्यभिधायिकां शिष्टोपदिष्टमार्गानुसरणार्थमाद्यगाथामाह ॥

नमिय जिणं सव्वन्नुं जयपुज्जं जयगुरुं महावीरं ।
जंबुद्दीवपयत्थे वुच्छं सुत्ता सपरहउे ॥१॥

Ends :

कैः कृतेयमित्याह । श्रीहरिभद्रसूरिभी रचितास्तत्र तया निबद्धेति भद्रं ॥

नित्यं श्रीहरिभद्रसूरिगुरवो जीयासुरत्यद्भुत-
ज्ञानश्रीसमलंकृताः सुविशदाचारप्रभाभासुराः ।
येषां वासस्नपया[1] प्रसन्नतरया शीलांबुसंपूर्णया
भव्यस्येह न कस्य कस्य विदधे [2]रंतोमलक्षालनं ॥१॥

वित्ते श्रीकृष्णगच्छे श्रवणपरिवृढश्रीप्रभानंदसूरिः
क्षेत्रादेः संग्रहण्या अकृतसमयगैः संवदंतीं सदर्थैः ।
एतां वृत्तिं खनंदज्वलनविधुमिते विक्रमाब्दे चतुर्थ्यां
भाद्रस्य श्यामलायामिह यदनुचितं तद्बुधाः शोधयंतु ॥२॥

॥ क्षेत्रसंघयणीवृत्तिः समाप्ता ॥

22. **A Great Commentary** on the **Yatijitakalpa** by SÂDHURATNA [यतिजीतकल्पबृहद्वृत्तिः । साधुरत्न:].

Folios 1 to 115.

Begins :

॥ ॐ नमः श्रीजिनप्रवचनाय ॥

जयति महोदयशाली भास्वान् श्रीवर्द्धमानतीर्थपतिः ।
विशदं चरणपथं सा तपःस्थितिर्यदुदिता तनुते ॥ १ ॥

जयति प्रवचनदीपः प्रतिहतदुरपोहमोहतिमिरौघः ।
चित्रं निरंजनोयं जगति गुणग्रामवृद्धिकरः ॥ २ ॥

सकलत्रिलोकविस्मयविधायिनिस्सीमगुणातिशयान् ।
बहुविधलब्धिसमृद्धान्निखिलानपि गणधरान्नौमि ॥ ३ ॥

प्रणमामि विश्रुतश्रीजिनभद्रगणिक्षमाश्रमणमुख्यं ।
संक्षिप्तजीतकल्पं महाश्रुताद्यः समुद्धरे ॥ ४ ॥

---

[1] वाग्भवया ? [2] चेतो ?

श्रीसोमप्रभसूरीन् गुरूत्तमान्स्तौमि विश्रुतातिशयान् ।
सुविहितहिताय विहितः सूव्यासो यैरसावेव ॥ ५ ॥
श्रीसोमतिलकसूरीन् वंदे विख्यातवैभवाभ्युदयान् ।
यैरस्य जीतकल्पस्यातेने वृत्तिरतिविशदा ॥ ६ ॥
मंदमतिबोधहेतोरतिगहनमहागमावगाहनया ।
कालानुभाववशतो व्युच्छिन्ना सा तदैव परं ॥ ७
युग्मं ।
जगति जयंति गरिष्ठा गुरवः श्रीदेवसुंदरमुनींद्राः ।
संप्रति निष्प्रतिमगुणप्रभाप्रभावाद्भुता विदिताः ॥ ८ ॥
ये निजवचनसुधांजनवशेन शिष्यस्य मादृशस्यापि ।
उद्घाटयंति लोचनमांतरमज्ञानतिमिरभृतं ॥ ९ ॥
तस्याः पुनरालेखे चित्रकलाकौशलेन विकलोपि ।
तैः स्वविनेयकनिष्ठोम्यादिष्टोयं ततो यतते ॥ १० ॥
यद्यपि साहसमेवं कुर्वन् हास्योस्मि तदपि किं कुर्वे ।
यन्मामत्र प्रसभं प्रेरयति गुरुप्रसादोयं ॥ ११ ॥

इह दुःषमांधकारनिमग्नजिनप्रवचनप्रदीपायमानश्रीजिनभद्रगणिक्षमाश्रमणविरचितो जीतकल्पोतिसंक्षिप्तः । निशीथभाष्यादिच्छेदग्रंथाश्चातिमहांतो दुरवगाहाश्च । अतः साध्वनुग्रहाय श्रीपूज्यसोमप्रभसूरयः किंचित्सविस्तरप्रायश्चित्तप्रतिपत्तये प्रायो जीतकल्पनिशीथाद्यंतर्गतगाथाभिरेव यतिप्रायश्चित्तविभागाविर्भावकं जीतकल्पनामकं प्रकरणं चिरंतनजीतकल्पात्किंचित्समधिकगाथाकदंबकं कृतवंतः । परं द्विधा विनेया योग्या अयोग्याश्च । तत्र योग्या ये रंगत्संवेगतरंगिणीतरंगप्रक्षालितांतरमलाः परिमलितबुद्धयः समस्तसिद्धांतमहार्णवपारीणाः परिणतवयसः सर्वपथीनप्रतिभाप्राग्भारसारचेतसः सततमुत्स-

र्गापवादगोचराचारचतुराश्चिरंप्रव्रजिताः । ये च तद्विपरीतास्तिंतिणिका-दयश्चाग्रतो वक्ष्यमाणस्वरूपास्तेयोग्याः । एतेषामयं जीतकल्पो न दा-तव्यः । यतः ।

आमे घडे निहित्तं जहा जलं तं घडं विणासेइ ।
इअ सिद्धंतरहस्सं अप्पाहारं विणासेइ ॥ १ ॥

अतो योग्यानामेव दातव्यः । अत्र चादौ पूर्वजीतकल्पगतास्त-द्रूपा एव चतुर्विंशतिगाथाः संति तासां व्याख्यापि प्रायस्तद्रूपैव । तथाहि । सर्वाण्यपि शास्त्राणि मंगलाभिधेयप्रयोजनप्रतिपादनपुरस्स-राण्येव प्रणीयंते विशेषतो निःशेषकल्मषकरीषंकषो जीतकल्पस्त-तस्तस्यादौ मंगलादिप्रतिपादिकेयं गाथा ॥

कयपवयणप्पणामो वुच्छं पच्छित्तदाणसंखेवं ।
जीअव्ववहारगयं जीवस्स विसोहणं परमं ॥ १ ॥

Ends:

अमुद्रसकलपरमागमसमुद्रं महाप्रयत्नेनावगाह्यामृतकल्पं प्रकट-मकारीति ।

इति श्रीयतिजीतकल्पवृत्तिर्जगत्प्रतीतश्रीतपागच्छाधिराजसुविहि-तशिरोमणिभट्टारकप्रभुश्रीदेवसुंदरसूरिशिष्यश्रीसाधुरत्नसूरिकृता ॥

वर्षे तर्कशराब्धिचंद्रगणिते १६५६ श्रीविक्रमार्काङ्कते
गुर्वादेशवशाद्विलोक्य सकलाः कल्पादिशास्त्रावलीः ।
सूरिः श्रीयुतदेवसुंदरगुरोः शिष्याग्रणीरातनो-
देतां श्रीयतिजीतकल्पविवृतिं श्रीसाधुरत्नाह्वयः ॥ १ ॥

प्राज्ञैरुद्देशतो वृत्तौ ग्रंथमानं विनिश्चितं ।
सहस्राः पंच श्लोकानां शतैः सप्तभिरन्विताः ॥ २ ॥

**23. A Short Commentary** on the **Gitagovinda** by MÂNÂNKA [गीतगोविंदकाव्यस्य टिप्पनिका । मानांकः].

Incomplete.

Folio 1.

Begins:

॥ श्रीपरमात्मने नमः ॥

चराणां स्थावराणां च येन ज्ञानं चराचरं ।
सर्वज्ञाय नमस्तस्मै ज्ञानदात्रेच्युतात्मने ॥ १
कवीनां मतिमतानां च स्वार्थाय सुखबुद्धये ।
कृता टिप्पनिका मुख्या मानांकेन महीभुजा ॥ २
वासना वासुदेवस्य सद्यः पापापनुत्तये ।
गीतगोविंदकं काव्यं जयदेवश्चकार सः ॥ ३

यस्यायमाद्यश्लोकः । मेघैरित्यादि ॥

**24. Navatattvaprakarana** by JINACHANDRAGAṆI, with **Bhashya** by ABHAYADEVASÛRI and **Vivarana** by YAŚODEVASÛRI [नवतत्त्वस्य सभाष्यस्य विवरणम् । मू० जिनचन्द्रगणिः । भाष्य० अभयदेवसूरिः । टी० यशोदेवसूरिः].

Folios 1 to 51.

Begins:

॥ ॐ नमः सर्वज्ञाय ॥

मोक्षस्यादिमकारणं जिनवरोद्दिष्टार्थरुच्यावहं
लक्ष्यं लक्षविपन्नबुद्धिविभवैः क्षांत्यादिभिः सद्गुणैः ।
यैरादेशि सुरासुरेंद्रविनतैः सद्दर्शनं देहिनां
नत्वा तान्निहतांतरारिनिकरान्नाभेयमुख्यान् जिनान् ॥ १
सम्यक्त्वार्थनिरूपणगाथाः श्रीदेवगुप्तसूरिर्याः ।
कृतवांस्तासां विवरणमभिधास्ये भाष्यसहितानां ॥ २

इह क्रोधादिकलुषकषायकरालपातालभीषणे जन्मजरामरणनीरपूरपूरिते महामोहावर्त्तपतितानंतजंतुसंतानसंकटे नानाधिव्याधिबा-

धासहस्रक्रूरजलचराकुलेनर्वाक्परपारसंसारपारावारे प्रचुरतरमिथ्या-
प्रकारमकरनिकरावलुप्यमानमवलोक्य सकलजीवलोकमनन्यशरणं
परमकारुणिकः श्रीमन्महावीरवर्द्धमानस्वामी सिद्धसांयात्रिको वि-
हिततदुत्तारणाभिलाषोनंतसुखसंदोहमहानंदनगरनिनीषयानेकविधवि-
शुद्धजीवपरिणामफलकावबद्धं प्रशमादिलिंगसितपटोपलक्ष्यमाणं स-
म्यक्त्वयानमादर्शयत् । तस्य च समस्तधर्ममूलभूतत्वात्स्वरूपादिप्रति-
पादनपराः श्रीदेवगुप्तसूरिणा कतिचिद्गाथा जिनमतोदधेरुद्धृतास्तासां
चातिमहार्थत्वाद्यद्यप्यभयदेवसूरिणा भाष्यं गाथाभिः कृतं तथापि
तासां तद्भाष्यगाथानां च गंभीरमहार्थतया विषमत्वात्तावन्मात्रेण
बोद्धुमशक्यत्वान्मंदमतिबोधार्थं व्याख्या प्रस्तूयते । तासु चेयमा-
दिसूत्रगाथा ॥

सम्मं च मोक्खबीयं तं तु ण भूयत्थसद्दहणरूवं ।
पसमाइलिंगगम्मं सुहायपरिणामरूवं तु ॥ १

Ends :

सूत्रकार एवाधुना प्रकरणकरणफलमुपदर्शयितुं स्वकृतत्वं च
प्रकरणस्य सूचयितुं स्वनामगर्भां समाप्तिगाथामाह ।

इय एए नवतत्ता सभेयभिन्नाउ संगहनिमित्तं ।
गणिणा जिणचंदेणं सरणत्थं अप्पणो रइया ॥

व्याख्या ।

इयत्ति । एवं पूर्वोक्तनीत्या एतानि नवतत्त्वानि प्राकृतत्वाच्च पुंसा
निर्देष्टानि सभेदभिन्नानि नवानामपि तत्त्वानां ये भेदाः संभवंति तैः
सह भिन्नानि पृथग्भूतानि प्रत्येकभणनात्तुशब्दः पूरणे संग्रहः संक्षेप-
करणं तदर्थं संग्रहनिमित्तं गणिना षाण्मासिकभगवत्यंगोपधानोद्ग-
हनावाप्तगणिनाम्ना जिनचंद्रेण पूर्वावस्थानामैतत्तस्योत्तरावस्थायां तु

श्रीदेवगुप्राचार्येणेत्यर्थः। जिनचंद्रगणिनेति भणनेन चैतज्ज्ञापितमेतन्नाम्ना सता मयेदं प्रकरणमकारि। किमर्थं पुनरेतेन च पदार्थाः संगृह्यंते नोक्तास्तत्त्वार्थादिप्रकरणेषु पूर्वसूरिभिरेवामीषां प्रपंचितत्वादित्याशंकापनोदाय स्वयमेवाह स्मरणार्थमात्मनो रचिता। अयमर्थो यद्यपि गंधहस्तिभाष्यादिषु प्रपंचेनामी दर्शितास्तथापि ते कार्यकालोपयोगिनो नास्मादृशां मंदमतीनामतः संक्षेपेणात्मस्मरणार्थं रचिता आत्मस्मरणार्थं कृताश्चान्येषामप्युपयोगिनो भविष्यंतीति गाथार्थः॥ १९२॥

इदानीं भाष्यकार आत्मव्यापारं सप्रयोजनमुपदर्शयन्समाप्तिगाथामाह॥

इय पुव्वसूरिविरइय संमत्तपरूवणत्थगाहाणं।
विवरणमेयं भणियं मंदमईणं विबोहत्थं॥

व्याख्या॥

इयत्ति। एवं पूर्वोक्तसूरिभिः श्रीदेवगुप्राचार्यैर्विरचिताः कृताया सम्यक्प्ररूपणार्थं सम्यग्दर्शनप्रकटनार्थं गाथास्तासां विवरणं व्याख्यानमेतद्गणितं गदितं मंदमतीनामल्पबुद्धीनां विबोधार्थमवगमार्थमिति भाष्यकर्तुः श्रीमदभयदेवसूरेः स्थानांगादिवृत्तिकृतो वचनमिति गाथार्थः॥ १९३॥

समाप्तं नवतत्त्वप्रकरणस्य सभाष्यस्य विवरणं।

नमो नवतत्त्वप्ररूपणाविधायकेभ्यो धर्मतीर्थकरेभ्यो नमः श्रुतदेवतायै नमो जिनशासनप्रभावकेभ्यः॥

कृत्वा विवरणमेद्यदर्जितं पुण्यमिह मया किंचित्।
तस्मात्तदर्थिलोकस्य भवतु नवतत्त्वसद्बोधः॥ १

उत्सूत्रमत्र रचितं यदनुपयोगान्मया कुबोधाद्वा ।
तच्छोधयंतु सुधियः सदाशया मयि विधाय कृपां ॥ २
विलसद्गुणमणिनिकरः पाठीनविराजितो नदीनश्च ।
जलनिधिरिवास्ति गच्छः श्रीमानूकेशपुरनिसृतः ॥ ३
तत्रासीदतिशायिबुद्धिविभवश्चारित्रिणामग्रणीः
सिद्धांतार्णवपारगः स भगवान् श्रीदेवगुप्ताभिधः ।
सूरिर्भूरिगुणान्वितो जिनमतादुद्धृत्य येन स्वयं
श्रोतृणां हितकाम्यया विरचिता भव्याः प्रबंधा नवाः ॥ ४
तेनैव स्वपदप्रतिष्ठिततनुः श्रीकक्कसूरिप्रभु-
र्नानाशास्त्रसुबोधबंधुरमतिर्जज्ञे स विद्वानिह ।
मीमांसां जिनचैत्यवंदनविधिं पंचप्रमाणीं तथा
बुद्ध्वा यस्य कृतिं भवंति कृतिनः सद्बोधशुद्धाशयाः ॥ ५
तत्पादपद्मद्वयचंचरीकः शिष्यस्तदीयोजनि सिद्धसूरिः ।
तस्माद्बभूवोज्ज्वलशीलशाली त्रिगुप्तिगुप्तः खलु देवगुप्तः ॥ ६

अपि च ।

यं वीक्ष्य निःसीमगुणैरुपेतं
श्रीसिद्धसूरिः स्वपदे विधातुं ।
श्रीमत्युपाध्यायपदे निवेश्य
प्रख्यापयामास जनस्य मध्ये ॥ ७

तदंतेवास्युपाध्यायो धनदेवाद्यनामकः ।
यशोदेवो जडोप्येतद्भाष्टचीद्विवरणं व्यधात् ॥ ८
विक्रमनृपतेरेकादशशतसंख्येष्वितेषु वर्षेषु ।
अधिके चतुःसप्ततिसमाभिरिदमागमत्सिद्धिं ॥ ९

श्रीमदणहिल्लपाटकनगरोकेशीयवीरजिनभवने ।
रचितमदः श्रीजयसिंहदेवनृपतेश्च सौराज्ये ॥ १०
श्रीमद्देवाचार्यैः कुशलैः सिद्धांतमुख्यविद्यासु ।
शोधितमिदमु -- सूरिश्रीसिद्धसूरियुतैः ॥ ११
यावज्जैनेश्वरो धर्मो भव्यचेतस्सु वर्त्तते ।
वाच्यमानमिदं तावत्साधुभिर्भवताद्भुवि ॥ १२
प्रत्यक्षरं निरूप्यास्य ग्रंथमानं विनिश्चितं ।
अनुष्टुभां सहस्रे द्वे चतुःशतसमन्विते ॥ १३ ॥

शुभं भवतु ।

---

## C

*Extracts from Books preserved in other Libraries.*

**Gathasahasri** by SAMAYASUNDARA [गाथासहस्री । समयसुंदरः].
Folios 42. Dated Samvat 1686 = A. D. 1630.
Folio 5:

पंचसया चोआला तईया सिद्धिं गयस्स वीरस्स ।
तो अंतरंजिआए तेरासिअदिट्ठिउप्पत्ति ॥ ९६
छव्वाससएहिं नउत्तरेहिं सिद्धिं गयस्स वीरस्स ।
तो बोडीअणदिट्ठी रहवीरपुरे समुप्पन्ना ॥ ९७
बारसवाससएहिं सट्ठेहिं निव्वुअस्स वीरस्स ।
जिणघरमठआवासो पगप्पिउं सायसीलेहिं ॥ ९८
पंचसु सएसु वरिसाण अईगएसु जिणाउ वीराउं ।
वइरो सोहग्गनिही सुनंदगम्भे समुप्पन्नो ॥ ९९
पंचसए पणतीए विक्कमकालाउज्झति अत्थमिउं ।
हरिभद्दसूरिसूरो निव्वुउं दिसउं सिवसुक्खं ॥ १००

तेरसवाससएहिं वीराउ समहिएहिं निवुत्तो ।
सिरिबप्पभट्टिसूरी विउसाण सिरोमणी जाउ ॥ १०१
पणसयरि वरिसाणं तिन्निसयसमन्नियं अइक्कमियं ।
विक्कमकालाउ तउ वलहीभंगो समुप्पन्नो ॥ १०२

श्रीविक्रमादित्यनृपस्य काला-
दष्टोत्तरे वर्षशते व्यतीते ।
शत्रुंजये जावडिना प्रतिष्ठा
बिंबस्य पाषाणमयस्य कारिता ॥ १०३

छव्वाससएहिं नवुत्तरेहिं रयणेण रेवयगिरिंमि ।
संठविअं मणिबिंबं कंचणभवणाउ तेऊणं ॥ १०४
बारसवाससएहिं पन्नासहिएहि वद्धमाणाउ ।
चउदसिपढमपदेसो पकप्पिउ साईसूरीहिं ॥ १०५

॥ इति गच्छोत्पत्तिप्रकीर्णके ॥...

तेणउअ नवसएहिं समइक्कंतेहि वद्धमाणाउ ।
पज्जोसवणचउत्थी कालगसूरीहि तो ठविआ ॥ ६
वीसहिं दिणेहिं कप्पो पंचगहाणीइ कप्पउवणा य ।
नवसयतेणउहिं वुछिन्ना संघआणाए ॥ ७
सालाहणेण रन्ना संघाएसेण कारिउ भयवं ।
पज्जोसवणचउत्थी चउम्मासं च चउदसिए ॥ ८
चाउमासयपडिकमणं पक्खियदिवसंमि चउव्विहो संघो ।
नवसयतेणउवेहिं आयरणं तं पमाणंति ॥ ९

॥ इति गाथाचतुष्टयं तीर्थोद्गालिप्रकीर्णके ॥

सिरिवीराउ गएसुं पणतीसहिएसु तिवरससएसु । ३३५
पढमो कालगसूरी जाउ सामज्जनामुत्ति ॥ १०

चउसयतिपन्नवरिसे ४५३ कालिगगुरुणा सरस्सेई गहिआ।
चउसयसत्तरि ४७० वरिसे वीराउ विक्कमो जाउ ॥ ११
इति श्रीहरिभद्रसूरिकृते पंचवस्तुके ॥...

Folio 33:

इति ज्ञानपंचकविवरणं प्रकरणं श्रीहरिभद्रसूरिकृतं [तत्र गाथाः २६]।

Folio 34:

चतुस्तिलैर्जवः प्रोक्तश्चतुर्जवैश्च अंगुलं ।
चतुर्भिरंगुलैर्मुष्टिश्चतुर्मुष्टिमितः करः ॥ ४३
चतुर्हस्तैश्च दंडः स्यात् क्रोशस्तैर्द्विसहस्रकैः।
चतुर्भिः क्रोशकैश्चाथ योजनं परिकीर्त्तितं ॥ ४४
शतयोजनदेशः स्याच्छतदेशं तु मंडलं ।
शतमंडलखंडः स्यान्नवखंडा वसुंधरा ॥ ४५
॥ इति गाथात्रयं गणिते ॥

Folio 34:

पुव्वभवा सो पेच्छइ इक्कं दो तिन्नि जाव नवमं वा ।
उवरिं तस्स अविसउ सभावउ जाइसरस्स[1] ॥ ४७
॥ इतींद्राचार्यकृतयोगविधौ ॥
चउदस वासाणि तया जिणेण उप्पाडियस्स नाणस्स ।
तो बहुरयाण दिट्ठी सावत्थीए समुप्पण्णा॥ ४८ ॥
जेट्ठासुदंसणजमालिणुज्ज सावत्थितिंदुजाणे[2] ।
पंचसया य सहस्सं ढंकेण जमालिपुत्तेणं ॥ ४९
॥ इति जमालिमतं ॥
सोलसवासाणि तया जिणेण उप्पाडियस्स नाणस्स ।
जीवपएसिअदिट्ठी उसभपुरंमि समुपन्ना ॥ ५०

[1] °सभरस्स ? [2] °तिंदुकुज्जाणे ?

रायगिहे गुणसिलए वसुचउद्दसपुव्वितीसगुत्ताऊ ।
आमलकप्पानयरी मित्तसिरिकूरपिउडाई ॥ ५१
॥ इति द्वितीयस्तिष्यगुप्तनिह्नवः ॥
चउदस दोवाससया तईया सिद्धिं गयस्स वीरस्स ।
अचित्तयाण दिट्ठी सेअवियाए[1] समुप्पन्ना ॥ ५२
सेअंविपोलासाढे जोगे तद्दिवसहिअयसूले अ ।
सोहम्मिनलणगुम्मे[2] रायगिहे सुरिअ बलभद्दे ॥ ५३
॥ इति आषाढाचार्यस्तृतीयोनिह्नवः ॥
वीसा दोवाससया तईआ सिद्धिं गयस्स वीरस्स ।
सामुच्छेइअदिट्ठी महिलपुरीए समुपन्ना ॥ ५४
महिलाए लच्छिधरे महगिरिकोडिन्नआसमित्ते अ ।
नेउणि अनुप्पवायण रायगिहे खंडरक्खाय ॥ ५५
॥ इति आसमित्तश्चतुर्थो निह्नवः ॥
अडवीस दोवाससया तइआ सिद्धिं गयस्स वीरस्स ।
दोकिरिआणं दिट्ठी उल्लगतीरे समुप्पन्ना ॥ ५६
नइखेडजणवउल्लगमहिगिरिधणगुत्तअज्जगंगे अ ।
किरिआदो रायगिहे महातवो तीरमणनाणे ॥ ५७
॥ इति गांगेअनिह्नवः पंचमः ॥
पंचसया चोआला तईआ सिद्धिं गयस्स वीरस्स ।
पुरिमंतरंजिआए तेरासिदिट्ठी उप्पन्ना ॥ ५८
पुरिमंतरंजिभुयगुहबलसिरिसिरिगुतरोहगुत्ते अ ।
परिवारपोट्टसाले घोसणपरिसेहणावाए ॥ ५९
॥ इह रोहगुप्तनामा षष्ठो निह्नवः ॥

---

[1] सेअंवियाए ? [2] नलिणगुम्मे ?

पंचसया चुलसीआ तईआ सिद्धिं गयस्स वीरस्स ।
अव्वाद्धिआण दिट्ठी दसपुरनयरे समुप्पन्ना ॥ ६०
दसपुरनयरुछुघरे अज्जरक्खिअपूसमित्ततिअगं च ।
गोट्ठामाहिलनवमइ नेअ पुछाय विंज्झस्स ॥ ६१
पुट्ठो जहा अबद्धो कंचुईणं कंचुउं सम्मन्नेई ।
एवं पुट्ठमबद्धं जीवं कम्मं स मन्नेई ॥ ६२
॥ इति गोष्ठामाहिलः सप्तमो निह्नवः ॥
॥ एते सप्तापि निह्नवा देशविसंवादिनः ॥
छवाससएहिं नवुत्तरेहिं सिद्धिं गयस्स वीरस्स ।
तो बोडियाण दिट्ठी रहवीरपुरे समुप्पन्ना ॥ ६३

इति दिगंबरमतप्रवर्त्तकः सहस्रमल्लनामा सर्वविसंवादिनिह्नवः ।
एताः षोडश गाथाः श्रीआवश्यकचूर्णितो लिखिताः । आसां व्याख्या संबंधसहिता मत्कृतविशेषसंग्रहतो ज्ञेयाः ॥ ...

Folio 36 :

स्वामिभक्तो[१]महोत्साहः[२]कृतज्ञो[३]धार्मिकः[४]शुचिः ५ ।
अकर्कशः[६]कुलीनश्च[७]शास्त्रज्ञः[८]सत्यभाषकः[९] ॥
विनीतः [१०]स्थूललक्ष्यश्च[११]व्यसनी[१२]वृद्धसेवकः १३ ।
अक्षुद्रः[१४]सत्त्वसंपन्नः[१५]प्राज्ञः[१६]शूरो[१७]चिरक्रियः[१८] ॥ ८५
पूर्वपरेक्षितः सर्वोपधासु १९ निजदेशजः २० ।
राजार्थस्वार्थलोकार्थकारको[२१]निःस्पृहः[२२]शमी[२३] ॥ ८६
अमोघवचनः[२४]कल्पः[२५]पालिताशेषदर्शनः[२६] ।
पात्रौचित्येन सर्वत्र नियोजितपदक्रमः २७ ॥ ८७
आन्वीक्षिकीत्रयीवार्त्तादंडनीतिकृतश्रमः २८ ।
क्रमागतो[२९]वणिक्पुत्रो[३०]भवेन्मंत्री न चापरः ॥ ८८
॥ इति कुमारपालचरित्रे उदयनमंत्रिस्थापने गुणाः ॥

Folio 37 :

आदौ मज्जनचारुचीरतिलकं नेत्रांजनं कुंडलं
नासामौक्तिकपुष्पहारचिकुरालंकारकं नूपुरं ।
अंगे चंदनलेपकंचुकमणी क्षुद्रावलीघंटिका
तांबूलं करकंकणं चतुरता शृंगारकाः षोडश ॥ ९८

स्नानं १ कुंतलधूपनं २ च कबरीगुंफः ३ करे बीटकं ४
चीरं ५ चंदनलेप ६ कंचुक ७ रद्योतां ८ जना ९ लक्तकं १० ।
तांबूलं ११ तिलकं १२ च पत्रलतिका १३ कर्पूरपूरस्तथा १४
पुष्पाणां मुकुटो १५ नखेषु रचना १६ शृंगारकाः षोडश ॥ ९९

प्रकारांतरम् ॥

क्षौरं १ मज्जन २ वस्त्र ३ शीर्षतिलकं ४ गात्रे विलेपार्चनं ५
कर्णे कुंडल ६ मुद्रिका च ७ मुकुटं ८ पादौ च चर्मोर्जितौ ९ ।
हस्ते खड्ग १० पटांबरं ११ कटिछुरी १२ विद्याविनोदो मुखे १३
तांबूलं १४ करकंकणं १५ चतुरता १६ शृंगारकाः षोडश ॥ १०० ...

Folio 41 :

दोपंथे हि न गम्मई दोमुहसुईइ न सीवए कंथा ।
दोवि कयावि न हुज्जा इंदियसुखं च मुक्कं च ॥ ६८

इति सुदर्शनकथायां चिवालवगच्छीयश्रीदेवेंद्रसूरिकृता गाथा ॥

नाम्ना गाथासहस्रीति ग्रंथोयं ग्रथितो मया ।
पंडितास्तांबूलमिवादीयतां मुखमंडनं ॥ १

गाथाः कियत्यः प्रकृताः कियत्यः
श्लोकाश्च काव्यानि कियंति संति ।
नानाविधग्रंथविलोकनश्रमा-
देकीकृता अत्र मया प्रयत्नात् ॥ २ ...

श्रीजिनचंद्रगणाधिपशिष्यादिमसकलचंद्रगणिशिष्यैः ।
श्रीसमयसुंदरोपाध्यायैः संदर्भितो ग्रंथः ॥ ५
ऋतुवसुरसशशि १६८६ वर्षे विनिर्मितो विजयतां चिरं ग्रंथः ।
व्याख्यानपुस्तकेषु व्याख्याने वाच्यमानोसौ ॥ ६ ...
राज्ये श्रीजिनराजस्य प्रतापाक्रांतविष्टपे ।
आचार्यपदवीं प्राप्ते सूरिश्रीजिनसागरे ॥ ४

**Visamvadasataka** by SAMAYASUNDARA [विसंवादशतकम् । समयसुंदरः].

Folios 13.

Begins:

सूत्रवृत्त्यादिसंबंधिविसंवादाभिधानकं ।
शतकं श्रीजिनं नत्वा ब्रूते समयसुंदरः ॥ १

Ends:

वृहत्खरतरे गच्छे सुविशुद्धपरंपरे ।
राज्ये श्रीजिनराजस्य सर्वसूरिशिरोमणेः ॥
सूत्रप्रकरणटीकाप्रबंधसंबंधचारुचरितेषु ।
ये केपि विसंवादा दृष्टा एकीकृता इह ते ॥
शरवसुरसशशिवर्षे १६८५ पाठकवरसमयसुंदरैः सम्यक् ।
स्वपरस्मृतिहेतुकृते कृतं विसंवादशतकमिदम् ॥

**Chandraprabha Haimakaumudi**, by MEGHAVIJAYA UPÂDHYÂYA [चंद्रप्रभाख्या हैमकौमुदी । मेघविजयमहोपाध्यायः].

Folios 86:

विजयंते ते गुरवः शैलशरर्षींदुवत्सरे १७५७ तेषां ।
आदेशाद्देशपतेः स्थितिः कृता राजधान्यंतः ॥ ७
चातुर्मास्यामस्यां नाम्ना श्रीअगरावराख्यायां ।
नानायोगे रचिते रचिता चंद्रप्रभा सुधिया ॥ ८ ...

Folio 87:

भट्टोजिनाम्ना भवदीक्षितेन
सिद्धांतयुक्ता वरकौमुदी या ।
श्रीसिद्धहैमानुगता व्यधायि
सैवाश्रिता भानुविमोदयाय ॥१२...
संवत्सरे बाणकरिक्षमाधर-
चंद्रोन्मिते श्रावणपौर्णमास्यां ।
महीतले खारतरे सुगच्छे
जगत्प्रसिद्धे सति भासमाने ॥ ६ ॥

**Vrindavanakavya** by MÂNÂNKA [वृन्दावनकाव्यम् । मानांक :].

Begins:

वरदाय नमो हरये पतति जनो यं स्मरन्न मोहरये ।
बहुशश्चक्रंद हता मनसि दितिर्येन दैत्यचक्रं दहता ॥ १

Ends:

इत्याह पीतवाससमायतनेऽत्रस्तं
कंसासुरात्पशुमतामायतनेत्रस्तं ।
हसितानां विलसितया स हली लाजानां
छायां विकरन्दशनैः सह लीलाजानां ॥ ३७ ॥
॥ इति वृंदावनकाव्यं पंचदशवृत्तन्यूनम् ॥

**Meghabhyudayakavya** by MÂNÂNKA [मेघाभ्युदयकाव्यम् । मानांकः].

Begins:

जितालिमालामधुभित्तमालं
द्युमार्गमाधाय महत्तमालं ।
पयो विमुंचत्यचिरप्रभाभि-
र्महांबुदाली चलदीप्रभाभिः ॥१ ॥

Ends :

विद्युल्लता लसतिकांचनसन्निभारं
धात्रा वहंति घनवंति न भानि भारं ।
उच्चैरसत्यविरतं जलदोऽस्तवारि-
रस्मिन्प्रयातु समये प्रिय यस्तवारिः ॥ ३० ॥

इति मेघाभ्युदयकाव्यं सप्तवृत्तहीनम् ॥

**Chandradutakavya** by JAMBÛKAVI [चन्द्रदूतकाव्यम् । जंबूकविः]

Begins :

यदतिशितशराग्रग्रस्तमापन्न दुःखं
त्यजति जगदशेषं दीनमापन्नदुःखं ।
स्मरत तदतनूनं सर्वदा शासनस्य
प्रभुमजरमनंतं श्रीमदाशासनस्य ॥ १

Ends :

इति विविधवचोभिश्चंद्रमा यामवत्यां
गदित उदयमानो दीनमायामवत्यां ।
कथयितुमिव तस्मै तूर्णमध्वन्यबाधां
सरति रतिमिलाभृत्यंबराध्वन्यवध्वा ॥ २३

इति चंद्रदूतकाव्यं संपूर्णम् ॥

**Sivabhadrakavya** by SIVABHADRA [शिवभद्रकाव्यम् । शिवभद्रः]

Begins :

प्रणमत सदसिगदं तं चैद्यमहन्योऽप्रियाणि सदसि गदंतं ।
चूर्णितचक्रतुरंगं रुक्मिणममुंचच्च यस्य च क्रतुरंगं ॥ १...
इति शिवभद्रकाव्ये प्रथम आश्वासो नववृत्तरहितः ॥ ...

Ends :

दृष्टा वानरहरिणाः के ते स्थास्यंति वीर वानरहरिणा ।
गुप्तिं कां तव पुर्यां पश्यसि च स नाभिहंति कां तव पुर्यां ॥ २८

इति शिवभद्रकाव्ये द्वितीय आश्वासो विंशतिकाव्यरहितः समग्रः ॥

इति शिवभद्रकवीश्वरविरचितमिदं काव्यम् ॥

**Panchasutra** with **Commentary** by HARIBHADRASŪRI [पञ्चसूत्रकम् । सटीकम् । टी० हरिभद्रसूरिः].

Folios 9.

॥ नमो वीअरागाणं सव्वन्नूणं देविंदपूइआणं जहठियवत्थुवाईणं । तेलुक्कगुरुणं । अरुहंताणं । भगवंताणं । जे एव माइक्खंति ।...

इति पावपडिग्घायगुणबीजाहाणसुत्तं समत्तं ॥...

साहुधम्मपरिभावणासुत्तं ॥...

पव्वज्जागहणविहिसुत्तं ॥...

पव्वज्जापरिपालणसुत्तं ॥...

पव्वज्जाफलसुत्तं ॥

समाप्तं पंचसूत्रकं ॥

कृतं चिरंतनाचार्यैर्विवृतं च जाकिनीमहत्तरासूनुश्रीहरिभद्राचार्यैः ॥

**Siyachariya** by BHUVANATUNGASŪRI [सीयाचरियम् । भुवनतुंगसूरिः].

Folios 8:

Begins:

जस्स पयपउमनहचंदजुन्हजलखालियमलोहं ।
तिजयंपि सुई जातं तं मुणिसुव्वयजिणं नमिउं ॥ १
तिजगचमक्कारकरं मुणिसुव्वयतित्थलद्धमाहप्पं ।
सीयामहासईए चरिअं कित्तेमि लवमित्तं ॥ २

Ends:

सीलगुणसवणसंभूयवरपवरमाणंदकारइयं ।
सीयाचरियं सिरिभुवणतुंगपयसाहगं होउ ॥४६९

इति सीयाचरियं समत्तम् ॥

**Dharmapariksha** by AMITAGATI [धर्मपरीक्षा । अमितगतिः].
Folios 36.
Begins:

श्रीमान्नभस्वत्त्रयतुंगशालं[1]
जगद्गृहे बोधमयः प्रदीपः ।
समंततो द्योतयते यदीयो
भवंतु ते तीर्थकराः श्रिये नः ॥ १

Ends:

सिद्धांतपाथोनिधिपारगामी
श्रीवीरसेनो जिनसूरिवर्यः ।
श्रीमाथुराणां यमिनां गरिष्ठः
कषायविध्वंसविधौ पटिष्ठः ॥ १
ध्वस्ताशेषध्वांतवृत्तिर्महस्वी
तस्मात्सूरेर्देवसेनोजनिष्ट ।
लोकोद्द्योती पूर्वशैलादिवार्कः
सिष्टाभीष्टः स्थेयसोपास्तदोषः ॥ २
भासिताखिलपदार्थसमूहो
निर्मलोमितगतिर्गणनाथः ।
वासरो दिनमणेरिव तस्मा-
ज्जायते स्म कमलाकरबोधी ॥ ३
नेमिषेणगणनायकस्ततः
पावनं वृषमधिष्ठितो विदुः ।
पार्वतीपतिरिवास्तमन्मथो
योगगोपनगणार्चितक्रमः ॥ ४

[1] शाले?

कोपनिवारी शमदमधारी
माधवसेनः प्रणतरसेन ।
सोभवदस्माद्दलितमदात्मा
यो यतिसारः प्रसमितमारः ॥ ५
धर्मपरीक्षामकृत वरेण्यां
धर्मपरीक्षामखिलसरण्यां ।
शिष्यवरिष्ठोमितगतिनामा
तस्य पटिष्ठोनघमतिधामा ॥ ६
बद्ध मया जलधियात्र विरोधि यत्तत्
गृह्णंत्विदं स्वपरशास्त्रविदो विशोध्य ।
गृह्णंति किं बुसमपास्य न सस्यजातं
सारं न सारमिदमूह्यधियो विबुध्य ॥ ७
कृतिः पुराणा सुखदा न नूतना
न भाषणीयं वचनं बुधैरिदं ।
भवंति भव्यानि फलानि भूरिसो
न भूरुहां किं प्रसवः प्रसूनतः ॥ ८
पुराणसंभूतमिदं न गृह्यते-
पुराणमित्यस्य न सुंदरेति गीः ।
सुवर्णपाषाणविनिर्गतं जने
न कांचनं गच्छति किं महार्थतां ॥ ९
न बुद्धिगर्वेण न पक्षपातता
मयान्यशास्त्रार्थविवेचनं कृतं ।
ममैष धर्मं शिवशर्मदायकं
परीक्षितुं केवलमुत्थितः श्रमः ॥ १०

अहारि किं केशवशंकरादिभि-
र्व्यतारि किं वस्तु जिनेन मेर्थितं ।
स्तुवे जिनं येन निषिध्य तानहं
बुधा न कुर्वंति निरर्थकां क्रियां ॥ ११

विमुच्य मार्गं कुगतिप्रवर्त्तकं
श्रयंतु संतः सुगतिप्रवर्त्तकं ।
चिराय मा भूदखिलांगतापकः
परोनुतापो नरकादिगामिनां ॥ १२

निगूहते ये विनिवेदितं हितं
व्रजंति ते दुःखमनेकधाग्रतः ।
कुमार्गलग्नो व्यवतिष्ठते न यो
निवारितोसौ पुरतो विषीदति ॥ १३

विनिष्ठुरं वाक्यमिदं ममादितः
सुखं परं दास्यति नूनमग्रतः ।
निषेव्यमाणं कटुकं किमौषधं
सुखं विपाके न ददाति कांक्षितं ॥ १४

विविच्य गृह्णीय[1] बुधा ममोदितं
शुभाशुभं ज्ञास्यथ निश्चितं स्वयं ।
निषेव्यमाणं शतशोपि जायते
स्फुटं भृशं नानुभवं विना जनाः ॥ १५

क्षतसकलकलंका प्राप्यते तेन कीर्त्ति-
र्बुधमतमनवद्यं बुद्ध्यते तेन तत्त्वं ।

---

[1] गृह्णीत ?

हृदयसदनमध्ये धूतमिथ्यांधकारो-
जिनपतिमतदीपो दीप्यते [1]यस्य दीप्रः ॥ १६

वदति पठति भक्त्या यः शृणोत्येकचित्तः
स्वपरसमयतत्त्वावेदि शास्त्रं पवित्रं ।
विदितसकलतत्त्वः केवलालोकनेत्र-
स्त्रिदशमहितपादो यात्यसौ मोक्षलक्ष्मीं ॥ १७

धर्मो जैनः पवित्रः प्रभवतु भुवने सर्वदा शर्मदायी
शांतिं प्राप्नोतु लोको धरणिमवनिपा न्यायतः पालयंतु ।
हत्वा कर्मारिवर्गं यमनियमजैरैः [2]साधवो यांतु सिद्धिं
विस्तीर्णा शुद्धबोधाजितहितनिरता जंतवः संतु सर्वे ॥ १८

इत्यमितगतिकृता धर्मपरीक्षा समाप्ता ॥

**Gathakosa** by MUNICHANDRASÛRI [गाथाकोशः । मुनिचंद्रसूरिः].

Folio 1:

धम्मह १ छयल्ल २ विज्ज ३ जोइसिउ ४ लेहउ ५ तहा वेसा ।
६ सिहिणा ७ सुरय ८ दिट्ठी ९ दूई १० असईण ११ पावलिया ॥
१२ पहियाण १३ पुणो माणं १४ बालालावण्णं १५ तहयमहिलाण ।
१६ दयियाणुराय १७ णेहो १८ पडिवण्ण १९ उण विरहो ॥
२०आलावो पुरिसाणं २१महिलाणं२२धण्ण२३विज्ज२४जिणसंखा ॥

दिट्ठी दिट्ठीपसरो पसरेण रईइ सम्भाउ ।
सब्भावेण य नेहो पंचवि बाणा अनंगस्स ॥
डज्झणभयेन णट्ठो कामो वसिउ कामिणीगुज्झे ।
ईसरपय जे भत्ता हणंति ते णिट्ठुरे घाए ॥

---

[1] यस्य? [2] °भरैः?

हरविसमनयणकोवानलेण दड्ढेण तहवि मयणेण ।
कज्जलमसेण तरुणीणयणम्मि संकामिउ अप्पा ॥
णिवसंति जत्थ छेया ललियरकरकव्वबंधणे कुसला ।
जाणंति वंकभणियं सुंदरि णयरं ण सो गामो ॥
तं नत्थि तं न होसिइ तिलतुसमित्तंपि [1]तिहुयले ।
तं विहिणा ण य विहियं ज ण हु णाउ छयल्लेहिं ॥
दोतिन्निबुहा दोतिन्निमाणिणो पंचसत्तरंगिल्ला ।
जत्थ न हुंति निवेसे तं नयरं रण्णसारित्थं ॥

Folio 2 :

लोहमई गुणविमुक्का रत्तं दट्ठूण जीवियं हरइ ।
विसमक्खियव्व वेसा जं पावइ तं विणासेइ ॥
उवयारसहस्सहवि तिण्णि ण लज्जंति माणुसे लोए ।
वेसा अविवेयपहू खलाण हिययं तह चेव ॥

Folio 3 :

दुल्लह जणाण राउ लज्जा गुरू ईय परवसो अप्पा ।
पियसहि विसमं पिम्मं मरणं सरणं णवरमेकं ॥
पीडे नियथणहारं वहेइ कंपं [2]ससम्भसं सेयं ।
चुंबेइ डिंभयावि हु मम्महसरपीडिया बाला ॥
अइलज्जियमइभीयं अइभूमिपलोयणं च अइमोणं ।
पुरिसस्स महिलियाए ण खुद्दसीलस्स चरियाइ ॥

Folio 4 :

संताविय ण विहडइ पिम्मं णवजुव्वकंचणच्छायं ।
वड्ढइ कलाहि अहियं मिहुणाणं माणकसवट्टे ॥

[1] तिहुयणतले ? [2] ससम्भमं ?

Folio 5:

अहह मयमोहमच्छरपमुक्कसंगाण वरमुणीणंपि ।
कामिणिकाबालहसियं णूणं हियए चमक्केइ ॥
अहरं कंठकवोले थणजुयलं नाहिमंडलं रमणं ।
एयं जणसामन्नं हियय्यं जं जस्स तं तस्स ॥
लायण्णसलिलभरियं वयणसरं दप्पणे पलोयंती ।
फुट्टणभएण बाला कोरइ सीमंतपरिवाहं ॥
एकेण कवडवलिबंधणेण भुयणे ण माइ गोविंदो ।
अच्चरियं भमइ पियाणवि मियमुही तिवलिबंधेवि ॥
ते धण्णा जाण घरंमि दीसंति धूलिधूसरा णिच्चं ।
उट्ठंत पडंत रडंत दोतिण्णि जत्थ डिंभाइं ॥
आयासं पायालं सयलं महिमंडलं सगहचक्कं ।
जाणंति बुद्धिमंता महिलाचरियं न याणंति ॥
मच्छपयं जलमज्झे आयासे पंखियाण पयपंती ।
जाणंति बुद्धिमंता महिलाहियय्यं न याणंति ॥

Folio 6:

धवला मइलणसीला सिणेहपरिपूरियावि तावेइ ।
दीवयसिहिव्व महिला कज्जलमइलं घरं कुणइ ॥
जम्मंतीए सोगो वट्टंतीए विवट्टए चिंता ।
परणीयाए दंडो जुवइपिउ दुक्किउ निच्चं ॥
मा वच्चह वीसंभं णईण णारीण सरइत्तारीण ।
पसरिय पउहराउ कूलाइ कुलाइ पाडंति ॥
एवं चिय स लहिज्जइ दिणेसदियहाण णेहनिव्वहणं ।
आजम्मं एक्कमेकेहि विरहो त्रिय ण दिट्ठो ॥

णेहो कहवि ण कीरइ अहवा कीरइ रत्तकंबलसरित्थो ।
अणवरयं धोयमाणो अण्णं वण्णं ण गिण्हेइ ॥
कज्जेण विणा णेहो अत्थविहूणेण गोरवं लोए ।
पडिवण्णे णिव्वहणं कुणंति जे ते जए विरला ॥
अणुराय जस्स जेहिं तेणं चिय हिययणिव्वुई तस्स ।
मेहसलिलेण तप्पइ बप्पीहो ण सरसलिलेण ॥

Folio 7:

सज्जणपिईपसंगो गुलियारंगव्व दुक्कपरकालो ।
इयरजणाण य णेहो हलिद्दरंगव्व [1]उ गिलइ ॥

Folio 8:

जह बप्पीउ खरगिम्हताविउ सुसियतालहुद्दहो ।
घणआगमणं जोअइ तह अम्हे तुम्ह आगमणं ॥

Folio 9:

सव्वोवि जणो पच्चक्खदंसणे कुणइ णिब्भरं णेहं ।
सो सुयणो जो दूरट्ठियाण पालेइ पडिवण्णं ॥
सो चिय कीरइ मित्तो जो चिय पत्तंमि वसमयंमि ।
ण होइ परायत्तो सेलसिलाघडियपुरिसव्व ॥
णयणेहि को ण दीसइ केण समं णह हवंति आलावा ।
जं पुण हियाणंदं जणेइ तं माणुसं विरलं ॥
जह चक्कवायजुयलं ण लहइ सुक्कं विओय संतत्तं ।
तुह दंसणमलहंतं अह्माण मणं तह चेय ॥
सज्जणजणाण संगो पइदियहं जं ण होइ अम्हाणं ।
ता मण्णे पुव्वभवे मयावि विच्छोहिउ कोइ ॥

[1] उग्गिलइ?

Folio 10:

णह जाणेमि गुणा तुह कित्तियमित्ताइ संति ससिवयणे ।
एक्क चिय तुह दोसो जं विरहे दहसि अंगाइ ॥
अमयरसपाणिसरिसं सुंदरि तुह दंसणं जइ लहेमि ।
ता एत्तिएण तित्तो अण्णंपि ण किंपि पत्थेमि ॥
संसारंमि असारे जीविज्जइ तुज्झ दंसणाए[1] ।
जइ सावि ण होइ पिए ता किं जीएण अफलेण ॥
सरणागयंवि काऊण धरसि पासम्मि मह मणं बाले ।
किं अवरुद्धं ण याणहि जेहिं तादूं विजोजेसि ॥
[2]अमयमउणि सुणिज्जइ णूणं पसयच्छि पुण्णमाइंदो ।
सा चेव तुज्झ विरहे हुयवहसविसेसउ जाउ ॥
जे णामंति ण सीसं कस्सवि भुवणेवि ते महासुहडा ।
रागंधा गलियबला रुलंति महिलाण चलणतले ॥
मरणेवि दीणवयणं माणधरा जे नरा ण जंपंति ।
तेवि य कुणंति लल्लिं अबलाणं णेहगहगहिला ॥
तत्थवि जत्थवि णूणं कामियणो णियइ तम्मयं सयलं ।
उम्मत्तयरसरसिउ पिच्छइ णण्णं विणा कणयं ॥

Folio 11:

जाणामि तुज्झ विरहे जइ जलणट्ठयासणंमि पविसामि ।
डज्झहिसि मज्झ हियए अत्थं तो तेण बीहामि ॥
पियमहिलामुहकमलं बालमुहं धूलिधूसरच्छायं ।
सामिमुहं सुपसण्णं ते धण्णा जेइ पिच्छंति ॥

Folio 12:

हंसा रच्चंति सरे भमरा रच्चंति केतकीकुसुमे ।
चंदणवणे भुयंगा सरिसा सरिसेहि रच्चंति ॥

---

[1] दंसणासाए? [2] अमिय?

पुव्वकइरइयगाहा गहिऊणं एगउवि काऊण ।
पुण्णिमपरहुप्पण्णो मुणिचंदो तेण णिम्मिउ ॥...
तिसउचउरासीउ रसालउ जयउ भुवणंमि ॥...

**Vichararatnasamgraha** by JAYASOMASÛRI. [विचाररत्नसंग्रहः। जयसोमसूरिः].

Folios 1 to 222. Dated Samvat 1748.=A. D. 1692.

The Granthâgra is given as 14,000.

1. *From the praśasti of a Munisuvratacharitra* [मुनिसुव्रतचरित्र-प्रशस्तौ].

पूर्वं चांद्रकुले बभूव विपुले श्रीवर्द्धमानः प्रभुः
सूरिर्मंगलभाजनं सुमनसां सेव्यः सवृत्तास्पदं ।
शिष्यस्तस्य जिनेश्वरः समजनि स्याद्वादिनामग्रणी-
र्बंधुस्तस्य च बुद्धिसागर इति त्रैविद्यपारंगमः ॥ १
सूरिः श्रीजिनचंद्रोभयदेवगुरुर्नवांगवृत्तिकरः ।
श्रीजिनभद्रमुनींद्रो जिनेश्वरविभोस्त्रयः शिष्याः ॥ २
चक्रे श्रीजिनचंद्रसूरिगुरुभिर्धुर्यैः प्रसद्धाभिध-
स्तेन ग्रंथचतुष्टयीस्फुटमतिः श्रीदेवभद्रः प्रभुः ।
देवानंदमुनीश्वरोऽभवदतश्चारित्रिणां ग्रामणीः
संसारांबुधिपारगामिजनताकामेषु कामं सखा ॥ ३
यन्मुखावासवास्तव्या व्यवस्यति सरस्वती ।
गंतुं नान्यत्र स न्याय्यः श्रीमान् देवप्रभुः प्रभुः ॥ ४
मुकुरतुलामंकुरयति वस्तुप्रतिबिंबविशदमतिवृत्तं ।
श्रीविबुधप्रभचित्तं न विधत्ते वैवरीत्यं तु ॥ ५
तत्पदपद्मभ्रमरश्चक्रे पद्मप्रभश्चरितमेतत् ।
विक्रमतोतिक्रांते वेदग्रहरविमिते समये ॥ ६ ॥

2. *From a Kalpâdhyananadurgapadanirukta by Vinayachandra* [कल्पाध्ययनदुर्गपदनिरुक्तम् । विनयचन्द्रः].

प्रणम्य श्रीमहावीरं द्वादशांगीगुरूनपि ।
कल्पाध्ययनशब्दानां पर्यायान् कांश्चन ब्रुवे ॥...

नववाससयाइंति । श्रीवीरनिर्वृतेर्नवसु वर्षशतेष्वशीत्या त्रिनवत्या वाधिकेषु इयं वाचना जाता । यद्वा पंचम्याः चतुर्थी पर्युषणा प्रववृते । तेणउ य नवसएहिं० ।

वीसहि दिणेहि कप्पो पंचयहाणीए कप्पउवणा य ।
नवसयतेउणएहिं वुच्छिन्ना संघआणाए ॥
सालाहणेण रन्ना संघाएसेण कारियं भयवं ।
पज्जूसवणचउत्थी चाउम्मासं चउहसीए ॥ ३
चउमासपडिकमणं पक्खियं दिवसम्मि चउविहा संघो ।
नवसयतेणउयएहिं आयरणं ते पमाणंति ॥ ४

इति तीर्थोद्गरादिषु भणनात् ।

3. *From a Sthavirâli* [स्थविरावली].

गोमय सुहम्म जंबू पभवो सिज्जंभवो य जसभद्दो ।
संभूइविजय सिरिथूलभद्द गणहरमहागिरिणो ॥ १
सूबलसह साई सामज्जो संडिलो य जीयधरो ।
अज्जसमुद्दो [1]मंनंनंदिल्लो नागहत्थी य ॥ २
रेवइ सिंह खंदिल्ल हिमवन्नागज्जुणाइ गोविंदो ।
सिरिभूईदिन्न लोहिच्च दूसगणिणो य देवड्ढी ॥ ३...
अज्जसुहत्थी तहेव दिन्ने तहिंदादिन्ने य ।
सीहगिरि वइरसामी एमाइ सुहत्थिवंसो य ॥ ६

[1] मंगू?

समाप्तं श्रीपर्युषणाकल्पाध्ययनस्य कतिचिद्दुर्गपदनिरुक्तमिति ।

सैद्धांतिकश्रीमुनिचंद्रशिष्या
अनूचानवरा[1] जयंति ।
श्रीरत्नसिंहाह्वयसूरिमुख्या
यच्छिष्यलेशो विनयेंदुसूरिः ॥ १
श्रीविक्रमात्तत्त्वगुणेंदुवर्षे १३२९
चूर्ण्यादि वीक्ष्य स्वगुरोर्मुखाच्च ।
ज्ञात्वानघं पर्युषणाभिधान-
कल्पस्य किंचिद्विदधे निरुक्तं ॥ २

4. *From the praśasti of a Commentary by Devaguptisuri on the Navapada* [नवपदलघुवृत्तिः । देवगुप्तसूरिः].

नवपदटीका प्रोक्ता श्रावकानंदकारिणी ।
श्रीदेवगुप्तसूरिभिर्भावयितव्या प्रयत्नेन ॥
त्रिःसप्त्यधिकसहस्रे मासे कार्त्तिकसंज्ञिते ।
श्रीपार्श्वनाथचैत्ये तु [2]दुर्गमाय च पत्तने ॥
श्रावकानंदटीकेयं नवपदस्य प्रकीर्त्तिता ।
जिनचंद्रगणिनाम्ना तु गच्छे उकेशसंज्ञके ॥
कक्कदाचार्यशिष्येण कुलचंदसंज्ञितेन च ।
तेनैषा सूत्रिता टीका निर्जरार्थं तु कर्मणां ॥

5. *From a Commentary on the Sârdhaśataka by Dhaneśvarasûri* [सार्धशतकवृत्तिः । धनेश्वरसूरिः].

जिणवल्लहगणिलिहियं सड्ढमत्थवियारलवमिणं ।
सुयणा निसुणंतु सुणंतु सयं परिविबोहिंतु सोहिंतु ॥

व्या० जिनवल्लभगणिनामकेन मतिमता सकलार्थसंग्राहिस्थानांगांगोपांगपंचाशकादिशास्त्रवृत्तिविधानाप्तावदातकीर्त्तिसुधाधवलि तथ

[1] प्राज्ञा अनूचान°? [2] दुर्गमायतपत्तने ?

रामंडलानां श्रीमदभयदेवसूरीणां शिष्येण लिखितं कर्मप्रकृत्यादि-
गंभीरशास्त्रेभ्यः समुद्धृत्य दृब्धं जिनवल्लभगणिलिखितं ॥

इति सार्द्धशतकवृत्तौ विशवालगच्छे धनेश्वरसूरिकृतायां ।

शशिमुनिपशुपतिसंख्ये वर्षे नृपविक्रमादतिक्रांते ।
[1]चैत्रे सप्तम्यां समर्थितेयं गुरौ वारे ॥

6. *From the praśasti of a Śrīvīracharitra by Guruchandragaṇi* [श्रीवीरचरित्रप्रशस्तिः । गुरुचन्द्रगणिः].

आसि सिरिवद्धमाणो मुणिनाहो संजमनिहिव्व ।
बहुलकलिकालतमपसरपूरियासेससविसमसमभागे ॥
दीवेणं व मुणीणं पयासिउं जेहि [2]मुत्तिपत्तो ।
मुणिवइणो तस्स हरंहासससिरिजसपयासियासस्स ॥
आसि दुवे वरसीसा जयपयडा सूरससिणुव्व ।
भवजलहिवीहिसंभंतभवियणसंताणतारणसमत्थो ॥
बोहित्थोव्व समत्थो सिरिसूरजिणेसरो पढमो ।
गुरुसाराउं धवलाउं खरयसाहुसंतई जाया ॥
हिमवंताउं गंगुव्व निग्गया सयलजणपुज्जा ।
अण्णो य पुण्णिमाचंदसुंदरो बुद्धिसागरो सूरी ॥
निम्मवियपवरवागरणछंदमत्थोवसत्थमई ।
एगंतवायविलसिरपरवायकुरंगभंगसीहाण ॥
तेसिं सीसो जिणचंदसूरी नामा समुप्पण्णो ।
संवेगरंगसाला न केवलं कव्वविरईया जेण ॥
सव्वजणविम्हयकरी विहिया संजमपवित्तीवि ।
ससमयपरसमयन्नू विसुद्धसिद्धंतदेसणाकुसलो ॥

[1] चैत्रे सितसप्तम्यां ? [2] मुक्तिपथो ?

सव्वमहिवलयवित्तो अन्नोभयदेवसूरित्ति ।
जेणालंकारधरा सलक्खणा वरपया पसन्ना य ॥
नवरंगवित्तिवररयणभारई कामिणीव कया ।
तेसिं अत्थि विणेउं समत्थसत्थबोहकुसलमई ॥
सूरी पसन्नचंदो चंदो इव जणमणानंदो ।
तव्वयणेणं सिरिसुमइवायगाणं विणेयलेसेणं ॥
गणिना गुरुचंदेणं रइयं सिरिवीरचरियमिमं ।
नंदसिहिरुइ११३९संखे वोक्कंते विक्कमाउ कालम्मि ।
जेट्ठस्स सुद्धतईयातिहिम्मि सोमे समत्तमिमं ॥

7. *From the Vasudevahindi* [वसुदेवहिंडौ मध्यमखण्डप्रारंभः].

तत्थ य सामापियपमादियाणं रोहिणिपज्जुवसाणं एगुणतीसं लंभगा संघदासवायगेणं उवणिबद्धा एग्गत्तरिसं च वित्थारभीरुणा कथामज्झे छड्डिया ततोहं लोइयसिंगारकहापसंसणं असहमाणो आयरियसगासे अवधारे ऊण पवयणाणुरागेणं आयरियनिउएण य तसि मज्झिल्लंभाणं गंथणत्थे अब्भुज्ज उहंतं सुणह ॥

8. *From the Yogavidhi by Ajitadevasúri* [योगविधिः । अजितदेवसूरिः]

चंद्रकुले ते जाताः श्रीशीलगणाख्यगणभृतः ख्याताः ।
श्रीमानतुंगगणभृन्मलयप्रभसूरिमुख्याश्च ॥ १
श्रीभद्रगुप्तगुरवः कुवलयसुप्रीतिकारिवरचरिताः ।
तन्नाममंत्रभक्तिस्मरणादपि जायतेभिमतं ॥ २
द्वादशवर्षशतेषु श्रीविक्रमतस्त्रिसप्ततियुतेषु ।
श्रीभानुप्रभगुरुराजपट्टकल्याणकुंभाभैः ॥ ३
श्रीअजितदेवसूरिभिरिति योगविधिः प्रपंचितः ।
किंचित्पाक्षिकनंद्याद्युक्तं विभाव्य भव्यबुधैः कार्यं ॥ ४

9. *From a Commentary by Prithvichandrasûri on the Paryushaṇa-kalpa* [पर्युषणाकल्पटिप्पनकम् । पृथ्वीचन्द्रसूरिः].

चांद्रकुलांबरशशिनश्चारित्रश्रीसहस्रपत्रस्य ।
श्रीशीलभद्रसूरेर्गुणस्य महोदधेः शिष्यः ॥ २
अभवद्दनमदहारः षट्तर्कांभोजबोधनदिनेशः ।
श्रीधर्मघोषसूरिर्बोधितशाकंभरीनृपतिः ॥ ३
चारित्रांभोजशशी त्रिपथीपरिहारजनितबुधहर्षः ।
दर्शितविधिशर्मनिधिः सिद्धांतमहोदधिः प्रवरः ॥ ४
बभूव श्रीयशोभद्रसूरिस्तच्छिष्यशेखरः ।
तत्पादपद्ममधुपोभूच्छ्रीदेवसेनगणिः ॥ ५
टिप्पनकं पर्युषणाकल्पस्यालिखदवेक्ष्य शास्त्राणि ।
तच्चरणकमलमधुपः श्रीपृथ्वीचंद्रसूरिरिदं ॥ ६ ॥

10. *From a "Duḥkhamakâlaśrîśramaṇastotra* [दुःखमाकालश्रीश्रमणसंघस्तोत्रम्].

वीरजिणभुवणविस्सुयपवयणगयणिक्कदिणमण[1]समाणे ।
वड्ढंतसुयनिहाणे थूणामि सूरी जुगप्पहाणे ॥ १
वीस[१]तिवीस[२]ठनवइ[३]अडसयरि[४]पंचसयरि[५]गुणनउई[६] ।
सउ[७]सगसी[८]पणनउई[९]सगसी[१०]छस्सयरि[११]अडसयरी[१२] ॥ २
चउनवइ[१३]अठ[१४]तिय[१५]सग[१६]चउ[१७]पन्नुत्तरसयं[१८]तितीससयं[१९]।
सउ[२०]पण नउइ[२१] नव नवइ[२२]चत्त[२३]तेवीसुदयसूरी ॥ ३
अह उदयाणं पढमे जुगपवरे पणवयामि तेवीसं ।
सिरिसुहम[१]वयर[२]पडिवय[३]हरिस्सहं[४]नंदिमित्तं च ५ ।
सिरिसूरसेण[६]रविमित्त[७]सिरिप्पहं[८]मणिरहं च ९ ।
जसमित्तं[१०]धणसिंह[११]सव्वमित्तं[१२]धम्मिल्लं[१३]सिरिविजयणंदं[१४]॥ ५

[1] दिणमणि?

वंदामि सुमंगल १५ धम्मसिंह १६ जयदेव १७ सूरसुरदित्तं १८ ।
वइसाहा१९कोडिन्नं२० माहुर२१वणिपुत्तं२२सिरिदत्तं २३ ॥ ६
उदयाणंतिमसूरी पुसमित्त१अरहमित्त२वइसाहं ३ ।
वंदे सुकित्ति४थावर५रहसुय६जयमंगलमुणिंदं७ ॥ ७
सिद्धत्थं८ईसाणं९रथमित्तं १०भरणिमित्त ११दढमित्तं १२ ।
सिरिसंगयमित्तं१३सिरिधरं१४मागह१५ममरसूरिं१६ ॥ ८
सिरिरेवइमित्तं १७ किित्तिमित्त१८सुरमित्त१९ फग्गुमित्तं च२० ।
कल्लाण२१देवमित्तं२२नमामि दुप्पसहमुनिवसहं२३ ॥ ९
वंदे सुहम्मजंबूपभवं सिज्जंभवं च जसभद्दं ।
संभूयविजयसिरिभद्दबाहुसिरिथूलभद्दं च ॥ १०
महागिरिसुहत्थगुणसुंदरं च सामज्जखंदिलायरियं ।
रेवइमित्तं धम्मं च भद्दगुत्तं च सिरिगुत्तं ॥ ११
सिरिवयरमज्जरक्खियसूरिं पणमामि पूसमित्तं च ।
इय सत्त कोडिनामे पढमुदए वीस जुगपवरे ॥ १२
बीए तिवीस वइरं च नागहत्थिं च रेवईमित्तं ।
सीहं नागुज्जणभूइदिन्नयं कालयं वंदे ॥ १३
सिरिसच्चमित्तहारिलजिणभद्दं वंदिमो उमासाइ ।
पुसमित्तं संभूयं मोढरिसिं भूयधम्मसिरिं ॥ १४
जिइंकपग्गुमित्तं धम्मघोसं च विणयमित्तं च ।
सिरिसीलमित्तरेवइमित्तसुमित्तं अरिहमित्तं ॥ १५
इय सव्वोदयजुगपवरसूरिणो चरणसंजुए वंदे ।
चउरूत्तरदुसहस्सं दुप्पसहंते सुहम्माई ॥ १६
इय सुहमजंबू तब्भवसिद्धा एगावयारिणो सेसा ।
सट्ठिदुजोयणमज्झे जयंतु दुब्भिक्खडमरहरा ॥ १७ ॥ ...

एवं देविंदनयं सिरिविज्जाणं धम्मकित्तिपयं ।
वीरजिणपवयणट्ठियं दुसमसंघं नमह निच्चं ॥

इति दुःखमाकालश्रीश्रमणसंघस्तोत्रं ।

11. *From an "Ashṭakavṛitti by Jineśvarasúri* [अष्टकवृत्तिः । जिनेश्वरसूरिः].

जिनेश्वरानुग्रहतोष्टकानां विविच्य गंभीरमपीदमर्थं ।
अवाप्य सम्यत्क्रमपेतरेकं सदैव लोकाश्चरणे यतध्वं ॥ १
सूरेः श्रीवर्द्धमानस्य निःसंबंधविहारिणः ।
हारिचारित्रपात्रस्य श्रीचंद्रकुलभूषिणः ॥ २
पादांभोजद्विरेफेण श्रीजिनेश्वरसूरिणा ।
अष्टकानां कृता वृत्तिः सत्त्वानुग्रहहेतवे ॥ ३
समानामधिकेशीत्या सहस्रे विक्रमाद्गते ।
श्रीजावालपुरे रम्ये वृत्तिरेषा समापिता ॥ ४

इति श्रीजिनेश्वरसूरिवराचार्यकृता श्रीमदभयदेवसूरिप्रतिसंस्कृताष्टकवृत्तिः समाप्ता ॥ ग्रंथमानं ३३७०

Folio 222:

श्रीमत्खरतरगच्छे विजयिनि मंदाकिनीजलस्वच्छे ।
श्रीजिनचंद्रविवस्वति युगप्रधानेतिपदवर्ये ॥ १
श्रीवामेयप्रमेयप्रमेयपारंगतं च पारगतं ।
कृत्वा चेतोविषयं विषयांतरविरतनिजमनसः ॥२
वागीसदयातिलकक्रमकमलरजोलवस्य परिचरणात् ।
समवसितसमयसारा बाल्येपि कृतश्रुताचाराः ॥ ३
श्रीचंद्रमंत्रिदेवाः सारणदासादिविबुधसामग्र्या ।
नानाग्रंथविचारव्याख्याकरणाच्च संयत्य ॥४

अणहिलपत्तनजेसलमेरुस्थितसमयकोशवीक्षायाः ।
समवसितगोप्यगंभीरभावश्रुतनिकरसंचाराः ॥ ५
खरतरसमाचारीविचारणप्रवणमानसैः सद्भिः ।
सूजामेघोदयकर्णडुंगराद्यैः परिश्रमिताः ॥ ६
हिंसारमहिमजेसलमेसलमेरुषु चर्चाश्रमेण विख्याताः ।
रेजुः श्रीगुरुकृपया लब्धजया जगति हरिवद्ये ॥ ७
श्रीमत्प्रमोदमाणिक्यगुरूणामनुशासनात् ।
साहाय्याच्च सतीर्थ्यश्री ५ दयारंगगणीशितुः ॥ ८
यथालब्धागमव्यूहाद्गृहीत्वा सारमादृताः ।
नानाप्रश्नपदश्रेणिप्रत्युत्तरपदात्मकं ॥ ९
परोपकारसंसिद्धये स्वस्य च स्मृतिहेतवे ।
मृक्षणमिव तेयं श्रीजयसोमबुधा व्यधुः ॥१०
विक्रमतो मुनिशररसशशिमाने वत्सरे विजयमाने ।
गुणविनयस्तच्छिष्यः सेरूणानाम्नि वरनगरे ॥ ११
विशकलितपत्ररशिं दृष्ट्वा तस्य क्रमेण तं कृत्वा ।
ग्रंथं ह्यग्बोधार्थं लेखकतो लेखयांचक्रे ॥ १२ ग्रंथाग्रं १४,०००

विचाररत्नसंग्रहः समाप्तः ॥

**Yamakastuti** by DHARMAGHOSHASÛRI with the **Commentary** of SOMATILAKASÛRI [यमकस्तुतिः सटीका । मू० धर्मघोषसूरिः । टी० सोमतिलकसूरिः].

Folios 1 to 21 :

Commentary begins :

ॐ नमः सिद्धं ॥ अर्हं ॥

श्रीमत्तीर्थपतीन्सर्वाननवद्यचिन्मयान् ।
अद्वैतसंविदे वंदे सानंदेन स्वचेतसा ॥ १

अधिकृत्य श्लेषमहं प्रकृतिप्रत्ययविभक्तिरचनाढ्यं ।
एकामपि हि चतुर्द्धा विवृणोमि स्तुतिमिमां सुकृतां[1] ॥ १

सा चेयं ।

श्रीतीर्थराजः पदपद्मसेवा-
हेवाकिदेवासुरकिंनरेशः ।
गंभीरगीस्तारतरो वरेण्य-
प्रभावदाता ददतां शिवं वः ॥ १

व्याख्या० श्रीतीर्थराजः ।...

Folio 3 :

Commentary ends :

, प्रकाशितमिति चतुर्थः स्तुत्यर्थः ॥ ४

श्रीसोमतिलकसूरिः स्तुतिमेकामपि स्वयं रचितां ।
विवृणोति स्म चतुर्द्धा श्लेषवशात्स्वपरहितकृतये ॥ १

इत्येकरूपस्तुतिचतुष्टयवृत्तिः समर्थितेति भद्रं ।

Commentary begins:

॥ अर्हं ॥

श्रेयःश्रीवरदं जिनौघमनघं प्रणम्य विवृणोमि ।
यमकैरलंकृतयतीर्जिनस्तुतीः स्वपरहितकृतये ॥ १

तास्त्वष्टाविंशतिः स्वष्टा मालिनीछंदसाद्भुताः ।
अष्टाष्टयमकै रम्या वर्णयुग्मविनिर्मिताः ॥ २

तत्रादिदेवत्वादादौ श्रीवृषभजिनस्तुतिमाह ।

जय वृषभजिनाभिष्टूयसे निम्ननाभि-
र्जडिमरविसनाभिर्यः सुपर्वांगनाभिः ।

---

[1] स्वकृतां ?

तम इह किल नाभिक्षोणिभृत्सूनुनाभि-
द्भुतभुवनमनाभिक्षांतिसंपत्कुनाभिः ॥ १

व्याख्या० जय रागादिरिपुवर्गजयनाज्जयवान् भव।...

Commentary ends:

तथेति श्रुतदेवतास्तुत्यर्थः ३ ॥ २८ ॥

श्रीदेवेंद्रमुनींद्रपट्टमुकुटैः श्रीधर्मघोषाख्यया
ख्यातैः सूरिवरैर्विशिष्टकविभिश्चारित्रिभिर्ज्ञानिभिः ।
संघाचार इति प्रसिद्धमहिमा सिद्धांततत्त्वाचित-
श्चक्रे ग्रंथवरः परोपकृतये यैः कृप्रयत्नैर्भृशं ॥ १

तस्यांतिर्यतिपर्यंतविन्यस्तयमका इमाः ।
व्यरच्यंत च यैरष्टाविंशतिः स्तुतयोनघाः ॥ २

तच्छिष्यशेखरश्रीसोमप्रभसूरिपादपद्मालिः ।
श्रीसोमतिलकसूरिस्तनुमतिरपि विवृतिमकृतेमां ॥ ३

एतस्यां शुचिसंप्रदायविगमात्तादृक्सुशास्त्रेक्षणा-
भावाद्ग्रंथगतार्थबोधविरहान्मांद्याच्च बुद्धेर्मया ।
दुष्टं क्लिष्टमशिष्टमिष्टसमयातीतं च यत्किंचन
प्रोचे शास्त्रविचारचारुहृदयैः क्षम्यं च शोध्यं च तत् ॥ ४

जयति जगतीह यावज्जिनमतममिकृप्रभावपात्रमिदं[1] ।
यमकस्तुतिवृत्तिरियं तावद्भव्योपकृतयेस्तु ॥ ५

इति यमकस्तुतिवृत्तिः समर्थितेयं ॥ भद्रमस्तु ॥ पंडितश्री०
मुनिचंद्रवाचनार्थं गणिदेवचंद्रेण लिखितं ॥ संवत् १६४८ वर्षे०

---

[1] अभितप्रभाव?

**Yogaratnamala** by NÂGÂRJUNÂCHÂRYA with the **Commentary** of GUṆÂKARA [योगरत्नमाला सटीका। मू० नागार्जुनाचार्यः। टी० गुणाकरसूरिः].

Commentary begins:

गुरुचरणकमलममलं चरणे च नागार्जुनप्रणीतायाः ।
विवृतिं सुखावबुद्ध्यै वक्ष्येहं योगरत्नमालायाः ॥ १

Text begins:

विमलमतिकिरणनिकरप्रभिन्नसच्छिष्यकमलसंघाताः ।
सकलभुवनैकदीपा जयंतिं गुरुभास्करा भुवने ॥ १

स्पष्टाक्षरपदसूत्रैर्गुरुमतरत्नाकरात्समुद्धृत्य ।
ग्रथिता परिस्फुरंती निगद्यते योगरत्नमालेयं ॥ २

Text ends:

आश्चर्यरत्नमाला नागार्जुनविरचितानुभवसिद्धा ।
सकलजनहृदयदयिता समार्थिता सूत्रतो जयति ॥ १४०

इति श्रीआचार्यनागार्जुनकृता योगरत्नावली समाप्ता ॥

Commentary ends:

शास्त्रस्याशीर्वादं ददात्याचार्यः ॥ १४०

यदशुद्धमिह निरूपितमार्यास्तत्क्षम्यतां प्रसादं मे ।
कृत्वा विशोध्यतां यत् को न स्खलति प्रमादनिवहेन ॥ १

आत्मस्मरणाय मया विवृता नागार्जुनप्रणीतेयं ।
आश्चर्यरत्नमाला अग्रेतनवृद्धटीकातः ॥ २

श्रीनृपविक्रमसमये द्वादशनवषड्भिरंकिते वर्षे ।
रचिता गुणाकरेण श्वेतांबरभिक्षुणा विवृतिः ॥ ३

इति श्रीसिद्धघटीयश्वेतांबरमंडितश्रीगुणाकरविरचिता नागार्जुनप्रणीतयोगरत्नमालालघुवृत्तिः समाप्ता ॥

**Atmabodha**, by JINALÂBHASURI [आत्मप्रबोधः। जिनलाभसूरिः].

Folios 1 to 183 :

Prasasti:

श्रीमद्वीरजिनेंद्रतीर्थतिलकः सद्भूतसंपन्निधिः
संजज्ञे सुगुरुः सुधर्मगणभृत्तस्यान्वये सर्वतः ।
पुण्ये चांद्रकुलेभवत्सुविहिते पक्षे सदाचारवान्
सेव्यः शोभनधीमतां सुमतिमानुद्योतनः सूरिराट् ॥ ३

आसीत्तत्पदपंकजैकमधुकृच्छ्रीवर्द्धमानाभिधः
सूरिस्तस्य जिनेश्वराख्यगणभृज्ज्ञातो विनेयोत्तमः ।
यः प्रापच्छिव० सिद्धि८पंक्ति१०शरदि१०८० श्रीपत्तने वादितो
जित्वा सद्विरुदं कृती खरतरेत्याख्यं नृपादेर्मुखात् ॥ ४

तच्छिष्यो जिनचंद्रसूरिगणभृज्ज्ञज्ञे गुणांभोनिधिः
संविग्नोभयदेवसूरिमुनिपस्तस्यानुजोभूत्ततः ।
येनोत्तुंगनवांगवृत्तिरचनां कृत्वार्हतः शासने
साहाय्यं विदधे महच्छ्रुतपरिज्ञानार्थिनां धीमताम् ॥ ५

तत्पट्टे जिनवल्लभो गणधरः सन्मार्गसेवापरः
संजातस्तदनु प्रभूतमहिमा सद्भव्यबोधप्रदः ।
अंबादत्तयुगप्रधानपदभृन्मिथ्यात्वविध्वंसकृ-
च्चेता श्रीजिनदत्तसूरिरभवद्वंदारकाभ्यर्चितः ॥ ६

तदनु श्रीजिनचंद्रः सूरिवरोभूत्स्वधर्मनिस्तंद्रः ।
सन्मणिमंडितभालः प्रणताखिलशिष्टभूपालः ॥ ७

तद्वंशे गुणनिधयः सम्यग्विधयो मुनीश्वराः शुचयः ।
श्रीजिनकुशलमुनींद्रश्रीजिनभद्रादयोभूवन् ॥ ८

जज्ञे मुनींद्रस्तदनुक्रमेण
श्रीजैनचंद्रो मुनिमार्गसेवी ।
प्रबोधितो येन दयापरेण
ह्यकब्बराख्यः पतिसाहिमुख्यः ॥ ९

तदन्वयेभूज्जिनसिंहसूरिः
स्वपाटवाल्हादितसर्वसूरिः ।
ततः स्वधीनिर्जितदेवसूरिः
स्फुरत्प्रभावो जिनराजसूरिः ॥ १०

तच्छिष्यो जिनरत्नसूरिसुगुरुः श्रीजैनचंद्रस्ततो
गच्छेशो गणभृद्वरो गुणगणांभोधिर्जगद्विश्रुतः ।
तत्पट्टोदयशैलमूर्ध्नि सुतरां भास्वत्प्रतापोद्भुरः
पूज्यश्रीजिनसौख्यसूरिरभवत्तत्कीर्त्तिविद्यावरः ॥ ११

तत्पादांबुजसेविनो युगवराः सत्यप्रतिज्ञाधराः
श्रीमंतो जिनभक्तिसूरिगुरवोभूवन् गणाधीश्वराः ।
यैरुद्दामगुणैः स्वधर्मनिपुणैर्निःशेषतेजस्विनां
तस्थे मौलिपदैः प्रकामसुभगैः पुष्पैरिव प्रत्यहं ॥ १२

तेषां विनेयो निरवद्यवृत्तिः
प्रमोदतः श्रीजिनलाभसूरिः ।
इमं महामंथपयोधिमध्यात्
समग्रहीद्रत्नमिवात्मबोधम् ॥ १३

हुताश३मध्या३वसु८चंद्र१वत्सरे
१८३३ समुज्ज्वलत्कार्त्तिकपंचमीदिने ।
मनोरमे श्रीमनराख्यबिंदिरे-
ऽगमन्निबंधः परिपूर्णतामयम् ॥ १४

**Kumaraviharaprasastikavya** by VARDHAMANASURI [कुमारविहारप्रशस्तिकाव्यम्। वर्द्धमानगणिः].

Folios 19 :

श्रीहेमचंद्रसूरिशिष्येण वर्द्धमानगणिना कुमारविहारप्रशस्तौ काव्येऽमुष्मिन् पूर्वं षडर्थे कृतेपि कौतुकात् षोडशोत्तरं शतं व्याख्यानं चक्रे सप्ताशीतितमं वृत्तं तच्चेदं ।

गंभीरः श्रुतिभिः सदाचरणतः प्राग्प्रतिष्ठोदयः
सत्कांतारचितप्रियो बहुगुणो यः साम्यमालंबते ।
श्रीचौलुक्यनरेश्वरेण विबुधश्रीहेमचंद्रेण च
श्रीमद्बाग्भटमंत्रिणा च परिवादिन्या च विप्रेण च ॥ ८७

**Kathamahodadhi** by SOMACHANDRA [कथामहोदधिः। सोमचन्द्रः].

Begins :

श्रीवर्द्धमानमानम्य निर्द्धूतवृजिनं जिनं ।
कर्पूरप्रकरग्रंथे कथाः स्वक्ष्यामि सप्रथाः ॥ १

*Table of contents.*

१ आर्द्रकुमारकथा
२ प्रदेशिनृपकथा
३ धरणेंद्रदृष्टांतः
४ कंबलसंबलवृषभद्वयकथा
५ मेघकुमारकथा
६ प्रसन्नचंद्रराजर्षिकथा
७ सुलसकथा
८ प्रभावतीकथा
९ तामलीकथा
१० शुकद्वयकथा
११ चिलातीपुत्रकथा
१२ रौहणेयचोरकथा
१३ श्रेणिकनृपकथा
१४ सुलसाकथा
१५ दर्दुरांकदेवकथा
१६ जीर्णश्रेष्ठिकथा
१७ श्रीगौतमकथा
१८ जमाल्याचार्यकथा तथा वज्रस्वामिकथा
१९ शय्यंभवकथा

२० शशिराजकथा
२१ अतिमुक्तकथा तथा मदालसाकथा
२२ बलदेवकथा तथा पुण्याढ्यनृपकथा
२३ गजसुकुमारकथा
२४ चंडरुद्रशिष्यदृष्टांतस्तथा विशाखचौरदृष्टांतः
२५ कंडरीकपुंडरीककथा
२६ उदायिनृपमारकद्रव्यसाधुकथा
२७ आनंदकथा
२८ कामदेवकथा
२९ वज्रायुधराजकथा तथा संगमदेवकथा
३० नेमिकथानकं
३१ कालिकाचार्यकथा
३२ वसुराजकथा तथा ब्रह्मादीनां कथा
३३ दृढप्रहारिकथा
३४ आम्रचोरकथा
३५ जंबूस्वामिकथा
३६ सुदर्शनश्रेष्ठिकथा
३७ नंदनृपकथा
३८ मम्मणवणिग्दृष्टांतः
३९ चारुदत्तकथा
४० श्रीकृष्णकथा
४१ वंकचूलकथा
४२ ब्रह्मदत्तमित्रविप्रकुटुंबकथा तथा शक्रकथा
४३ चेटकमहाराजकथा
४४ अशोकचंद्रनृपकथा
४५ चंद्रावतंसकनृपकथा
४६ उदायननृपकथा
४७ काकजंघकोकाशिकथा
४८ लोहजंघकथा
४९ मेघरथकथा
५० सागरचंद्रदृष्टांतः
५१ मूलदेवकथा
५२ शालिभद्रकथा
५३ संप्रतिभूपतिकथा
५४ दत्तराजकथा
५५ विद्युन्मालीकथा
५६ अभयकुमारकथा
५७ अश्वावबोधतीर्थोत्पत्तिकथा
५८ बाहुबलिकथा तथा अष्टापदतीर्थोत्पत्तिकथा
५९ आर्यरक्षितसंबंधः
६० शय्यंभवकथा
६१ वज्रस्वामिकथा

६२ यक्षार्यकासंबंधः
६३ जीवानंदवैद्यकथा
६४ बाहुसुबाहुकथा
६५ ब्राह्मीकथा तथा पुष्यचूलासंबंधस्तथा मृगावतीकथा
६६ कुबेरदत्तासाध्वीसंबंधस्तथा याकिनीपुत्रसंबंधः
६७ भरतचक्रिकथा
६८ भद्रबाहुस्वामिकथा
६९ मरुदेनास्वामिनीकथा
७० सुभद्राकथा
७१ श्रेणिककथा
७२ दवदंतीकथा
७३ श्रीरामचंद्रकथा
७४ ब्रह्मदत्तकथा
७५ नमिविनमिकथा
७६ आर्यखपुटाचार्यकथा तथा विष्णुकुमारकथा
७७ सनत्कुमारकथा
७८ प्रत्येकबुद्धचतुष्ककथाः
१ करकंडुकथा
२ द्विमुखनृपकथा
३ नमिराजर्षिकथा
४ नग्गतिभूपकथा
७९ श्रेयांसकथा
८० चंदनबालाकथा
८१ स्थूलिभद्रकथा
८२ सैव
८३ शिवकुमारकथा
८४ नंदिषेणद्विजकथा
८५ वल्कलचीरीकथा
८६ इलातीपुत्रदृष्टांतः
८७ श्रीअजितसंबंधः तथा श्रीसागरचक्रवर्तिकथा
८८ मल्लिनाथकथा
८९ सत्यकिविद्याधरदृष्टांतः
९० ब्रह्मदत्तकथा
९१ त्रिषष्टिपर्वैकपालकथा
९२ क्षुल्लकुमारकथा
९३ कुमारनंदिस्वर्णकारकथा
९४ सुज्येष्ठासंबंधः
९५ मंगुसूरिकथा तथा ढंढणकुमारकथा
९६ धर्मरुचिकथा तथा वडवानलसंबंधः । तथा नीलकंठसंबंधः
९७ सुबंधुमित्रकथा
९८ लोढककथा
९९ चंडप्रद्योतभूपसंबंधः

१०० सुकुमालिकाकथा
१०१ कुमारपालभूपकथा
१०२ गौतमस्वामिकथा तथा स्थूलिभद्रकथा
१०३ पंचपांडवकथा
१०४ नलराजदृष्टांतः
१०५ हरिनृपकथा
१०६ चेल्लणाराज्ञीसंबंधः
१०७ जीवयशादृष्टांतः
१०८ वररुचिकथानकं
१०९ कृतपुण्यककथा
११० कुलवालकऋषिदृष्टांतः
१११ गांगेयशांतनुनृपकथानकं
११२ खांडवाग्निकथा तथा जराकुमारकथा तथा दशरथनृपकथा
११३ सगरपुत्रकथा
११४ मंडिककथा तथा कंदर्पकथा
११५ रावणदृष्टांतः
११६ दीर्घनृपकथा तथा चंद्रकथा
११७ सुभूमपरशुरामकथा
११८ चाणाक्यकथा
११९ कुरगडुकथा
१२० मेतार्यऋषिकथा तथा कुरडकरडसाधुद्वयकथा
१२१ नंदिषेणकथा तथा कार्तिकेयकथा
१२२ चमरेंद्रकथा
१२३ श्रीवीरकथा तथा कर्णकथा तथा श्रीपतिकथा
१२४ आषाढभूतिकथा तथा मल्लिस्वामिकथा तथा महेशसंबंधः तथा दुर्दांतदैत्यकथा
१२५ भरतचक्रवर्त्तिसंबंधः
१२६ कपिलब्राह्मणकथा

Ends:

समाप्तोयं श्रीमान्कथामहोदधिनामा ग्रंथः ।

वर्षे वाद्ध्यैंबरशरसुधारश्मि१९०४संख्ये बभूव
श्रीमान्ग्रंथः सकलसुमनश्चित्तहर्षप्रदायी ।

यावत्क्रीडां गगनकमले राजहंसौ विशाले
तन्वानौ स्तस्तिमिरभिदुरौ तावदेषापि जीयात् ॥ १ ॥
त्रैविद्योपनिषद्विलासवसतेः प्रामाणिकज्ञप्रभोः
श्रीसूरीश्वररत्नशेखरगुरोश्चातुर्यतः स्वर्गुरोः ।
शिष्यः पंडितसोमचंद्र उरुधीर्माधुर्यधुर्यो व्यधात्
कर्पूरप्रकरादिकाव्यकथिता एताः कथाः सप्रथाः ॥ २ ॥

**Kavyaprakasasanketa** by MÂṆIKYACHANDRASÛRI [काव्यप्रकाशसंकेतः । माणिक्यचन्द्रसूरिः].

Folios 1 to 83.

Begins :

ॐ नमो वाण्यै ॥ अर्हं ॥

सर्वज्ञवदनांभोजविलासकलहंसिकां ।
विशुद्धपक्षद्वितयां देवीं वाचमुपास्महे ॥ १ ॥
नानाग्रंथचतुष्पथेषु निभृतीभूयोद्यमं कुर्वता
प्राप्तैरर्थकणैः कियद्भिरभितः प्रज्ञार्द्धिशून्यात्मना ।
सर्वालंकृतिभालभूषणमणौ काव्यप्रकाशे मया
वैधेयेन विधीयते कथमहो संकेतकृत्साहसं ॥ २ ॥
न प्राग्ग्रंथकृतां यशोधिगतये नापि ज्ञताख्यातये
स्फूर्जद्बुद्धिजुषां न चापि विदुषां सत्प्रीतिविस्फीतये ।
प्रक्रांतोयमुप क्रमः खलु मया किं तर्ह्यगर्ह्यक्रमं
स्वस्यानुस्मृतये जडोपकृतये चेतोविनोदाय च ॥ ३ ॥

समुचितेति । इह खलु लोके त्रिविधा देवता समुचिता इष्टा समुचितेष्टा च । क्वचित्समुचितायाः स्तुतिर्यथा । नीतिकामशास्त्रादारंभे महीपतिमन्मथादेः स्तुतिः । क्वचिदिष्टाया यथा । रघुमहाकाव्ये प्रारंभे महेश्वरगौर्योः । क्वचिच्च समुचितेष्टाया यथात्रैव । ...

Ends:

तानि नात्र काव्यालंकारतया प्रतिपादितानीति ॥

इत्याचार्यश्रीमाणिक्यचंद्रविरचिते काव्यप्रकाशसंकेते काव्यप्रकाशदशमोल्लाससंकेतः समाप्तः ॥

गुणेन प्रेक्षणीयेस्मिन्नर्थालंकारतत्परा ।
प्रौढापि जायते बुद्धिः संकेतः सोयमद्भुतः ॥ १ ॥
नानाग्रंथसमुद्भूतैरसकलैरप्येष संसूचितः
संकेतार्थलवैर्लविष्यति नृणां शंके विशंकं तमः ।
निष्पन्ना ननु जीर्णशीर्णवसनैर्नीरंध्रविच्छित्तिभिः
प्रालेयग्रथितां न मंथति कथं कंथा व्यथां सर्वथा ॥ १ ॥
श्रीशीलभद्रसूरीणां पट्टे माणिक्यसंनिभाः ।
परमज्योतिषो जाता भरतेश्वरसूरयः ॥ २ ॥
भरतेन परित्यक्तोस्मीति कोपं वहन्निव ।
शांतो रसस्तदधिकं भेजे श्रीभरतेश्वरं ॥ ३ ॥
पदं तदन्वलंचक्रे वैरस्वामिमुनीश्वरः ।
अनुप्रद्योतं ——— दिवमिंदुमरीचिवत् ॥ ४ ॥
वांछन्सिद्धिवधूं हसन् सितरुचिं कीर्त्या रतिं रोदयन्
पंचेषोर्मथनाद्दहन्भववनं क्रामन्कषायद्विषः ।
त्रस्यन्नागमलंघनाद्धनशकृद्भस्त्रास्त्यजन्योषितो
बिभ्राणः शममद्भुतं नवरसी यस्तुल्यमास्फारयन् ॥ ५ ॥
षट्तर्कीललनाविलासवसतिः स्फूर्जत्तपोहर्षति-
स्तत्पट्टोदयचंद्रमाः समजनि श्रीनेमिचंद्रप्रभुः ।
निःसामान्यगुणैर्भुवि प्रसृमरैः प्रालेयशैलोज्ज्वलै-
र्यश्चक्रे कणभोजिनो मुनिपतेर्व्यर्थं मतं सर्वतः ॥ ६ ॥

यत्र प्रातिभशालिनामपि नृणां संचारमातन्वतां
संदेहैः प्रतिभाकिरीटपटली सद्यः समुत्तार्यते ।
नीरंध्रे विषमप्रमेयविटपिव्रातावकीर्णे सदा
तस्मिंस्तर्कपथे [1]यथेष्टगमनाज्जज्ञे यदीया मतिः ॥ ७ ॥
यस्मात्प्राप्य पृथुप्रसादविशदां वेद्योपदेशात्मिकां
पत्रीं मुक्तिकरीमतीव जडतावस्त्वन्विता मन्मतिः ।
विक्षिप्य भ्रमशौल्किकान्कलयतो लात्वाश्रयं मानसे
मध्ये वाङ्मयपत्तनं प्रविशति द्वारि स्थिता तत्क्षणात् ॥ ८ ॥

मदमदनतुषारक्षेपपूषा विभूषा
जिनवदनसरोजावासिवागीश्वरायाः ।
द्युमुखमखिलतर्कग्रंथपंकेरुहाणां
तदनु समजनि श्रीसागरेंदुर्मुनींद्रः ॥ ९

माणिक्यचंद्राचार्येण तदंघ्रिकमलालिना ।
काव्यप्रकाशसंकेतः स्वान्योपकृतये कृतः ॥ १० ॥
स[illegible]वक्रमहाधीशवत्सरे मासि माधवे ।
काव्ये काव्यप्रकाशस्य संकेतोयं समर्थितः ॥ ११ ॥

ग्रं० ३२४४ काव्यप्रकाशसंकेतो माणिक्यचंद्रसूरिकृतः ॥

**Dvyasrayamahakavya** with **Commentary** by HEMACHANDRA [प्राकृतद्व्याश्रयमहाकाव्यं सटीकम् । हेमचन्द्रः].

Folios 1 to 81.

Begins:

॥ ॐ नमः श्रीजिनेश्वराय ॥

पुण्यांकूराः शिवसुखफलं श्रोतृजंतूनु नेतुं
तैरग्रेस्ताः किमुत लिखितुं मंगलान्यष्ट लाजाः ।

[1] गमना जज्ञे ?

यस्योह्यंते सदसि दशनाभीशवो देशनायां
स श्रीचंद्रप्रभजिनपतिः प्रातिभं नस्तनोस्तु ॥ १

Ends:

एवं च व्याकरणाष्टमाध्यायलक्ष्यभूताः प्राकृतादिभाषाः समर्थिता इति शुभं ॥ इत्याचार्यहेमचंद्रविरचितश्रीकुमारपालचरितप्राकृतद्व्याश्रयमहाकाव्यवृत्तावष्टमः सर्गः । तत्समाप्तौ समाप्तं चेदं वृत्तितः प्राकृतद्व्याश्रयमहाकाव्यमिति ॥

संतापापहदर्शनं शिवकलादानोदिताशंसनं
विश्वार्थ्यामृतदायिपादभजनं रत्नाकरानंदनं ।
श्रीकल्पद्रुमसोदरं कुवलयामोदप्रबोधोद्गुरं
कामोद्भासि कुरंगहारि सकलं भात्यत्र चांद्रं कुलं ॥ १

तस्मिन्सोभयदेवसूरिरभवत्कूपांगवृत्तिस्ततः
संविग्नो जिनवल्लभो युगवरो विद्यालितारांबरं ।
तत्पट्टे जिनदत्तयोगितिलकः सन्मार्गपद्मार्यमा
ख्यातः श्रीजिनचंद्रसद्गुरुरतः सौभाग्यभंगैकभूः ॥ २

विज्ञाः केचन लक्षणेथ कतिचित्तर्के परेष्यागमे
काव्येन्ये च समग्रशास्त्रचतुराः प्रायेण नामून्विना ।
व्यक्तं नूनमिदं विधिर्बहुविधैः शास्त्रैर्विजाप्यास[1]
प्राज्ञान्राजसभास्वलंभयदतो यान् जैत्रपत्राण्यरं ॥ ३

भृंगायमाणपदपुष्कररराजहंसाः
श्रीजैनचंद्रपदपंकजराजहंसाः ।
- - - - - - - - - - - - - - -
स्ते जज्ञिरे जिनपतिप्रभवोत्थहंसाः[2] ॥ ४

---

[1] विलाप्यासकृत्? [2] अच्छहंसाः ?

चातुर्वेद्यक्रमाढ्या विजिततदमृतक्षीरभूती रहस्यो-
त्सर्गाख्यद्वंद्वशृंगा स्तनितवरतपोभावनादानशीला ।
दुःप्रापा स्वल्पपुण्यैः स्थगितपरगवीस्फूर्त्तिकीर्त्तिप्रपंचा
येषां पादप्रसादाद्भवति सुरगवी कामितार्थाय पुंसां ॥ ५

**Meghadutabhashya** by JANÂRDANA [मेघदूतभाष्यम्। जनार्दनः]. Folios 1 to 91.

Begins:

ॐ नमः श्रीवरदगणेशश्रीशारदाभ्यां नमः ॥

श्रीकालिकानुग्रहतोधिगम्य
कवींद्रभावं किल कालिदासः ।
श्रीमेघदूताभिधभव्यकाव्यं
तेने तदष्टादशलक्षणाढ्यं ॥ १

तस्य प्रबंधे कृतनव्यबंधे
मिताक्षरेथ प्रमिताक्षरार्थे ।
श्रीसारदाश्रीवरदप्रसादात्
जनार्द्दनो भाष्यविशेषमैच्छत् ॥ २

ब्रह्माद्या यस्य नित्यश्रुतिनुतिनतिभिः प्राप्नवंतः स्वसिद्धिं
स्कंदेनारीन्विहंतुं दशरथतनयेनापि भक्त्या स्तुतो यः ।
सिद्धैः संकीर्त्तितो यो मुनिभिरभिनुतः सिद्धये दीर्घशुंड-
श्चंडः श्रीवक्रतुंडः स नयतु सदयो भाष्यमाश्वेव सिद्धिं ॥ ३

स्थिरदेववल्लभासहकृतानि [1]भाष्यान्यिकरचनानि ।
अवलोक्य सद्विशेषं विरच्यते बालबोधाय ॥ ४

---

[1] भाष्याण्यनेकरचनानि ?

यदेकेंदुहताशादिप्रद्योतस्याप्यगोचरे ।
स्थितं प्रकाशयत्यर्थं ज्योतिस्तद्वाङ्मयं मम ॥ ५

रसभावभरोद्भिन्नां भारतीं [1]भारताद्दृते ।
कविश्रीकालिदासस्य व्याख्यातुं कः क्षमः पुमान् ॥ ६

तस्य प्रसन्नगंभीरात्प्रबंधान्नौरिवांबुधेः ।
उद्धर्तुं स्तोकमप्यर्थं व्याख्या मम भविष्यति ॥ ७

अत्र किल काव्यं रसवदुपादेयं । रसाः शृंगारादयस्तेषु शृंगारः प्रवरस्तद्भेदौ संभोगविप्रलंभौ तयोरपि विप्रलंभः सुभगः । तस्य पूर्वानुरागमानकरणप्रवासाः प्रकारास्तेषामत्र प्रवासाभिधातो भेदः । प्रबंधोपयोगित्वादभीप्सितः । स च रसनायकचरितमंतरेण वक्तुं न शक्यते । नायकाश्च धीरोदात्तदेवा एव तेषामपि पुण्यजनाः शृंगारिणः । ततः कविर्यक्षं नायकत्वेनोपात्तवान् । कालिदासश्च स्वयं शृंगारी तदसौ शृंगाररसप्रधानं मेघदूताभिधानं क्रीडाकाव्यमेतदेव निबंधः । गिरिनगरसागरर्तुचंद्रार्कोदयोद्यानजलकेलिमधुपानसुरतमंत्रदूतप्रयाणाजिनायिकाभ्युदयविवाहविप्रलंभकुमारवर्णनैरमीभिरष्टादशभिर्लक्षणैर्लक्षितत्वादिदमपि महाकाव्यमुच्यते ॥

Ends:

किं भूतौ विगलितशुचौ । विगलितो गतः शोको ययोस्तौ विगलित गिउ शुच् शोकछइ जेहरहिं अत एव हृष्टचित्तौ सानंदमानसौ । शोकहर्षौ न मे अत एवानुभवति ॥ १२६

इति पंडितजनार्दनकृतं जनानंदनं मेघदूतभाष्यं समग्रं श्रीवरदप्रसादात् श्रीभारतीगुरोः प्रसादाच्च निःप्रत्यूहं समाप्तमिति ॥६१

---

[1] भरतात्?

सावद्यं निरवद्यं वा भवतु तद्बुधैः क्षंतव्यं । शुभं भवतु । कल्याणं भूयात् ॥

पुस्तके शुद्धमद्राक्षीत्कूटं च लिखितं मया ।
इति मत्वा तु मे गालीं मा ददुः प्रतिवाचकाः ॥
यादृशं पुस्तके दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥

स्वस्ति संवत् १४६६वर्षे नभस्यासितपक्षे ७ सप्तम्यां तिथौ बुधदिने । अद्येह श्रीधवलक्कसमर्यादवर्त्तिनि वयजङ्कपुरे पातसाहेन पौत्रदत्तातपत्रवंशादुत्पन्नप्रधानावसरे दुर्ग्गासनमनस्तालाभिधसाधारणाह्वानराशिगतांगिरसि तेन प्राक्प्रयाणमहानंदपूःकृतोत्पन्नोत्कर्षजने । अस्मिन्नवसरे महादुस्थदुर्भिक्षोत्पन्नभीष्मवशात्सौराष्ट्रनिवासिनो नागराः समाजजनसत्रसमागच्छंतो गवादैः काठीसंज्ञकैर्मलिम्लुचैर्मुषिताः सर्वस्वं ततोनंतरं केपि धवलक्कं समाजग्मुः । ततस्तत्र निवासिभिः पंडितशंकरश्रुतिस्मृतिपुराणप्रवीणत्रि० वासुदेवमहं माधवपंडितमुरारिप्रमुखैः स्वीयं मंदिरं नीत्वा भोजनाच्छादनादिभूषणैरलंकृत्य स्थितं कृत्वा स्थापिताः । तत्र निवसता नागरज्ञातीयाभ्यंतरीयगुलेचावटंकीयविश्वेश्वरांघ्रिकोकनदमधुव्रतदुवेगदाधरात्मजश्रुतिस्मृतिपुराणज्ञदुःपुरुषोत्तमसुतपुराणपुरुषः [1]वस्त्रांघ्रिरेणुमौलिः । गीः प्रसादात् । पंडितश्रीजनार्दनविरचितं गुरुनिरपेक्षं जनानंदाभिधं मेघदूतभाष्यमलीलिखत् । दीक्षितकाह्नडदेवसुतदीक्षितनानासुतदामोदरेण लिखितं ॥ शुभं भवतु । मंगलं भूयात् ॥

---

[1] °वत्त्रांघ्रि ?

**Yogabindu**, with **Commentary** by HARIBHADRASŪRI योगबिंदुः सटीकः। हरिभद्रसूरिः].

Folios 1 to 87.

Begins:

॥ ॐ नमः ॥

सद्योगचिंतामणितोनणीयो
येनाधिजिग्ये जगतः पतित्वं ।
स योगिवृंदारकवंदनीयो
[1]द्यतात्रद्यानि द्यनं जिनौघः ॥ १ ॥

सुधाबिंदोरिवानंदममंदमुपचिन्वतः ।
योगबिंदोः समासेन वृत्तिरेषा विधीयते ॥ २ ॥

गुरूपदेशो नच तादृगस्ति
मतिर्न वा काचिदुदाररूपा ।
तथापि योगप्रियतावशेन
यत्नस्तदाभ्यासकृते ममायं ॥ ३ ॥

तस्य चेदमादिसूत्रं । नत्वेत्यादिश्लोकद्वयं ॥

नत्वाद्यंतविनिर्मुक्तं शिवं योगींद्रवंदितं ।
योगबिंदुं प्रवक्ष्यामि तत्त्वसिद्धयै महोदयं ॥ १ ॥

सर्वेषां योगशास्त्राणामविरोधेन तत्त्वतः ।
सन्नीत्या स्थापकं चैव मध्यस्थान् तद्विदः प्रति ॥ २ ॥

Begins:

योग एव लोचनमक्षं यस्य स तथा विरह इति च भगवतः
श्रीहरिभद्रसूरेः [2]प्रकरप्रकरणांकप्रद्योतकमिति ।

समाप्ता चेयं योगबिंदुप्रकरणवृत्तिः ॥ ग्रं० ३२२० ॥

---

[1] °द्यतादवद्यानि घनं ? [2] प्रकरणे ?

**Arhatstava** by SIDHASENA [अर्हत्स्तवः । सिद्धसेनः].

Folios 3.

Begins:

॥ ॐ ॥

ॐ नमोर्हते परमात्मने परमज्योतिषे परमपरमेष्ठिने परमवेधसे परमयोगिने परमेश्वराय तमसः पुरस्तात्सदोदितोदितादित्यवर्णाय समूलोन्मूलितानादिसकलक्लेशाय ॥

Ends:

आमुष्मिक्यः स्वर्गापवर्गश्रियोपि क्रमेण यथेष्टं स्वयंवरणोत्सवसमुत्सुका भवंतीति सिद्धिश्रेयःसमुदयः ॥

यथेंद्रेण प्रसन्नेन समादिष्टोर्हतस्तवः ।
तथायं सिद्धसेनेन लिलिखे संपदां पदं ॥

**Umasvativachaka's Pujavidhiprakarana** with BHÂSHÂ [पूजाविधिप्रकरणं सभाषम् । मू० उमास्वातिवाचकः].

Folios 3.

Text begins:

॥ ॐ ॥

स्नानं पूर्वमुखीभूय प्रतीच्यां दंतधावनं ।
उदीच्यां श्वेतवस्त्राणि पूजा पूर्वोत्तरामुखी ॥ १ ॥
गृहे प्रविशतां वामभागे सुस्थानके स्थितं ।
देवतावसरं कुर्यात्सार्द्धहस्तोर्ध्वभूमिके ॥ २ ॥

Text ends:

स्नानं विलेपनविभूषणपुष्पवास-
धूपप्रदीपफलतंडुलपत्रपूगैः ।
नैवेद्यवारिवसनं चमरातपत्र-
वादित्रगीतनटनस्तुतिकोशवृद्धिः ॥ १८ ॥

इत्येकविंशतिविधा जिनराजपूजा
ख्याता सुरासुरगणेन कृता सदैव ।
खंडीकृता कुमतिभिः कलिकालयोद्य[1]-
द्यत्प्रियं तदिह भाववशेन योज्यं ॥ १९ ॥

इति श्रीउमास्वातिवाचकविरचितं पूजाप्रकरणं समाप्तं ॥

**Vairutyastavana** by ÂRYANANDILA [वैरूट्यास्तवनम्। आर्यनन्दिलः].

Begins :

॥ ६० ॥

नमिऊण जिणं पासं नागिंदसुरिंदवंदिअं देवं ।
वइरुट्टाए थुत्तं अहयं समरामि भत्तीए ॥ १ ॥ ...
जो तसु नाउं लेइ तस असुहनिवारी ।
अज्जानंदिलेण संदिट्ठं एहिं थंडिलिनाहिवसेवं ॥ १३ ॥

Ends :

एह दुलंघिआ को लंघइ पारसनाथियमुइ ॥ ३० ॥

इति वइरुट्टास्तोत्रं समाप्तम् ॥

**Nigamastavana** by INDRANANDI, with a **Commentary** [निगमस्तवनं वा वेदान्तस्तवनं सटीकम्। मू० इन्द्रनन्दिवा धर्मसिंहाचार्यः].

॥ ६० ॥ पूर्वेभ्यो नमः ॥

Commentary begins :

श्रीनाभेयजिनं नत्वा धर्महंसगुरुं तथा ।
वेदांतस्तवनं मुग्धबोधाय विवृणोम्यहं ॥ १ ॥

Text begins :

श्रीनाभिसद्वंशसरोजभास्वते
निरंतरज्ञानमयाय चार्हते ।

[1] योगाद्यत्प्रियं ?

श्रीधर्मकर्मव्यवहारदेशिने
नमो नमः श्रीऋषभाय तायिने ॥ १ ॥
जिनास्यपद्मश्रुतवस्तुजात-
ज्ञाता नृपश्रीभरतो जगाद ।
चतुःश्रुतिश्राद्धजनोपयोगि-
सुश्राद्धदेवोचितवृत्तकोशं ॥ २ ॥
एतन्निगमसंबंधि षट्त्रिंशन्मितमद्भुतं ।
[1]सुरासारोपनिषज्ज्ञातं कीर्त्तयिष्यामि नामतः ॥ ३ ॥
आदर्शवद्दर्शनभेददर्शी
नभस्वदर्कोदितभावनाभित् ।
श्रीउत्तरारण्यकमद्य वंदे
मंदेतरानंदतरंगितांगः ॥ ४ ॥

Commentary:

श्रीउत्तरारण्यकनामप्रथमोपनिषदमाह ॥ आदर्श० ४
पंचाध्यायनाम्नीं द्वितीयोपनिषदमाह ॥ गुर्वादि० ५
बहूचं तृतीयोपनिषदमाह ॥ श्रीकेव० ॥ ६
श्रीविज्ञानघनार्णवचतुर्थोपनिषदमाह ॥ निर्वाण० ७
श्रीविज्ञानेश्वराख्यपंचमोपनिषदमाह ॥ वह्निश्री० ८
श्रीविज्ञानगुणार्णवाख्यषष्ठोपनिषदमाह ॥ मथिता० ९
नवतत्त्वनिदाननिर्णयाख्यसप्तमोपनिषदमाह ॥ नतत्त्व० १०
तत्त्वार्थनिधिरत्नाकराभिधाष्टमोपनिषदमाह ॥ श्रीरत्ना० ११
विशुद्धात्मगुणगंभीराख्यनवमोपनिषदमाह ॥ विशुद्धा० १२
अर्हद्धर्मागमनिर्णयाख्यदशमोपनिषदमाह ॥ जीयास्त्वं० १३

[1] सुरसोपनिषज्जातं ?

उत्सर्गापवादवचनैकांताभिधानैकादशमोपनिषदमाह ॥ श्रीवच० १४
अस्तिनास्तिविवेकनिगमनिर्णयाख्यद्वादशमोपनिषदमाह॥अस्तिना १५०
श्रीदर्शनिजमनोनयनाह्लादाख्यत्रयोदशमोपनिषदमाह ॥श्रीदर्श० १६
श्रीरत्नत्रयनिदाननिर्णयनामचतुर्दशमोपनिषदमाह ॥ रत्नत्रि ०१७
सिद्धागमसंकेतस्तवकाख्यपंचदशमोपनिषदमाह ॥ श्रीसिद्धा० १८
भव्यजनभयापहारकनामषोडशोपनिषदमाह ॥ सेवध्व० १९
श्रीरागिजननिर्वेदजनकाख्यसप्तदशमोपनिषदमाह ॥ श्रीरागि० २०
स्त्रीमुक्तिनिदाननिर्णयाख्याष्टादशमोपनिषदमाह ॥ यत्रैव ॥ २१
कविजनकल्पद्रुमोपमाख्यैकोनविंशतितमोपनिषदमाह॥पापेषु०॥२२
सकलप्रपंचपथनिदाननामविंशतितमोपनिषदमाह ॥ सकल० ॥ २३
श्राद्धधर्मसाध्यापवर्गनामैकविंशतितमोपनिषदमाह ॥ श्रीश्राद्ध०॥ २४
सप्तनयनिदाननामद्वाविंशतितमोपनिषदमाह ॥ श्राद्ध० ॥ २५
बंधमोक्षापगमनामत्रयोविंशतितमोपनिषदमाह ॥ निबबं० ॥ २६
इष्टकमनीयसिद्धिनामचतुर्विंशतितमोपनिषदमाह ॥ इष्टक० ॥ २७
ब्रह्मकमनीयसिद्ध्यभिधाननामपंचविंशतितमोपनिषदमाह॥कर्णे०॥२८
नैःकर्मकमनीयाख्यषड्विंशतितमवेदांतमाह ॥ दुर्भव० ॥ २९
चतुर्वर्गचिंतामणिनामसप्तविंशतितमवेदांतमाह ॥ चतुर्वर्ग० ॥ ३०
पंचज्ञानस्वरूपवेदनाख्यमष्टाविंशतितमवेदांतमाह ॥ वेदांत० ॥ ३१
पंचदर्शनस्वरूपरहस्याभिधानैकोनत्रिंशत्तमोप०माह॥मिथ्याद०॥३२
पंचचारित्रस्वरूपरहस्याभिधानत्रिंशत्तमोपनिषदमाह ॥ पंचव० ॥ ३३
निगमागमवाक्यविवरणाख्यैकत्रिंशत्तमोपनिषदमाह ॥ निगमा०॥३४
व्यवहारसाध्यापवर्गनामद्वात्रिंशत्तमवेदांतमाह ॥ जनेज० ॥ ३५
श्रीनिश्चयैकसाध्यापवर्गाभिधानत्रयस्त्रिंशत्तमोप०माह॥श्रीनिश्च०॥३६
प्रायश्चित्तैकसाध्यापवर्गाख्यचतुस्त्रिंशत्तमोपनिषदमाह ॥ प्रायश्चि० ३७

श्रीदर्शनैकसाध्यापवर्गनामपंचत्रिंशत्तमवेदांतमाह ॥ भव्यज० ॥ ३८
विरताविरतसमानापवर्गाह्वषट्त्रिंशत्तमवेदांतमाह ॥ विनुमः० ॥ ३९

Ends:

वेदान् श्रीइंद्रनंदिर्भरतनरपतिर्निर्ममे श्राद्धदेवः
श्राद्धाचारप्रपंचप्रकटननिपुणान् धर्मकर्मप्रवृत्त्यै ।
मिथ्यादृक्संगृहीतानवगतवचसोद्यापि ते धर्महंस-
क्रीडांभोजन्मकल्पाः कुतुकमिह कलौ बिभ्रते शुद्धपाठं ॥ ४६

इति श्रेयःश्रेणित्रततिवनराजीजलधरा
भवोदन्वत्तारा जिनचरितरत्नाकरवराः ।
तदुद्धाराः सारा जिनपतिवचोबिंबमुकुरा
बुधैरध्येतव्या ऋतुसमयसंख्योपनिषदः ॥ ४७ ॥

इति निमस्तवनं संपूर्णम् ॥

**Commentary** on the **Kavyaprakasa** by Ravi [काव्यप्रकाशस्य टीका मधुमती । रविः].

Folios 1 to 11. Incomplete.

Begins:

॥ श्रीगणेशाय नमः ॥

भूत्यालेपनभूषितः प्रविलसन्नेत्राग्निदीपांकुरः
कंठे पन्नगपुष्पदामसुभगो गंगाजलैः पूरितः ।
ईषच्चाम्रजटाम्रपल्लवयुतो न्यस्तो जगन्मंडले
शंभुर्भैगलकुंभतामुपगतो भूयान्मम श्रेयसे ॥ १

गंगे विमुंच रुषमेष न मेपराधः
संध्यां नमामि यदशेषजनाभिवंद्यां ।
तत्स्वप्नजल्पितमिदं स्वपतोर्निशम्य
कंठे श्रथीकृतभुजा गिरिजा पुनातु ॥ २

शिवसिंहान्मिथिलेशादवाप यो मंत्रितां विबुधः ।
तस्याच्युतस्य सूनुर्बभूव भुवि रत्नपाणिरयं ॥ ३
तर्कः कवितया सार्द्धं विवेकश्च सह श्रिया ।
मिथो विरोधमुत्सृज्य यत्रैकाश्रयतां गतौ ॥ ४
भावं काव्यप्रकाशस्य काव्यदर्पणबिंबितं ।
दृष्ट्वा मधुमतीटीकां कुरुते तत्सुतो रविः ॥ ५

शिष्टाचारपरिप्राप्ततया मंगलं प्रेक्षावत्प्रवृत्त्यंगतयाभिधेयं वा प्रथममभिधातुमुचितं न तु देवताकीर्त्तनमिति शंकां निराकर्त्तुमाह । ग्रंथारंभ इति ॥...

यत्तु काव्यदर्पणे पितृचरणैरुक्तं परामृशति प्रतिसंधत्ते स्तुतिविषयतयेति शेष इति तत्र परामृशतीत्यस्य स्तौत्यर्थो लक्षणया यो भास्करादिभिरुक्तः स लक्षणासामग्र्यभावाच्छेषद्वारा प्रतिपाद्यतां न हि तत्रापि प्रयोजनापेक्षा वस्तुतस्तु स्मृतिपरमेव तदित्यभिप्रायकं ।...

इति मधुमत्यां प्रथम उल्लासः । ...

**Pranabharana** by JAGANNÂTHA [प्राणाभरणम् । जगन्नाथः].
Folios 1 to 4.
Begins :

श्रीगणेशाय नमः ॥ ॐ नमः ॥

विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमा
भूपालाः कमलाविलासमदिरोन्मीलन्मदाघूर्णिताः ।
आस्ये धास्यति कस्य लास्यमधुना धन्यस्य कामालस-
स्वर्वामाधरमाधुरीमधरयन् वाचां विलासो मम ॥ १
विद्वाणैव गुणज्ञता समुदितो भूयानसूयाभरः
कालोयं कलिराजगाम जगतीलावण्यकुक्षिंभरिः ।

एवं भावनया मदीयकविते मौनं किमालंबसे
जागर्त्ति क्षितिमंडलोपरि चिरं श्रीकामरूपेश्वरः ॥ २

Ends:

तैलंगान्वयमंगलालयमहालक्ष्मीदयालालितः
श्रीमभ्येरमभट्टसूनुरनिशं विद्वल्ललाटंतपः ।
संतुष्टः कमताधिपस्य कवितामाकर्ण्य विद्वन्मतं
भूयः पंडितमंडलाधिपजगन्नाथो व्यधासीदिदम् ॥ ९३

इति प्राणाभरणं समाप्तं ॥

**Chandivilasanataka** with **Commentary** by TRIPÂṬHÎ, RUDRAŚARMÂ [चण्डीविलासनाटकं सटीकम् । त्रिपाठी रुद्रशर्मा].

Folios 1 to 111.

Commentary begins:

श्रीशिवाय नमः ॥

प्रणम्य गुरुमीशां च रुद्रशर्मत्रिपाठिभिः ।
चण्डीविलासशब्दार्थचंद्रिका तन्यतेपरा ॥

Text begins:

जगदंब विलंबलंबताहरहेरंबवरावलंबदे ।
तरुणां करुणां मयीश्वरे कुरु रोलंबकदंबसेविते ॥ १...
महेंद्रपुरीनरेंद्रतिलकपुरस्कृतो जसवंतरायोप्यत्रास्ति ।...

Text ends:

निष्क्रांताः सर्वे । चंडीविलासे सप्तमोंकः ।
चंडीविलासः संपूर्णः ॥

Commentary ends:

इति चंडीविलासगूढार्थचंद्रिकायाः सप्तमोंकः ॥

**Commentary** on **Nalodayakavya** by RÂMA ṚISHI [नलोदयकाव्यस्य टीका । रामऋषिः].

Folios 1 to 32. Dâted Saṃvat 1780 = A.D. 1724.

Begins:

प्रणम्य परमानंदं यदुनंदनमादितः ।
नलोदयमयी टीका यथाविधि वितन्यते ॥ १

बुद्ध्वा बुधान् यमकसागरपारकामान्
श्रीशंकरैकशरणः करुणार्द्रचेताः ।
टीकां स पोतसदृशीं हि नलोदयस्य
प्राज्ञः प्रियामलघु राम ऋषिः करोति ॥ २

वृद्धो व्याससरित्पतिर्गुणगणोप्यर्थैकरत्नाकरः
प्रख्यातो जनकोस्ति यस्य सरसः काव्यज्ञमौलिद्युतिः ।
श्रीमद्रामऋषिर्महामणिरभूच्छ्रीगोमतीसंभवो
यैनैषा क्रियते नलोदयगृहाज्ञानांधकारक्षतिः ॥ ३

पीत्वाम्राय पयः पृदाकुरमृतस्पर्द्धी प्रकोपी यथा
तादृग्गो वमति स्वरूपममलं तत्पायसं तादृशं ।
दृष्ट्वालोच्य च सत्कृतिं सुगुणिनां सद्रोहकृत्स्वाननाज्-
ज्ञानानोप्यतिनिर्मलां न वदति प्रायस्तथा दुर्जनः ॥ ४

इह ध्रुवं यद्यपि सज्जनानां
नाधिक्यमस्त्यज्ञदृगंजनानां ।
तथाप्यहं तद्विनयानुवर्ती
करोमि टीकां प्रणये प्रवर्त्ती ॥ ५

Ends:

श्रीडिंडवाणनगरे किल वत्सगोत्रो
व्यासो बभूव फलहूः फलदोनुगानां ।
प्रीत्या सदा पुरजनैः परिपूज्यमानः
शुभ्रैर्यशोभिरमलीकृतचंद्रबिंबः ॥ १

बभूव भूमौ भवभूतितुल्यः
श्रीकेल्हणो नाम तदात्मजश्च ।
येन स्वबुद्धेः किल वैभवेन
वशीकृता राजसभासु सर्वे ॥ २
तस्यात्मजः सर्वगुणैकधाता
श्रीरंगनामा क्षितिदेववर्यः ।
बभूव भूपालकलब्धमानः
[1]सिद्धामितज्ञानविधूतपापः ॥ ३
तस्यात्मजौ कीर्त्तिकरौ पितॄणां
कौजूस्तथा वृद्ध इति प्रसिद्धौ ।
गोविंदपादांबुजसेवनोत्कौ
वेदागमाचारपरावभूतां ॥ ४
श्रीभागवतभावार्थव्याख्याने श्रीधरोपमः ।
वृद्धव्यासोभवद्वृद्धमाननीयो दिने दिने ॥ ५
वैश्वदेवविशुद्धात्मा तीर्थाटनपरायणः ।
वृद्धव्यासोभवद्वाग्मीलोककल्याणकारकः ॥ ६
तस्यात्मजास्त्रयो जाता निंबादित्यो विदांवरः ।
तथा रामऋषिर्द्धीमान् हरिवंशस्तथावरः ॥ ७
तेषां माता महाभागा नामतो गोमती बभौ ।
महादानपरा नित्यं विप्राणां भोजनप्रदा ॥ ८
चक्रे रामऋषिर्विद्वान् वृद्धव्यासात्मजः सुधीः ।
नालोदयीमिमां टीकां शुद्धां यमकबोधिनीं ॥ ९

[1] सिप्रा°?

टीकां विना बुधा व्याख्यां कृत्वा नालोदयीमिमां ।
व्याख्याने यमकानां तु भ्रमं ज्ञास्यथ मामकं ॥ १०
यद्विस्मृतं भ्रांतिवशात्कृतं वा
विचार्य तन्मे सुधियो महांतः ।
कृपालवः कीर्तिकृतः कवीनां
परोपकाराः किल शोधयंतु ॥ ११
केतकानां सुपुष्पाणां बुद्ध्वा कंटकिनामपि ।
सौरभं न त्यजंत्येव महांतो हि गुणग्रहाः ॥ १२
वेदांगरसचंद्राढ्ये वर्षे मासे तु माधवे ।
शुक्लपक्षे तु सप्तम्यां गुरौ पुष्ये तथोडुनि ॥ १३
सुरत्राणे तथा साहिसलमे शासति क्षितिं ।
पत्तनाख्ये महादुर्गे राजशल्ये च राजनि ॥ १४
युवराजे भोजराजे टीकेयं पूर्णतामगात् ।
कृता रामर्षिमिश्रेण वृद्धव्यासस्य सूनुना ॥ १५

इति वृद्धव्यासात्मजमिश्ररामर्षिदाधीच्यविरचितायां रविदेवविरचितमहाकाव्यनलोदयटीकायां यमकबोधिन्यां नलराज्यप्राप्तिर्नाम चतुर्थ आश्वासः ॥

**Murarivijayanataka** by KṚISHṆAKAVI [मुरारिविजयनाटकम् । कृष्णकविः].

Folios 1 to 52.

Begins:

श्रीगणेशाय नमः । श्रीगुरवे नमः ॥

॥ श्रीभक्तानंददात्रे नवनीतचौराय नमो नमस्तु ॥

सानंदं तुहिनाचलस्य दुहितुश्चंडेन चारुभ्रुवा
कोदंडेन हठात्कटाक्षविशिखान्कामे विमुंचत्यपि ।

योयं क्वापि न खंडनां क्षणमपि प्राप्तः परे ब्रह्मणि
ध्यानस्य द्रढिमा स कोपि यमिनामाद्यस्य पायाज्जगत् ॥ १

अस्ति किल दाक्षिणात्यस्य गोदारोधोवास्तव्यस्य श्रीमद्विश्वरूपवंशवनमुक्तामणेरधिविद्यानगरसभं विद्वद्वृंदवितीर्णभट्टभट्टारकापरनाम्नो भट्टनृसिंहस्यात्मजः कृष्णभट्टो नाम महान्विद्वत्कविः। तत्कृतिर्मुरारिविजयं नाम नाटकमभिनीय सुमनोमनोरंजनं विधातुमुचितमिति।

Ends:

समस्तैः सिद्धांतैर्विवृतमहिमांशस्य कमला-
विलासानां हेतोर्विबुधमुकुटालंकृतिमणेः।
गुणालंकाराढ्या सरसपदयुक्ता मधुभिदः
कृतिः कृष्णस्येयं लुठतु वनमालेव पदयोः ॥
इति निष्क्रांताः सर्वे। कंसहिंसनो नाम पंचमोंकः ॥

॥ संपूर्णमिदम् ॥

**Bhavasataka** by NÂGARÂJA [भावशतकम्। नागराजः].

Folios 1 to 8.

Begins:

॥ ॐ ॥

शुभ्रं क्वचित्क्वचिदतीव सितेतराभं
क्वापि प्रफुल्लनवपंकजसंनिकाशं।
तप्तं क्वचित्क्वचन शीतलमस्तु वस्तु
कैवल्यसंसृतपथानुगतं मुदे वः ॥ १

नागराजशतं ग्रंथं नागराजेन तन्वता।
अकारि गतवक्त्रश्रीर्नागराजो गिरां गुरुः ॥ २

Ends :

आसीत्कर्प्पटिगोत्रसागरसुधाधामा सुकामाद्भुतः
श्रीविद्याधर इत्यशेषभुवनप्रख्यातनामामृतः ।
यः केदारपदारविंदयुगलप्रत्यग्रपूजाविधिः
प्राप्ताशेषपवित्रभव्यविभवैः सार्थीकृतार्थिश्रमः ॥ ९७

तत्पुत्रः सर्वमित्रः सरसकविकुलस्तूयमानोरुकीर्त्तिः
प्रख्यातो जालपाख्यो जगति विजयते टाकवंशप्रशस्यः ।
विष्णुर्दैत्येंद्रयुद्धव्यतिकरसमये व्याकुलीतात्मभार्यो
लक्ष्मीं निक्षिप्य यस्मिन्विहरति दिवसः स्वेच्छया स्वच्छचित्ते॥९८

तस्माज्जातः सुजातो निजगुणमणिभिः प्रिणिताशेषलोको
लोकाहंकारकारिस्मितमहितमुखष्टाकवंशावतंसः ।
भाति श्रीनागराजः परनृपतिशिरोदर्शितोद्यत्प्रतापो
राजेते यं समेते विगलितकलहे वाक्च पद्मालया च ॥ ९९

भारत्या यदि पुंस्त्वमामरतरुव्राते विवेकोस्ति चे-
त्सांगत्वं यदि मन्मथे सकलता नित्यं शशांके यदि ।
सिंहे चेन्नरता जितारियशसो भावज्ञचूडामणे-
स्तत्तत्सद्गुणतोपमानघटना स्यान्नागराजप्रभोः ॥ १००

यत्तीक्ष्णाक्षतधारदुर्द्धरमहाकौक्षेयकाक्षेपण-
बिभ्यत्क्ष्मापतिवल्लभोदरदरीनिर्भिन्नगर्भायते ।
सोयं दुर्जयदोर्भुजंगगमितप्रौढप्रतापानल-
ज्वालाजालखिलीकृतारिनगरः श्रीनागराजो जयी ॥ १०१

इति श्रीनागराजविरचितं भावशतकं समाप्तमगात् ॥

**Kavikarpatikarachana** by ŚAṄKADVÂRA [कविकर्पटीकरचना। शंकद्वारः].

Folios 1 to 9.

Begins:

॥ श्रीगणेशाय नमः ॥

यः स्वातंत्र्यसुधाविधानकुशलः साहित्यरत्नालयः
सानंदस्फुरगद्यपद्यरचनाप्रागल्भ्यशिष्टोदयः ।
यद्वाच्यामृतपूरपूर्णवदनः सद्वृंदबद्धोदय-
स्तस्येयं कविकर्पटीकरचना कंठे प्रतिष्ठाप्यतां ॥ १

Ends:

पुनः सप्ताक्षराणि । वागीश्वरोयं नृपः । श्रीभीमसेनो नृपः । जीयादयं भूपतिः । भीमोयमालोक्यतां । विज्ञानपारायणः । विद्वानयं राजते ।
इति श्रीकविराजशंकद्वारविरचिते कविकर्पटीकरचना समाप्ता ॥

**Prakritasutrani** [प्राकृतसूत्राणि].

Folios 1 to 10.

Begins:

॥ श्रीगणेशाय नमः ॥

॥ अथ पैशाचीवर्जप्राकृतसूत्राणि ॥

कगचजतदपयवां प्रायो लुक् १ यमुनाचामुंडाकामुकातिमुक्तके मोनुनासिकश्च २ नावर्णात्यः ३ अवर्णो यश्रुतिः ४ ॥...

Ends:

लिंगमतंत्रम् ११५ शौरसेनीवत् ११६ व्यत्ययश्च ११७ शेषं संस्कृतवत्सिद्धम् ११८ इति पैशाचीवर्जप्राकृतसूत्रपूर्वकशौरसेनी १ मागधी २ द्विधा २ पैशाच्य३पभ्रंश ४ भाषाचतुष्कसूत्राणि ॥

**Naishadhanandanataka** by KSHEMÎŚVARA. [नैषधानन्दनाटकम्। क्षेमीश्वरः].

Folios 1 to 59. Dated Samvat 1667 = A.D. 1611.

Begins :

॥ श्रीकृष्णाय नमः ॥

आख्याते हसितं पितामह इति त्रस्तं कपालीति च
व्यावृत्तं गुरुरित्ययं दहन इत्याविष्कृता भीरुता ।
पौलोमीपतिरित्यसूयितमथ व्रीडाविनम्रं श्रिया
पायाद्वः पुरुषोत्तमोयमिति यो न्यस्तः स पुष्पांजलिः ॥ १

अपि च ।

अस्थि ह्यस्थि फणी फणी किमपरं भस्मापि भस्मैवत-
च्चर्मैतत्खलु चर्म किं तव जितं येनैवमुत्ताम्यसि ।
नैतां धूर्त्त पणीकरोषि सततं मूर्द्ध्नि स्थितां जाह्नवी-
मित्येवं शिवया सनर्मगदितो ब्यूते हरः पातु वः ॥ २

अपि च ।

देव्याः संभ्रमकातराः सकरुणा दीने सुराणां गणे
स्मेरा विद्रवविह्वले सुरपतावंभोनिधौ साद्भुताः ।
सानंदाः शशिकंदले कवलनक्रूराश्च हालाहले
शंभोर्वः परिपांतु तांडवमिव व्यातन्वतो दृष्टयः ॥ ३

नांद्यंते सूत्रधारः ।

अलमतिविस्तरेण । आदिष्टोस्मि परिषदा । यथा किल विजय-कोष्ठप्रणप्तुः कवेराचार्यक्षेमीश्वरस्य कृतिरभिनवनैषधानंदं नाम नाटकं नाटयितव्यमिति ॥

Ends :

येनादिश्य प्रयोगं घनपुलकभृता नाटकस्यास्य हर्षा-
द्वस्त्रालंकारहेम्नां प्रतिदिनमकृशा राशयः संप्रदत्ताः ।

तस्य क्षत्त्रप्रसूतेर्भ्रमतु जगदिदं कार्त्तिकेयस्य कीर्त्तिः
पारे क्षीरांबुसिंधो रविकवियशसा सार्द्धमग्रेसरेण ॥
इति निष्क्रांताः सर्वे । सप्तमोंकः समाप्तः ॥

**Satrusalyakavya** by VIŚVANÂTHA [शत्रुशल्यकाव्यम् । विश्वनाथः].
Folios 1 to 234.
Begins:

॥ श्रीगणेशाय नमः ॥ श्रीष्टदेवतायै नमः ॥
श्रीराधाकुचकलशद्वयेतिगौरे
संसर्पी नवजलदोद्धुरो मुरारिः ।
आश्लेषे जयति वपुःप्रभासमूहः
कस्तूरीललितघनांगरागमाली ॥ १

Ends:

योंतर्वाणिशिरोमणेर्वरभिषग्वंशैकमुक्तामणेः
साहित्यांबुरुहाकरैकतरणेः श्रीवैद्यनारायणात् ।
रुक्मिण्यामुदभूदमुष्य सुकवेः श्रीविश्वनाथस्य स-
त्काव्ये श्रीनृपशत्रुशल्यचरिते देवाचलत्रोटनं ॥ ९०

इति श्रीमद्वैद्यवंद्यपदश्रीनारायणात्मजश्रीविश्वनाथरचिते श्रीमन्महाराजाधिराजश्रीशत्रुशल्यचरिते देवगिरिग्रहणनामा द्वाविंशः सर्गः ॥ २२

**Prakritachandrika** by KṚISHṆAPANDITA [प्राकृतचन्द्रिका । कृष्णपण्डितः].
Folios 1 to 52.
Begins:

॥ श्रीगणेशाय नमः ॥
अलिकुलमंडितगंडं प्रत्यूहव्यूहतिमिरमार्त्तंडं ।
सिंदूरारुणशुंडं देवं वेतंडमवलंबे ॥ १

कलितकलमपुस्तन्यस्तहस्ताग्रमुद्रा
दिशतु लिखनसिद्धिं शारदा सारदा नः ।
प्रतिवदनसरोजं या कवीनां नवीनां
वितरति मधुधारां माधुरीणां धुरीणां ॥ २
श्रीनृसिंहगुरोर्नत्वा पदपंकजतल्लजं ।
विशदार्थां शिशुहितां कुर्वे प्राकृतचंद्रिकाम् ॥ ३
प्रकृतिः संस्कृतं तत्र भवत्वात्प्राकृतं स्मृतं ।
तद्भवं तत्समं देशीत्येवमेतत्त्रिधा मतं ॥ ४
प्रकृतिप्रत्ययांशाभ्यां विकृतं तद्भवं यथा ।
गोरी आदेउ सोहग्ग सामिद्धिं पायडं सइ ॥ ५
यत्केवलं प्रत्ययांशे विकृतं तत्समं यथा ।
हरिणो चरणे चारू नमो कमलकोमले ॥ ६
देशी देशविशेषेण प्रयुक्तमपरिस्फुटं ।
यथा हल्लोहलं हालः कंदोइ समउप्पवं ॥ ७
तेषु देश्यं निरूढत्वात्स्वतंत्रत्वाच्च लक्षणं ।
नापेक्ष्यतेन्यशास्त्रावत्संप्रदायोस्य बोधकः ॥ ८
संस्कृतप्राकृतोक्ताभ्यां लक्ष्मभ्यां विद्धि तत्समं ।
अतस्तद्भवमेवैकामिह लक्ष्यतया स्थितं ॥ ९
तच्चार्षं मागधी शौरसेनी पैशाचिकी तथा ।
चूलिकापैशाचिकं चापभ्रंशश्चेति षड्विधं ॥ १०
एषां कार्यविशेषेण भेदोग्रे स्फुटयिष्यते ।
शेषं संस्कृतवत्सिद्धं प्रकृतिप्रत्ययादिकं ॥ ११
महाराष्ट्रोद्भवां भाषां प्रकृष्टं प्राकृतं विदुः ।
आकरः सूक्तिरत्नानां सेतुबंधादि यन्मयं ॥ १२

ऐऔ ँकँपक्रक्लल्प्रुतशषाः सर्गश्चतुर्थीभ्यसि
प्रांते हल्ङञ्नाः पृथक् द्विवचन नाष्टादश प्राकृते ।
सुप्तिङ्लिंगनराज्झलादि बहुलं षष्ठी चतुर्थ्याः सदा
तादर्थ्योदितङेस्तु वा बहुवचो द्वित्वे प्रयोज्यं सदा ॥ १३

प्रायो वादोयं । कैअवं । सौअरिअं । कौरवा । इत्यादौ क्वचिदैदौतोरपि दर्शनात् । जिह्वामूलीयश्च क्वचिच्छौरसेन्यादौ वक्ष्यते । तक्षः तँक्को । शकारश्च मागध्यां वक्ष्यते । यथा । पक्षः पक्को । लाक्षा लाक्का ॥

लहशवशणमिअभुलशिलविभलिअमंदाललाइअंहियुगे ।
वीलयिणे पक्कालदु मह सयलमवज्जयंबालं ॥
रभसवशनमितसुरशिरोविगलितमंदारराजितांघ्रियुगः ।
वीरजिनः प्रक्षालयतु मम सकलमवद्यजंबालं ॥
मागध्यां रस्य लः सः शो जो यः सेर्ङे च लक्ष्यते ।

चतुर्थी भ्यसि चतुर्थ्या भ्यस् न प्रयुज्यत इत्यर्थः । यद्वक्ष्यति । षष्ठी चतुर्थ्याः सदेति भ्यसीति वचनाच्चतुर्थ्या एकवचनमस्त्येव । यद्वक्ष्यति । तादर्थ्योदितङेस्तु वेति । तादर्थ्ये विहिता या चतुर्थी तत्संबंधिङेः षष्ठी वा स्यात् । देवाअ णिवेज्जं देवस्स वा देवतार्थमित्यर्थः । प्रांते हल् नास्ति । लोपोंत्यहल इति वचनात् । प्रांतग्रहणादनंत्यस्य हलःप्रयोगं वारयति । ङञनाः पृथक् पृथक् असंयुक्ता न संति पृथग्ग्रहणात्संयुक्ता ननु मन्यंते । पञ्चमो सपङ्क्ति चिन्तइ द्विवचनं । स्यादित्यादीनां द्विवचनं न प्रयुज्यते द्वित्वे बहुवचनस्यैव विधास्यमानत्वात् । तथा प्राकृते सुबादिविधिर्बहुलं भवति । यत्र विहितास्ततोन्यत्रापि भवंति । सुप्तिङौ पाणिनिप्रसिद्धया तत्र द्वितीयार्थे षष्ठी । यथा । गंगाधरस्स वंदे ।

तृतीयार्थे यथा । धनस्स लुद्धो । पंचम्यर्थे यथा । चोरस्स बीहई । सप्तम्यर्थे यथा । पिट्ठीए केसवासो । पृष्ठे केशपाशः । क्वचिद्वितीयातृतीययोः सप्तमी । यथा । गामे अहिवसामि । घरे ण जामि । तिसु तेसु अलंकिआ पुहवी । त्रिभिस्तैरलंकृता पृथिवीत्यर्थः । क्वचित्पंचम्यास्तृतीयासप्तम्यौ । चोरेण बीहइ । अंतेउरम्मि आगओ राआ । अंतःपुरादुपागतो राजेति । क्वचित्सप्तम्या द्वितीया । यथा । विज्जुज्जोअंतरइ रत्तिं । विद्युद्द्योततते रात्रिं । आर्षे तु तृतीयापि दृश्यते । तेणं कालेणं तेणं समएणं । तस्मिन्काले तस्मिन्समये इत्यर्थः । क्वचित्प्रथमार्थे द्वितीया । चउव्वीसंपि जिणवरा । चतुर्विंशतिरपि जिनवराः । एवं तिङामपि व्यत्ययः । परस्मैपदात्मनेपदयोः । यथा । हसइ । हसए । वेवइ । वेवए । लिंगव्यत्ययः । यथा ।

प्रावृट्शरत्तरणयः पुंसि ।
पाउसो । सरओ । एसो तरणी ।
क्वांतमपि क्वचित् ॥ १२ ॥

सांतं नांतं च पुंसि स्यात् ।
जसो । पओ । तमो । चेओ ।
पुरो । नांतं । जम्मो । नम्मो । चम्मो । पिम्मो ।...

Folio 6 :

इति सामान्यविधिप्रकाशः । (३४)

कगचजतदपयवां लुप्यंतेनाद्ययुक्तं
न विदुरसमवाये कोपने नो सपापे ।
स्वगतसुगतदेवे दानवे चूचके चा-
गुरुविजनसुतारे न प्रयागे सचापे ॥ १ ...

Folio 10:

इति असंयुक्तादेशप्रकाशः । (६९)

तीक्ष्णस्य तिण्हं तिरक्कं च जानातेर्ज्ञो जणौ क्वचित् । ...

Folio 12:

इत्यव्ययानि ॥ (२३२)

एवं प्रकृतिषु संस्कृतासु ताभ्यः स्यादयो विभक्तयो योज्यंते तत्रादौ तदुपयोगि संगृह्यते ।

टामोर्णस्य सुपो हेः क्काश्चांते वा बिंदुरागमः ॥...

Folio 34:

निपातनेषु पर्यायसौकर्यप्रतिपत्तये ।

एवमुच्चावचमिह समाधेयं सुधीवरैः ॥ ९०

इति श्रीप्राकृतचंद्रिकायां स्याद्यंतप्रकाशः ॥ (२८२)...

Folio 48:

इति तिङंतप्रकाशः । (३८३)...

Folios 51:

अपभ्रंशस्तु यो भेदः षष्ठः सोत्र न लक्ष्यते ।

देशभाषादितुल्यत्वान्नाटकादावदर्शनात् ॥ २८

अनत्यंतोपयोगाच्चातिप्रसंगभयादपि ।

एवमन्येपि ये भेदा लक्षिताः पूर्वसूरिभिः ॥ २९

नेहोक्ताः किं तु नाम्नैते कीर्त्यंते स्पष्टबुद्धये ॥

तदुक्तम् ।

महाराष्ट्री तथावंती सौरसेन्यर्द्धमागधी ।

वाल्हीकी मागधी चैवेत्यष्टैता दाक्षिणात्यजाः ॥

शकाराभीरचंडालशबरद्रविडोद्भजाः ।

हीना वनेचराणां च विभाषा नाटकाश्रयाः ॥

त्राचंडो लाटवैदर्भावुपनागरनागरौ ।
वार्वरावंत्यपांचालटाक्कमालववैकयाः ॥
गौडोड्रदैवपाश्चात्यपांड्यकौंतलसैंहलाः ।
कालिंग्यप्राच्यकर्णाटकांच्यद्राविडगौर्जराः ॥
आभीरो मध्यदेशीयः सूक्ष्मभेदव्यवस्थिताः ।
सप्तविंशत्यपभ्रंशा वैडालादिप्रभेदतः ॥
कांचीदेशीयपांड्ये च पांचालं गौडमागधं ।
त्राचंडदाक्षिणात्यं च सौरसेनं च वैकयं ॥
शावटं द्राविडं चैव एकादंश पिशाचजाः ।
एवमार्षमनार्षं च संकीर्णं चोपजायते ॥
देवानां भूपतीनां च सचिवानां पुरोधसां ।
अमात्यवणिगादीनां पाठ्यमिच्छंति संस्कृतं ॥
संस्कृतेनैव केप्याहुः प्राकृतेनैव केचन ।
साधारण्यादिभिः केपि केचन म्लेच्छभाषया ॥
न म्लेच्छितव्यं प्रज्ञादौ स्त्रीषु नाप्राकृतं पठेत् ।
संकीर्णे नाभिजातेषु नाप्रबुद्धेषु संस्कृतं ॥
परित्राण्मुनिविप्राणां संस्कृताच्चान्यदिष्यते ।
अन्येषामुत्तमानां च प्रतीपं क्वापि दृश्यते ॥
बालस्त्रीवृद्धवैश्यानां हितं वाप्सरसां तथा ।
वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चांतरांतरा ॥
ऐश्वर्यादिप्रमत्तस्य दारिद्र्योपप्लुतस्य च ।
उत्तमस्यापि पठतः प्राकृतं नैव दूष्यति ॥
क्रीडार्थं नृपतेरिष्टं प्राकृतं च द्विजन्मनां ।
भरतेनोदितं माद्यमबाधितमिदं वचः ॥

विशेषमाह भारद्वाजः ।

गाथासु तु महाराष्ट्री अन्या नाट्याश्रया मताः ।
बालस्त्रीवृद्धभिक्षूणां श्रावकव्याजलिंगिनां ॥
ग्रहोपसृष्टमत्तानां प्राकृतं षंडरूपिणां ॥
नायिकानां सखीनां च सौरसैन्यविरोधिनी ॥
प्राच्या विदूषकादीनां धूर्त्तानामप्यवंतिका ।
मागधी राक्षसादीनामंतःपुरनिवासिनां ॥
चेटानां राजपुत्राणां श्रेष्ठीनां चार्द्धमागधी ।
शकाराणां तु शाकारी बाल्हीकी दिव्यभाविनां ॥
योधानां भारिशादीनां शाबरी च प्रशस्यते ।
द्राविडी द्रविडादीनामौड्री खनकरक्षसां ॥
काव्ये वैतालिकादीनां वेतालादि सुभाषितं ।
किरातबर्बरादीनां न भाषा नैव लक्षणं ॥

तदिमां पदचंद्रिकानुजातां
प्रणुतां प्राकृतचंद्रिकां विदग्धाः ।
परिशील्य चिरादपास्ततापां
कविगोष्ठीषु विहारमातनुध्वं ॥ ३०

इति कृतिपरितोषप्रार्थनालंपटेन
प्रकटितपरभागा शेषकृष्णेन सेयं ।
रचयतु गुरुतोषं शेषवंशावतंसं
गुरुमिह नरसिंहं प्रापिता तत्पदाब्जे ॥ ३१

इति श्रीकृष्णपंडितविरचिता प्राकृतचंद्रिका समाप्ता ॥ (४१४)

**Saptasati** by HÂLA [हालसप्तशती].

Folios 1 to 41.

Begins :

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ॥

अथ हालसप्तशती लिख्यते ॥ पसुवइणो...

Ends :

राएण विरइआए कुंतलजणवअइणेण हालेण ।

सत्तसई अ समत्तं सत्तम ७ मज्झासअं एअं ॥ ७०२

इति सप्तमं ७ शतकम् ॥ ७ ॥

इति श्रीमत्कुन्तलजनपदेश्वरप्रतिष्ठानपत्तनाधीशशतकर्णोपनामकट्टीपिकर्णात्मजमलयवतीप्राणप्रियकालापप्रवर्त्तकशर्ववर्मधीसखमलयवत्युपदेशपण्डितीभूतत्यक्तभाषात्रयस्वीकृतपैशाचिकपण्डितराजगुणाढ्यनिर्मितभस्मीभवद्बृहत्कथावशिष्टसप्तमां ७ शवलोकनप्राकृतादिवाक्पञ्चक ५ प्रीतकविवत्सल १ हाला २ ह्युपनामकश्रीसातवाहननरेंद्रनिर्मिता विविधान्योक्तिमयप्राकृतगीर्गुम्फिता शुचिरसप्रधाना काव्योत्तमा सप्तशत्य ७०० वसानमागात् ॥

लिखिता पौराणिककविवर्य्यबुन्दीन्द्रहडुरावराड्रामसिंहसप्रतिभसभ्यषड्दर्शनभाषावेशभाभिनीभुजङ्गभिश्रणसूर्यमल्लेन स्वकीये श्रीभारतीभाण्डागारे लिखिता गौर्जरगौडविप्रेण नन्दशर्मणा स्वस्वामिलेखयित्रभिहितवंशभास्करलिपिकृता ॥ श्रावणशुक्लैकादश्यां ११ छायेयुजि शक्कर्यतिधृति १८१४ मितश्रीप्रामाररराड्विक्रमसंवत्सङ्गतायामन्तमिता लिविः ॥

**Commentary** on the **Sarasvatikanthabharana** by RÂMASIMHADEVA [सरस्वतीकण्ठाभरणस्य टीका । रामसिंहदेवः].

Folios 1 to 126. Incomplete.

Begins :

॥ श्रीगणेशाय नमः ॥

एकेन यस्य यमिनः प्रमदेव देह-
मर्द्धेन राजति पुमानिव चापरेण ।
तत्त्वक्रमादथ च न प्रमदा पुमान्वा
श्रेयांसि वर्द्धयतु स स्मरशासनो वः ॥ १
श्रीरामसिंहदेवेन दोर्दण्डदलितद्विषा ।
क्रियतेवंतिभूपालकंठाभरणदर्पणः ॥ २
कंठाभरणमनर्घ्यं वाग्देवी रत्नदर्पणोत्संगे ।
अस्मिन्पश्यतु निभृतं प्रकाशसर्वांगलावण्यं ॥ ३

ग्रंथारंभे समुचितेष्टदेवतानमस्कारेण शिष्टाचारमनुवर्त्तते । ध्वनिरिति । ...

Folio 78 :

इति श्रीमिश्ररत्नेश्वरविरचिते रत्नदर्पणनाम्नि सरस्वतीकंठाभरणविवरणे गुणदोषयोर्विरचननामा प्रथमः परिच्छेदः ॥...

Folio 126 :

चित्रानुप्रास इत्युच्यते । तथाहि । प्रकृतोदाहरणे संदर्भसमाप्तिं यावदावर्त्तत ।...

**Pushpabhashya** by AJÍTAŚATRU [पुष्पभाष्यम् । अजातशत्रुः].
Folios 1 to 162.
Begins :

॥ ॐ नमो सामवेदाय ॥

जितं भगवता येन हरिणा लोकधारिणा ।
अजेन विश्वरूपेण निर्गुणेन गुणात्मना ॥ १

सोभराभीवर्त्तजयानां वृद्धं तुरीयं । सोभरअभीवर्त्तजयानां साम्नां तुरीयं चतुर्थमक्षरं व्वं दीर्घं यत्तद्बृद्धं भवति । तुरीयशब्देन चतुर्थ-

मुच्यते । दीर्घं द्विमात्रमुच्यते । वृद्धं त्रिमात्रं । उदाहरणानि । सौभरे वयमुत्वाघात्ययोः । अभीवर्त्ते युनानः सोमाघयोः योधा जयेत वाह६ सोमाघामां ॥ अस्यापवादमाह ॥...

Folio 6 :

या मे दीर्घं महित्रीणां द्वितीयं वर्द्धते । आयं गौरित्यत्र ॥

इति पुष्पभाष्ये प्रथमस्य प्रथमा कंडिका ॥...

Folio 37 :

तवाहं नक्तेति द्वैगताभीशवयोः । अहं शब्दो नीचैः । इति उच्च-नीचं समाप्तं ॥

इति पुष्पभाष्ये द्वादशमी कंडिका । प्रथमः प्रपादकः समाप्तः ॥

Folio 56 :

एते शब्दाः षट् षडष्टोऽसंकृष्टाः ॥ ७ इति द्वितीयस्य द्वादशमी कंडिका ॥

इति पुष्पभाष्ये द्वितीयः प्रपाठकः समाप्तः ॥...

Folio 87 :

इति तृतीयस्यैकादशमी कंडिका ॥ पदांतश्च भवति । अंतःपदि-कानामभाव उक्तः । अथेदानीं पदांतीयस्याभाव उच्यते ॥...

Folio 89 :

मधु१म१धू३ ना ३३भा३कुं१मा३इ१॥ अत्र इकारस्याभावः॥

इति पुष्पभाष्ये तृतीयः प्रपाठकः समाप्तः ॥...

Folio 96 :

प्रत्ययभूतायामिति ॥ इति चतुर्थस्य चतुर्थी कंडिका ॥....

इति पुष्पभाष्ये उपाध्याय अजातशत्रुकृतौ भावाभावाः समाप्ताः॥

Folio 121 :

एतेन लक्षणप्रयोगेण ऊह्यः प्रयोगः कल्पयितव्यः कल्पयितुं शक्यत इति चतुर्थस्य दशमी कंडिका ॥

उपाध्यायाजातशत्रुपादैर्विष्णुयशःशिष्याय ।

अनुचरणार्थं भाष्यं कृतमिति भावापरिसमासाः[1] ॥

इदानीं विकल्पा उच्यंते । भावशेषं च एकस्मिन्पादे द्विधा गीतिर्दृश्यते।

Folio 122 :

ककुभो वृहत्यौ वा ॥ इति पुष्पभाष्ये पंचमस्य प्रथमा कंडिका ॥

अथ भावान्प्रवक्ष्यामः ॥ ...

Folio 139 :

वैरूपे तु देवतापदं । देवतापदमित्येवं निधनक्रमो भवति ।

ऊह गीतौ ।

इति पंचमस्याष्टमी कंडिका ॥...

Folio 140 :

पंचमस्य नवमी कंडिका ॥ पंचमः प्रपाठकः समाप्तः ॥...

Folio 143 :

ऊर्द्ध्वं व्यंजनादिविश्लेष्ट[2]मुपेयुरित्येवमारभ्यते ॥

उपाध्यायाजातशत्रुकृते पुष्पभाष्ये षष्ठस्य द्वितीया कंडिका ॥...

Folio 162 :

विकल्पमाह । वा प्रस्ताव्ये उ इति विकल्पः । उत्तरयोरिति सिद्धं ।

इत्युपाध्यायाजातशत्रुकृते पुष्पभाष्ये षष्ठस्यैकादशमी कंडिका समाप्ता ॥ इति षष्ठः प्रपाठकः समाप्तः ॥

**The Karikas** of BHARATA [भरतकारिका].

Folios 2.

Begins :

॥ श्रीहरिः ॥

अथ भरतकारिका ॥

---

[1] भावाः परिसमासाः? [2] विश्लेष?

खंडिता विप्रलब्धा च वाससज्जाभिसारिका ।
कलहांतरिता चान्या तथैवोत्कंठितापरा ॥ १ ॥
स्वाधीनभर्तृका चैव तथा प्रोषितभर्तृका ।
संयोगविप्रलंभाभ्यामित्यष्टौ नायिकाः स्मृताः ॥ २ ॥
उन्निद्रताजनितरागविलोहिताक्षः
कांतानखक्षतविशेषविचित्रितांगः ।
यस्याः प्रभातसमये गृहमेति कांतः
सा नायिका निगदिता खलु खंडितेति ॥ ३ ॥
अहरहरनुरागाद्भूतिकां प्रेष्य पूर्वं
सरभसमुपयाति क्वापि संकेतितं या ।
न मिलति खलु यस्या वल्लभो दैवयोगा-
न्निगदति भरतस्तां नायिकां विप्रलब्धां ॥ ४ ॥
या वासवेश्मनि सुकल्पिततल्पमध्ये
तांबूलपुष्पवसनैश्च समं ससज्ज ।
कांतस्य संगमरसं समवेक्षमाणा
सा कथ्यते कविवरैरिह वाससज्जा ॥ ५ ॥
[1]उद्दामन्मथमहाज्वरवेपमाना
रोमांचकंटकितगात्रलतां वहंती ।
निःशंकिनी व्रजति या प्रियसंगमाय
सा नायिका निगदिता त्वभिसारिकेति ॥ ६ ॥
प्राणेश्वरप्रणयकोमलमंजुवाग्भि-
र्या चाटुकारमचिरादवधीर्य याति ।
संतप्यते मदनवह्निशिखासहस्रै-
र्बाष्पाकुला कुकलहांतरिता हि सा स्यात् ॥ ७ ॥

[1] उद्दाममन्मथ°?

दुर्वारदारुणमनोभवबाणपात-
पर्याकुलां तरलमानसमुद्वहंतीं ।
प्रस्वेदवपथुयुतां पुलकोचितांगी-
मुत्कंठितां वदति तां भरतः कवींद्रः ॥ ८ ॥
आश्लेषचुंबनशतैः कुसुमादिदानैः
प्रेमोल्लसन्मधुरकोमलमंजुवाग्भिः ।
या सर्वदा प्रियतमेन निषेव्यते सा
स्वाधीनभर्तृकपदं प्रकटीकरोति ॥ ९ ॥
निश्वासिनीं मलिनवस्त्रवपुर्वहंतीं
डिंडीरपिंडपरिपांडुरगंडभित्तिं ।
निर्भूषणां प्रियवियोगजभावतप्तां
तां प्रोषितप्रियतमां प्रवदंति संतः ॥ १० ॥

इति श्रीमत्कविकेसरिभरतविरचिताष्टनायिकालक्षणं समाप्तं ॥

Jagatprakasakavya by Viśvanâthavaidya [जगत्प्रकाश-महाकाव्यम्। विश्वनाथवैद्यः].

Folios 1 to 109. Dated Samvat 1700 = A.D. 1644.

Begins :

श्रीमन्मंगलमूर्तिर्जयति ॥ श्रीमन्नारायणाय नमः ॥

शंभुः शं भुवि भूरि भावयतु वः संभुज्यमानं जनै-
र्योर्द्धांगे निदधाति कामधगपि प्रेम्णा प्रकामं प्रियां ।
चित्रं यश्च सतीमतीव कुरुते [1]पंनीचुंबना-
दप्येनां सचराचरेत्र भुवने लोकालिशोकापहाम् ॥ १

Ends :

श्रीमद्राणकवंशमौक्तिकमणिश्रीकर्णदेवात्मज-
क्षोणीमंडलमंडनाभिधजगत्सिंहप्रशंसोज्ज्वले ।

[1] पंचाननी०?

सत्काव्येत्र जगत्प्रकाश उदिते श्रीविश्वनाथाभिध-
ज्ञेनापूरि चतुर्दशोतिविशदः सर्गो बुधानां प्रियः ॥७२

इति श्रीमन्महीमंडलाखंडलश्रीचित्रकूढसार्वभौमश्रौतस्मार्त्तधर्म-कर्माचारचातुरीनिवारितकलिकालश्रीमद्ब्राणखुमानकुलमौलिमंडनश्री-मत्कर्णदेवात्मजश्रीमन्महाराजाधिराजधर्मावतारसप्तलोकैकदानवीर-धीरोदात्तगुणशोभितश्रीमज्जगत्सिंहदेवप्रशंसोज्ज्वले श्रीमद्द्विद्वृंदवंदनीयपादारविंदश्रीमन्नारायणात्मजश्रीमत्कविनाथविश्वनाथवैद्यकृते श्रीजगत्प्रकाशमहाकाव्ये बंदिस्तुतिर्नाम चतुर्दशः सर्गः ॥

॥ समाप्तं चेदं काव्यं ॥

**Yudhistiravijayakavya** by VÂSUDEVA [युधिष्ठिरविजयकाव्यम्। वासुदेव]. Folios 1 to 73. Dated 1690 = A.D. 1634.

Begins:

॥ श्रीकृष्णाय नमः ॥

प्रदिशतु गिरिशः स्तिमितां ज्ञानदृशं वः श्रियं च गिरि शस्तिमितां।
प्रशमितपरमदमायं संतः संचिंतयंति परमदमा यं ॥ १ ॥...

७८ ॥ इति वासुदेवविरचिते युधिष्ठिरविजये प्रथम आश्वासः।

Ends:

सुखेन नागसाह्वये पुरे वसन्स भारतः।
ररक्ष गां पुरूरवा पुरैव सत्सभारतः ॥ १०९

इति श्रीयुधिष्ठिरविजयेऽष्टम आश्वासः ॥ ८॥ संवत् १६९०

**Kansanidhana** by ŚRIRÂMA [कंसनिधनं महाकाव्यम्। श्रीरामः]. Folios 1 to 105.

Begins:

॥ श्रीनंदनंदनो जयति ॥

आनंदयिष्यन्निखिलां धरित्रीं

निराकरिष्यन्दितिजाधिराजान् ।
जनिं जगद्गीतयशा दशार्हे-
संतानगेहे हरिराससाद ॥ १

Ends:

रणे निघ्नन्नित्थं निखिलखलचक्रं नतिकृतां
कृतांतीयं त्रासं निरतिशयितार्धिं शकलयन् ।
घनानंदं सेंद्रत्रिदशगणगीतस्थिरयशा
निरातंकं चक्रे [1]त्रिगदखिलं नंदतनयः ॥ ७२

इति श्रीरामकृतौ कंसनिधननामधेये महाकाव्ये सप्तदशः सर्गः । कंसनिधनाख्यं निरोष्ठ्यकाव्यमिदं ॥ ग्रंथसंख्या १९७९ शुभमस्तु ।

**Kavyaloka** by HARIPRASÂDA [काव्यालोकः । हरिप्रसादः].
Folios 1 to 69.
Begins:

॥ श्रीमहागणाधिपतये नमः ॥

अभिधेयकथनपुरस्सरं प्रयोजनं शास्त्रारंभं प्रतिजानानीते ।

काव्यस्य परमाह्लादकीर्त्यादिफलयोगिनः ।
हरिप्रसादविदुषा मीमांसा क्वापि तन्यते ॥ १

निपुणवर्णनारूपकविकर्मणः कापीत्येकदेशमात्रकथनं मीमांसा लक्षणविचारः परमाह्लाद इति सकलप्रयोजनमौलिभूतं तदर्थकपुरुषार्थसाधनप्रवृत्तेः ॥...

Folio 12:

इति श्रीमन्महामहिमकविपंडितश्रीमाथुरमिश्रगंगेशात्मजहरिप्रसादनिर्मिते काव्यालोके प्रथमः प्रकाशः ॥.

Ends:

विशिष्टशब्दरूपस्य काव्यस्यात्मा चमत्कृतिः ।
उत्पत्तिभूमिः प्रतिभा मनागत्रोपपादितं ॥

[1] त्रिजगद° ?

अत्रेति काव्यालोके । स्पष्टमन्यत् ।

अब्धिदिङ्मुनिभू१७८४वर्षे माघशुक्लमुनौ७रवेः ।
काव्यालोकमिदं पूर्णमकारि गुरुसंनिधौ ॥

इयं माधुकरी भिक्षा सुमनोभ्यः समाहृता ।
बालानां तुष्टये गर्वो न मनागपि विद्यते ॥

प्राचीनैर्यदिहोदितं बहुविधैर्ग्रंथैस्तदत्राहृतं
संक्षेपेण न किंचिदन्यदुदितं गर्वेण तद्वन्मया ।
व्याख्यातं तदुदाहृतं तदुदितं भूयोपि तच्चापलं
भो विद्यागुरवः क्षमंतु शिशवः कुर्वंति चात्मोचितं ॥

इहेति काव्यलक्षणप्रस्तावे । अत्रेति काव्यालोके चकारो युक्तार्थे सर्वमलंकारस्वरूपमवदातं ॥

इति श्रीमन्माथुरमिश्रगंगेशात्मजहरिप्रसादनिर्मिते काव्यालोकेऽर्थालंकारनिरूपणं नाम सप्तमः ७ प्रकाशः समाप्तः ॥

**Nalayana or Kuberapurana** by MÂṆIKYASÛRI [नलायनं नाम कुबेरपुराणम् । माणिक्यसूरिः].

Folios 1 to 73. Dated Samvat 1464 = A.D. 1408.

Begins :

॥ ॐ नमः श्रीसर्वज्ञाय ॥

जयति जयति देवः केवलज्ञानमूर्ति-
र्मदमदनविजेता शास्वतो वीतरागः ।
जयति कुमुदशुभ्रा भारती भूरिभावा
जयति कविकुलानां कोमलो वाक्प्रपंचः ॥ १

दुरितदलनसज्जः सज्जनोद्धारधीरो
धनवितरणवीरो धर्मविश्रामशाखी ।

जयति जगति नित्यं निश्चलो निष्कलंकः
सकलकलुषहारी लोकपालः कुबेरः ॥ २

स्निग्धैर्नवदुग्धमुग्धमधुरैः शुभ्रैर्यशोभिर्जग-
द्यश्चक्रे कलिकालकल्मषमषीविक्षेपिभिर्निर्मलं ।
स श्रीमानलकापतेर्भगवतः पूर्वावतारः कृती
नित्यं मंगलमातनोतु भवतां राजा नलो नैषधः ॥ ३ ...

मध्ये धर्मस्य शांतेश्च चतुर्थे च तथारके ।
वीरसेनसुतो राजा नलो राज्यमपालयत् ॥ २६...

Folio 9 :

२९ ॥ इति श्रीकुबेरपुराणे शुकपाठे नलायने माणिक्य-सूरिविरचिते उत्पत्तिस्कंधे एकादशः सर्गः ॥...

Ends :

एतत्किमप्यनवमं नवमंगलांकं
साहित्यसारविदुषा कविना कृतं यत् ।
तस्यार्यकर्णनलिनस्य नलायनस्य
स्कंधो जगाम दशमः शमसंभृतोयं ॥ २२

उत्पत्तिदौत्यवरविद्वरशीलभूचा-
संयोगराज्यभवनिर्वहणाभिधेयाः ।
स्कंधा भवंति दश यस्य नलायनस्य
पूर्णं तदेतदधुना धनदप्रसादात् ॥ २३

॥ शतसर्गं नलायनं समाप्तं ॥

समाप्तं चेदं नलायनं नाम कुबेरपुराणं शुकपाठ इति । सर्वग्रंथ-संख्या ॥ ४७२४.

**Sandrakutuhalaprahasana** by KRISHNDATTA [सान्द्रकुतूहल-प्रहसनम्। कृष्णदत्तः].

Folios 1 to 36.

Begins:

श्रीगणेशाय नमः ॥

व्रजगोपवधूरहस्करं
चरणांभोजजुषामहस्करं ।
यदुवंशमहायशस्करं
हरिमीडे नवनीततस्करम् ॥ १...

नांद्यंते सूत्रधारः । अलमनल्पजल्पनप्रकल्पनेन ।

जीवातुर्जन्मभाजामवनितलगतक्षत्रियाणां कुटुंबी
नाथोनाथप्रजानामखिलगुणखनिर्भाग्यभूर्भूसुराणां ।
दावाग्निर्दुर्ज्जनानां स्वजनसुरतरुर्वेदसन्मार्गसीमा
राजासीद्धर्मवर्मा प्रथितजगदसौ राजराजाधिकार्द्धिः ॥ ४...

सूत्र० । आर्ये के ते सिद्धाः परिचिता अपरिचिता वा ।

हेमलता । परिचिता एव ।

पद्माकराचार्यसुतः सुखाकरः
प्रभाकराचार्यसुतः क्षपाकरः ।
दिवाकराचार्यसुतो गुहाकरो
दोषाकराचार्यसुतः सुधाकरः ॥ १...

Folio 3:

सुखा० । कस्तर्हि तत्प्राप्तावुपायः ।

पद्मा० । गाढमाक्रोश्य ।

किं हंत खिद्यत जना भवसागरेस्मिन्
सत्साधने महति सत्यपि विद्यमाने ।
यांतु व्रजाधिपतिवल्लभविङ्घ्रलेश-
संबंधिषट्पदसरोरुहषट्पदत्वं ॥ ३

सुखा० । पूज्यपाद किंकुलोत्पन्नो व्रजपतिः ।
पद्मा० ।

अमांगल्यध्वंसी भुवनशुभशंसी करपुटे
दधद्रम्यां वंशीमपरकलहंसीमिव परां ।
सदा दुष्टभ्रंशी विलसदवतंसी श्रवणयोः
स्वयं साक्षादंशी जयति यदुवंशीयतरणिः ॥ ४

Folio 35 :

इति श्रीमद्विद्वज्जनमनोरंजनसांद्रकुतूहलनाम्नि प्रहसने कविकृष्ण-दत्तकृते चतुर्थोंकः पूर्त्तिमैत् ॥

विद्वन्मनोरंजनकृत्कवित्वं
चतुर्भिरंकैः परिशोभमानं ।
सन्नाटकं सांद्रकुतूहलाख्यं
चकार कीर्त्यै कविकृष्णदत्तः ॥ १...

नवांबराष्टापदभूषिता समा
मामाधवो निर्मलपक्षसंयुतः ।
एका तिथिः श्रेष्ठतमा सुमंगला
तेनेन्वहं स्वां कृतितामिमामिह ॥ ११

अयं श्लोको व्यर्थः । संवत्सरपक्षेण भगवत्पक्षेण च ॥

**Ramayanachampu** by BHOJARÂJA and LAKSHMANABHAṬṬA [रामायणचम्पूः । भोजराजो लक्ष्मणभट्टश्च].

Folios 1 to 68.

Begins:

॥ श्रीगणेशाय नमः ॥

॥ पद्यं ॥ लक्ष्मीं तनोतु सुतरामितरानपेक्ष-
मंघ्रिद्वयं निगमशाखिशिखाप्रवालं ।
हैरंबमंबुरुहडंबरचौर्यनिघ्नं
विघ्नाद्रिभेदशतधारधुरंधरं नः ॥ १ ॥...

Folio 13:

१८॥ इति श्रीविदर्भराजविरचिते चंपूरामायणे बालकांडः ॥...

Folio 25:

॥ ८९ ॥ इति विदर्भराजविरचिते चंपूरामायणे श्रीमदयोध्या-कांडः समाप्तः ॥...

Folio 33:

इति श्रीमद्विदर्भराजविरचिते चंपूरामायणे श्रीमदरण्यकांडः समाप्तः॥...

Folio 40:

॥ ४७ ॥ इति श्रीविदर्भराजाविरचिते चंपूरामायणे किष्किंधा-कांडः समाप्तः ॥...

Folio 51:

॥ ७६ ॥ इति श्रीविदर्भराजविरचिते चंपूरामायणे श्रीमत्सुंद-रकांडः समाप्तः ॥...

Folio 68:

राज्यं स्वं समुपेयिवान्सविनयैरासेवितो भ्रातृभिः
सुग्रीवप्रमुखानपि प्रियसखान्स्वे स्वे पदे स्थापयन् ।

स्वच्छंदः सुचिरं सुखान्यनुभवन्देव्या तया सीतया
रामः पालयति स्म कीर्त्तिविभवैरामोदिनीं मेदिनीं ॥१०९
कोलालाख्यमहाग्रहारमहिताकल्पेन संख्यावतां
मूर्द्धन्येन विशारदेन विधुना श्रीसोमनाथोदये ।
प्राग्भोजोदितपंचकांडमहितानंदे प्रबंधे पुनः
कांडो निर्मित एकचूतपतिना षष्ठोपि जीयाच्चिरं ॥११०

इति श्रीलक्ष्मणकविविरचिते चंपूरामायणे युद्धकांडः समाप्तः ॥

**Bharadvajiyagrihyasutra** [भारद्वाजीयगृह्यसूत्रम् ].
Folios 1 to 350.
Folio 13:

२७ ॥ इति चौलकर्म समाप्तम् । श्रवणकर्म व्याख्यास्यामः । श्रावण्यां पौर्णमास्यामुपकल्पयतेऽक्षतधानाश्चाक्षतसक्तूंश्च ॥...

Ends :

उक्तं प्रांते प्राजापत्यं तस्य विच्छित्तिः तस्य तु पुनराधेयं मनोज्योतिस्तंतुमतीः पुनस्त्वा रुद्रादित्या इति पूर्णाहुतिं प्रतीयादेतामप्युपघातेषु सर्वं स्त्रियाश्चैवं होमाभिगमनस्थालीपाकेषु सर्वेषामंततो व्याहृतिरिति सिद्धं नम आचार्येभ्यो नम आचार्येभ्यः ॥ ९०

॥ इति भारद्वाजीयं गृह्यसूत्रं समाप्तं ॥

**Radharahasyakavya** by KRISHNADATTAKAVI with **Commentary** [राधारहस्यकाव्यं सटीकम् । मू० कृष्णदत्तकविः].
Folios 1 to 350.
Granthâgra 11150.
Commentary begins :

॥ श्रीलक्ष्मीनारायणाभ्यां नमः ॥

लीलैजद्वृषभानुमानसमहाकासारवर्यांतरा...

Text begins :

जनयति जगदिच्छामात्रतो ब्रह्मरूपी...

Text ends:

यस्यास्ते वाज्जडेतिप्रथितजनपदे ग्रामठीयाख्यखेटो
यं मातानंददेवी तनयमजनयच्छ्रीसदारामभर्त्तुः ।
साहस्रौदीच्यजातिर्य इह सुविदितो डालवाणीयजोशी-
त्याविख्यातावटंको जयति कृतिरियं कृष्णदत्तस्य तस्य ॥ ४४

॥ इति द्वाविंशः सर्गः पूर्त्तिमाप ॥ २२

Commentary ends:

४४ ॥ इति श्रीसद्राधारहस्याभिधकाव्यांतर्गतकठिनपदगूढकपा-
टमहार्गलाभेदिनीनाम्न्यां टीकायां द्वाविंशतितमःसर्गः पूर्त्तिमाप ॥ २२

Haravali by PURUSHOTTAMA. [हारावली । पुरुषोत्तमः].

Folios 2 to 19.

Granthagra 271.

Ends:

इति काव्यमलीकं स्यान्मात्सर्यमलिनात्मनां ।
शब्दार्णव उत्पलिनी संसारावर्त्त इत्यपि ॥ ६९

कोषा वाचस्पतिव्याडिविक्रमादित्यनिर्मिताः ।
आदाय सारमेतेषामन्येषां च विशेषतः ।
हारावली निबद्धेयं मया द्वादशवत्सरैः ॥

उपास्य [1]सर्वज्ञपर्णवेषं
भूत्वातिथिः श्रीधृतिसिंहवाचां ।
हारावली द्वादशमासमानै-
र्विनिर्मितेयं पुरुषोत्तमेन ॥ ७०

नानाकाव्यपुराणनाटककथाकोषेतिहासस्मृति-
ज्योतिःशास्त्रगजाश्वपालव[2]भिषक्कोषान्प्रयत्नादियं ।

[1] सर्वज्ञसुपर्ण ? [2] पालक ?

दृष्ट्वान्यानपि शाब्दिकैः सह कृता हारावली यत्नतः
कर्त्तव्योत्र न संशयः सुमनसः शब्दार्थलिंगेष्वथ ॥

— — — सुधियो न भूभृता
धृतिसिंहेन समं निरूपितेयं ।
विदितो बहुदश्वभिः कवींद्रै-
र्भुवि केषां मनस (?) अमोमदीयैः ॥ ७२

हित्वा महाशाब्दिकताभिमानं
मात्सर्यमन्यत्र समुन्निनाय ।
हारावलीं यो विदधाति कंठे
विदग्धगोष्ठीषु परं विभाति ॥ ७३

इति श्रीमहाशाब्दिकपुरुषोत्तमविरचिता हारावली समाप्ता ॥

**Surimantrakalpasaroddhara** by MERUTUÑGA [सूरिमंत्रकल्पसारोद्धारः । मेरुतुंगः].

Folios 1 to 47. Incomplete.

Folio 15:

सुरभिमुद्रया अंजलिमुद्रया च यथावस्थितं श्रीअंचलगच्छेशश्री-आर्यरक्षितसूरिक्रमागतं ३७८ अक्षरमानं सूरिमंत्रं जपेत् ।

Folio 19:

श्रीमदंचलगच्छेशाः श्रीमेरुतुंगसूरयः ।
आलोक्यानेकसूरींद्रमुख्यमंत्रोपयोगिनः ॥ १ ॥
ग्रंथान् गच्छोपयोगार्थं सारोद्धारं व्यधुः स्वयं ।
श्लोकाः पंचशतान्यत्राष्टापंचाशच्च निश्चिताः ॥ २ ॥

इति विधिपक्षमुख्याभिधानश्रीमदंचलगच्छेशश्रीश्रीमेरुतुंगसूरिलिखितः श्रीअंचलगच्छश्रीसूरिमुख्यमंत्रकल्पः ॥ ग्रंथाग्रं श्लो० ५५८

Folio 22:

श्रीमानदेवसूरींद्रैर्व्याख्यातः पुण्यशालिभिः ।
सूरिप्रभावसुभगः पूर्वं श्रीगौतमाभिधः ॥
इति श्रीअंचलगच्छेश्वरश्रीमेरुतुंगसूरिसमुद्धृतः श्रीकल्पः ॥
इति सूरिमंत्रविशेषाम्नायः ॥ संवत् १४९६लिखितः ॥

**Commentary** on the **Surimantra** by JINAPRABHASŪRI [सूरिमंत्रप्रदेशविवरणम् । जिनप्रभसूरिः].

Folio 32:

इति श्रीसूरिमंत्रस्याम्नायलेशं विदृब्धवान् ।
दृष्ट्वा पुराणकल्पेभ्यः श्रीजिनप्रभसूरिराट् ॥
श्रीजिनप्रभसूरिसमुद्धृतः श्रीसूरिविद्याकल्पः ।

Folio 40:

मतांतरेण पदसंख्या समाप्ता ॥

रेवती १ रोहिणी २ नागार्जुन ३ आर्यखपुटाचार्य ४ यशोभद्राचार्य ५ इति नामानः सूरय एते मंत्रसिद्धयः । मिथ्या मे दुःकृतं चास्तु शुद्धमशुद्धं कल्पयतः । यतो भगवत्कालेप्येकादश गणधरा नव नव गणा हि । अनेकविधा जिनशासने । अनेकधा वाचनाः । इति परिभाव्यास्य कल्पस्यांते स्वनाम न निगदितं किंचित्तत्त्वं तत्त्वविदो जानंति । अंगविद्यामध्ये महाविशेषोस्ति । आलंबनमात्रमेतत्क्षम्यतां २ सूरिवराः । प्रवर्त्ततां जैनो धर्मः अतिशयेन मंत्रस्येष्टांशं जानंतु भूतभविष्यद्वर्त्तमानसूरयः प्रसन्ना भवंतु सिद्धयंतु ॥

**Surimantrakalpadurgapadavivarana** [सूरिमंत्रकल्पदुर्गपदविवरणम्].

Folio 45:

मिथ्यात्वदेवताधिष्ठितचैत्यश्रुततपःसंघसमुद्धरणं महाकाले सिद्धसेनदिवाकरवत् । बोटिकाधिष्ठितरैवतवत् । न्यायचक्रवालग्रंथे धर्मकीर्त्तिबौद्धाधिष्ठितवत् । अनशने उपोषितरात्रिभोजनदर्शनं चतु-

र्वणश्रीसंघस्य शाकिन्यादिक्षुद्रोपद्रवनाशनता योगिपाषंडासंक्रमकरणं । आसां मंत्राक्षरे ॥

Folio 47 :

श्रीदेवाचार्यगच्छसमुद्भूतसूरिशिष्यलवेन रचितं विद्याकल्पसंग्रहे दुर्गपदविवरणं समाप्तमिति ॥

**Kamasamuhamahakavyaprabandha** by ANANTA [कामसमूहमहाकाव्यप्रबन्धः । अनन्तः].

॥ ६० नमो श्रीगणेशाय ॥ श्रीसरस्वत्यै नमः ॥

इदानीं कामसमूहो नाम काव्यप्रबंधो लिख्यते । तत्र पूर्वं इष्टदेवतावर्णननमस्कारमाह ।

सकलभुवनमध्ये दीव्यते देवताभिः
सकलभयहरो यः पूज्यते दानवेंद्रैः ।
अहिनरगणवृंदैः सेव्यते विघ्नराजः
स जयति रिपुहर्त्ता सर्वजाड्योपहर्त्ता ॥ १

यस्याः प्रसादेन महामतीनां
समागतायां[1] कविराजितायां ।
अर्थाः स्वयं किंकरतां भजंते
सा भारती नः श्रियमातनोतु ॥ २

लंबोदर तव ना रदमादरतो यो न पूजयति ।
स भवति विश्वामित्रो दूर्वासा गौतमश्चेति ॥ ३

प्रणम्य पूर्वं शिरसा सुपादा-
न्महेश्वसूनोश्च[2] विधेः सुतायाः ।
प्रगृह्य काव्यं सुकविप्रणीतं
विरच्यते काव्यसमूहबंधः ॥ ४

[1] सदा सभायां ? [2] महेशसूनोः ?

भामल्लवंशजाते[1] मंत्रिमंडनसूनुना ।
अनंतेन महाकाव्यप्रबंधो लिख्यते धिया ॥ ५
एषा वै पुस्तिका लोके [2]जननामुपकारिणी ।
प्रसिद्धास्तु सरस्वत्याः प्रसादाच्च गुरोरपि ॥ ६

अथ षड्ऋतुवर्णनं । तत्र तावद्वसंतः ।

ईषद्वसंतविभवेन यथा यथामी
प्रौढिं क्रमेण दिवसाः परिदर्शयंति।
शंके त्रपापरिमलेन तथा तथैता
यामा नवीनवनिता इव संकुचंति ॥ ७

भिंदंतश्चंदनालीः कमलमुकलजां धूलिमुद्धूलयंत-
श्चुबंतश्चूतवीथीः परिमलबहुलान् चंपकान् कंपयंतः ।
आरामाधामसीमातटघटितघटीयंत्रनिर्मुक्तवारा-
धारामाराधयंतः श्रमजलरिपवो यांत्यमी गंधवाहाः ॥ ८
कावेरीतीरभूमिरुहभुजगवधूभुक्तमुक्तावशिष्टः
कर्णाटीचीनपीनस्तनदशनदशालोलनिःस्यंदमंदः ।
लोलल्लाटीललाटालकलुलितलतालास्यलीलाविलोलैः
कष्टं भो दाक्षिणात्यः प्रसरति पवनः पांथकांताकृतांतः ॥९

महीरुहाणां विलसंति पल्लवा
नवा दवाग्निप्रतिमा वने वने ।
असौ [3]वसंतशशिरशनशतो
निवासभूमिं दहति क्रुधादिव ॥ १०

वसंतप्रारंभे चिरविरहखिन्ना सहचरी
यदि प्राणान् मुंचेत्तदपि वधभागी भवति कः ।

---

[1] मामल्लवंशजातेन? [2] जनाना°? [3] वंसतः शिशिरेशनाशतो?

वयो वा स्नेहो वा कुसुमविशिखो वेति विमृशन्
तुही वेति व्यक्तं पिकनिकरझंकारमशृणोत् ॥ ११

किंशुकाः कुसुमिताः किल कांतैः
कूजितैर्मुकुलिताः सहकाराः ।
नागतः प्रियतमः सखि हा मे
का गतिर्मधुरुपागत एषः ॥ १२

बोधयन् पिकरवेण वधूनां
मानसेष्वतिशयालुमनंगं ।
संप्रति प्रियतमस्य वियोगो
का गतिर्मधुरुपागत एषः ॥ १३

नितंबिनीं चुंबति चक्रपद्मं
शुकं पिकं चूतलतांकुरं च ।
भ्रमन्मुदाराममनंगमूर्ति-
र्मंत्रीष्यनंगस्य वसंतराजः ॥ १४

शोणांबरो गौरतनुः पलाशे
पुष्पोत्करं यस्य सुकेशपाशे ।
चूतांकुरानिच्छति कोकिलोपि
चूताश्रयोसौ कथितो वसंतः ॥ १५

वसंतसीतभीतेन कोकिलेन वने रुतं ।
अंतर्जलगताः सर्वे स्तोतुकामा इवोत्थिताः ॥ १६

असौ [1]सुरशुंबितपुष्पकेसरः
प्रसन्नताराधिपमंडलोग्रणी[2] ।

---

[1] पुर° ? [2] °मंडलाग्रणीः ?

वियोगिनी मानभिदातदाकृते
वसंतकालो हनुमानिवागतः॥ १७
कुसुमितसहकारा किंशुकाशोकनागा
विकसितवनमाला मागधी दिव्यगंधा ।
जनयति मदरागं कोकिलाशब्दितं च
प्रवरपुरुषसेव्या वर्त्तते श्रीर्वसंते ॥ १८
ध्यात्वा समस्तगुरुकार्यविधौ समर्थां
श्रीसारदां कविजनस्य मुखे वसंतीं ।
आनंदपूर्णगुरुपादयुगं प्रणम्य
व्याख्यां विधाय सुरभेरवयत्यनंतः ॥ १९

इति श्रीकामसमूहे महाकाव्यप्रबंधे भिषग्मुकटालंकारहारमंत्रि-मंडनसूनोरनंतस्य कृतौ वसंतवर्णने प्रथमोध्यायः ॥

अथ ग्रीष्मवर्णनं ।

वह्निं प्रोषितभर्तृकाहृदि भृशं मंदोपि संदीपय-
न्नंगग्लानिमनंगसंगजनितां संभोगिनीनां हरन् ।
सुस्पर्शश्च वने नयन् परिणतिं जंबूतरूणां फलं
व्यूढप्रौढकदंबपुष्पसुरभिग्रीष्मोत्र वातो ववौ ॥ २०
धारायंत्रतुषारसारकणिकानिर्वारितोष्मोच्चयं
श्रीषंडागुरुधूपचारुरुचिरं हर्म्यं सचंद्रोदयं ।
शय्या पुष्पमयी च चंदनरसः कर्पूरकस्तूरिका-
वासस्वच्छमकंचुकाः प्रियतमा ग्रीष्मे सुखस्यास्पदं ॥ २१
तल्यं ताम्ररसं ताली तिकलं तारकापतिः ।
तालवृंतस्तरंगिण्यो ग्रीष्मे सप्त सुखावहाः ॥ २२

॥ श्रीकाम० कृतौ ग्रीष्मवर्णनं समाप्तं ॥

अथ प्रावृड्वर्णनं ।

वर्षाकाले प्रणाले खलहलमुदकं याति खाले विशाले
चिखिल्ले लिप्सियित्वा षडहडपतितो वड्डुगुड्डो नरेशः ।
चुल्ही गेहस्य मध्ये कुरु २ कुरुते कुर्कुटः खुट्टखुट्टी
शून्यागारेस्य मध्ये घनतररटनं रासभो रारटीति ॥ २३

तरुणीतुरंगतारुण्यतरुणस्तनपातपाः ।
तप्तरसस्तंत्रीवाद्यं वर्षा सप्तसुखावहा ॥ २३

शिखिनि कूजति गर्जति तोयदे
स्फुटति जातिलता कुसुमाकरे ।
अहह पांथ न जीवति ते प्रिया
नभसि मासि न यासि गृहं यदि ॥ २४

किं गतेन यदि सा न जीवति
प्राणति प्रियतमा तथापि किं ।
इत्युदीर्य नवमेघमालिकां
न प्रयाति पथिकः स्वमंदिरं ॥ २५

अतसीपुष्पसंकाशं खं वीक्ष्य जलदागमे ।
ये वियोगेपि जीवंति न तेषां विद्यते भयं ॥ २६

तरुणीवेषो दीपितकामा
विकसितजातीपुष्पसुगंधि ।
उन्नतपीनपयोधरभारा
प्रावृषि तनुते कस्य न हर्षं ॥ २७

आकर्ण्य गर्जितं घोरं जलदानां जलागमे ।
बालावधूतलाजे च सत्रास श्लिष्यति प्रियं ॥ २८

विग्रहेण शयने पराङ्मुखीं
नानुनेतुमबलां स तत्वरे ।
आचकांक्ष घनशब्दविक्लवां
तां विवृत्य विशतीं भुजांतरं ॥ २४
सचापबाणो धृतिभित्सुवेषो
मयूरपिच्छैः कृतसेखरश्रीः ।
विहारशीलो गिरिकंदरांते
श्रीमेघराजो घनकालवर्गः ॥ ३०

॥ इति प्रावृड्वर्णनम् ॥

अथ शरद्वर्णनम् ।

सुस्पर्शाः [1]शालगोपीविकटकुचतटाभोगभागाभिरामाः
प्रोन्मीलत्सप्तपर्णप्रसवपरिमलप्राप्तसौभाग्यभाग्याः ।
केदारोदारवारिप्रसृमरकुमुदांदोलनप्रोद्गलीलाः
पांथस्त्रीणामनिष्टाः प्रियऋतुसुखदाः शारदा वांति वाताः॥ ३१

परिमलमिलितालिर्मालतीपुष्पमाला
सुरभिघृतसहाशं चंदनालेपनं च ।
तुहिनकिरणरस्मिश्चंचला चापि दोला
शरदि सुखविभूतिः कामिनी कामलोला ॥ ३२

॥ इति शरद्वर्णनम् ॥

अथ हेमंतवर्णनम् ।

हेमंते दधिमुग्धसर्पिरशना मांजिष्ठवासोभृतः
काश्मीरद्रवसांद्र[2]दग्धवपुषः [3]खिन्नाचरित्रै रतैः ।

---

[1] शालि ? [2] दिग्ध ? [3] खिन्नाश्च चित्रै° ?

वृत्तोरस्तनकामिनीजनकृताश्लेषा गृहाभ्यंतरे
तांबूलीदलपूगपूरितमुखा धन्याः सुखं शेरते ॥ ३३
तैलं तापनतांबूले तूली ताम्रवती पटी ।
तप्तोदकं तरुण्यस्य[1] शीते सप्त सुखावहाः ॥ ३४
प्रावरणैरंगारैर्निर्वातहर्म्ये कुचोष्मभिः स्त्रीणां ।
धनवद्भिः परिभूतं निपतति सीतं दरिद्रेषु ॥ ३५
उच्छ्वसंतीं हसंतीं वा रमंतीं बाललोचनां ।
हेमंते ये न सेवंते नूनं ते दैवदंडिताः ॥ ३६
धिग्जन्म धिक्च तां विद्यां धिग्गुणान् धिग्यौवनं[2] ।
यांति हेमंतयामिन्यो[3] मृगाक्षालिंगनं विना ॥ ३७
हे हेमंत स्मरिष्यामि त्वय्यतीते गुणद्वयं ।
अयत्नशीतलं वारि निशाश्च सुरतक्षमाः ॥ ३८

॥ इति हेमंतवर्णनम् ॥

अथ शरद्वर्णनम् ।

किंचिदूमान्मुकरयंस्तरसा[4] रसालान्
हेमंतमंतुमदनं मदयन् जनेषु ।
लीलायते न मलयाचलचूतमाला-
दावाति[5] मारुत इतः किल शैशिरोयं ॥ ३९
उन्मणा[6] हिमभयादिव भेजे
सुभ्रुवां कुचमहाचलदुर्गं ।
आह्वयन् युवजनं मुदितात्मा
तेन पंचविशेषोऽविषेवे[7] ॥ ४०

---

[1] तरुण्यश्च ? [2] सुयौवनं ? [3] मृगाक्ष्या ? [4] किंचिदूमान्मुकुलयंस्तरसा ?
[5] स्वावाति ? [6] उन्मना ? [7] ऽपि निषेवे ?

विद्वज्जनसभानंदी मंत्री नारायणात्मजः ।
मंडनस्तस्यं पुत्रेण वर्ण्यते चात्र[1] वोधुना ॥ ४१
॥ इति श्रीषड्ऋतुवर्णनं समाप्तं ॥

इदानीं स्त्रीणां शृंगारविवरणं बाष्पायते तत्र तावद्बाला-वर्णनं ।

संतानकामा किल काचिदंगना
मारस्य बाणैः परिपीडिता सती ।
नक्तं मिथो भर्त्तुरमोघसंगमे
लेभे सुतां निर्जरकन्यकोपमां ॥ ४२
दिने दिने सा परिवर्द्धमाना
लब्धोदया चांद्रमसीव लेखा ।
पुपोष लावण्यमयान्विशेषान्
ज्योत्स्नांतराणीव कलांतराणि ॥ ४३

[2]कीलक्ष्मी स्वयमागता मुररिपोर्देवस्य वक्षःस्थलात्
कोपात्पत्युरुतावतारमकरोद्देवी भवानी भुवि ।
श्यामांभोजसुदक्षपक्ष्मलचलन्नेत्रामिमां पश्यतो
धातस्तात करोषि किं न वदने चक्षुःसहस्रं मम ॥ ४४

मंदाकिनीसैकतवेदिकाभिः
सा कंदुकैः कृत्रिमपुत्रकैश्च ।
रेमे मुहुर्मध्यगता सखीनां
क्रीडारसं निर्विशतीव बाल्ये ॥ ४५

असंभृतं मंडनमंगयष्टे
रसान्नवाक्षं करणं मदस्य ।

---

[1] चाटवो? [2] किं लक्ष्मीः?

कामस्य पुष्पव्यतिरिक्तमस्त्रं
बाल्यात्परं सापि वयः प्रपेदे ॥ ४६

इंदोः सुंदर्यमीशं[1] कलयति कमलस्पर्द्धिनं[2] नेत्रपत्रे-
कालिंद्याः कुंतलाली तुलयति विभवं भव्यभंगे स्वरंगैः[3] ।
तस्याः किं श्लाघ्यतेऽन्[4] सुभगगुणनिधेः कापि पूर्वं वयस्याः
पुष्पेषोर्वैजयंती जयति युवमनोन्मानिनी यौवनश्रीः ॥४७

दृशा दग्धं मनसिजं दृशैव जीवयंति याः ।
महेश्वरस्य जयिनीस्तास्तुवे वामलोचनाः ॥ ४८

मंडमतनयोनंतो मन्मथरूपसकलशास्त्रज्ञः ।
अभिमतदाता रचयति रूवं[5] बाल्यावि[6]वस्थायाः ॥ ४९

इति श्रीकामसमूहमहाकाव्यप्रबंधे भिषग्मुकारहारमंत्रिमंडनसू-
नोरनंतस्य कृतौ बाल्यावस्थावर्णने द्वितीयोध्यायः ॥

अधुना बाल्यादनंतरं यौवनस्य केशाग्रादारभ्य नखाग्रं यावद्व-
र्णनमारभ्यते ॥

Darsanasara by BHAṬṬÁRAKADEVASENA [दर्शनसारः । भट्टारक-देवसेनः ].

पणमीय वीरजिणिंद[7] सुरसेणनमंसियं विमलणाणं ।
वोच्छं दंसणसारं जह कहियं [8]पुव्वरीहिं ॥ १

भरहे [9]तित्थराणं पणवियदेविंदणागगरुडाणं ।
समएसु होंति केइ मिच्छत्तपवड्ढणा जीवा ॥ २

---

[1] °मीषत्? [2] °स्पर्द्धिनी? [3] °गैस्त०? [4] °तेन्यत्? [5] रूपं? [6] °ल्याद्यव°? [7] जिर्णिदं. [8] पुव्वसूरीहिं. [9] तित्थयराणं.

उसहजिणपुत्तपुत्तो मिच्छत्तकलंकितो महामोहो ।
सव्वेसिं भट्टाणं धुरि गणिउ पुव्वसूरीहिं ॥ ३
तेण य [1]कायाविचित्तं दंसणरूवं सजुत्ति संकलियं ।
तम्हा इयराण पुण समए तह णिव्वुढिगयं ॥ ४
एयत्तं संसइयं विवरीयं विणयजं महामोहं ।
अण्णाणं मिच्छत्तं णिदिट्ठं सव्वदरीसेहिं ॥ ५
सिरिपासणाहतित्थे सरऊ तीरे पलासणयरत्थे ।
पिहिआसवस्स सीहे महालुदो बुद्धिकित्तिमुणी ॥ ६
तिमिपूरणासणेया अगहियपज्जावऊ परमभट्ठे ।
रत्तंबरं धरित्ता पवट्टियं तेण एयत्तं ॥ ७
मंसस्स नत्थि जीवो जहा फले दहियदुद्धसक्करए ।
तह्मा तं मुणित्ता भक्खंतो णत्थि पाविट्ठो ॥ ८
मज्जं ण वज्जणीजं दव्वदव्वं जह जलं तह एदं ।
इदि लोए घोरीता पवत्तियं संघसावज्जं ॥ ९
अण्णो करेदि कम्मं अण्णो तं भुंजदीदि सिद्धंतं ।
परिकप्पिऊण णूणं वसिकिच्चा णिरयगुवपणे ॥ १०
छत्तीसे वरिससए विक्कमरायस्स मरणपत्तस्स ।
सोरहे [2]वली सेवडसंघो समुप्पण्णो ॥ ११
सिरिभद्दबाहुगणिणो सीसो णामेण संतिआयरिउ ।
तस्स य सीसो दुट्ठो जिणचंदो मंदचारित्तो ॥ १२
तेण कियं मदमेदं इत्थीणं अत्थि तब्भवे मोक्खो ।
केवलणाणीण पुणो भुंजकाणं तहा रोऊ ॥ १३

[1] क्रीयाविचित्तं. [2] वलहीए.

अंबरसहिऊवि जइ सिज्झइ वीरस्स गब्भचारित्तं ।
परलिंगेवि य मती पासुयभोजं च सव्वत्थ ॥ १४

अण्णं च एवमाई आममउद्दाइ मिट्ठसत्थाइं ।
विरइत्ता इप्पाणं पडिट्ठवियं पढमए णिरए ॥ १५

सुव्वयतित्थे उज्झारवीरकदंबोत्ति सुद्धसंमत्तो ।
सीसो तस्स य दुट्ठो पुत्तोवि पाइऊ वक्को ॥ १६

विवरीयमयं किच्चा विणासियं सव्वसंजमं लोए ।
तत्तो पत्ता सव्वे सत्तमणरयं महाघोरं ॥ १७

सव्वेसु य तित्थेसु य वेणइयणं समुब्भऊ अत्थि ।
सजडा मुंडा सीसा सिहिणो णणायके इह ण ॥ १८

दुट्ठे दुणगवंते य समया भत्ती य सव्वदेवाणं ।
णमणं दंडुव्व जणे परिकलियं तेहि मूढेहिं ॥ १९

सिरिवीरनाहतित्थे बहुस्सुदो पाससंघगणिसीसे ।
मक्कडिपूरणसाहू अण्णी णसियं लोए ॥ २०

अण्णाणादो मोक्खो णाणं णत्थित्ति मुत्तजीवाणं ।
पुनरागमणं भमणं भत्तिभविणत्थिति जीवस्स ॥ २१

एको सुद्धो बुद्धो कत्ता जीवस्स जीवलोयस्स ।
सुण्णज्झाणं वण्णाचरणं परिसिक्कियं तेण ॥ २२

जिणमग्गबाहिरं जं तत्तं संदरसिऊण पावमणो ।
णिच्चणिगोयं पत्तो सत्तो मज्जेसु विविहेसु ॥ २३

सिरिपुंज्जपादसीसो दाविडसंघस्स कारगो दुट्ठो ।
णामेण वज्जणंदीं पाहुडवेदी महासत्थो ॥ २४

अप्पासुयचणयाण भक्खणदो वज्जिदो मुणिंदेहिं ।
परिरयियं वियरीदं ससियवग्गण चोज्जं ॥ २५

विज्जेसु णत्थि जीवो उब्भसणं णत्थि फासुगं णत्थि ।
सावज्जं णहु मण्णइ ण गण्णइ गिहकप्पियं अट्ठं ॥ २६

कच्छं खित्तं वसहिं वाणिज्जं कारिऊण जीवंते ।
एहंतो सीयलणीरे पावं पउरं समज्जेदि ॥ २७

पंचसए छवीसे विक्कमरायस्स मरणपत्तस्स ।
दक्खिणमहुराजादो दाविडसंघो महामोहो । २८

कल्लाणे नरणयरे दुणिसये पंचउत्तरे जादो ।
जाउलियसंघभेऊ सिरिकलसा दो हु सेवड दो । २९

सिरिवीरसेणसीसो जिणसण्णो सयलसत्थविन्नाणी ।
सिरिपउमनंदि पच्छा चउसंघसमुद्धरो धीरो ॥ ३०

तस्स य सीसो गुणवं गुणभेइोहिव्वणाणपरिपुण्णो ।
परकव्वसयहमदी महातवो भावलिंगो य ॥ ३१

तेणप्पणोवि मच्चुं णाऊण मुणिस्स विणयसेणस्स ।
सिद्धंते घोसित्ता सयं गयं सग्गलोयस्स ॥ ३२

आसी कुमरसेणो णंदियरे विणयसेणमुणिसीसे ।
सण्णासभंजनेन य अगहियपुणुदिक्कऊ जादो ॥ ३३

परिवज्जिऊण पिच्छं चमरं घित्तूण मोहकलिदेण ।
उमग्गं संकलियं वागडविसएसु सव्वेसु ॥ ३४

इत्थीणं पुण दिक्का खुल्लयलोमस्स वीरचरियत्तं ।
कक्कसकेसग्गहणं छट्ठं गुणव्वदं णाम ॥ ३५

आयमसत्थपुराण पयच्छितं च अणहा किंपि ।
थिरइत्तामिच्छत्तं पवत्थियं मूढलोएसु ॥ ३६
सो सवणसंघबज्झो कुमारसेणो हु समयमिच्छत्तो ।
चत्तोवसमो रुद्दो कट्ठं संघं पवत्तवेदि ॥ ३७
सत्तसये तेवण्णे विक्कमरायस्स मरणपत्तस्स ।
णंदियडेवरगामे कट्ठो संघो मुणेयव्वो ॥ ३८
णंदियडेवरगामे कुमारसेणो हि णाम पव्वइऊ ।
कट्ठो दंसणभट्ठो जाउ सल्लहणाकाले ॥ ३९
ततो दुसएतीदे महुराये माहुराण गुरू णाहो ।
णामेण रामसेणो णिप्पिच्छियं च णियतेण ॥ ४०
सत्तमपयडिमिच्छं कहियं जं जिणिंदविंवेवासु ।
अप्पपरणि दुए सुय मम्मत्तबुद्धीए परिवसिणं ॥ ४१
एसो मम होइ गुरू अवरो णत्थित्ति चित्तपरियरणं ।
सगगुरुकूलाहिमाणे इयरेसु विभंगकरणं च ॥ ४२
जइ पउमणंदिणाहो सीमंधरसामिदिव्वणाणेण ।
ण विवोहइ तो समणो कहं सुमग्गं पयाणंति ॥ ४३
भूतबलिपुप्फयंता दाक्खिणदेशे [1]तहुत्तर धम्म ।
जं भासंति मुणिंदा [2]तत्तचं णिव्वियप्पेण ॥ ४४
दक्खिणदेशे विंझोपकूलये वीरचंदमुणिणामे ।
[3]अहारससए तीसे भिल्लियसंघं पत्तदेहिं ॥ ४५
सो णियसंघं किच्चा पडिक्कमणं तहय भिन्नकिरियाउ ।
वण्णाचारविवाइ जिणमग्गं स हु णिहणेदि ॥ ४६

---

[1] तहुत्तरे धम्मं? [2] तत्तचं? [3] अहारससये?

तत्तोवि कोवि भणिऊ गुरुगणहरपुंगवेहि मिच्छत्तं ।
पंचमकालवसाणे [1]सिच्छन्ताणं विणासो हि ॥ ४७
एक्को च्चिय मूलगुणो वीरंगजणामऊ जइ होइं ।
सो अप्पसुदोवि परं वीरोव्वयणंपवो होइ ॥ ४८
पुव्वापरियकयाइं अंगा होइं संचिऊण येयत्था ।
सिरिदेवसेणमुणिणा [2]धाराए वंवंसे तेण ॥ ४९
रइऊ दंसणसारो भव्वाण णवस्सए णउए ।
सिरिपासणाहगेहे सुपवित्ते माहसुद्धदसमीए ॥ ५०
रूसउ तूसउ लोऊ [3]सचं अरकंतयस्स साहुस्स ।
किं जूयं भए साजं विवज्जिय वानरेंद्रेण ॥ ५१

इति भट्टारकदेवसेणकृतो दर्शनसारः समाप्तः ॥

---

[1] सिद्धन्ताणं ? [2] धाराए संवसंतेण ? [3] सचं ?

# APPENDIX III.

## LIST OF MANUSCRIPTS ACQUIRED FOR GOVERNMENT.

# LIST OF MSS. ACQUIRED FOR GOVERNMENT.

| नंबर. | ग्रन्थनाम. | कर्ता. | पत्राणि. | पंक्तयः. | अक्षराणि. | संवत्. | अपूर्णादिवाच्यम्. |
|---|---|---|---|---|---|---|---|
| | **साङ्गोपनिषदो वेदाः ।** | | | | | | |
| १ | अथर्वगृह्यपद्धतिः..... | वासुदेवः ... | ५२ | ९ | ३८ | १५९५ | अध्यायद्वयस्य. |
| २ | अथर्वचतुरध्यायिका ..... | ..... | ८ | ८ | ३० | ... | |
| ३ | अथर्वच्छन्दः ..... ..... | ..... | २ | ९ | २५ | ... | |
| ४ | परिशिष्टानि ..... | ..... | ५० | ८ | २६ | १४७१ | |
| | | | १५ | १० | २६ | १५३९ | |
| ५ | अथर्वपूर्वोत्तरतन्त्रम्..... | ..... | १७ | ७ | २१ | १७६६ | |
| ६ | अथर्वप्रातिशाख्यसूत्रम् ..... | ..... | ८ | ७ | १८ | ... | |
| ७ | अथर्वप्रातिशाख्यभाष्यम्..... | ..... | ३७ | १० | ३४ | ... | नवीनम्. |
| ८ | अथर्ववृहत्सर्वानुक्रमणिका ... | ..... | ८८ | १० | ३१ | ... | पटलानि ९. |
| ९ | सैव ..... ..... | ..... | ३३ | ८ | ३२ | ... | पटलानि ४. |
| १० | देव्या अथर्वशीर्षम् ..... | ..... | ६ | ८ | २० | ... | |
| ११ | आथर्वसंस्काराः ..... | ..... | ३४ | १३ | ३२ | ... | अपूर्णाः. |
| १२ | अथर्वसंहिता ..... | ..... | ४८२ | ९ | २५ | १७१९ | |
| १३ | तस्याः पदानि..... | ..... | ४२१ | ९ | ३० | १७६६ | |
| १४ | अथर्वसंहताविधेर्विवरणम् ... | कौशिकः ... | १७४ | ११ | ४० | १६८० | किञ्चिदूनम्. |
| १५ | उपनिषदः—ईशावास्योपनिषद् | ..... | ४२ | ९ | २८ | ... | |
| | केनोपनिषद्. | | | | | | |
| | कठवल्ल्युपनिषद्. | | | | | | |
| | प्रश्नोपनिषद्. | | | | | | |
| | मुण्डकोपनिषद्. | | | | | | |
| | माण्डूक्योपनिषद्. | | | | | | |
| | ऐतरीयोपनिषद्. | | | | | | |
| | तैत्तिरीयोपनिषद्. | | | | | | |
| १६ | ऋग्वेदसंहिता..... ..... | ..... | ४१० | १२ | ३२ | ... | |
| १७ | तस्याः पदपाठः ..... | ..... | ४८७ | ८ | २८ | ... | चतुर्थाष्टकपदपर्यन्तः. |
| १८ | काण्वसंहिता वृ० ..... | ..... | ६३ | ८ | ३७ | ... | |
| १९ | तस्या भाष्यम् अ० ८ ..... .. | अनन्तदेवः | ११६ | ११ | ३६ | ... | अ० ३२-४० |
| २० | कात्यायनीयगृह्यसूत्रम् ..... | ..... | २४ | ७ | २४ | ... | काण्डः १ |

| नंबर. | ग्रन्थनाम. | कर्ता. | पत्राणि. | पंक्तयः. | अक्षराणि. | संवत्. | अपूर्णादिवाच्यम्. |
|---|---|---|---|---|---|---|---|
| २१ | तस्य भाष्यम् ..... | गदाधरः-वामनात्मजः | ८६ | २१ | ५६ | १७७३ | काण्डौ. |
| २२ | कात्यायनीयपरिशिष्टान्तर्गतमूल्याध्यायस्तद्भाष्यं च. | भा० गोपालः | ४ | १३ | ४८ | ... | |
| २३ | तदेव भाष्यम् ..... | स एव ..... | ४ | ११ | ४८ | १८१४ | |
| २४ | कौशिकीयकल्पव्याख्या ..... | ..... | ५५ | १५ | ४५ | १५६४ | |
| २५ | कालाग्निरुद्रोपनिषद्-नन्दिकेश्वरपुराणोक्ता. | ..... .. | ६ | १० | २८ | ... | |
| २६ | सर्वानुक्रमणिका ..... | कात्यायनः | ४३ | ८ | २७ | ... | |
| २७ | अनुवाकसंख्या ..... | ..... | ९ | ६ | २४ | ... | |
| २८ | ईशावास्यभाष्यम् ..... | शंकराचार्यः | ५ | १६ | ४० | ... | |
| २९ | उपनिषदः ..... | ..... | १५ | ११ | ३२ | ... | |
| | गारुडोपनिषद्<br>कालाग्निरुद्रोपनिषद्<br>रामपूर्वतापनीयोपनिषद्<br>मृत्युलाङ्गूलोपनिषद्<br>हनुमदुपनिषद्<br>रामोपनिषद्<br>योगराजोपनिषद्<br>ब्रह्मविद्योपनिषद्<br>नादबिन्दूपनिषद्<br>ध्यानबिन्दूपनिषद्<br>तेजोबिन्दूपनिषद्<br>योगतत्त्वोपनिषद्<br>नारायणोपनिषद्<br>नीलरुद्रोपनिषद्<br>पिण्डोपनिषद् | | | | | | | |
| ३० | उपनिषदः ..... | ..... | १८ | ८ | ३१ | ... | |
| | वासुदेवोपनिषद्<br>गोपीचन्दनोपनिषद्<br>हनुमदुपनिषद्.<br>रामोपनिषद्.<br>योगराजोपनिषद्.<br>महोपनिषद्.<br>मृत्युलाङ्गूलोपनिषद्.<br>कृष्णोपनिषद्-श्लोकबद्धा. | | | | | | |

| नंबर. | ग्रन्थनाम. | कर्ता. | पत्राणि. | पंक्तयः | अक्षराणि. | संवत्. | अपूर्णादिवाच्यम्. |
|---|---|---|---|---|---|---|---|
| ३१ | गर्गपद्धतिः | ..... | ६६ | १० | ३८ | ... | ..... |
| ३२ | गलितपदसीपिकाभाष्यम्-श्लोकबद्धम्. | लक्ष्मीधरः | ९ | १० | ४० | ... | नवीनम्. |
| ३३ | गृह्यतात्पर्यदर्शनम् | सुदर्शनाचार्यः | ११६ | १० | ४० | ... | नवीनम्. |
| ३४ | गृह्यसूत्रम् | पारस्करः | २९ | ११ | ३२ | ... | |
| ३५ | तदेव | स एव | ९५ | ७ | ३२ | ... | |
| ३६ | गोपथब्राह्मणम् | ..... | २१८ | ८ | ३३ | ... | |
| ३७ | तदेव पूर्वार्द्धम् | ..... | ७८ | ८ | ३२ | ... | |
| ३८ | गोभिलीयश्राद्धकल्पभाष्यम् | तार्किकभट्टशिष्यः | ६० | १० | ३२ | ... | अपूर्णम्. |
| ३९ | चरणव्यूहः | ..... | ६ | ९ | २० | १७२१ | |
| ४० | छान्दोग्योपनिषद् | ..... | ७२ | ९ | २८ | ... | |
| ४१ | निरुक्तम् | ..... | १७० | ८ | ३२ | ... | |
| ४२ | नीतिमञ्जरीभाष्यम् | द्याद्विवेदी | १३४ | १० | ४० | ... | नवीनम्. |
| ४३ | नैगेयानामृक्षु दैवतम् | ..... | २१ | ८ | ३६ | ... | |
| ४४ | पदार्थादर्शः | ..... | ४६ | ११ | ४८ | ... | नवीनम्. |
| ४५ | प्रतीहारभाष्यम् | वरदराजः | ९९ | १० | ४८ | ... | नवीनम्. |
| ४६ | बृहदारण्योपनिषद् | ..... | ७५ | ९ | ३० | ... | |
| ४७ | पुरुषसूक्तं सटीकम् | ..... | ८ | १० | ३७ | ... | |
| ४८ | भूनीलापञ्चसूक्तम् | ..... | ७ | ९ | २० | ... | |
| ४९ | मण्डलब्राह्मणम् | ..... | ११ | ६ | २० | ... | |
| ५० | मौनसूत्रम् | ..... | १४ | १० | ४० | ... | नवीनम्. |
| ५१ | रात्रिसूक्तं सटीकम् | ..... | ९ | ८ | ४० | ... | |
| ५२ | रामोत्तरतापिन्युपनिषद् | ..... | ७ | ९ | २७ | ... | |
| ५३ | रुद्रमन्त्रस्य टीका | ..... | ४० | १४ | २४ | ... | |
| ५४ | रुद्राध्यायो मैत्रायणीयस्थ | ..... | १४ | ८ | ३९ | ... | |
| ५५ | लघुरुन्यासः | ..... | ९ | ९ | २६ | ... | |
| ५६ | लाट्यायनसूत्रम् | ..... | ९६ | ९ | ३३ | ... | |
| ५७ | वंशब्राह्मणम् | ..... | ३ | ९ | ३१ | १९९१ | |
| ५८ | तदेव | ..... | १४ | ६ | ३६ | ... | |
| ५९ | वज्रशूच्युपनिषद् | ..... | ११ | १० | २८ | ... | |
| ६० | सैव | शंकराचार्यः | ३ | १३ | ३३ | ... | |
| ६१ | वाजसनेयिसंहिता | ..... | २७२ | ७ | २७ | ... | |
| ६२ | वैतानसूत्रम् | ..... | ३८ | ९ | ४० | १९६९ | अष्टाध्यायाः |
| ६३ | तदेव | ..... | ३३ | १० | ३२ | ... | नवमाध्यायात्सम्पूर्णम्. |

| नंबर. | ग्रन्थनाम. | कर्ता. | पत्राणि. | पंक्तयः | अक्षराणि. | संवत्. | अपूर्णादिवाच्यम्. |
|---|---|---|---|---|---|---|---|
| ६४ | तस्य भाष्यम् ..... | ..... | ५० | १७ | ३० | ... | द्वितीयाध्यायादष्टमाध्यायपर्यन्तम्. |
| ६५ | शतपथब्राह्मणम् ..... | ..... | १०६५ | ९ | ३२ | ... | |
| ६६ | शान्तिभाष्यम्..... | वेदमिश्रः ... | ८ | १२ | ३५ | ... | त्रुटितम्. |
| ६७ | शान्तिसूक्तम्..... | ..... | ४ | ११ | ३२ | ... | |
| ६८ | शिक्षादिचतुष्टयम् ..... | ..... | २८ | ८ | २६ | ... | |
| ६९ | शिक्षा ..... | मण्डूकः ... | ३५ | ९ | ३१ | ... | |
| | ज्योतिः | | | | | | |
| ७० | शुक्लयजुर्ब्राह्मणम् ..... | ..... | १२ | ५ | १६ | ... | |
| ७१ | श्रौतसूत्रम्... ..... | ..... | १८ | १६ | १७ | ... | |
| ७२ | सर्वानुक्रमः..... | ..... | ३४ | ९ | ३४ | १७६३ | |
| ७३ | सांखायनगृह्यसूत्रम्..... | ..... | ४५ | ८ | २४ | १७३६ | प्रथमपत्राभावः. |
| ७४ | सांखायनारण्यकम् ..... | ..... | ३३ | १० | ३६ | १७४२ | |
| ७५ | सौरसूक्तम् ..... | ..... | ४ | १० | ३० | ... | प्रथमपत्राभावः. |
| ७६ | सूर्योपनिषद् ..... | ..... | ६ | ८ | १४ | ... | |
| ७७ | सूर्योपनिषद्देव्युपनिषच्च ..... | ..... | ६ | ७ | २७ | ... | |
| ७८ | हौत्रम् ..... | ..... | १० | ९ | २४ | ... | |
| ७९ | हौत्रमञ्जरी..... | जगन्नाथदीक्षितः | ४८ | ११ | ४६ | ... | नवीनम्. |
| | **धर्मशास्त्रम्.** | | | | | | |
| ८० | अङ्गिरास्मृतिः ..... | ..... | ४ | ८ | ४८ | ... | |
| ८१ | अङ्गिराबृहत्स्मृतिः ..... | ..... | ८ | ८ | ४० | ... | |
| ८२ | अश्वदानपद्धतिः ..... | ..... | ९ | १२ | २४ | १९०३ | |
| ८३ | आचारदीपकः ..... | नागदेवः ... | ११२ | ९ | २५ | ... | |
| ८४ | आचारप्रदीपाह्निकम् ..... | कमलाकरः. | ७८ | १२ | ३३ | १७८५ | |
| ८५ | आपस्तम्बस्मृतिः..... | ..... | ८ | ९ | ५२ | ... | |
| ८६ | आशौचत्रिंशती सटीका ..... | टी० आचार्यभट्टः | २० | १२ | ३४ | ... | २०।२१।२२ पत्राणि न सन्ति. |
| ८७ | आश्वलायनस्मृतिः ..... | ..... | ३३ | ११ | ४४ | १८८१ | |
| ८८ | आह्निकपद्धतिः ..... | शिवरामः ... | ७ | १५ | ४८ | १८३९ | |
| ८९ | उत्तरक्रियापद्धतिः ..... | याज्ञिकदेवः | २७ | ११ | ३८ | १६७२ | |
| ९० | एकादशीव्रतनिर्णयः ..... | देवकीनन्दनः | ११ | १० | ३० | १६८८ | |
| ९१ | औशनसस्मृतिः प्रथमाध्यायः. | ..... | ३ | ९ | ४० | ... | |

| नंबर. | ग्रन्थनाम. | कर्ता. | पत्राणि. | पंक्तयः | अक्षराणि. | संवत्. | अपूर्णादिवाच्यम्. |
|---|---|---|---|---|---|---|---|
| ९२ | कात्यायनसूत्रपद्धतिः ..... | याज्ञिकश्रीदेवः | ६४ | ११ | २४ | १७८१ | |
| ९३ | सैव ..... | स एव ..... | ४८ | १२ | ४१ | १६२५ | प्रारम्भेऽध्यायद्वयं नास्ति. |
| ९४ | कालचन्द्रिका ..... | कृष्णभट्टः ... | ३४ | ११ | ३२ | ... | |
| ९५ | कालनिर्णयः सटीकः ..... | मू० माधवाचार्यः | १२ | १२ | ४० | १६५२ | |
| ९६ | कालनिर्णयप्रकाशः..... | रामचन्द्रभट्टः | १८८ | १० | ३८ | १८२१ | |
| ९७ | कुण्डाकृतिः ..... | रामः..... | १९ | १० | ३२ | ... | |
| ९८ | कृत्यरत्नावलिः ..... | रामचन्द्रभट्टः | १३९ | ८ | ३४ | ... | पत्रद्वयाभावः १०५।१०६. |
| ९९ | क्रियापद्धतिः सामवेदिनाम् ... | ..... | ६३ | ९ | २६ | ... | |
| १०० | गायत्रीपद्धतिः ..... | विश्वामित्रः | २९ | ६ | १८ | ... | |
| १०१ | गृह्यकारिका ..... | ..... | १७ | ८ | १९ | १६९५ | |
| १०२ | गृह्यपद्धतिः ..... | वासुदेवः ... | ८७ | ९ | २२ | १४५८ | चतुःसप्ततिपत्रादारभ्याष्टौ पत्राणि न सन्ति. |
| १०३ | गृह्यप्रकीर्णकम् ..... | ..... | ३० | ६ | २० | ... | |
| १०४ | जयन्तीनिर्णयः ..... | ..... | ११ | १३ | २० | १८६८ | |
| १०५ | जातककर्मपद्धतिः ..... | दामोदरः ... | ९ | १० | २८ | ... | अपूर्णा. |
| १०६ | ज्येष्ठाविधानम् ..... | ..... | ५ | ८ | १९ | ... | |
| १०७ | तिथिनिर्णयोद्धारः ... ..... | राघवभट्टः ... | १६ | १२ | २६ | १८७४ | |
| १०८ | तिथिप्रदीपिका ..... | रामसेवकः... | ५ | ७ | २६ | १८७७ | |
| १०९ | दक्षस्मृतिः ..... | ..... | ८ | ८ | ४५ | १८८१ | |
| ११० | दर्शश्राद्धविधिः ..... | ..... .. | १७ | १४ | २४ | ... | |
| १११ | दानखण्डः..... ..... | हेमाद्रिः..... | ३०१ | १२ | ४० | ... | अपूर्णः |
| ११२ | दानपञ्जिका ..... | रत्नाकरठक्कुरः | ३६ | १० | ५० | १६६१ | |
| ११३ | दानपद्धतिः..... | ..... ... | २३४ | १६ | ३८ | ... | अपूर्णा. |
| ११४ | दानरत्नाकरः ..... | चण्डीश्वरः. | ८२ | २० | ३५ | १७८४ | |
| ११५ | देवलस्मृतिः..... | ..... | ५ | ८ | ४२ | ... | |
| ११६ | धर्मशास्त्रोद्धृतवचनानि ..... | ..... | २२ | १० | २२ | ... | |
| ११७ | धर्मशास्त्रनिबन्धः ..... | फकीरचन्द्रः | २८ | ९ | ३० | ... | |
| ११८ | धर्मप्रवृत्तिः..... .... ..... | नारायणभट्टः | १७० | ११ | ३२ | १८४५ | |
| ११९ | नित्यकर्मपद्धतिः..... ..... | श्रीधराचार्यः | २५ | १० | ३२ | १४३४ | त्रुटिता. |
| १२० | नित्यपद्धतिः ..... | रामानुजाचार्यः | १० | १४ | २२ | .. | |

| नंबर. | ग्रन्थनाम. | कर्ता. | पत्राणि. | पंक्तयः | अक्षराणि. | संवत्. | अपूर्णादिवाच्यम्. |
|---|---|---|---|---|---|---|---|
| १२१ | सैव ... ..... | श्रीधरः ..... | ८१ | १२ | ३० | १५८४ | प्रथमपत्रं नास्ति. |
| १२२ | नित्यविधिः ..... | ..... | १३ | ८ | २० | ... | |
| १२३ | निबन्धसारः ..... | वच्छियः ... | ३२९ | ११ | ४२ | १६३२ | प्रारम्भे १८९ पत्राणि न सन्ति. |
| १२४ | नीलोद्वाहपद्धतिः ..... | ..... | २० | ९ | ३२ | ... | |
| १२५ | पुत्तलविधानम् ..... | वाल्म्यः ..... | ३ | ९ | ३० | ... | |
| १२६ | पृथ्वीप्रेमोदयः ..... | प्रेमानिधिशर्मा | १८ | ११ | ४८ | ... | अपूर्णः |
| १२७ | प्रयोगरत्नम् ..... | नारायणः ... | ४२ | ९ | ३३ | १५२८ | अपूर्णम्. |
| १२८ | बहूचश्राद्धप्रयोगः ..... | ..... | १७ | १० | ३० | ... | |
| १२९ | बृहस्पतिसंहिता ..... | ..... | १९३ | ६ | २२ | ... | अपूर्णा. |
| १३० | बृहस्पतिस्मृतिः ..... | ..... | ४ | ८ | ४० | ... | |
| १३१ | भक्तिसिद्धान्तवृत्तिः ..... | गोकुलनाथः | १४ | ८ | २५ | १८११ | |
| १३२ | भोजनविधिः ..... | ..... | ३ | ८ | २४ | ... | |
| १३३ | मदनपारिजातः ..... | ..... | ३०७ | ११ | ४० | १६८३ | २०२ पत्रादारभ्य ५६ पत्राणि न सन्ति. |
| १३४ | मधुपर्कनिर्णयः ..... | ..... | १८ | १७ | २२ | ... | आरम्भे पत्रद्वयं नास्ति. |
| १३५ | महारुद्रजपविधिः ..... | ..... | २३ | ९ | २४ | १७५६ | |
| १३६ | महारुद्रपद्धतिः ..... | ..... | २० | १० | ३२ | १७३० | |
| १३७ | महाशान्तिः ..... | ..... ... | १७ | १० | ३७ | १६९६ | |
| १३८ | मृत्युंजयपद्धतिः ..... | ..... | २९ | ९ | ३२ | ... | |
| १३९ | यजुर्विवाहपद्धतिः ..... | ..... | ३४ | ९ | २१ | १५०३ | |
| १४० | यतीन्द्रमतदीपिका ..... | श्रीनिवासः | ३३ | ११ | ४३ | ... | |
| १४१ | यत्याचारसप्तर्षिपूजा ..... | ..... | ९ | १८ | ३९ | ... | |
| १४२ | यमस्मृतिः ..... | ..... | ६ | ९ | ४० | ... | |
| १४३ | याज्ञवल्क्यस्मृतिः मिताक्षरासहिता । व्यवहाराध्यायः. | ..... ... | १४१ | १० | ४८ | ... | |
| १४४ | रत्नदीपविधिप्रकाशः ..... ..... | ..... | ९१ | १० | ४० | ... | |
| १४५ | रामनिबन्धः .. ..... | क्षेमरामः ... | ६१ | १२ | ३२ | १८४४ | |
| १४६ | रामपद्धतिः ..... | रामानुजाचार्यः | १६ | ११ | ३२ | १८६७ | |
| १४७ | रुद्रीकल्पः ..... ..... | ..... | ७ | १० | १४ | १७७१ | |

| नंबर. | ग्रन्थनाम. | कर्ता. | पत्राणि. | पंक्तयः | अक्षराणि. | संवत्. | अपूर्णादिवाच्यम्. |
|---|---|---|---|---|---|---|---|
| १४८ | लघुपाराशरस्मृतिः ..... | ..... | २४ | ८ | ५० | १८८१ | |
| १४९ | लिङ्गप्रतिष्ठा ..... | ..... | ३८ | ८ | २४ | ... | |
| १५० | वाजसनेयिविवाहादिपद्धतिः ... | रामदत्तमन्त्री | ४१ | ९ | ४७ | १७४४ | |
| १५१ | वास्तुपद्धतिः ..... | ..... | ११ | १२ | ३० | १८८९ | |
| १५२ | वासिष्ठी शान्तिः..... ..... | ..... | १८ | ९ | २३ | १५४८ | |
| १५३ | विनियोगमाला ..... | ..... | १३ | १३ | ३२ | ... | आरम्भे काण्डचतुष्टयं नास्ति. |
| १५४ | विवाहतत्त्वम् ..... | रघुनन्दनः... | २३ | १३ | ४८ | ... | |
| १५५ | विष्णुस्मृतिः ..... | ..... | ६ | ८ | ४४ | ... | |
| १५६ | वृद्धशातातपस्मृतिः ..... | ..... | ४ | ८ | ४२ | ... | |
| १५७ | वृद्धहारीतस्मृतिः ..... | ..... | ५९ | १० | ४४ | १८८१ | |
| १५८ | वैश्वदेवः ..... | ..... | ३ | १२ | २४ | ... | |
| १५९ | वैष्णवानामाह्निकम् ..... | वल्लभदासः | ७१ | १० | २६ | ... | |
| १६० | वैष्णवोपयोगिनिर्णयः ..... | ..... | २८ | ८ | ३६ | १७३२ | आरम्भे पत्रद्वयं नास्ति. |
| १६१ | व्यवहारनिर्णयः ..... | मथारामभिश्रः | १७ | ११ | ४२ | ... | |
| १६२ | व्रतकौमुदी ..... | शंकरभट्टः ... | २२१ | ८ | ३२ | १८८७ | |
| १६३ | व्याघ्रस्मृतिः ..... | ..... | १६ | ८ | ५६ | १८८० | |
| १६४ | व्यासस्मृतिः ..... | ..... | ४ | ८ | ४२ | ... | |
| १६५ | शङ्खलिखितस्मृतिः ..... | ..... | २ | ८ | ४४ | ... | |
| १६६ | शङ्खस्मृतिः ..... | ..... | १६ | ८ | ४८ | ... | |
| १६७ | शान्तिकल्पः ..... ... | ..... | १७ | ७ | २८ | १६६८ | |
| १६८ | शान्तिपद्धतिः..... | ..... | ९ | १३ | ३० | १८८७ | |
| १६९ | शुल्बपरिशिष्टम् ..... | ..... | ७ | ९ | ३२ | १६८२ | |
| १७० | शौनकस्मृतिः ..... | ..... | ३१ | ८ | ५२ | ... | |
| १७१ | श्राद्धकल्पपरिशिष्टम् ..... | कात्यायनः | ३ | १२ | ३६ | ... | |
| १७२ | श्राद्धकल्पभाष्यम् ..... | गदाधरः ... | ६३ | १० | २८ | ... | |
| १७३ | श्राद्धोपयोगीनि वचनानि..... | अनन्तभट्टः | ३३ | १० | ४० | १६६८ | |
| १७४ | संध्योपासनविधिः ..... ... | ..... | ३ | १२ | ३२ | ... | |
| १७५ | संन्यासनिर्णयः ..... | पुरुषोत्तमः... | २८ | ९ | ३२ | ... | |
| १७६ | संप्रदायप्रदीपः..... | गदाभट्टः ... | ३३ | ११ | ३६ | ... | प्रथमपत्राभावः |
| १७७ | संवत्सरोत्सवकालनिर्णयः ... | ..... | ४२ | ११ | ३६ | ... | |
| १७८ | स एव ..... | भट्टनिर्भयरामः | २४ | ८ | २८ | १९२५ | |
| १७९ | संवर्तस्मृतिः..... | ..... | १० | ८ | ४८ | ... | |
| १८० | संस्कारप्रदीपः..... | ..... | १० | १४ | ४५ | ... | त्रुटितः. |

| नंबर. | ग्रन्थनाम. | कर्ता. | पत्राणि. | पंक्तयः | अक्षराणि. | संवत्. | अपूर्णादिवाच्यम्. |
|---|---|---|---|---|---|---|---|
| १८१ | संस्कारादिधर्मशास्त्रम् ..... | ..... | १७० | १० | ४१ | ... | अपूर्णम्. |
| १८२ | समयसूक्तानि... ..... | ..... | १२ | ९ | २८ | १८४० | |
| १८३ | सहगमनविधिः ..... | ..... | १२ | ११ | २६ | १६९६ | |
| १८४ | स्मृतिमञ्जरी ..... | ... ... | ११ | ८ | २९ | ... | |
| १८५ | हारीतस्मृतिः ..... | ..... | ९ | ८ | ४२ | ... | |
| | **पुराणानि.** | | | | | | |
| १८६ | आदित्यपुराणम् ..... | ..... | १४९ | १० | ३४ | ... | |
| १८७ | गणेशपुराणम् ..... | ..... | ४७३ | ११ | ३६ | १८९२ | |
| १८८ | ब्रह्मोत्तरखण्डः ..... | ..... | ४७ | १७ | ४८ | ... | |
| १८९ | स एव ..... | ..... | १०६ | १२ | २६ | १७९२ | |
| १९० | भागवतक्रोडपत्राणि ..... | ..... | ३६ | १८ | ४८ | ... | |
| १९१ | भागवततत्त्वदीपः सटीकः ... | मू० वल्लभाचार्यः टी०वल्लभदीक्षितः | १३६ | १४ | ४० | ... | |
| १९२ | भागवतदशमस्कन्धानुक्रमणी. | वल्लभाचार्यः | ४ | ११ | ३० | १८७५ | |
| १९३ | भागवतस्वरूपविषयकशंकानिरासः | पुरुषोत्तमः... | ९ | १३ | २४ | ... | |
| १९४ | स एव ..... | श्रीनाथः ... | ६ | ९ | ३२ | ... | |
| १९५ | साभ्रमतीमाहात्म्यम् ..... | ..... | ३२ | ९ | ३१ | १९४७ | |
| १९६ | हरिलीलाख्याभागवतानुक्रमणी | बोपदेवः ... | ५४ | १० | २४ | ... | |
| | **न्यायशास्त्रम्.** | | | | | | |
| १९७ | अनुमानदीधितिव्याप्तिवादस्य... | ..... | ३० | ९ | ६४ | ... | अपूर्णम्. |
| १९८ | अनुमानलक्षणम् ..... | लक्ष्मीदासः | ४१ | ८ | ४९ | ... | त्रुटितम्. |
| १९९ | तर्कचन्द्रिका ..... | विश्वेश्वराश्रमः | १९ | १४ | ३० | १८८८ | |
| २०० | तर्कभाषाप्रकाशिका ..... | बलभद्रः ... | ५८ | १० | ४० | १६०० | ५-६-७ इति पत्रत्रयं नास्ति. |
| २०१ | तर्कसंग्रहदीपिका..... | अन्नंभट्टः ... | १४ | १४ | ४० | ... | |
| २०२ | न्यायबोधिनी-तर्कसंग्रहस्य टीका | शुक्करत्ननाथः | १९ | ११ | २६ | ... | |
| २०३ | न्यायलीलावती ..... | ..... | १९ | १६ | ४८ | ... | अपूर्णा. |
| २०४ | न्यायसिद्धान्तमञ्जरी ..... | भट्टाचार्यचूडामणिः | २३ | १३ | ४० | ... | प्रथमपत्रं नास्ति. |
| २०५ | भाषापरिच्छेदः ..... | भट्टाचार्यपद्माननः | ११ | ९ | ३२ | ... | |

| नंबर. | ग्रन्थनाम. | कर्ता. | पत्राणि. | पंक्तयः. | अक्षराणि. | संवत्. | अपूर्णादिवाच्यम्. |
|---|---|---|---|---|---|---|---|
| २०६ | मथुरानाथी सव्यभिचारस्य ... | ..... | १३ | ११ | ६४ | ... | |
| २०७ | व्याप्तिग्रहोपायदिप्पनम् ..... | गदाधरः ... | १९ | १० | ६४ | ... | |
| २०८ | सिद्धान्तचन्द्रोदयः —तर्कसंग्रहस्य टीका. | श्रीकृष्णदीक्षितः | ५० | ११ | ३६ | १८४६ | |
| २०९ | स एव ..... | स एव ..... | १२३ | ८ | ३० | ... | |
| २१० | सिद्धान्तमुक्तावली ..... | पञ्चाननः ... | ७९ | १० | ३२ | ... | |
| २११ | तस्या एव टीका..... | दिनकरः ... | १५४ | १२ | ४० | ... | |
| २१२ | सिद्धान्तलक्षणम्..... | गदाधरः ... | १३ | १० | ९० | ... | |
| | **सांख्यमीमांसायोगग्रन्थाः** | | | | | | |
| २१३ | जैमिनीयभावार्थचरणभाष्यं सटीकम् | मू० वल्लभाचार्यः टी० यदुपतिः | ११ | १३ | ४० | ... | |
| २१४ | जैमिनीयसूत्रभाष्यम्, द्वितीयाध्यायस्य प्रथमः पादः | वल्लभाचार्यः | १४ | १० | ३७ | ... | |
| २१५ | न्यायप्रकाशः ..... | आपदेवः ... | ५८ | १३ | ३२ | १८३४ | |
इति श्रीसम्राट् स्थपत्यभिचिदेकोनत्रिंशत्क्रतुतं[कृ]न्महायाज्ञिकप्रजापतिसूनुना याज्ञिकदेवेन कृतं पूरणभाष्यं समाप्तम् ॥ संवत् १९६७ अषाडादि श्रावणकृष्णद्वितीयायां तिथौ मृगशीर्शिलांछनवासरे धनिष्ठानक्षत्रे अद्येह श्रीमदिलमहादुर्गाभ्यन्तरनागरज्ञातीयाग्निचित्सम्राट् स्थपतिमहायाज्ञिकश्रीगोपालसुतदेवीदासेन आत्मनां अध्यापनाय अन्येषामीक्षणाय च पूरणभाष्यं स्वयमेव लिखितम् । महाराजाधिराजश्रीभीमेन्द्रस्य साम्राज्ये । लेखकपाठकयोः स्वस्त्यस्तु ॥

No. 58.

## नैगेयानामृक्षु दैवतम् ।

आ०—ॐ नमः सामवेदाय ॥ ॐ अथार्षमार्ग्विकस्याग्नेरिरेहि

त्वामग्ने भरद्वाजो बार्हस्पत्योग्निं मेधातिथिः काण्वः प्रेष्ठमुशक्काव्य-स्त्वन्नः सुदीतिर्बार्हद्विरसः सौहोत्रः पुरुमीढो वा तेवश्यः कण्वोग्ने सुमित्रो वाध्यश्वो वध्यश्वो वानूपः ॥ १ ॥...

प्रथमः प्रपाठकः ।

पुरुदीर्घतमा औतथ्यः प्रहोत्रेमेयजिष्ठो विश्वामित्रो गाथिनोग्ने राहूगणो गोतमो जज्ञानस्त्रित आत्थ उत.इरिंबिठिः काण्व ईडिध-नस्तस्य श्रुष्टीव्यश्वमनावैयश्वोपभरद्वाजौ बार्हस्पत्यः ॥ १ ॥ ...

द्वितीयः प्रपाठकः ।

त्वत्वा प्रगाथः काण्वो गिर्वणो विश्वामित्रो गाथिनः ...

तृतीयः प्रपाठकः ।

इमे वशिष्ठो मैत्रावरुण इमे शौनको गृत्समद ...

चतुर्थः प्रपाठकः ।

गृणे प्रगाथः काण्वो यस्य भरद्वाजो बार्हस्पत्य ऐंद्रनूमेध ...

पञ्चमः प्रपाठकः ।

उपसद्ये अमहीयुरांगिरसः पुनानो बृहन्मतिरांगिरस आविशन्न-सितः । ...

षष्ठः प्रपाठकः ॥ इति छंदस्यार्षम्—

इंद्रशंयुर्बार्हस्पत्य इंद्रो वशिष्ठो मैत्रावरुणो यस्येदमुच्छुशेप ...

आरण्यकमार्षं समाप्तम् ।

अथोत्तरमुपासितः काश्यपो देवलो वादविकश्यपो मारीचः ...

इति नैगेयानामृक्षुमार्षं समाप्तम् ।

इति प्रथमः प्रपाठकः ।

ॐ नमः ॥ वेदविद्भ्यो नमस्कृत्य नैगेभ्यस्तु विशेषतः ॥

तृचर्चार्धर्चपादानां तेषां वक्ष्यामि दैवतम् ॥ ...

च०—तृतीये देवाश्चतुर्थे एकादशे चाग्निः सप्तमे भद्रं द्वे वैश्वदेव्यौ ॥ २२ ॥ नैगेयानामृक्षु दैवतं समाप्तम् । द्वितीयः प्रपाठकः । ग्रन्थसंख्या ३९६ संवत् १७२० वर्षे द्वितीयचैत्रवदी १ शनौ सूरजीसुतमाधवजी लिखितम् ॥

No. 60.

## पाशुकानि चातुर्मास्यानि ।

आ०—ॐ नमः शिवाय ॥ अथ चातुर्मास्यानि हौत्रं लिख्यते । वैश्वानरपर्जन्येष्टिः । सप्तदश सामिधेन्यः ।

च०—पत्नीसंजायादि पूर्ववत् । हृदयशूलोपस्थानांतं कर्म ॥ इति पाशुकानि चातुर्मास्यानि समाप्तानि । संवत् १७३९ वर्षे फाल्गुनशुदि १ शनौ लिखितं । दी । अनंतेन ।

No. 99.

शुल्वसूत्रवृत्तिः—रामचन्द्रः ।

आ०—रामो निमिषवास्तव्यः सोमपीथी गुरून् हरिम् ।
प्रणम्य वृत्तिमाधत्ते शुल्वसूत्रेष्वविस्तराम् ॥ १ ॥
उद्धृत्य सारभूतार्थं स्वकृताच्छुल्ववार्त्तिकात् ।
सूत्रार्थविवृतिद्वारा बालेभ्यः प्रददे स्फुटम् ॥ २ ॥
रज्जुसूत्रं वक्ष्यामः ॥

च०—शुल्वे क्रतुकृतां नेत्रे मखदशप्रकाशके ।
अबोधव्याधिकलिते वृत्तिर्भेषजमस्त्वियम् ॥ १ ॥
उच्छेत्तुं जनमोहपानवि[नि]रतं त्रातुं महीदेवता
देवेंद्राभ्रमनामराम उदभूत्तस्यानुकंपापदम् ।
सम्राडन्वयगोपयाज्ञिकसुतश्रीनैयजः कृष्ण इ-
त्यास्ते तस्य कृते कृतेति विवृतिः शुल्वस्य रामः स्फुटम् ॥ २ ॥

इति निमिषीयसोमसुद्रामचंद्राचार्यकृतायां शुल्वसूत्रवृत्तौ षष्ठी कंडिका समाप्ता ॥ संवत् १६३४ वर्षे चैत्रकृष्णभौमे अद्येह रेवातीरवास्तव्यनागरज्ञातीययाज्ञिकश्रीविश्वक -------

No. 105.

सामप्रकाशनम्—प्रीतिकरः ।

आ०—यो गजवदनचरणकमलं नत्वा सामप्रकाशनं ग्रंथम् ।
विरचयति सामसमूहात्प्रीतिकरस्सारमुद्धृत्य ॥ १ ॥

च०—।७।मिश्रितमिदमिति सुखदं कौतुकसहितं च दुर्घटं श्लोकैः ।
प्रीतिकरेण यथाक्रममुदितं गानस्य सर्वस्वम् ॥
समाप्तमिदमिति सामप्रकाशनाख्यग्रंथम् ॥
श्वरामशरसंख्यापु[द्ध] ग्रंथः प्रीतिकरेरितः ।
सामप्रकाशनाख्योयं सम्यक्संपूर्णसामगान्
[ संपूर्णतामगात् ] ॥

No. 106.

सामब्राह्मणम् ।

आ०—प्रजापतिर्वा इदमेक आसीन्नाहरासीन्न रात्रिः ।

च०—मूर्ध्ना यत्सर्वामृद्धिमृध्नुवंति य एतदुपनयंति ॥ १८ ॥

इति पंचमः प्रपाठकः समाप्तः ॥ संवत् १४६० वर्षे

No. 117.

सामरथन्तराणि चत्वारि ।

आ०—॥ ॐ नमः सामवेदाय । रथंतराणि चत्वारि ॥ आ भि
२५
र र र ४ १ २ र र र र.
त्वा शूर नो नु मो वा । आ दुग्धा इव धेनव ई शा नमस्य
१ १ र २ १ ४ १
जगतः सु वा २३ दृशाम् । आ इशा नमा २३ इंद्रा ३ । सू

र र ५ २ १ २
स्थू २३४ षा नु वा ६ । हा उ वा । ई शो वा । नामिंद्र सु-
र र र १ १ र
स्थुषो न स्वा वाऽ अन्यो दिवि यः । न पा २३ र्थिवाः । न जा
२र १ ४ १ र र ५ ५
तो ना २३ जा ३ । ना ईष्या २३४ ता । उ वा ६ । हा उवा ।
३ १ २ र र र १ २
न जो वा । तोन जनिष्यते अश्वायतो मघवन्नो । इ वा २३ जिनाः ।
१ १ १ ४ १ र र ५ ५
गव्यं तस्त्वा २३ हा ३ । वा मा २३४ हा उ वा ६ । हा
उवा ॥ दु ॥ १ ॥

र १ २ ४ ५ र
च०—३ षा यि । अ मू ३ । चाथाः । पवमान महा २३
१ १ २ १ १ १ १ १ १ १
होइ । त्वा ना ३१३ वा २३ इ ट् इ डा २३४५७ इति षष्ठः
प्रपाठकः । संवत् १७०२ वर्षे पोषसुद ८ भोमे त्रवाडी कीकाद्भत
जीवा तथा गणेश तथा गोपालजी तथा नारायणजी हरजी मुकुं-
दजी । त्र० गोपालजीयेन लिखितम् ॥

No. 120.

सोमोत्पत्तिः ।

आ०—अग्निहोत्रं हुतासीनं गार्ग्यं वृद्धिं[द्धं] महामुनिम् ।
विनये[विनयेनो]पसंक्रम्य भागुरिः परिपृच्छति ॥ १ ॥

च०—इति सोमोत्पत्तिः । संवत् १७४४ वर्षे शाके १६०९ प्रवर्त्तमाने उत्तरायणगे मासोत्तम अषाडमासे कृष्णपक्षे पञ्चमी श-
निवासरे अध्यारु शिवरामेण लिखितं त्रवाडि जागेश्वरपठनार्थम् ।

No. 203.

दत्तकसिद्धान्तमञ्जरी—बालकृष्णः ।

आ०—प्रणम्य परं(मात्मानमद्वै)तानंदविग्रहम् ।
क्रियते युक्तिमुक्ताभिर्दत्तसिद्धांतमंजरी ॥ १ ॥

मान्यान्प्रणम्य विहितोंजलिरेष भूयो
भूयो विधाय विनयं विनिवेदयामि ।
दूष्यं वचो मम परं निपुणं विभाव्य
भावावबोधविहितो न दुनोति दोषः ॥ २ ॥

च०—इति शौनकरीत्या पुत्रप्रतिग्रहविधिः ॥

सतां संतोषसिद्ध्यर्थं दत्तसिद्धांतमंजरी ॥
अकारि बालकृष्णेन तेन तेषां मुदेऽस्तु सा ॥ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यसर्वतंत्रस्वतंत्रश्रीमद्द्वैतानंदभगवत्पादारविंदभृंगायमानांतःकरणेन श्रीमत्पल्हणीटकरकुलोत्तंसश्रीमहेश्वरभट्टदीक्षितपंडितात्मजेन बालकृष्णशर्मणा विरचिता दत्तसिद्धांतमंजरी समाप्ता ।

No. 246.

प्रवरमञ्जरीसारोद्धारः—शंकरदैवज्ञः ।

आ०—विघ्नौघध्वांतविध्वंसमार्तंडं सिंदुराननम् ।
ब्रह्मादिविबुधैः सेव्यपादपद्मं भजाम्यहम् ॥ १ ॥
रणत्र[ चू ]पुरसंस्कारैः क्वणद्वीणादिवादनैः ।
जातहर्षां प्रफुल्लास्यां भारतीं भावयाम्यहम् ॥ २ ॥
बौधायनादिसूत्राणां व्याख्याकृद्भिः पुरातनैः ।
प्रपंचितं विस्तरेण तत्संक्षिप्य मयोच्यते ॥ ३ ॥
विवाहसिद्ध्यै किल वैदिकानामुर्वीसुतानामबहुश्रुतानाम् ।
संदोहगोत्रप्रवरानुपूर्व्या विरच्यते शंकरतांत्रिकेण ॥ ४ ॥

च०—इत्थं सगोत्रप्रवरः संदोहः परिगुंफितः ।
आदरेण बुधैर्भाव्यः क्षम्यतां मम साहसम् ॥

इति श्रीमच्छिवात्मजशंकरदैवज्ञविरचिते प्रवरमंजरीसारोद्धारे गोत्रप्रवरनिर्णयः समाप्तः ॥ ॥

No. 281.

रुद्रकल्पद्रुमः—अनन्तदेवः ।

आ०—सिद्धिबुद्धिप्रदातारं विघ्नव्यूहविदारणम् ।
महागणपतिं वंदे लक्ष्मीविष्ण्वादिभिर्वृतम् ॥ १ ॥
सच्चिदानंदरूपाय शिवादेहार्धधारिणे ।
नम ॐकारवाच्याय शिवायाभीष्टदायिने ॥ २ ॥
श्रीनृसिंहं रमानाथं सच्चिदानंदविग्रहम् ।
विधीन्द्रोपासितं वंदे भक्तकल्पमहीरुहम् ॥ ३ ॥
कात्यायनान्गुरून्नत्वा श्रीमदुद्धवसूनुना ।
तन्यतेऽनंतदेवेन रुद्रार्चापद्धतिर्मया ॥ ४ ॥
पद्धत्यो विविधा अन्या स्फुटाः संतीह यद्यपि ।
ताभ्यस्तस्या विशेषो यः पंडितैः सोऽवधार्यताम् ॥५ ॥

अथ काण्वमाध्यंदिन्यादिवाजसनेयीशाखानुसारेण रुद्राभिषेकप्रयोग उच्यते ॥.....

पत्रे ४६ इति श्रीमद्द्विवेदी उद्धवसूनुना द्विवेदीदेवानुजेन द्विवेदी श्रीमदनंतदेवेन विरचिते श्रीरुद्रकल्पद्रुमे रूपकाख्याद्यरुद्राभिषेकपद्धतिः समाप्तिमगमत् ॥ अथ द्वितीयो रुद्र उच्यते ॥

च०—धीमतानंतदेवेन श्रीमदुद्धवसूनुना ।
त्रैवेद्यमोढसंज्ञेन काशीपुरनिवासिना ॥ १ ॥
श्रुतिस्मृतिभ्य उद्धृत्य रुद्रकल्पद्रुमोर्पितः ।
मदीयनाथयोर्विष्णुवंद्ययोः शिवपादयोः ॥ २ ॥
मुहुर्मुहुः प्रार्थयेहं सज्जनान् शुद्धमानसान् ।
मयोक्तमिह संशोध्यं विचार्य सदसच्च यत् ॥ ३ ॥

यश्च श्रमः समुत्पन्नो ग्रंथस्यास्य विलेखने ।
सर्वात्मा तेन विश्वेशः प्रीयतां परमः शिवः ॥ ४ ॥

इति श्रीमद्विवेदी उद्धवसूनुना द्विवेदीश्रीदेवानुजेन द्विवेदी अनंतदेवेन ----------

No. 285.

लघुकारिका—कर्काचार्यः ।

आ०—श्रीदेवदत्तोप्यविनायकः पुरा
माध्यंदिनीयोप्यथ गौडवासी ।
श्रीविष्णुशर्मा इति तस्य नंदनः
स कारिकाकारवृथा बभूव ॥ १ ॥

च०—चतुर्विंशतितंतूनां वशिष्ठो वाक्यमब्रवीत् ।
अधिकारी सपत्नीको दंपत्योरुपविष्टयोः ।
जलेशाभिमुखी दद्यात्प्राङ्मुखा यः[ऽपः] प्रयोगतः॥ २७१॥

इति श्रीकर्काचार्यविरचिते लघुकारिकायां यजुर्वेदब्रह्मसूत्रे --- प्रकाशः ॥

No. 296.

विष्णुभक्तिचन्द्रोदयः—नृसिंहारण्यमुनिः ।

आ०—वंदेहं श्रीनृसिंहेशं पुण्यारण्यं प्रभूषमम् ।

च०—श्रीमन्नृसिंहमुनिना ख्यातो धर्मप्रकाशकः ।
विचार्य धर्मशास्त्राणि चक्रे ग्रंथं महामुनिः ॥
बुद्धिप्रेरककृष्णस्य पादपद्मं प्रसीदतु ।
ध्यानासमर्थजीवानामस्माकं सर्वदा स्वतः ॥

इति श्रीश्रीमन्नृसिंहारण्यमुनिविरचिते श्रीविष्णुभक्तिचंद्रोदये एकादश्यादिमाहात्म्यं निर्णयषोडशकलाप्रकरणम् ॥

No. 386.

भागवतामृतम् ।

आ० श्रीगोपकुमार उवाच ॥

ब्रह्मलोकादिमां पृथ्वीमागच्छन् दृष्टवानहम् ।
पूर्वं यत्र यदासीत्तद्वंधोऽप्यस्ति न कुत्रचित् ॥

च०—अथ श्रीरामेण प्रवरकरुणाकोमलहृदा
जगच्चित्तज्ञेन प्रणयमृदुनाश्वास्य वचसा ।
व्रज द्वारावत्यां सुखमिति समादिश्य गमितः
समं तां भक्तूकावलिपरिवृढेनाहमचिरात् ॥

इति श्रीभागवतामृतनाम्नीतिहासे गोलोकमाहात्म्यखंडे वैकुंठनामा चतुर्थोऽध्यायः ॥

No. 402.

हरिलीला—बोपदेवः ।

आ०—नमः कृष्णाय नित्यैकसच्चिदानंदमूर्त्तये ।
जगत्सर्गविसर्गादिसाक्षिणेऽचिंत्यशक्तये ॥ १ ॥
श्रीमद्भागवतः स्कंधाध्यायार्थादि निरूप्यते ।
विदुषा बोपदेवेन मंत्रिहेमाद्रितुष्टये ॥ २ ॥
आनंदस्य हरेर्लीलां वक्ता भागवतागमः ।
स्कंधैर्द्वादशभिः शाखाः प्रतन्वन् द्विजसेवितः ॥ ३ ॥
सा च द्वितीये दशमे दशधाऽदर्शि तथथा ।
अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ॥ ४ ॥
मन्वंतरेशानुकथा निरोधो मुक्तिराश्रयः ।
सर्गादयस्तृतीयादिस्कंधेषूक्ता दश क्रमात् ॥ ५ ॥
श्रोतुर्वक्तुश्च लक्ष्माद्ये द्वितीये श्रवणे विधिः ।
इतीदं द्वादशस्कंधं पुराणं दशलक्षणम् ॥ ६ ॥

च०—इति भागवते लीलानुक्रमणी रमणी कृता ।
विदुषा बोपदेवेन विद्वत्केशवसूनुना ॥ १७५ ॥
हरिलीलाविवेकोऽयं हरिभक्तैर्विलोक्यताम् ।
अस्याविलोकनादेव हरौ भक्तिर्विवर्धते ॥ १७६ ॥
अतत्त्वे तत्त्वधीर्येषां तत्त्वे चातत्त्वधीर्नृणाम् ।
न तानानंदयंत्वेता बोपदेवस्य सूक्तयः ॥ १७७ ॥
यस्य व्याकरणे वरेण्यघटनाः स्फीताः प्रबंधा दश
प्रख्याता नव वैद्यकेऽपि तिथिनिर्धारार्थमेकोद्भुतः ।
साहित्ये त्रय एव भागवततत्त्वोक्तौ त्रयः सस्यभु-
ज्यंतर्वाणिशिरोमणेरिह गुणाः के के न लोकोत्तराः ॥ १७८
इति श्रीबोपदेवपंडितविरचिता हरिलीला समाप्ता ।

No. 448.

न्यायसारः—माधवदेवः ।

आ०—नत्वा विश्वेश्वरं देवं गुरुं श्रीलक्ष्मणाभिधम् ।
द्रव्यादीनां पदार्थानां विवेकः क्रियतेऽधुना ॥ १ ॥

च०—इति धारासूरनिवासिलक्ष्मणदेवात्मजमाधवदेवविरचितो न्यायसारः समाप्तोऽयम् ॥

श्रीमन्माधवदेव इत्यभिहितो ब्रह्मांडभांडोदरे
सूरिः सूर्यनिभः शरत्कुमुदिनीबंधुप्रभाधीरभूत् ।
तंत्रद्राविडधीकृताखिलजगच्छ्रीमाधवः सूरिराट्
तंत्रार्थं निखिलं विचार्य विदधौ श्रीन्यायसारं सुधीः ॥ १ ॥
गोदातीरविभूषणं पृथुयशाः श्रीलक्ष्मणाख्यः सुरो
धारासूरपुरे स्थितोऽखिलजगद्वंद्योर्जुनानुग्रही ।
तत्सूनुस्त्रिपुरारिराजनगरे श्रीन्यायसाराभिधं
ग्रंथं माधवदेवपंडित इमं ज्ञात्वाकरोदाकरम् ॥ २ ॥

No. 481.

उक्तिरत्नाकरः—साधुसुन्दरः ।

आ०—स्मृत्वा श्रीभारतीं देवीं गुरुपादांश्च भक्तितः ।
उक्तीनां संग्रहं वक्ष्ये स्वान्ययोर्हितहेतवे ॥ १ ॥

च०—खरतरेअणूषाद्य[तरमतपाथो]राशिवृद्धौ मृगांका
यत्पतिसभायां ख्यापितार्हन्मताज्ञाः ।
प्रहतकुमतदर्पाः पाठकाः साधुकीर्त्ति-
प्रवरसदभिधानापिवासिंहा [नाःसिंहतुल्या] जयंतु ॥
तेषां शास्त्रसहस्रसारविदुषां शिष्येण शिक्षाभृता
भक्तिस्थेन हि साधुसुंदर इति प्रख्यातनाम्ना मया ।
ग्रंथोयं विहितः कवीश्वरवचोबुद्ध्योक्तिरत्नाकरः
स्वान्यानां हितहेतवे बुधजनैर्मान्यश्चिरं नंदतु ॥

इति श्रीउक्तिरत्नाकरः संपूर्णः ॥

No. 485.

कातन्त्रदौर्गसिंहीवृत्तिष्टीकासमेता ।

मू० आ०—राज्याभिषेके कनकाचलस्थः
सर्वांगदिव्याभरणाभिरामः ।
श्रियेऽस्तु वो मेरुशिरोवतंस-
कल्पद्रुकल्पः प्रथमो जिनेंद्रः ॥ १ ॥
देवदेवं प्रणम्यादौ सर्वज्ञं सर्वदर्शिनम् ।
कातंत्रस्य प्रवक्ष्यामि व्याख्यानं शार्ववार्मिकम् ॥ २ ॥

सिद्धो वर्णसमाम्नायः । सिद्धः खलु वर्णनां समाम्नायो वेदितव्यः । न पुनरन्यथोपदेष्टव्य इत्यर्थः । सिद्धशब्दोत्र नित्यार्थो निष्पन्नार्थः प्रसिद्धार्थो वा । यथा सिद्धमाकाशं सिद्धमन्नं कांपील्ये सिद्धो देवदत्त इति ॥

टी० आ०—ॐकारं बिंदुसंयुक्तं यं ध्यायंतीह योगिनः ।
कामदं मोक्षदं तस्मै ॐकाराय नमो नमः ॥ १ ॥
अविरलशब्दमयौघा प्रक्षालितसकलभूतलकलंका ।
मुनिभिरुपासिततीर्था सरस्वती हरतु दुरितं नः ॥ २ ॥
षट्कं निश्चलं कृत्वा यथा मेरुं सुनिश्चलम् ।
स्वोपाध्यायं नमस्कृत्य ततो व्याख्यानमारभेत् ॥ ३ ॥
देवदेवं प्र० ४
प्रणम्य योगिभिर्वंद्यं जिनं सज्ज्ञानभास्करम् ।
शब्दशास्त्रप्रणेतारं वक्ष्ये मुग्धप्रबोधकम् ॥ १ ॥

दिवूच् क्रीडाजयेच्छापणिद्युतिस्तुतिकांतिगतिषु । दिव् दीव्यंति क्रीडंति स्वर्गेऽप्सरोभिः सह विलसंतीति देवाः ।

मू० च०—दौवारिकः द्वौवा[द्वा]रपालिकः सौवरः [श्वः] एवमन्येप्यनुसर्त्तव्याः । इति दौर्गसिंह्यां वृत्तौ तद्धितप्रकरणं समाप्तम् ॥

टी० च०—द्वारे नियुक्तो दौवारिकः तेन दी० कण्प्र० पश्चात् अनति० द्वारादीनां चा(वा)पदाद्योरपि वृद्धिः । इति दौर्गसिंह्यां वृत्तौ तद्धितप्रकरणं ढुंढकम् ॥ ॥

No. 486.

कातन्त्रशिक्षासंदोहः—वा—कलापव्याकरणसूत्राणि ।

आ०—उक्तानुक्तदुरुक्तानां चिंता यत्र प्रवर्त्तते ।
तच्छास्त्रं वार्तिकं प्राहुर्वार्त्तिकज्ञा विपश्चितः ॥ १ ॥

च०—कृताकृतप्रसंगि यल्लक्षणं तन्नित्यं लक्षणसन्निपाते तदनुपरोध्य कार्यमिति । कातंत्रे परिभाषासूत्रसंदोहः समाप्तः ॥

ॐ नमः पार्श्वनाथ ॥ अष्टौ स्थानानि वर्णानां...

हकारं पंचमैर्युक्तमंतस्थाभिश्च [मंतःस्थैश्चाभि]संयुतम् ।
उरस्यं तं विजानीयात्कंठ्यमाहुरसंयुतम् ॥ १ ॥

इति कातंत्रे शिक्षासंदोहः समाप्तः ॥ इति कलापव्याकरणसूत्राणि संपूर्ण[र्णानि] ॥

No. 487.

कातन्त्रोत्तरं सिद्धानन्दापरनामकम्—विजयानन्दः ।

आ०—नाम्नां । वस्तुवाचीनीति । ननु किं भावरूपमथाभावरूपं यदि वोभयरूपमाहोस्विद्भावाभावविनिर्मुक्तं वस्त्विति ।

च०—अथः शिरसां वेदतिर्स्यं । अथः स्यन्दं तिरस्यन्दि नमस्करोति पुंस्करोति च दृश्यते । घोषवति तु नेदं लक्षणम् । भव्वो भोजनमित्यादि ॥

इति विजयानन्दविरचिते कातन्त्रोत्तरे सिद्धानन्दापरनाम्नि संमासप्रकरणं समाप्तम् ॥

No. 495.

दशबलकारिका ।

आ०—ये धातवः संति गणांतरेषु वर्णार्थनिर्देशपदैरभिन्नाः ।
विभिन्नशब्दप्रतिपादनार्थं रूपाणि तेषां समुदाहरिष्ये ॥ १ ॥

च०—यः शक्लृ शक्तौ कथितो दिवादौ
स तु प्रसिद्धः स्वरितानुबंधः ।
रूपद्वयं शक्यति शक्यते च
शक्नोति नङ् यस्य तु शक्नुते च ॥ ३६ ॥

द्वात्रिंशता श्लोकनिबंधनेन
धातूनसौ स्वीकृतवान्महाधीः ।
स व्यापकोयं सुतरां प्रसिद्धो
बलोत्तरो विंशतितुल्यभागः ॥ ३७ ॥

दृष्टिस्ते विषमा तनौ विरचिता भूतिर्मुखे पंचता
पाणौ ब्रह्मशिरो गले च गरलं दोषाकरो मस्तके ।
एतैनैव परिच्छदैः पशुपते के त्वां नमस्कुर्वते
यद्येषा सुरवृंदवंदितपदा मौलौ न भागीरथी ॥ ३८ ॥

इति दशबलकारिका समाप्ता ॥ संवत् १७८३.

No. 500.

न्यायार्थमञ्जूषा—हेमहंसगणिः ।

आ०—ॐरूपाय नमः श्रीमद्धैमव्याकरणाय च ।
श्रीसोमसुंदरगुरूत्तंसाय च नमो नमः ॥ १ ॥

अथ ये तु शास्त्रे सूचिता लोकप्रसिद्धाश्च न्यायास्तदर्थं यत्नः क्रियते ।

स्वरूपं शब्दस्याऽशब्दसंज्ञा ॥१॥
सुसर्वार्धदिक्शब्देभ्यो जनपदस्य ॥२॥

च०—श्रीसूरीश्वरसोमसुंदरगुरोर्निश्शेषशिष्टाग्रणी-
र्गच्छेंद्रः प्रभुरत्नशेखरगुरुर्देदीप्यते सांप्रतम् ।
तच्छिष्याश्रमहेमहंसगणिना न्यायार्थमंजूषिका-
वक्षस्कार इहांतिमोऽब्धिमितः सन्न्यायरत्नैर्भृतः ॥ ४ ॥...
श्रीमच्चांद्रकुले पुराजनि जगच्चन्द्रो गुरुर्यस्तपा-
चार्यख्यातिमवाप तीव्रतपसा तस्यान्वये जायते ।
प्रौढश्रीवरदेवसुंदरगुरुस्तत्पट्टपूर्वाद्रिरे:
शृंगे श्रीप्रभुसोमसुंदरगुरुर्भानुर्नवीनोभवत् ॥ ७ ॥

यतः ।

भानोर्भानुशतानि षोडश लसंत्येकत्र मास्याश्विने
यच्छिष्यास्तु ततोऽधिका अपि महीमुद्योतयंते सदा ।

तस्याहं चरणानुपासिषि सदा श्रीमत्तपागच्छप-
क्षोणीविश्रुतसोमसुंदरगुरोश्चारित्रचूडामणेः(णेः) ॥ ८ ॥

अपि च ।

मारिर्येन निवारितां सुरकृता संसूत्र्य शांतिस्तवं
स श्रीमान्मुनिसुंदराभिधगुरुर्दीक्षागुरुर्मेऽभवत् ।
यस्य श्यामसरस्वतीति बिरुदं विख्यातमुर्वीतले
गुर्वी श्रीजयचंद्रसूरिगुरुरप्याधात्प्रसत्तिं स मे ॥ ९ ॥
सांप्रतं तु जयंति श्रीरत्नशेखरसूरयः ।
नामग्रंथकृतस्तेपि पूर्वाचार्यानुकारिणः ॥ १० ॥
एतानाचार्यहर्यक्षान्प्रत्यक्षानिव गौतमान् ।
वीतमायं स्तुवे स्फीतश्रीतपागच्छनायकान् ॥ ११ ॥

किंच ।

हैमव्याकरणं महार्णवमिव व्यालोड्य मंजूषिका-
संपूर्तिप्रमितान्यऽमून्यधिनवं सद्व्याश्रयरत्नानि यत् ।
तत्सर्वं यदवाप्तबोधकणिकासिद्धौषधीजृंभितं
विद्यासिद्धमिमं हृदि प्रणिदधे चारित्ररत्नं गुरुम् ॥ १२ ॥
चिन्मयानां मयामीषामृषीणां सुप्रसादतः ।
हेमहंसाभिधानेन वाचनाचार्यतायुजा ॥ १३ ॥
श्रीमद्विक्रमवत्सरे तिथितिथौ १५१५ शुक्लद्वितीयातिथौ
पूर्वाह्णे मृगलांछने मृगशिरःशृंगाग्रशृंगारिणि ।
शुक्रस्याहनि शुक्रमासि नगरे श्रीसागरेऽहम्मदा-
वादे निर्मितपूर्तिरेष जयताद्ग्रंथः सुधीवल्लभः ॥ १४ ॥

इति श्रीतपागच्छपुरंदरश्रीसोमसुंदरसूरिस्वदीक्षागुरुश्रीमुनिसुंदर-
सूरिश्रीजयचंद्रसूरिप्रमुखश्रीगुरुसांप्रतविजयमानश्रीगच्छनायकपरमगु-

रुश्रीरत्नशेखरसूरिचरणकमलसेविना महोपाध्यायश्रीचारित्ररत्नगणिप्रसादप्राप्तविद्यालवेन वाचकश्रीहेमहंसगणिना स्वपरोपकाराय संवत् १५१५ वर्षे ज्येष्ठसुदि द्वितीयायां निर्मितेयं न्यायार्थमंजूषानाम्नी न्यायबृहद्वृत्तिश्चिरं नंदतात् ॥

प्रत्यक्षरं गणनया ग्रंथेऽस्मिन्मानमागतम् ।
सहस्रत्रितयी पंचाशीतिः श्लोकाश्च साधिकाः ॥ १५ ॥

ग्रंथाग्रं श्लोकाः ३०८५ अक्षर २१ ॥ श्रीन्यायार्थमंजूषानाम्नी न्यायबृहद्वृत्तिः संपूर्णा । सूत्रसहितवृत्तिग्रंथाग्रं श्लोका ३१५४ ॥

No. 502.

परिभाषाभास्करः—अग्निहोत्री हरिभास्करः ।

आ०—आखण्डलादिसुरमण्डलमण्डनं त-
मुद्दण्डकोकविरहानलदण्डचण्डम् ।
ईडे ऽहमत्र बहुशोधितपद्मकाण्डं
मार्त्तण्डमंधतमसं प्रति कालदण्डम् ॥ १ ॥
श्रीगुरून् पितरौ नत्वाऽग्निहोत्री भास्कराभिधः ।
भास्करं परिभाषाणां तनुते बालबुद्धये ॥ २ ॥
युक्तायुक्ताभिज्ञं वन्द्यं भूयो २ विद्वद्वृन्दम् ।
नामं नामं याचे मंदो मांद्यं चेदं शोध्यं सम्यक् ॥ ३ ॥
मड्डी मड्डीकया तुल्या खरैरिव खलैर्यदि ।
नादृतेयं कृतिस्तस्मादस्माकं हानिरस्ति का ॥ ४ ॥

च०—अव्यभिचारि सत्त्वम् । अत्रोत्पत्तिमत्स्वपि पदार्थेषु सच्छब्दः संबंधं न व्यभिचरतीति तत उत्पन्नो भावप्रत्ययः ॥ क्रियासंबंधेनाहापितु सामान्यम् । इदं च भर्तृहरेर्वचनम् । यत्तु मथुरानाथभट्टाचार्या वदंति पाणिनिवचनमिदमिति तदतिरभसादिति ध्येयम् ।

केचित्तु व्याख्यानतो विशेषप्रतिपत्तिरित्यादि सर्वा परिभाषा व्याडिमुनिना रचिता इत्याहुः ॥

परिभाषाकमलिनीर्युक्तिरुग्भिर्विकाशयन् ।
भास्करः पंडितालीनां स्वांतमानंदयत्वयम् ॥

इति श्रीमदग्निहोत्रिवंशावतंसहरिभट्टात्मजापाजिभट्टसुतापराभिधानहरिभास्करकृतः परिभाषाभास्करः समाप्तिमगात् ॥१ ॥

No. 530.

लघुसारस्वतम्—कल्याणसरस्वती ।

आ०—मातरपितरौ श्रीशौ नत्वा केन त्रिदं गुरुम् ।
लघुसारस्वतं कुर्वे श्रीकल्याणसरस्वती ॥ १ ॥

च०—आदेशाच्छ्रीसरस्वत्या गुरुपादानुवंदनात् ।
बालानां शीघ्रबोधाय कृतं सारस्वतं लघु ॥ १ ॥

इति श्रीलघुसारस्वतं संपूर्णम् ॥

No. 540.

सारस्वतटिप्पणम्—क्षेमेन्द्रसूरिः ।

आ०—ॐ नमः सरस्वत्यै ॥

तदर्थतत्त्वाभिनिविष्टबुद्धि-
र्गर्वप्रतिक्षेपकयुक्तिलेशैः ।
अल्पैः पदैर्व्याकरवाम कामं
सारस्वतं व्याकृतमन्यदीयैः ॥ १ ॥

प्रारिप्सिताविघ्नसमाप्तिशिष्टाचारावनाभ्यां प्रणतेष्टदेवाः ।
श्रोतृप्रवृत्त्यै विषयादि तावदाचार्यधुर्या इह संगिरंते ॥ १ ॥
प्रणम्य० सारस्वतीं प्रक्रियामृजुं कुर्वे इत्यन्वयः ।

च०—लोकाच्छेषस्य सिद्धिरिति सूत्रबलादस्माभिर्दिङ्मात्रमुक्तम् ।
स यतिः प्रक्रियां शुभामिति ऋजुमित्यर्थः ॥ छ

कृष्णा ( भय ) श्रीचरणोपसत्तिमवाप्य संप्राप्तमतिप्रकर्षः ।
क्षेमेंद्रसूरिर्हरिभद्रसूनुः सारस्वते टिप्पणमभ्यधत्त ॥ १ ॥
व्याख्यागुणात्परीक्षेह चिरं नंदंतु ----------

No. 575.

परमार्थबोधः—मुकुन्दः ।

आ० ॥ ॐ नमः परमात्मने पुराणपुरुषोत्तमाय ॥
अगुणाय गुणाढ्याय स्वात्मनेऽनन्तरूपिणे ।
शुद्धाय स्वप्रकाशाय श्रीरांममुनये नमः ॥ १ ॥
निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः ।
कथं सर्गादिकर्तृत्वं ब्रह्मणोऽप्युपपद्यते ॥ २ ॥

च०—इति मुकुंदमुनिना वेदांतविवेकविरचितं श्रीरामचंद्रनाथप्रसादेन माध्यंदिनीशाखायां परमार्थबोधपूर्वकांडं समाप्तम् ॥

No. 661.

अलंकारमञ्जरी—निर्मलः ।

आ०—कपोललंबिरोलंबबिंबकोलाहलाकुलम् ।
अंबालंबानुरागाढ्यालंबे लंबोदराननम् ॥ १ ॥
ज्ञातुमिच्छंत्यलंकारानल्पेन श्रवणेन ये ।
कुर्वंतु कर्णयोरुच्चैः कर्णालंकारमञ्जरीम् ॥ २ ॥

च०—अर्थालंकारजातं हि मुख्यमेतावदेव हि ।
अन्ये वैकल्पिकाः सर्वे विज्ञेयाः किमु तद्भवाः ॥ ४३ ॥
काश्यां वल्लभभट्टस्य पुत्रेण निरमाप्यसौ ।
निर्मिता त्रिम्म[निर्म]लाख्येन रम्यालंकारमंजरी ॥४४॥
॥ इत्यर्थालंकारमंजरी समाप्ता ॥

## No. 676.

किरातकाव्यं सटीकम्-मू० भारविः, टी० मल्लाह्वयः।

टी० आ०—नत्वा परं ज्योतिः शिवं गणेशं
वाणीं भवानीं च गुर्वङ्घ्रिपद्मम्।
आशापुरां स्वां कुलदेवतां च
भिल्लाख्यकाव्यस्य वृत्तिं रचिष्ये ॥ १ ॥
श्रीवच्छ[त्स]लः पुष्करवंशवर्यो
ज्योतिर्विदां सुज्ञः द्विजाग्रगण्यभूत् ॥
जयरामनामा तत्सूनुरासी-
त्तर्कादिविद्याकुशलोऽतिविद्वान् ॥ २ ॥
तदात्मजो राजसभासु मान्यः
पुराणविद्यातिदक्षः शुकाह्वः।
कृतेयं सुज्ञातनुजेन तस्य
मल्लाह्वयेनैव स्वबोधनाय ॥ ३ ॥
वृत्तयः प्रचुराः संति अस्याग्रे भारविकृतेः।
तथापि तन्यतेऽस्माभिर्नूतना बालबोधिनी ॥ ४ ॥
घंटापथमतं गृह्य स्वात्मबुद्ध्यनुसारतः।
श्रीमनोहरजित्तस्य गुरोः पुनरनुज्ञया ॥ ५ ॥
छंदसो लक्षणं नोक्तमलंकारस्य चात्र वै।
शुद्धार्थप्रकाशिनी चेयं ज्ञातव्या विबुधोत्तमैः ॥ ६ ॥

च०—इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके श्रीभारविकृतौ तस्य व्याख्यायां बालबोधिनीसमाख्यायां अर्जुनसंवरप्रदानो नामाष्टादशः सर्गः समाप्तिमगमत् ॥

No. 698.

## चिमनीचरितम्—नीलकण्ठः ।

आ०—आसीदासी[शि]र्वचनविषयः पश्यतामाननाज्वं [आननाब्जं]
सोदर्यौ[सौंदर्यौ]तःकरणमवनीकौतुकं काव्यतत्त्वम् ।
स्फूर्तैर्मूर्त्तिर्मदनमहिमा भारतीभागधेयं
क्रीडास्थानं रसिकमनसां श्रीदयादेवशर्मा ॥ १ ॥
चेतोवृंदान्यलहविरदीखानसीमंतिनीनां
यस्मिन्नग्नौ शलभकुलवद्भेजिरे झंपपातान् ।
बिभ्राणो यः किमपि ललितं लोचनालेह्यमोजः
स्त्रीणामासीदवनिवलये मोहनो मोहिनीनाम् ॥ २ ॥
सोऽयं दैवादलहत्रिरदीखाननामानमेत्य
म्लेच्छाधीशं प्रकटितगुणः स्वीचकाराश्रवृत्तिम् ।
तत्राप्येषः स्मरसहचरे वर्त्तमानो वयस्य-
प्युत्सुकों[उत्सिक्तां]तःपुरमृगदृशां पाटनस्याधिकारी ॥३॥
का[क्का]सौ विप्रः क च परिचयोंतःपुरस्त्रीषु योयं
नीरूपाणां गलितवयसां युक्त उक्तोऽभियुक्तैः ।
इत्यज्ञानादपरिगणयन्म्लेच्छराजोऽन्वजाना-
देतत्पार्श्वे पठितुमनिशं मानिकामां नताङ्गीं(म्) ॥ ४ ॥

च०—रस एव स ईश्वरः श्रुता-
विति निर्णीतमतोऽभिधीयते ।
चिमनीचरिते रसाश्रयं
वचनं चेभम[ वेतन ]मश्रमः श्रमः ॥ १०२ ॥
रिक्तीकृते निजतया भवभूतिमुख्यै-
र्भिक्षाटनं कृतवता[तः] पुनरुञ्छवृत्त्या ।

क्षेत्रे यदत्र खननेन समार्थलाभो
यः कोप्यभूदिह महेशकृपैव हेतुः ॥ १०३ ॥
शुक्लजनार्दनपुत्रो वच्छा[त्सा]चार्यस्य दौहित्रः ।
पठितालंकृतशास्त्रो भर्तृश्रीमंडनच्छात्रः ॥ १०४ ॥
हीराभिधानपातिव्रतमहसि प्राप्तनिजन्मना[ निजजन्मा ] ।
कविनीलकंठशर्मा निरमाच्चिमनीचरित्रमिदम् ॥ १०५ ॥
महिस्मुनींद्रदु [महीमुनींद्र] मितेब्देऽतिक्रांते विक्रमादित्यात् ।
शिवरात्रौ शिवपदयोर्निजकृतिराधायि नीलकंठेन ॥१०६॥
इति श्रीनीलकंठकविकल्पितं चिमनीचरितं समाप्तम् ॥

No. 711.

नलोदयकाव्यं सटीकम्—मू०रविदेवः ।
टी० प्रज्ञाकरमिश्रः ।

टी०आ०—कंकणफणिराजमणिं दीपधिया वदनमारुतैरसकृत् ।
निर्वापयति कुमारे सगिरिसुतो जयति सस्मितः शंभुः ॥१
नलोदयस्य सहसा दुरूहस्य सुबोधिनीम् ।
क्रियमाणस्य मे कुर्वदूपोस्तु शरणं शिवः ॥ २ ॥

तत्रभवान् कालिदासः प्रारिप्सितग्रंथसमाप्तिप्रतिबंधकविघ्नविघाताय श्रीकृष्णस्मरणरूपमंगलमादौ निबध्नाति । हृदयेति ॥

टी०च०—श्रीमिश्रानंदकस्त्वासीन्महोपाध्यायलक्षितः ।
पुण्यग्रामसभाजेता यष्टा वाणीमयः सुधीः ॥ १ ॥
वेदेनैव विधिं कविं नयरुतैस्तर्केण वाचस्पतिं
वेदान्तेन शिवं मनुस्मृतिगणैर्ज्योतिश्चयैर्भास्करम् ।
व्याकृत्येन फणाधरं क्षितिधरं नागाधिपं छंदसा
धर्मो यस्य विजेतुमंचति परं सांख्येन चार्वाकपम् ॥२॥

तत्सूनुः सुकृती क्षितीश्वरकृपापात्रः सुहृत्पालको
नानाशास्त्ररतो महापदृयुतोपाध्यायसंज्ञान्वितः ।
सत्तर्कायतकाननोद्यतचलद्वादींद्रदंतावल-
श्रेणीमर्दनचातुरीचणहरिर्विद्याकरो मैथिलः ॥ ३ ॥
तस्याग्रजोऽभूद्विबुधाग्रगंता प्रभाकरः सज्जनतापहर्ता ।
गुणालयश्रीशपदानुमंता शास्त्रेषु दक्षः कुधियां नियंता॥४॥
स्वल्पेन वयसा तेन कृता टीका सुबोधिनी ।
पूर्वाचार्यकृतीर्वीक्ष्य सुधियां पदृयतां मुदे ॥ ५ ॥

इति श्रीमैथिलप्रज्ञाकरमिश्रप्रणीतायां नलोदयटीकायां सुबोधिन्यां चतुर्थ उच्छ्वासः ॥ ४ ॥ समाप्तेयं सुबोधिनी टीका ॥

नलोदयकाव्यं सावचूरि—मू० रविदेवः ।

च०—४४ ॥ इति नारायणसुतश्रीरविदेवविरचिते नलोदय-काव्ये चतुर्थोल्लासः समाप्तः ॥ ४ ॥

No. 715.

नेमिदूतकाव्यम्—विक्रमः ।

आ०—प्राणित्राणप्रवणहृदयो बंधुवर्गं समग्रं
हित्वा भोगान्सह परिजनैरुग्रसेनात्मजां च ।
श्रीमान्नेमिर्विषयविमुखो मोक्षकामश्चकार
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥ १ ॥

च०—तद्दुःखार्थं प्रवरकविना कालिदासेन काव्या-
दंत्यं पादं सुपदरचितान्मेघदूताद्गृहीत्वा ॥ २ ॥
श्रीमन्नेमेश्चरितविशदं सांगणस्यांगजन्मा
चक्रे काव्यं बुधजनमनःप्रीतये विक्रमाख्यः ॥ १२६ ॥

इति मेघदूतांत्यपादविरचितं नेमिदूताभिधानं काव्यं समाप्तम् ॥

No. 716.

## नैषधस्य टीका—लक्ष्मणः।

आ०—सर्गस्थित्युदितं सुवर्णघटितप्रासादलंकारिता-
मापन्नं कमनीयवृत्तरचितश्लोकं प्रकांडाकृतिम्।
कल्पोद्बोधकृदन्वयांचितपदं सद्वर्णनीयस्थितिं
श्रीवल्मीकभुवः प्रबंधमिव तं श्रीरामभद्रं भजे॥ १॥
श्रीपंक्तिरथपादाब्जरोलंबीकृतविग्रहम्।
पितरं रामकृष्णाख्यं नौमि विद्याविशारदम्॥ २॥
स्पर्धामभिनिवेशादुमया प्राप्तामुमासमाख्यां ताम्।
द्युनदीनिर्मलचित्तां मातरमेकां सतीं सदा वंदे॥ ३॥
आ पूर्वाचलमा च पश्चिमगिरेरुर्वीभृतां शेखर-
प्रोताधिष्ठितप्रांतमद्भुतवपुः श्रीलक्ष्मणाग्रांचितम्।
वंदे विष्णुपदाश्रयं दिनकरं स्वभ्रातरं सर्वदा
सत्कर्मप्रतिपादनार्थमुदितं प्रक्षिप्तदोषागमम्॥ ४॥
गणेशाय नमस्कृत्य पितृभ्यामग्रजन्मने।
करोमि नैषधव्याख्यामन्यादृष्टपथानुगाम्॥ ५॥
संति यद्यपि सद्व्याख्या बुधानां नैषधे शतम्।
तथाप्यमुष्या वैदग्धीं केचिद्विज्ञातुमीशते॥ ६॥

सर्गः १.

No. 725.

## पद्यतरंगिणी—सटीका—व्रजनाथः।

आ०टी०—गुरुचरणसरोजद्वंद्वमाधाय चित्ते
किमपि तदनुकंपालब्धबुद्धिप्रभावः।

इह सुललितभव्यान्योक्तिपद्यानि सम्यक्
परिकलनरहस्यान्यर्थतः सूचयामि ॥ १ ॥

अ°मू°—खद्योतो द्योतते तावद्यावन्नोदयते शशी ।
उदिते तु सहस्रांशौ न खद्योतो न चंद्रमाः ॥ १ ॥

च°मू°—धन्यः स ते विधाता धन्यो वंशः स यत्र जातोसि ।
जीवयसि मूर्छितमपि न जगत्प्राणदानेन ॥ १०२ ॥

इति पद्यतरंगिण्यां व्रजनाथकृतश्लोकसंग्रहे द्वादशस्तरंगः ॥२३॥

च°टी°—यस्तीक्ष्णांशुकुले बभूव विमले श्रीमान्धराधीश्वरः
पृथ्वीराज इति प्रभावमहितः प्रत्यर्थिजेता रणे ।
श्रीकूर्मान्वयभूषणं नरहरिप्रेमैकपात्रं श्रियो-
लीलासद्म गुणैकधाम सकलक्ष्मोणीशचूडामणिः ॥१॥

तद्वंशे सततावदातचरितः प्रौढप्रतापानल-
ज्वालाजालविदीपितारिनिवहः सच्छास्त्रनिष्णातधीः ।
देवब्राह्मणपूजकोऽतियशसा कुर्वन्सितं भूतलं
जातः श्रीजयसिंह इत्यभिधया ख्यातो धराधीश्वरः ॥ २ ॥

के नाभवन्नृपतयो बत विक्रमाद्याः
केनाप्यकारि नहि तेषु तुरंगमेधः ।
अस्मिन्युगे निखिलभूपतिसार्वभौम-
स्तद्यज्ञकृद्विजयते जयसिंह एकः ॥ ३ ॥

पारीक्षितोपि विदधे हयमेधमुच्चै-
स्तत्रापि शापमयमुत्तमपूरुषोपि ।
राजाधिराजजयसिंहनृपश्चकार
निर्विघ्नमेनमधुना भगवत्प्रसादात् ॥ ४ ॥

योऽदाद्दीनीपककुलेषु सुवर्णपूगा-
नंभःकणानिव नभःस्थितवारिवाहः ।

वेदोदितेन विधिना हयमेधमुच्चै-
श्चक्रे तथा क्रतुशतानि महाधनानि ॥ ५ ॥
आसन् पूर्वं मानसिंहादयो ये
भास्वद्वंश्याः क्षोणिपालाः कियंतः ।
चक्रुर्भूमिं भूमिपालान्वशे ते
श्रौते मार्गे नैव निष्ठामवापुः ॥ ६ ॥
राजाधिराजो जयसिंह एव
तद्वंशजः प्राक्तनपुण्यपुंजात् ।
संभावितो दक्षिणदिग्विजेंद्रैः
श्रद्धालुरासीच्छ्रुतिधर्म एव ॥ ७ ॥
पपाठ वेदं विदधेऽग्निहोत्रं
चकार यज्ञान्विविधान्सदैव ।
धनं ददौ ब्राह्मणपुंगवेभ्यो
ग्रामान् गजांश्चापि तुरंगमांश्च ॥ ८ ॥
बभौ स तस्य क्रतुराट् तदानीं
महेंद्रसंस्पर्धिसमृद्धिभाजः ।
अत्रामतश्चेत्र[त्र]कुलः स दैवा-
त्स्वर्णार्धिपार्श्वोऽथ भविष्यदेव ॥ ९ ॥
वेदव्यासतनुः पुराणमनने तर्कागमे गौतमो
वेदांतार्थविवेचने विधिसुतः काव्येषु काव्योऽपरः ।
शेषो व्याकरणे कलासुकुशलो गर्गस्तथा ज्यौतिषे
नानाशास्त्रविचक्षणो जयहरिः क्षोणीशमुख्योऽभवत् ॥ १० ॥
तस्मादजायत गुणैकनिधिर्वरेण्यो
विद्यानिधिर्विनयवारिधिरुद्धृतारिः ।

श्रीमाधवो लसदुमाधवमाधवाब्ज-
योनिष्वभेदमतिरद्भुतदानशक्तिः ॥ ११ ॥
काष्ठं कल्पतरुः सुमेरुरचलश्चिंतामणिः प्रस्तरः
कामं कामगवी पशुः सुरपतिर्वृद्धश्रवा गोवृषभित् ॥
चंद्रो हंत कलंककीलिततनुः क्षारान्वितः सागर-
स्तेनायं जगतीनिरुपमतमः श्रीमाधवः क्ष्माधवः ॥१२॥
यश्चोर्वीतलसार्वभौममुकुटालंकारहीरायितः
स्फूर्जद्दिव्ययशःसुधांशुविसरद्रोचिश्छटाभासुरः ।
मध्याह्नार्ककरप्रकर्षविजयिप्रोद्यत्प्रतापोदयो
दानोद्रेकतिरस्कृतामरतरुस्वर्धेनुचिंतामणिः ॥ १३ ॥
मूर्त्तो धर्म उदेयिवान्किमथवा निष्पारिजातोऽभव-
त्स्वर्गः किं सकलः कलानिधिरगात्कर्णोऽवतीर्णः किमु ।
पार्थोऽयं किमुपागतः पृथुरथो पृथ्वीवियोगातुरो
यं वीक्ष्येति निरंतरं कविमुखादर्वंति वाग्वीचयः ॥१४॥
युधिष्ठिरो भीमसेनस्तथैव यशसार्जुनः ।
नकुलातिक्रमी भाति सहदेवोऽच्युतो रणे ॥ १५ ॥
यं प्रोद्दंडबिलेशयेशविलसद्दोर्दंडचंडीभव-
त्कोदंडं रणमूर्ध्नि खंडपरशोराक्रम्य भासं स्थितम् ।
आलोक्याललसलोचनाः सरभसं नृत्यंति देवांगनाः
कंपंते हरयश्चलंति गिरयस्त्रस्यंति सर्वे रथः[वैऽरयः] ॥ १६ ॥
प्रोद्यत्कीर्त्तिवितानमथिडत[ मंडित ]नवब्रह्मांडभांडोदरे
यस्मिन्भूमिपतौ प्रशासति भुवं सौभाग्यभव्यायुषि ।
चांचल्यं चपलासु चंद्रवदनानेत्रांचले तीक्ष्णता
चंद्रे लक्ष्म करग्रहः परिणये लोकेषु नैवाभवत् ॥ १७ ॥

आवासो निधिसंपदां रणभुवि त्रासः प्रतिक्ष्माभृता-
मुल्लासः प्रतिभाजुषामतिमहान्व्यासः सभासंपदाम् ।
विन्यासः सुजनाशिषां प्रतिलवं रासः कुरंगीदृशां
विश्वासः प्रणयातमनां[यात्मनां] विजयते श्रीमाधवः क्ष्माधवः १८
कवीश्वराणामय[मथ] पंडितानां प्रकाशयंती विमलांतराणि ।
देशेष्वगम्येष्वपि संचरंती विभाति सिद्धेव यदीयकीर्त्तिः ॥१९॥
भूमंडले यद्यशसा विलिप्ते काका अभूवन्बकतुल्यभासः ।
किं चापणेऽज्ञायत गंधभेदात्कर्पूरकस्तूरिकयोर्विभेदः ॥ २० ॥
उष्णत्वमुच्चैर्वदतां कवीनां यस्य प्रतापे मतिमोह एव ।
यतो दधत्कंबलमद्रिदर्या वसन्प्रकंपं न जहाति शत्रुः ॥ २१ ॥
येनार्थिसार्थार्थितपूरणार्थमर्थे [र्थि] जलं चोभयमाददाने ।
सुवर्णशैलांबुनिधिस्वरूपनाशप्रसंगाद्ययतुः प्रकंपम् ॥ २२ ॥
शौर्ये पार्थ इवापरो वितरणे देवद्रुमो वाङ्मय-
व्यापारे सुरराड्गुरुर्वसुमतीरक्षासु विश्वंभरः ।
धर्मे धर्मसुतः कवित्वकलने काव्यः प्रसादे शिवः
सोयं कूर्मकुलैकभूषणमणिर्जीयाच्चिरं माधवः ॥ २३ ॥
यस्याच्छाच्छप्रविततयशोगीतबद्धप्रबंध-
प्रक्षिप्तांतःकरणविवशीभूतभास्वत्तनूनाम् ।
क्रीडंतीनां वनभुवि गले गोपसीमंतिनीनां
गुंजाहारः समजनि जवात्कोपि मुक्ताच्छहारः ॥ २४ ॥
शिरःकुसुमभूषणीकृतकलानिधिस्तारका-
च्छलात्कलितमौक्तिकाभरणभासुरा सर्वतः ।
विभाति वसुधापतेर्गगनमंदिरे चंद्रिका-
वपुश्चपललोचना विमलकीर्त्तिसीमंतिनी ॥ २५ ॥

कुंताभिप्रोतदंताधिकबलनिहतद्वेषिदंतावलौघ-
श्रिंतासंतानसंतापितरिपुवनिताभाग्यसौभाग्यहंता ।
श्रीरंता यस्य नित्यं निवसति विपदंताय हस्कार्णिकायां
सोनंताधीश्वरोऽयं प्रतपतु सुचिरं माधवः क्ष्माधवेशः ॥ २६ ॥
अस्मिन्भूवलये चिरस्य कति नो जाता धराधीश्वरा
येषां कीर्त्तिभरैरभूद्धवलितं भूमीतलं सर्वतः ।
यत्काचाभरणानि पंडितवधूस्तेषु [धूस्नेहेषु] मुक्ताफलं-
त्येतद्दानविधानकीर्त्तिरतुला यत्रैव दृष्टाद्भुता ॥ २७ ॥
यत्प्रतापोष्णकिरणप्रतप्तो विद्विषां गणः ।
शिशिरीकर्तुमात्मानमाश्रितः शिशिराचलम् ॥ २८ ॥
कुंदाभः स्वच्छचंद्रादपि समधिकभा वैरिवृंदावमंता-
मंदानंदानुभावो निजजनहृदयांभोजवृंदावनश्रीः ।
नित्यं यश्चारवंदासन [श्चारविंदासन]भुवनगतो
वाद्यवंदारुगीनः [ वाद्यवृंदोरुगीतः ]
स्वच्छंदं यस्य लोके विलसति नितरामद्भुतः कीर्तिपूरः ॥ २९ ॥
देवेंद्रद्विरदंति निर्जरसरित्पूरंति कुंदंत्यथो
मातंगेंद्ररदंति चारुचमरीवालंति फेनंति च ।
देवाधीशहयंति केतकलसत्पुष्पंति सर्पाधिपं-
त्यृक्षंत्यद्रिकुलेश्वरंति च सुधासारंति दुग्धंति च ॥ ३० ॥
कर्पूरंति हरंति मौक्तिकलसद्धारंति हीरंत्यथो
कैलासंति बिसंति मुग्धदशनज्योत्स्नंति हंसंति च ।
क्षीरोदंति हिमंति चंद्रकिरणग्रामंति रामंत्यपि
श्रीमन्माधवभूमहेंद्रमुकुटालंकारकीर्तिच्छटाः ॥ ३१ ॥
कालिंदीसलिलंति दुर्धरतमःपुंजंति मेद्यत्य[ मेघंत्य ]थो
नीलांभोजकुलंति गारुडमहारत्नंति भृंगंति च ।

काकोलंति पिकंति कज्जलमहाशैलंति दंतावलं-
त्येवं यस्य च विद्विषामपयशस्तोमाः कलंकंति च ॥ ३२ ॥
दानं दातुमिहोद्यतेत्र सततं यस्मिन्धराधीश्वरे
स्वर्णाद्रिर्निजदेहदारणभयात्रस्तः परं कंपते ।
देवाः स्वस्वनिवासनाशचकिताः शक्रादयो बिभ्यति
प्राज्यानंदसमुद्रसांद्रहृदया हृष्यंति चक्राह्वयाः ॥ ३३ ॥
अनुरक्तः सुहृद्वर्गो द्विषतो मलिनीकृताः ।
सितीकृतं जगत्सर्वं यदीययशसा भृशम् ॥ ३४ ॥
पूरयन्नर्थिनामर्थान्विदुषः परिपालयन् ।
विद्विषः संहरन्सर्वांश्चिरं जीयात्स भूपतिः ॥ ३५ ॥
तत्तुष्टयै व्रजनाथेन रम्या पद्यतरंगिणी ।
निबद्धा शोधनीयेयं सद्भिः सारानुरागिभिः॥ ३६ ॥
जयंति के वा न मनोज्ञरूपा वाङात्मदाद्याः खलपक्षिभूपाः ।
क्षीरांबुनोः सारविवेचने तु पुरस्क्रियंते किल राजहंसाः ॥३७॥
नंदाभ्रवसुशीतांशु १८०९मितेऽब्दे मासि पौषके ।
एकादश्यां रविदिने ग्रंथः संपूर्णतामगात् ॥
इति पद्यतरंगिण्यां नृपवंशवर्णनम् ॥

No. 742.

महिम्नः स्तोत्रस्य टीका—श्रीकृष्णनृपः ।

आ०—अत्र तावत्कश्चित्पुष्पदंतनामा श्रीमन्महादेवस्य गणः ईश्वरपूजानिमित्तं कस्मिंश्चिदधिष्ठाने आकाशमार्गेणागत्य उद्यानोपवनवाटिकायाः सर्वपुष्पाण्याहार्यांतरिक्षेणैवागच्छति । तदनु दिनानुदिनमेवं पुष्पाण्याददानस्य कापि पदपद्धतिः केनापि महता यत्नेनापि न दृश्यते । ततश्च कस्यापि महात्मनः उपदेशेन पुष्पवाटिकायां सर्वत्र आरामिकैः

शिवनिर्माल्यमाकीर्यत। ततोस्य शिवनिर्माल्योल्लंघनदोषेण पुष्पाण्यादाय गच्छतो गतेर्भंगः संजातः। ततश्चारामपालकैर्दृष्टो गृहीतो निबद्धश्च। मारणाय संजातराजवाक्ये तेन राजपुरुषानित्यूचे। यदहं राजवाक्यादवश्यं व्यापादनीयः परं यदि भवंतो मां संस्थाप्य ईश्वरदर्शनं कारापयत। ततोहमीश्वरं संस्तूय परलोकं साधयामीत्युक्ते तैश्च राजपुरुषैस्तदनुष्ठितम्। तेनापि कृतस्नाने(न) ईश्वरपुरतः स्तुतिरियं हरिहरयोरभेदेनाकारि। ततश्च स्तुत्यंते तेषां राजपुरुषाणां पश्यतामप्याकाशमार्गेण हरिहरसकाशं संप्राप्तश्चेति किंवदंती श्रूयते। ततःप्रभृति सर्वोयं लोक इमां स्तुतिं सादरं सविशेषां पठत्येव। महिम्न इति ॥

च०—इति श्रीकृष्णनृपविरचिता महिम्नः टीका समाप्ता ॥

N. 743.

मुन्कुदमहिमस्तवः—पुरुषोत्तमप्रसादः।

आ०—श्रीमुकुंदं जगद्योनिं गोपीकांतं रमापतिम्।
ब्रह्मेशानादिभिर्ध्येयं शास्त्रयोनिं नमाम्यहम् ॥ १ ॥
अनंततां श्रीभगवन्महिम्नो
यतः श्रुतिः प्राह ततो न कोपि।
कात्स्न्र्येन वेत्तुं वदितुं च शक्तो
मुकुंद तेऽहं नम एव कुर्वे ॥ २ ॥

च०—श्रीमन्मुकुंदमहिमस्तवमेतमर्थ्यं
यः कृष्णपादकमले यदि रागमिच्छन्।
नित्यं पठेत्प्रयतमानस आदरेण
स श्रीमुकुंदकरुणामृतभाजनं स्यात् ॥ १ ॥

इति श्रीभगवद्वाद्याचार्यनियमानंदसंतत्याश्रयेण श्रीपुरुषोत्तमप्रसादेन विरचितः श्रीमन्मुकुंदमहिमाख्यस्तवः समाप्तः।

N. 748.

मेघदूतटीका—श्रीवत्सव्यासः ।

आ०—उपास्महे गणेशं तं सर्वविघ्नोपशांतये ।
यस्य प्रसादात्प्राप्यंते महिमादिविभूतयः ॥ १ ॥
कश्चित्कांतेति ॥

च०—इति श्रीकालिदासकृतौ मेघदूतकाव्ये श्रीवत्सव्यासकृता शिशुहितैषिणी टीका समाप्ता ॥

N. 756.

रघुवंशटीका—उदयाकरपण्डितः ।

आ०—यस्य भृंगावलिः कंठे वदनांभोजराजिते ।
भाति रुद्राक्षमालेव स वः पायाद्गणाधिपः ॥ १ ॥
कालिदासोक्तयः कुत्र व्याख्यातारो वयं क्व च ।
तदिदं मंददीपेन नाट्यवेद्यप्रकाशनम् ॥ २ ॥
तथापि क्रियतेऽस्माभिः पंजिका रघुवर्णने ।
टीकाविरहखेदार्त्तसाधुसार्थप्रवर्त्तने ॥ ३ ॥...

इति श्रीरघुकाव्ये कालिदासकृतौ पंडितोदयाकरविरचितं रघुकाव्यस्य प्रथमसर्गस्य विवरणं समाप्तम् ॥ १ ॥...

अपूर्ण ।

No. 760.

रघुवंशार्थदीपिका—हरिदासमिश्रः ।

आ०—श्रीमन्मदनगोपालं नत्वा तत्त्वार्थदायकम् ।
सर्वविघ्नापहर्तारं दातारं सर्वसंपदाम् ॥ १ ॥
विष्णुदासतनूजेन हरिदासेन धीमता ।
विरच्यते यथाबुद्धि रघुकाव्यार्थदीपिका ॥ २ ॥

च०—इति श्रीमन्महोदारसंतःकरणमिश्रविष्णुदासात्मजहरिदास-मिश्रकृतायां रघुकाव्यार्थप्रकाशिकायां दिलीपव्रतोपदेशो नाम प्रथमः सर्गः ॥ १ ॥

No. 764.

रसप्रदीपः सटीकः—प्रभाकरः ।

आ०—स्वबिंबमंबाकुचकुंभबिंबे विलोकमानं प्रतिबिंबमानम् ।
प्रचंडशुंडां परितः क्षिपंतं हेरंबमालंबनमाश्रयामः ॥
कलयतु कल्याणत्रयं रघुकुलतिलकः कुलोपास्यः ।
यस्य प्रसादलेशात्कपिभिरकूपारलंघनं विहितम् ॥
ग्रंथांतराद्विशेषो यः स्यादस्मिन्नसौ तु गुणगृह्यैः ।
अवधार्यतां रसज्ञैरज्ञैरितरैर्नरैर्मम किम् ॥

इह तावत्काव्यस्यानेकप्रयोजकत्वेपि रससंवेदनजन्यं सुखमेव मुख्यं प्रयोजनम् ॥

च०—विस्तरेण चेयं वृत्तिरस्माभिरलंकाररहस्ये प्रसाधितेत्युपरम्यत इति ॥

श्रीमत्पुरारिपुटभेदनवासपूतः
श्रीरामचंद्रपदसारसचंचरीकः ।
श्रीविश्वनाथविबुधप्रतिपन्नविद्यः
श्रीमान्प्रभाकर इमं व्यतनोत्प्रबंधम् ॥ १ ॥
भवतु कृरिरियं विदेहपुत्री-
परिवृढपादपयोजयोर्मदीया ।
कठिनविपिनभूमिरेणुखंड-
क्षपणपटुः सरसामृतोर्मिधारः ॥ २ ॥

व्योमाकूपारभूमीशगणे(य)खस्वत्सरे ।
एकोनविंशवर्षे वि[ण] प्रबंधोयं कृतो मया ॥
दोषापहारिरुचिरो विलोलरससंचितः कोपि ।
विलसतु रसप्रदीपो यावत्कल्पं जगत्त्रितये ॥

इति श्रीमर्दिंदुवृंदारकवृंदवंदनीयपादारविंदभूसुरपुरंदरगजङ्गुरुमहामहोपाध्यायभट्टमाधवतनूजनिप्रभाकरोन्नीते रसप्रदीपे व्यंजनानिरूपणो नाम तृतीयालोकः समाप्तः ॥ ॥

## No. 784.

विदग्धमुखमण्डनं सटीकम्—मू० धर्मदासः। टी० दुर्गदासः।

टी०—भा०—विघ्नौघद्विपमर्मभेदनलसत्कंठीरवं प्रोल्लस-
द्विघ्नेशांघ्रिसरोजयुग्ममरणं सौभाग्यसौरभ्यदम् ।
तल्लोभभ्रमणोत्सुकभ्रमरसद्वृंदोपगीतं मुहु-
र्वैदे युक्तिपरागराजितमतिर्प्राचुर्यकार्यन्वहम् ॥ १ ॥
नीरक्षीरविवेकिनः परममी हंसा जयंति क्षितां[ता-]
वाचामंति पयः पयः पुनिरिदं निंदंति नो निंदिताः ।
धिक् दुष्टान् परदोषदुष्टहृदयान् किंवाऽनया चिंतया
युक्तायुक्तविदस्त एव मम चेदालंबनं जाग्रति ॥ २ ॥
कणादिशास्त्रार्थचणाः संति यद्यपि वादिनः ।
गुणं तथापि कवयो जानंति कविसत्कृते(:) ॥ ३ ॥
यो ऽर्थः कथितः प्रथितो गुरुभिः श्रीभट्टदेवचंद्राख्यैः ।
उत्कंठितं स्वशक्त्या विरचयितुं मे मनस्तमेवार्थम् ॥ ४ ॥
यद्यत्पदं स्थगयते स च धर्मदास-
स्तत्तत्र को(पि) कलयेदिति दुर्गदासः ।

श्रीवासुदेवतनयो विनयी तनोति
मुग्धां विदग्धमुखमंडननव्यटीकाम् ॥ ५ ॥

ग्रंथकृद्ग्रंथादाविह शिष्टाचारपालनार्थं प्रवचनं जानन्नेव वस्तु काव्यमुखं प्रस्तौति ॥ सूत्रं ॥ सिद्धौषधानि भव—

च०—७७ इति च्युतदत्ताक्षरा जातिः ॥

इति दुर्गकविकृतायां विदग्धमुखमंडनस्य टीकायाम् ।
वर्गोऽजनिष्ट चतुर्थः क्लिष्टपरिच्छेदवान् परिच्छेदः ॥ १ ॥
समाप्तेयं विदग्धमुखमंडनटीका ॥

No. 815.

साहित्यरत्नाकरः—धर्मसुधीः ।

आ०—आलिंग्य गाढमुदरं पितुरर्धजाने-
रुत्संगवर्त्यवतु बालगजाननो वः ।
यत्कुंभयोर्गिरिसुताकुचपार्श्वभाजोः
स्तन्यं पिपासति गुहस्त्रिभिराननाब्जैः ॥ १ ॥
श्रेयो मे विदधातु शारदशशिश्रीभासुरा भासुरा-
हारासारनिरासकारिमधुरव्याहारिणी हारिणी ।
मुक्ताभूषणपोषणस्मितलवश्रीः साधुना साधुना
(ला)वण्येन निजेन निर्मितवती रंभारती भारती ॥ २ ॥
नमस्तमःकर्दमदुर्दमांबुधिप्रणष्टचेष्टाखिलजंतुसंततिम् ।
प्रसार्यमाणैः पटुदीर्घरश्मिभिर्जगत्त्रयीमुद्धरते विवस्वते ॥ ३ ॥
लक्ष्मीं वक्षसि तारहारवलये तस्याः प्रियं सोदरं
बिभ्रच्छुभ्रमणिं परं च नयने नाभौ च भद्रासनम् ।
ऊरुभ्रूगलनाभिरोमलतिकामिश्राणि पंचायुधा-
न्याश्लिष्यन् करपंकजैरवतु नः कश्चिन्महाकामुकः ॥ ४ ॥

अनंतमत्यंतविशुद्धविग्रहं
महच्चिदानंदमयं निरामयम् ।
अशेषवेदांतविचिंत्यवैभवं
प्रशस्तमस्ति प्रविभास्वरं स्वतः ॥ ५ ॥
तदव्ययं ज्योतिरनाद्यविद्यया
कृतं रजःसत्त्वतमोगुणाद्यया ।
प्रजापतिश्रीपतिपार्वतीपति-
प्रपंचरूपाणि मुहुः प्रपद्यते ॥ ६ ॥
तदेकदात्मन्यखिलं चराचरं
निधाय नारायणनामकं महः ।
फणींद्रपर्यंकजले पयोनिधौ
चिराय रेमे निजयोगनिद्रया ॥ ७ ॥
ततोऽस्य नाभीसरसः सरोरुहं
समुद्बभौ यस्य समस्तमंबरम् ।
वितन्वदिंदीवरशावविभ्रमं
दलांतरालेषु चिरं व्यलीयत ॥ ८ ॥
ततस्ततस्तामरसात्समुद्यत-
श्चतुर्मुखस्तद्रजसेव राजसः ।
जगत्सिसृक्षुर्जगदीशशासना-
त्समाधिसंपन्नमना मनागभूत् ॥ ९ ॥
अस्मात्समाधिसचिवान्मनसस्तदीयात्
पुत्रा मरीचिपुलहप्रमुखाः प्रसूताः ।
यत्पुत्रपौत्रतदपत्यपरंपराभि-
रापूरितोभवदजांडकटाहगर्भः ॥ १० ॥

तेष्वंगिरोमुनिवरादुदयं प्रपेदे
भास्वानिवोदयगिरेर्हरितो मुनींद्रः ।
दोषानुषंगरहितश्च नभोगमार्ग-
भ्रांतो निराकृततमाः शुचियोगदीप्तः ॥ ११ ॥
गोत्रे च तस्य समभूदभिजातवंशो
वाराणसीत्युपपदेन भुवि प्रसिद्धः ।
तत्राभवन्बुधवरास्त्रिपुरारिसोम-
यज्वादयः शुभवपुःश्रुतिशीलवृत्ताः ॥ १२ ॥
देवान् हविर्भिरतिथीनशनैश्च शिष्या-
न्विद्योपदेशविधया परितोषयद्भिः ।
वाराणसीविहितनित्यनिवासदीक्षै-
र्यैः पंडितैर्भरतखंडममंडि पुण्यैः ॥ १३ ॥
सर्वज्ञतः शमितकामरुषो गिरीशा-
च्छ्रीपार्वतीप्रियतमात्त्रिपुरारिनाम्नः ।
तस्माद्बुधाद्बहुमुखोद्गतवाग्विभूति-
र्धर्माह्वयस्समुदभून्महितः कुमारः ॥ १४ ॥
नागांबिकां शुभगुणां प्रतिगृह्य कन्या-
मेकां गृहाश्रममनिवासकृते चिरं यः ।
अन्यप्रतिग्रहभयो निगमागमानां
सत्संप्रदायमकरोदवनावखंडम् ॥ १५ ॥
शंभोर्यदीयशतरुद्रकृताभिषेक-
तोयैर्ललाटगलजाप[ताप]हरैः कपर्दे ।
गंगात्मना परिणतैर्दधिरेवसिक्ता
नूनं जटावलिलता शशिपुष्यशोभा ॥ १६ ॥

यः सप्तवारविहितैर्वर(दप्रसा)दा-
(त्प्रासाद)मंत्रसुपुरश्चरणैर्महेशात् ।
आसन्नमाङ्गरमगान्निजवंशजात-
विच्छेदशून्यविमलाखिलशास्त्रबोधम् ॥ १७ ॥
विधिवदनुष्ठितकर्मा धर्माख्यस्तुधीस्तुसंस्फुरद्धर्मा ।
जनयांबभूव तनयान्नारायणपर्वतेशरामाख्यान् ॥ १८ ॥
पदक्रमपदाक्षरक्रमजटाक्रमारोहणा-
वरोहविषमक्रमाक्रममुखावधानाधुनिम् [नाध्वनि] ।
परिक्रमणचक्रवर्त्यभिधयाष्टदिग्यूढया
चचार बहुशः क्षितौ द्विजरथेन नारायणः ॥ १९ ॥
जित्वा रामावधानिप्रमुखमुरुमरुद्वेगवद्वेदचर्चा-
गोष्ठ्या नारायणार्यः सदसि बुधशतैः श्राव्यमानावदानः ।
संतुष्टाद्धर्मभूपादलभत शिबिकां चामरच्छत्रपूर्वं
गर्वाखर्वावधानीश्वरसरभघटागंडभेरुंडचिह्नम् ॥ २० ॥

तस्यानुजः पर्वतनाथसूरि-
रासीदशेषागमपारदृश्वा ।
ऐकात्म्यलीलायितमादिमानां
षड्दर्शनीजन्मकृतां मुनीनाम् ॥ २१ ॥

एकं कोपि सुदर्शनं भ्रमकरं पाणौ ललाटे दधौ
कश्चित्कामविघातकं पदतले कश्चिच्छिवक्षोभकम् ।
निःशेषभ्रमभंजिकां शिवकरीं कामप्रदां पर्वता-
धीशार्यः समदर्शयद्रसनया षड्दर्शनीमद्भुतम् ॥ २२ ॥
वाग्मित्वद्युतिभुद्धिविष्णुभजनाभीष्टार्थविभ्राणनै-
स्तस्मिन्विस्मयमावहत्यहिपतौ नित्यैकता वारिता ।

द्वित्वं पुष्पवतोः कृशानुषु गतं त्रित्वं चतुष्टं चिरा-
दुत्सन्नं सनकादिषु प्रशमितं पंचत्वमिंद्रद्रुषु ॥ २३ ॥
येन स्वैरमभाणि पाणिनिमतं प्राणादि काणादवाग्-
गुंफे स्पष्टमघट्टि भट्टगुरुवागुद्दीकिते कुट्टिमे ।
निःशंकं निरटंकि शंकरमतं चाक्षोदि चाक्षांघ्रिवाग्-
ध्वन्यध्वन्युदलास्यखंडि निखिला पाखंडखंडाटवी ॥ २४ ॥
यो वादेन जनार्दनाह्वयबुधं मध्येविपश्चित्सभं
जित्वाऽवैदत वादिकेसरिपदं प्रौढं तदीयं स्वयम् ।
मायावादिभयंकराख्यविरुदादस्यूर्जितादर्जितां
किं चोदंचयति स्म कीर्त्तिमतुलां प्रख्यापयन्वैष्णवम् ॥ २५ ॥
आटोपोद्भटनाट्यधूर्जटिजटाकोटीरकोटीनट-
द्गंगातुंगतरंगरिंगणभरप्रस्पर्धिवाग्वैभवः ।
सोयं (स्व)प्रतिभादृषन्निकषणप्रोद्दामषट्दर्शनी-
रत्नस्नङ्मयकंधरो यदनुजो रामाह्वयः पंडितः ॥ २६ ॥
तस्मात्पर्वतनाथसूरिजलधेः श्रीपल्लमांबावियः-
द्गंगासंगजुषो लसद्गुणमणेर्लब्धोदयश्चंद्रवत् ।
सोयं धर्मसुधीर्गवां विलसितैः कर्तुं रसालंक्रिया-
संस्फूर्त्तिं समुदंचयेयमधुना साहित्यरत्नाकरम् ॥ २७ ॥

च०—इति श्रीमन्निभुवनपवित्रहरितगोत्रावतंसवाराणसीवंशपद्माकरभानुना पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायपर्वतनाथपंडितमल्लेश्वरसूर्यसूनुना श्रीपल्लमांबागर्भरत्नाकरपारिजातेन निर्मलाचारपूरितेन चतुर्दशविद्यास्थानसिद्धांतरहस्यविज्ञानवता श्रीधर्मसंज्ञावता विरचिते श्रीमद्रघुकुलतिलकगुणगणमणिधाम्नि साहित्यरत्नाकरनामालंकारशास्त्रे रसनिरूपणं नाम दशमस्तरंगः ॥ १० ॥

आस्थामंदिरमिंदिराप्रणयिनो देवस्य रामात्मन-
स्त्वंगत्तुङ्गतरङ्गरिंगणभरैरंगीकृताडंबरः ।
तादृङ्निर्मलधर्मसूरिकविताकल्लोलिनीवेल्लनैः
पूर्णः कर्णमनोहरो विहरते साहित्यरत्नाकरः ॥ १ ॥

प्राचीनानुभवप्रवृद्धविहितग्रंथानुसंधायिना
सोयं साहसिकेन संप्रति मया नूत्नः प्रबंधः कृतः ।
कः स्तुष्येदमुनाधुनात्यसुलभो बोद्धा च निर्मत्सरः
सर्वज्ञो गतमत्सरोस्ति हि रमारामः स संतुष्यतु ॥ २ ॥

भो मातः कविते हितं मम वचः किंचित्समाकर्णय
श्रीमद्रामगुणस्तवामृतवतो मर्त्यस्तुतिं मा कृथाः ।
कस्तूरीघनसारचंदनरसन्यासोत्सवास्वादुवि-
त्को बीभीत्सवसासृपूयपिशितालेपाभिलाषी भवेत् ॥३॥

संजातो हरितान्वये महतपः [ऽमलतपाः] श्रीपर्वतेशः सुधीः
षण्णां दर्शनकारिणां सुमनसामैकात्म्यलीलाकृतिः ।
धर्माख्येन मनीषिणा विरचितस्तत्सूनुना तादृशा
सोयं यावदिलातलं विजयतां साहित्यरत्नाकरः ॥ ४ ॥

संपूर्णश्चायं ग्रंथः ॥

No. 838.

संगीतसारोद्धारः—कीकराजः ।

आ°—आनंदाब्धिमनेकजन्मसुकृतप्राप्तैकलभ्यं मुनिं
प्रोद्यन्मानसराजहंसमनघं वैकुंठकंठीरवम् ।
ब्रह्मेंद्रादिसुरार्चितांघ्रियुगलं सद्भक्तिचिंतामणिं
नाविंदं कलवेणुवादनपरं दिव्यांगरागं भजे ॥ १ ॥

आसीदुंबदुदारधीरचरितः श्रीमान्कपोलान्वये
साधु(:) सज्जनसंज्ञकः कृतिजनप्रोद्गीयमानोदयः ।
उद्भूता विविधप्रदानजलधेरापूर्य भूमंडलं
प्राप्ता विष्णुपदं विभाति भुवने यत्कीर्त्तिभागीरथी ॥ २ ॥
तदात्मजनिरंजसा विबुधगीतकीर्त्तिः सदा
क्षितीश्वरगणार्चितो जगति कीकराजः कृती ।
परस्परजिगीषया वसति यत्र विद्वाचय-
श्चतुर्भुजपरायणो जयति शारदानंदनः ॥ ३ ॥
यशोदयांकिततनुः सत्यासक्तमनाः सदा ।
सुदर्शनप्रियः कीकराजः कृष्णांशसंभवः ॥ ४ ॥
भरतकश्यपदत्तिलयाष्टिका-
र्जुनसमीरणतुंबुरुनारदाः ।
मुनिमतंगविशाखिलकंबलां
श्वरतप[कंबलाश्यवन]कोहलराहलरावणाः ॥ ५ ॥
व्याख्यातारो भारतीये ये चान्ये लोल्लटादयः ।
अगाधबोधमंथेन तेषां मतपयोनिधिम् ॥ ६ ॥
सम्यगालोड्य कृतिना सज्जनानन्ददायिनी ।
कीकराजेन संगीतसारोद्धारो विधीयते ॥ ७ ॥

च०—१७० इति श्रीश्रीमत्कपोलवंशावतंसमधुश्रीसज्जनात्मज-सकलविद्याविशारदमहनीयचरितमहायशश्शारदानंदकीकराजविरचिते संगीतसारोद्धारे नृत्यप्रकरणं सप्तमं समाप्तम् ॥

No. 869.

वृत्तरत्नाकरः सटीकः—मू०केदारभट्टः । टी०सुल्हणः ।

टी०आ०—श्रीकंठप्रभया युतं रुचिरया प्रोद्भासितं गंगया
नानावक्त्रविराजितं शशिकलापीडोच्छ्रयालंकृतम् ।

आर्योपेतमुपस्थिताखिलगणस्रक्पूजितं सर्वदा
छंदःशास्त्रमिवेश्वरस्य जयति त्रैलोक्यवंद्यं वपुः ॥ १ ॥
कृष्णात्रेयस्य गोत्रे समजनि पुरा दाक्षिणात्याग्रणीयो
वेलादित्याभिधानः सुकविरभवद्भास्करस्तस्य सूनुः ।
तत्पुत्रः सुल्हणाख्यः सुललितपदां वृत्तरत्नाकराख्य-
छंदोवृत्तिं स चक्रे सुकविहृदयानंदिनीनामधेयाम् ॥ २ ॥

च०—सद्वृत्तरत्नाकरनामधेयशास्त्रस्य वृत्तावधिकार एषः ।
प्रस्तारमुख्योऽत्र तु सुल्हणाख्यविनिर्मितायामजनिष्ट षष्ठः ॥ १
प्रमादादौत्सुक्यात्क्वचिदनवबोधेन यदि वा
ममास्यां वृत्तौ ( यत् ) सहृदयजनाः कोमलमतेः ।
अवद्यं चेत्किंचिद्भवति भवतामंजलिरयं
प्रसादं कृत्वा तत्प्रगुणमतिभिः शोध्यमखिलम् ॥ २ ॥
यावच्चंद्रमसश्छलेन विलसद्दीपप्रदीपांचिते
रम्येऽनुक्षपमंतरिक्षफलके बद्धोत्सवं खेलति ।
तारासारदुरोदरेण निखिलं दिक्कामि(नीमंडलं)
जीयात्तावदियं मनोहरपदा वृत्तिः प्रसादात्सताम् ॥ ३ ॥

इति श्री०

No. 887.

गणकमण्डनम्—नन्दिकेश्वरः ।

आ०—नत्वा दुर्गां गणेशं च श्रीमद्वेदांगरायजः ।
नंदिकेश्वरसंज्ञोहं वक्ष्ये गणकमंडनम् ॥ १ ॥

च०—श्रीमद्गूर्जरदेशेऽस्ति विप्रवृंदविभूषितम् ।
श्रीस्थंलाख्यं पुरं रम्यं पुरुहूतपुरोपमम् ॥ १२ ॥

तत्रासीच्छ्रुतिशास्त्रज्ञो रत्नभट्टाह्वयो द्विजः ।
तज्जः श्रीतिगलाभट्टः सर्वविद्यामहोदधिः ॥ १३ ॥
तत्पुत्रोमालजित्संज्ञो वेदवेदांगपारगः ।
येन वेदांगरायेति प्राप्तं दिल्लीश्वरात्पदम् ॥ १४ ॥
पितृभक्तिरक्षप्राज्ञस्तत्सूनुर्नंदिकेश्वरः ।
( सतां ) प्रीत्यै व्यधाद्ग्रथममुं गणकमंडनम् ॥ १५ ॥
ज्योतिर्निबंधमखिलं च तथा मुहूर्त्त-
चिंतामणिं गणकभूषणरत्नमाला[ ले ] ।
ज्योतिर्विदाभरणसज्जनवल्लभाख्यै [ ख्ये ]
दृष्ट्वा त्रिविक्रमशतादि मयेदमुक्तम् ॥ १६ ॥

इति श्रीगणकमंडने गणितप्रकरणांतमष्टमोऽध्यायः ॥

इति पदवाक्यप्रमाणज्ञभट्टश्रीरत्ना तत्पुत्रभट्टतिगला तस्मात्प्रजा(त) वेदांगरायस्तत्पुत्रेण नंदिकेश्वरेण बालविनोदनाय गणकमंडनसंज्ञो ग्रंथो विरचितः संपूर्णतां प्राप्तः ॥

No. 889.

गिरिधरानन्दः—वेदाङ्गरायः ।

आ०—नत्वा श्रीभुवनेश्वरीं गणपतिं विष्णुं च रुद्रं द्विजान्नूनं
ग्रंथपयोनिधीन् दृढधिया निर्मथ्य धीवृद्धिदम् ।
ग्रंथं गौडकुलोद्भवस्य नृपतेरानंदसिद्धिप्रदं
वक्ष्ये बालविनोदनाय विमलं वेदांगराजाह्वयः ॥ १ ॥
सृष्टा ये चतुराननेन च नृपास्ते राजपुत्रादयः
शूरा धर्मरताः स्वधर्मनिपुणाः पूर्वादिदेशस्थिताः ।
वर्षैस्तैः कतिभिर्बलोत्कटभटैर्मध्यप्रदेशोद्भवं
धात्र्या(ः)प्रीतिपरैर्विभज्य सकलं स्थानं स्वकीयं कृतम् ॥ २ ॥

तेषां ये गौडदेशीया राजपुत्रा यशस्विनः ।
भजमेरपदं तैस्तु गृहीतं पुण्यभूमिजम् ॥ ३ ॥
गौडा नृपेंद्रा द्विजदेवभक्ता अरातिचक्राक्रमणेऽतिदक्षाः ।
लोकानुरूपाः सुतरां सुरूपास्तुरंगहेमांबरकुंजराढ्याः ॥ ४॥
तत्रासीच्छ्रुतिशास्त्रमार्गनिपुणो धीरोतिशूराग्रणी-
र्येशोजित्ति नृपोत्तमः सकलजिद्वीर्येण भूभृत्पतिः ।
गांभीर्येण सरित्पतिर्धनपतिर्लक्ष्म्या गुणैः स्वर्पतिः
कांत्या रात्रिपतिर्धिया दृढगतिः सद्विद्यया वाक्पतिः ॥५॥
तत्सूनुर्द्विजदेवभक्तनिरतो भूपानुकंपान्वितो
योगाजीति नृपो ह्यभूत्सुमतिमान् योगींद्रसेवापरः ।
शूरः साहसिको रणांगणरतो दानेतिदक्षः सदा
नूनं सर्वजनप्रियोऽतिचतुरः सौजन्यरत्नाकरः ॥ ६ ॥
तस्यात्मजो धर्मरतोतिवीरो
गोपालदासो नृपतेर्बभूव ।
दील्लीश्वराद्येन च नामधेयं
मांधातृराजेंद्र इति प्रलब्धम् ॥ ७ ॥
सोयं पंडितमंडितोतिनिपुणो देवद्विजाचारितः
स्वाचारेण मुनीश्वरो गुणनिधिः कारुण्यधाराधरः ।
वेदाज्ञापरिपालको दृढमतिर्मांधातृनामा नृपो
येनेदं प्रकटीकृतं हरिपदं श्रीकीर्तिवह्न्याः फलम् ॥ ८ ॥
शिवेन सार्धं हि सदा यथेश्वरी
शुभावहा सिंधुसुता च विष्णुना ।
तथैव मांधातृनृपेण सत्कुला
सदा कुमारीत्यभिधा पतिव्रता ॥ ९ ॥

सा पट्टराज्ञी खलु षट् तनूजान्
सौभाग्यसिंधून् सुषुवे च तस्मात् ।
स्वशक्तिसंपन्नमहाप्रभावान्
प्रायः पुमर्थानिव मूर्त्तिभाजः ॥ १० ॥
तत्रात्मजो ज्येष्ठतमोऽतिशूरो
दाक्षिण्यसिंधुर्गुरुदेवभक्तः ।
अखर्वगर्वः परगर्वहंता
विष्णुप्रियोऽभूद्बलिरामनामा ॥ ११ ॥
तस्माल्लघुः सत्यपरः सहिष्णुः
पदाभिषिक्तो नृपतिर्वदान्यः ।
राजात्मजश्रीरमणीसुखाढ्यः
स्याद्राजते विट्ठलदासभूपः ॥ १२ ॥
द्विजहरिहरभक्तो युद्धकार्येतिशक्तो
धनगजहययुक्तो विट्ठलेशाल्लघुर्यः ।
ननु गिरिधरदासो भूमिपः सत्यवक्ता
परिजनसुखतुष्टः शोभते चातिहृष्टः ॥ १३ ॥
वैरिवर्गविजयस्ततो लघुः
ख्यातिमान् विजयरामसंज्ञिकः ।
बंदिवृंदधनदो विराजते
संकटेपि न च खेदमेत्यसौ ॥ १४ ॥
सत्कर्मधर्मनिरतोऽतितरां प्रवीण-
स्तस्माल्लघुः सकलसौख्ययुतो वदान्यः ।
सत्यप्रियः स च मनोहरदासभूपः
संशोभते सकलवित्खलु धर्मरूपः ॥ १५ ॥

तस्माल्लधीयान् द्विजदेवभक्तः
प्रद्युम्नसंज्ञो नृपतिः सुरूपः ।
सौख्यान्वितः सर्वजनप्रियोऽसौ
स्याद्राजमानेन विराजमानः ॥ १६ ॥

श्रीमन्मांधातृभूपात्सकलगुणयुताश्चान्यदारोद्भवा ये
पुत्रास्तेषां मुकुंदो गुरुरतिनिपुणः श्रीमुरारिस्ततोऽन्यः ।
स्तदन्यो[तस्मादन्यो]विहारी धनजनसहितो रामसिंहस्ततः स्या-
त्सूनुं श्रीभावसिंहस्तदनु दृढतरो विष्णुसेवापरश्च ॥ १७ ॥

देवर्षिभक्तो ह्य[र]णछोडरामो
भीष्मस्ततो भीष्मपराक्रमः सः ।
श्रीवीरभद्रोतितरां हि वीर-
श्चाष्टौ सुताश्चैव मतिप्रगल्भाः ॥ १८ ॥

भूरोतिधीरः सुतरां वदान्यो
धर्मप्रियः श्रीबलिरामसूनुः ।
श्रीमद्रमोमाचरणेषु रक्तो
जीयात्सदासौ शिवराममामा ॥ १९ ॥

जातः श्रीविट्ठलेंद्रो नरपतिविदितश्चानिरुद्धाभिधानः
भूरो येनातिवीर्यं स्वभुजबलवशात्संनिरुद्धं रिपूणाम् ।
तद्वच्चान्योऽर्जुनाख्यो विजितरतिपतिर्देहकांत्यातिधीरो
दानैः श्रीकर्णतुल्योऽर्जुनसमबलवान्निर्मलः स्याद्यशोभिः॥ २०॥

सुकृतकृत्परतापहरो लघु-
र्हरियशाख्य इति प्रबलस्ततः ।
तदनु धीरतरो ननु भीमजि-
त्सुजनपूजनशुद्धतनुः सदा ॥ २१ ॥

जातः शिवप्रसादेन श्रीमद्गिरिधरेश्वरात् ।
धर्मकर्मान्वितः शूरः पुत्रो हरिजनाह्वयः ॥ २२ ॥
श्रीमन्मुकुंदजो भाति ज्यायानुदयभानुकः ।
कनिष्ठो हरिभानुश्च कुलोद्योतकरौ च तौ ॥ २३ ॥

अन्येपि मांधातृनृपस्य वंशे
पुत्राः प्रपौत्रा बहुशश्च शूराः ।
धर्मप्रियाः संति चिरायुषस्ते
भूयासुरित्थं खलु भाविनश्च ॥ २४ ॥

यद्दोर्दंडप्रयुक्तोऽरिकुलगजघटाकुंभभित्खड्गभागः
पीत्वा रक्तं समंताद्भ्रमति बहुतरं कीर्तिकर्पूरमेव ।
तस्य श्रीगौडभूपप्रबलगिरिधरस्याज्ञया चारु कुर्वे
ग्रंथं सत्संहिताभिः कलितगिरिधरानंदनामानमिष्टम् ॥ २५ ॥

इति श्री० श्रीमद्गिरिधरानंदे नानामुनिमतान्विते ।
कुलवर्णनसंज्ञोयमध्यायः प्रथमोभवत् ॥ १ ॥

च०—७१ ॥ 'इति संक्षेपेण स्त्रीजातकम् ॥

आसीद्गुर्जरदेशमंडलमणिः श्रीवत्सगोत्रोद्भवः
श्रौतस्मार्तविचारसारचतुरस्त्वौदीच्यचूडामणिः ।
वेदांताखिलशास्त्रवासरमणिः श्रीश्रीस्थलाख्ये पुरे
रत्नाभट्ट इति प्रसिद्धमहिमा सद्धर्मरक्षामणिः ॥ ७२ ॥

तत्सूनुः कवितालतासुरतरुः साहित्यवारांनिधि-
र्मीमांसाप्रखरार्थपंकजवने भासांनिधिः प्रोद्गतः ।
भट्टः श्रीतिगलाभिधो गुणनिधिः श्रीयज्ञविद्यायुतः
स्वच्छाचारकुमुत्सु शीतकिरणः प्राचां विधाने विधिः ॥ ७३ ॥

तत्पुत्रः क्षत्रवंशाखिलनृपनिवहाभ्यर्चितः स्वच्छपादो
नाम श्रीमालजीति स्फुरदखिलगुणं प्राहुरार्याः प्रवर्याः ।

यं दिल्लीनायकोऽयं व्यरचत विबुधोद्दामवेदांगरायं
सोयं गौडेंद्रभूपंप्रवरगिरिधरस्याज्ञयामुं चकार ॥ ७४ ॥
वृद्धा ये लघवो हि यत्र निपुणास्तान्वच्मि नत्वादरात्
क्षंतव्यं मम तैर्मया यदधुना न्यूनाधिकं कीर्त्तितम् ।
नानानंदभरैः सुकाव्यकुशलैः सुज्ञैर्गुणज्ञैर्धिया
यत्किंचिद्भ्रमतस्तथात्र पतितं शोध्यं महद्भिस्तु तत् ॥ ७५ ॥
इति० श्रीमद्गिरिधरानंदे नानासुनिमित्तान्विते ।
जातकाद्योयमध्यायो ग्रंथोऽपि पूर्णतां गतः ॥

## No. 917.

### ताजिककौस्तुभः—बालकृष्णः ।

आ०—ध्यात्वा तत्सपयःपयःप्रदनिभं विंध्याद्रिसंस्थं महो
यश्चासीत्सकलागमार्थकलनः श्रीरामजित्पंडितः ।
तद्वंशोद्भवभट्टयादवसुतः श्रीबालकृष्णाभिधः
कुर्वे ताजिककौस्तुभं सुललितं विद्वद्धृदाभूषणम् ॥ १ ॥
सत्ये विधिः शास्त्रमधान्न(वै) मुधा
त्रेतायुगे यन्मुनिबादरायणः ।
यद्वापरे गर्गकृतं यथाऽभव-
त्तिष्ये तथा ताजिकशास्त्रजं फलम् ॥ २ ॥

च०—या ताप्युत्तरतीरसंश्रयवती ख्याता प्रकाशा पुरी
यश्चासीदिह याज्ञवल्क्यतिलकः श्रीरामजित्पंडितः ।
षट्शास्त्राध्ययनाधिराट् समभवन्नारायणस्तत्सुत-
स्तत्सूनुर्नयवेदवित्समभवद्यो रामकृष्णाभिधः ॥ १९ ॥
तदंगजो यादवभट्टनामा
नानागमार्थाकलितो बभूव ।

साहित्यपीयूषसुपोषितांग-
श्चित्रप्रकाशो जगति प्रसिद्धः ॥ १६ ॥
इह यादवभट्टजातजन्मा
कृतजंबूसर आलयस्ततान ।
स हि ताजिककौस्तुभाभिधानं
कमनीयं भुवि बालकृष्णभट्टः ॥ १७ ॥

श्रीनारायणशंकरस्तवनके स्तोत्रं शिवायास्ततो
यंत्रोद्धारयुतं महागणपतेः स्तोत्रं त्रिवेण्यास्ततः ।
योगिन्यष्टदशाक्रमश्च तरणेः संक्रांतिजो निर्णयः
पञ्चया यस्य विराजते कृतिरियं पांडित्यचिंतामणिः ॥ १८ ॥

एनं नरस्ताजिककौस्तुभं यः
कंठे विदध्यात्स मनीषिमान्यः ।
सर्वसहामंडलमंडनाय
भवेन्नरेशाग्रगजाश्ववित्तः ॥ १९ ॥
नात्यर्थ्यते चंद्रिकायां चकोरा-
श्चंद्रेणार्थो कल्पपुष्पैर्न भृंगाः ।
तद्वत्स्यादस्मिन्गुणोत्कर्षलेशः
कश्चिन्नूनं पंडिताः संतु सक्ताः ॥ २० ॥
यादृशो मम मतेः परिपाक-
स्तन्निदानवशतोऽयमकारि ।
शोधनं त्विह बुधा यदशुद्धं
प्रार्थनां सफलयंतु ममैनाम् ॥ २१ ॥

इति श्रीमद्भट्टयादवात्मजबालकृष्णभट्टविरचितस्ताजिककौस्तुभः समाप्तिमगमत् ॥

## No. 939.

### प्रश्नरत्नम्—नन्दराममिश्रः ।

आ०—यमक्षरं ब्रह्म वदंति विज्ञा
सिद्धास्तुरीयं यमकर्तृ सांख्याः ।
तं सत्यमानंदनिधिं स्मरामि
श्रीनंदसूनुं श्रुतिभिर्विमृष्यम् ॥ १ ॥
ज्योतिःशास्त्रे पंच शाखाप्रतानाः
सत्यस्तेषां यश्चमत्कारकारी ।
श्रीरुद्रोक्तः केरलिस्तं तु सम्यक्
जानातीशस्तत्प्रसादाज्जनोऽन्यः ॥ २ ॥
ज्ञात्वा किंचित्तत्र कुर्वे प्रबंधं
श्रीगोपालप्रेरणात्प्रश्नरत्नम् ।
स्वर्णैर्वृत्तैर्भातु कंठे बुधानां
नित्यं भूमीपालविद्वत्सभासु ॥ ३ ॥
यद्यपि बहुप्रबंधाः शुक्लपटैः पंडितंमन्यैः ।
रचितास्ते न हि रम्या अतो मयायं समासतः क्रियते ॥ ४ ॥
श्रीमच्छिवेनोक्तमिदं रहस्यं तत्त्वं परं ये श्रुतितत्त्वहीनाः ।
बौद्धादयो वा यवनादयो वा तेभ्यो न दद्याद्यदि धर्मकामः ॥५॥

च०—सिद्धाष्टचंद्रवर्षेऽधियुजः सितपक्षसप्तमगम् ।
पूर्त्तिमगाद्ग्रंथोऽयं पूगाब्धिद्विपमितैर्वृत्तैः ॥ ५४८ ॥

इति मिश्रनंदरामकृतं केरलिशास्त्रे प्रश्नरत्नं नाम समाप्तम् ।

## No. 945.

### प्रश्नसुधाकरः—लालमणिः ।

आ०—सिंदूरारक्तशुंडं सकलबुधजनानन्दकन्दं प्रचण्डं
माद्यन्मातंगवक्त्रं प्रकटकटलसद्दानपूराभिरामम् ।

कामं भृंगीगनाभिर्विरचितसरसोद्गीतसंशोभिगंडं
प्रत्यूहध्वांतधारातरुणिमतरणिं वक्रतुंडं नमामि ॥ १ ॥
ज्ञानप्रदीपादथ प्रभ्रदीपात्संवित्प्रकाशादथ विष्णुतन्त्रात् ।
आदाय सारं मिहिरादिशास्त्राद्ब्रवीम्यहं प्रभ्रसुधाकराख्यम् ॥२॥

च०—मज्जद्वीर्वाणकन्याकुचकलशतटापातसंचूर्णितांभाः
संभोगासक्तरंभाद्यमरपुरवधूनव्यजंभारिकर्त्री ।
प्रौढाहंभावभाजामपि सकलनृणां हंत दंभादिशत्रु-
च्छेदस्वच्छांबुपूरा विलसति भुवने सा त्रिवेणीकृपाणी ॥२८॥
यत्संपर्कात्प्रयागः समजनि सहसा तीर्थराजाभिधानो
यस्मिन्पद्मासनोपि प्रतिदिनमकरोदश्वमेधीयदीक्षाम् ।
यस्मिन्श्यग्रोधवृक्षः प्रलयजलनिधिस्थायिशय्या मुरारे-
र्वेदो यस्यैव गाथां मथयति सहसा मुक्तितात्पर्यवक्त्रीम् ॥२९॥
तस्मात्तीर्थाधिराजात्सकलवसुमतीस्वर्गसोपानमार्गा-
द्याम्ये भागेऽथ विंध्याभिधधरणिधरादुत्तरस्मिन्प्रदेशे ।
आस्तेऽलर्काभिधानं नगरमतिलसत्सूर्यकन्यासमीर-
स्फारोन्मीलद्विलासं सकलवसुमतीमंडनीभूतलोकम् ॥ ३० ॥
ज्योतिर्विद्याविलासप्रणयपटुमतिर्भूमिदेवावतंस-
स्तत्राभूत्कोपि तत्त्वं समधिगतमथो येन वाग्देवतायाः ।
गंगारामाभिधानः सकलनृपसभामौलिमंदारवल्ली-
मालानिर्यन्मरंदव्यतिकररचितापूर्वपद्यादिपूजः ॥ ३१ ॥
क्षीराम्भोधेः कलावानिव विमलयशाः प्रादुरासीत्तदीयः
सूनुः सर्वानवद्याकृतिरचितजगद्रामनामा मनीषी ।
यस्य स्फारैश्चरित्रैरिदमजनि जगत्कौतुकोत्तानिताक्षं
यद्वाचा पूर्णकामाः कथमिव कथयंत्वर्थिनः काकुवाचम् ॥३२॥

कृष्णाराधनलब्धबुद्धिविभवप्रख्यातकीर्तेः सुधीः
श्रीमल्लालमणिर्बभूव तनयस्तेनापि कौतूहलात् ।
यत्प्राचां वचनप्रपंचरचनामालंब्य भव्योक्तिभिः
प्रश्नग्रंथविदां मुदे विरचितः श्रीप्रश्नसौधाकरः ॥ ३३ ॥

इति श्रीज्योतिर्विज्ञगद्रामात्मजज्योतिर्विल्लालमणिकृते प्रश्नसुधाकरे उत्पाताध्यायः संपूर्णः ।

No. 974.

यन्त्रचिन्तामणिः—चक्रधरः ।

आ०—नत्वा भवानीं प्रमथाधिनाथं रविं गुरोरंघ्रिरविंदयुग्मम् ।
यंत्रं च वक्ष्ये गणितानपेक्षं यथाशुबोधः समयादिकानाम् ॥१॥

च०—आसीदमजराजवंदितपदः श्रीवामनो विश्रुतो
ज्योतिःशास्त्रमहार्णवामृतकरः तत्सूक्तिरत्नाकरः ।
तत्सूनुः क्षितिपालमौलिविलसद्रत्नं महज्ञाग्रणी-
श्चक्रे चक्रधरः कृती सविवृतिं सद्यंत्रचिंतामणिम् ॥ २६ ॥

इति यंत्रचिंतामणौ प्रकीर्णाधिकारश्चतुर्थः ॥ ४ ॥

No. 975.

यन्त्रप्रकाशः सटीकः—मू० टी० रामचन्द्रः ।

आ०—शंभोः पदांभोजयुगं प्रणम्य
स्पष्टार्थतां गूढपदानि नेतुम् ।
यंत्रप्रकाशस्य निजाहितस्य
करोति टीकां कविरामचंद्रः ॥ १ ॥
विघ्नोपशमनाय विघ्नराजं प्रणमति ।
व्याकोशनाय मतिकैरवकोरकाणां
विघ्नांधकारपटलीदलनाय पुंसाम् ।

नानामनोरथचकोरकुलस्य पूर्त्यै
बिभ्रज्जयत्यमृतरश्मिकलां गणेशः॥ १ ॥

व्याकोशनाय फुल्लत्वकरणाय कैरवं कुमुदं…

अथ स्वेष्टदेवते उमामहेशौ सकलवांछितार्थसिद्धये प्रणमति ।

संप्राप्याशुः[शु] प्रणतमनुजामामितो[अनुजाभ्यामिवो]माभितः श्री-
वाग्देवीभ्यां कनकरजताभासिनीभ्यामितीव ।
स्वस्वांगाभांकितमचलजाशर्वयोः पादपद्म-
द्वंद्वं वन्दे मिलितवपुषोश्चंपकेंद्वाभकांत्योः ॥ २ ॥…

अथ कविर्निजपूर्वजमहत्वप्रकटनच्छलादात्मनस्तादृशत्वं सूचय-
न्प्रामाणिकप्रणीतो ग्रंथ आदरणीय इति भंग्याह ।

आसीन्मालवदेशमंडनमणिः श्रीश्रीधराचार्य इ-
त्युद्गीतो भुवने समाधिसमये साक्षात्कृतोमापतिः ।
श्रीवत्सान्वयसागरामृतकरः श्रुत्यब्धिकुंभोद्भवः
कैवल्यावगतेरवाप्तमनुजालभ्याखिलप्रत्ययः ॥ ३ ॥

कुंभोद्भवोऽगस्तिमुनिस्तेन यथा प्रागब्धिः कुक्षौ क्षिप्तस्तथानेन श्रुतयः…

सूनुः संक्रमदर्पणो गुणगणस्यास्याभवत्कोविदो
विख्यातः शिवदासमिश्र इति तत्पुत्रो विभाति क्षितौ ।
वेदांभोनिधिपारगः पृथुयशाः श्रीसूर्यदासाभिधो
वंद्यांभोरुहवृंदवासरमणिः श्रौताग्निसेवापरः॥ ४ ॥

अस्य सूनुरस्य गुणगणस्य संक्रमदर्पण इत्यस्य …

अथ गुरुं प्रणमन् भक्त्या जनन्याश्च नाम प्रकाशयन् चिकीर्षितं प्रतिजानीते ॥

नत्वा हीरस्वामिनमनुग्रहात्तस्य लब्धविशदमतिः ।
कुर्वेऽथ विशालाक्षीतनयो यंत्रप्रकाशमहम् ॥ ६ ॥

अथ सतो विज्ञापयन्नसतां चेहानधिकार एवेत्यधिक्षेपमाह ।

सद्भिः सृजद्भिरसतोपि च सत्त्वमस्म-
त्संप्रार्थनेन कृतिराद्रियतामियं नः ।
किं दुर्जनान्प्रति वदामि सुदुर्लभैव
स्वप्नेपि येषु सदसत्त्वविवेकवार्त्ता ॥ ७ ॥

अथ सदसद्विलक्षणानामज्ञानां शिक्षामाह ॥

अज्ञैर्ज्ञातुं सद्रहस्यमप्संगाच्छीततां मनाक् ।
ज्ञात्वोरःसु चिरात्सद्भिः संसृज्यं प्रियमिच्छुभिः ॥ ८ ॥

प्रियं हितमिच्छुभिरज्ञैः ग्रंथस्य रहस्यमन्यद्वा रहस्यं विज्ञातुं सद्भिः संसृज्यं सद्भिः सह संसर्गः कार्यः । संसृज्यमिति 'ऋदुपधाच्चाक्लृपि वृतेरिति क्यप्' । किं कृत्वाप्संगाच्छीततां मनागुरःसु ज्ञात्वा जलसंसर्गाच्छैत्यं भवतीत्येवं किंचित् हृदये विचार्य तद्दृष्टांतवशात्संसर्गात्सत्त्वं भविष्यतीति सत्संगे यत्नः कार्यः । "शीततां मनागिति पदांतस्येति परसवर्णाभावपक्षे रूपम् । 'उरःसु इति' वा शरीति विसर्जनीयपक्षे रूपम्" । तेनात्र श्लोकस्य प्रथमपादाद्यक्षरेण द्वितीयपादद्वितीयाक्षरेण तृतीयपादतृतीयाक्षरेण चतुर्थपादस्य चतुर्थाक्षरेण पुनः पंचमाक्षरेण पुनस्तृतीयषष्ठाक्षरेण पुनर्द्वितीयपादसप्तमाक्षरेण पुनराद्यपादाष्टमाक्षरेण आत्मनो विशिष्टं नामोक्तम् । षष्ठी च तस्येयं कृतिरिति शेषाभिप्रायेण तस्य ग्रंथोपनिबद्धं रहस्यं वा विज्ञातुमज्ञैः सद्भिः संसृज्यमिति संबंधाभिप्रायेणोक्ता ॥

च०—वत्सस्यास्ते महर्षेः प्रयततरकुले सर्वविद्याविदग्धः
सद्बुद्धिः शैवदासीर्बुधनलिनरविर्वीक्षितः सूर्यदासः ।
तत्सूनू रामचंद्रो गुरुगुरुकृपयाध्यायमेतं तु षष्ठं-
वैशालाक्षेय आधाद्बहुलकुतुककृद्यानुयंत्रप्रकाशे ॥ ७३ ॥

सावित्री शिशुनैव यच्चिरमभूद्ध्याता मया भक्तितः
काश्यां स्पर्शमदाच्च कश्चन सुरो यच्छ्रीभवान्याः पुरः ।
शैवाजोपि च पर्यचाययदलं यद्दीक्षया श्रीगुरु-
स्तत्तद्वैभवतो ममामलमतौ श्रीभारती भासते ॥ ७४ ॥
मीमांसाद्वयमूलया फणिपतिप्रोद्गीतभाष्यामृता-
साराभ्युक्षितपाणिनीयधरणौ साहित्यबीजोत्थया ।
सांख्यन्यायपुराणषड्लवितया श्रीरामधीवीबुधा [धीविद्यया]
वेदांगादिफलैः सदुक्तिकुसुमैः को वा न संतोष्यते ॥ ७५ ॥

इति श्रीमहेश्वराचार्यश्रीरामचंद्रविरचितायां स्वविरचितयंत्रप्रकाशटीकायां कुतूहलयंत्रप्रकाशनो नाम षष्ठोऽध्यायः समाप्तः ॥

No. 984.

राजविजयः—रणहस्ती ।

आ०—वरदपाशरदांकुशविस्फु-
त्करनतास्यसरोरुहभास्करः ।
दिशतु नः श्रियमंबुरुहासनः
शशिकलांकितमौलिरिभाननः ॥ १ ॥
यत्पादपंकजयुगप्रणतिप्रसादा-
त्सद्यस्तिरस्कृतबृहस्पतिवाग्विलासः ।
मूकाननेऽपि चतुरा विकसंति वाचो
वंदे गिरीशदयितां जगदंबिकां ताम् ॥ २ ॥
बालं कुमारं परिहृत्य येन
भानुं युवानं च विलोक्य सद्यः ।
त्रयी पुरामेकशरेण भिन्ना
वंदे गुरुं सस्वरमीश्वरं तम् ॥ ३ ॥

आसीत्समस्तनृपमौलिकिरीटकोटि-
रत्नप्रभानिकररंजितपादपद्मः ।
प्रत्यर्थिभूपतरुणीकरुणापयोधि-
वृद्धयै हिमांशुरिह सिंहणदेवभूपः ॥ ४ ॥
तस्य सूनुरभूद्वीरो हम्मीरः सद्गुणाकरः ।
प्रतीपभूपमत्तेभकुंभदारणकेसरी ॥ ५ ॥
जयत्युदारक्षितिपावतंसस्तन्नंदनश्रीमदनक्षितीशः ।
वर्णाश्रमस्याचरणैकहेतुः प्रतीपभूपालकुलैककेतुः ॥ ६ ॥
तेनासकृत्कनकरत्नदुकूलवाजि-
ग्रामातपत्ररुचिराभरणैरनेकैः ।
संमानितः स्वरविदुन्मदराजदुर्ग-
केतुः क्षितौ विजयते रणहस्तिनामा ॥ ७ ॥
ब्रह्मेशविष्णुरचितामलयामलेभ्यः
सारं विचिंत्य गिरिजादिमतानुसारम् ।
आरच्यते स्वरविदामखिलार्थसिद्धयै
तेनेह राजविजयो रणहस्तिसंज्ञः ॥ ८ ॥
रक्षा सतां नृपधनाहरणेन चेष्टो
धर्मस्त्वयत्न इति दिग्विजयोद्यतस्य ।
भूवल्लभस्य दुरितं द्विषतो निहंतु-
र्न स्यान्मखेष्विव पशून्विधिनोदितेन ॥ ९ ॥
उत्साहप्रभुमंत्रशक्तिसहितः श्रीमान् विनीतेंद्रियो
नित्यायव्ययवित्क्षमी त्वनलसः प्राज्ञः प्रभारंजकः ।
धीरः सच्चरितः स्वरैरनुदिनं विज्ञातलोकस्थिति-
र्नित्योद्योगपरः क्षितीशतिलकः स्यात्संपदामास्पदम् ॥ १० ॥

अपूर्णः ।

No. 989.

## लग्नसारसमुच्चयः ।

आ०—अथातः संप्रवक्ष्यामि लग्नसारसमुच्चयम् ।
येन विज्ञानमात्रेण त्रैलोक्यं दृश्यते स्फुटम् ॥१॥...

मूर्ते नवमे स्थाने सर्वोत्तमबलो ग्रहो भवति प्रस्तावात्संख्यैर्दिनैर्मासैर्वर्षैर्वा तत्प्रयोजनं भवत्येव । यथा संवत् १६६६ वर्षे आषढ शुदि १५ शुक्रे वृश्चिकलग्ने वहमाने पाश्चात्ये सार्धप्रहरोद्देशे पृच्छकस्यापि अमुको बंदिगृहान्मोक्ष्यते इति ।

च०—यल्लग्नं चंद्रराशिप्रथमार्धे भवति केंद्रस्थो दृश्यते तदा देवदत्तोपि गृहेऽस्ति कथनीयम् । विपरीते विपरीतम् ॥ ८ ॥ इति लग्नसारसमुच्चयः संपूर्णः ॥

No. 1001.

## लोकमनोरमा—गर्गः ।

आ०—प्रणम्यानंदरूपं तमानंदैकानिकेतनम् ।
गर्गो बुद्धिमतां प्रीत्यै प्रश्नविद्यामथाकरोत् ॥ १ ॥

च०—इत्येवमेकत्रिंशद्भिः श्लोकैर्लोकमनोरमा ।
प्रश्नविद्या मया प्रोक्ता देया शिष्याय साधवे ॥ ३३ ॥

तथा विशेषेण ।
उक्तेऽप्यनुक्ते मूलांके तद्वत्क्षेप्यं सदा बुधैः ।
स्वानुभूत्या विशेषोऽयं मोहनेन विचारितः ॥ ३४ ॥
सितं रक्तं तथा पीतं कृष्णं चित्रं हरीतकम् ।
शुष्कमार्द्रं तथा द्राभ्यां भक्ष्याभक्ष्यमिदं क्रमात् ॥ ३५ ॥
इति श्रीगर्गाचार्यविरचितश्लोकमनोरमा संपूर्णा ।

## No. 1026.

### हिल्लाजव्याख्या—रामेश्वरः ।

आ० रामो भैरवपद्युगं गुरुवरं तातं तथा श्रीपतिं
गोविंदाख्यगुरुं प्रणम्य कृतिनं दैवज्ञचूडामणिम् ।
योऽकार्षीदुरुसंहिताब्धितरणिं पीयूषधाराभिधां
चूडामण्यभिधां विचार्य कुरुते हिल्लाजटीकां कृती ॥ १ ॥

सृष्ट्यादौ कमलोद्भवेन गदितं सूर्यं प्रति प्रांशु त-
च्छापान्म्लेच्छगतोऽथ रोमकपुरे म्लेच्छेषु यद्दृष्टवान् ।
शास्त्रं ताजिककं ततस्तदभिधं पश्चात्सुपद्यैरितं
श्रीमद्रोमककेन तन्मतमभूत्सत्यत्ययं तत्ततः ॥ २ ॥

खिंदाख्यः कृतवान्सुपद्यललितैर्हिल्लाजसंज्ञं शुभं
ज्ञात्वा रोमकजं पुरान्यपठितं जन्माब्दपृच्छात्मकम् ।
तन्नष्टे त्वधुना तथापि च तदायुर्दायपद्यात्ततो
दुर्बोधात्सुजनस्य बोधविधये स्पष्टं तु कर्त्तुं सुधीः ॥ ३ ॥

ननु हिल्लाजस्य आयुर्दायाद्यर्थं प्रवृत्तिः स च जातकपद्धतिरेव सिद्धम् । एवं सति हिल्लाजस्याऽप्रवृत्तिविषयत्वात् । तत्र तद्विवरणकर्तुः सुतरां प्रवृत्तिर्लघीयसीतिचेन्न । जातकपद्धत्युक्तायुर्दायस्याऽघटकत्वात् । तथा च हिल्लाजभाष्ये ।

ताजकजातकजनितं जन्मफलं कीर्त्तयेन्न शकजातेः।
तस्मात्पद्धतिमार्गं स्फुटं न घटते फलं तेषाम् ॥ १ ॥
दृष्टिर्मैत्रं वा दृग्महवीर्यं पंचवर्गिकापूर्वम् ।
सर्वं दलीलसंज्ञं होराशास्त्राद्विसंवादी ॥ इति ।

पूर्वपद्यस्यायं भावः । यस्मात्पद्धतिमार्गजनितं फलं स्फुटं न घटते तस्माल्लोकानां शकजातेस्ताजकजातकजनितं जन्मफलम् ।

कोर्थः। यवनव्यतिरिक्तोक्तजातकताजकफलमित्यर्थः। तं न कीर्त्तयेत्। तर्हि केनोक्तं फलं कीर्त्तयेदित्यत्राह। दृष्टिरिति। दृष्ट्यादि सर्वमेतद्दलीलसंज्ञं यवनसंज्ञं यवनोक्तमित्यर्थः। दलील इति भाषया यवनोक्तलक्षकम्। यद्वा। दलील इति हिल्लाजोपलक्षकम्। एतत् होराशास्त्रादिसंज्ञादि।----पुण्यसहम तत्पती पर्वलग्नतत्पती क्रूरविशुद्ध्या द्रष्टव्यावित्यर्थः। अमुना प्रकारेणैषां चतुर्णां मध्ये यस्यैव संभवः तद्ग्राह्यं तद्धिल्लाजसंज्ञं भवतीत्यर्थः। हिल्लाजशब्देन शरीरमुच्यते। चतुर्णां मध्ये यदा एकस्यापि हिल्लाजसंभवो नास्ति तदा तज्जन्मस्थं अल्पजीवितं स्यादित्यर्थः।-----अत्रोदाहरणम्। चतुर्दशशतचतुःषष्टिवर्षाधिके शालिवाहनशके १४६४ जाते कार्तिक शुद्ध षष्ठी शनौ सूर्योदयाद्गतघटी एकोनपंचाशत् घटी ४९ नवपलानि ९। श्रीमत्सस्तपृथ्वीमंडलाधिप अक्कबरसाहस्य जन्मकालः।...वामनजातके दर्शितः। यथा। रसांगाष्टशरा पंच--------संज्ञातंत्रे दर्शिताः आद्याः कुजाद्या रवितोपि मध्यमाः...

इति श्रीक्षीरसागरोपनामकश्रीपतिभट्टांगजरामेश्वरविरचितायां हिल्लाजव्याख्यायां चूडामण्यभिधायामायुर्दायप्रकृतिः समाप्ता॥ १॥

च०—इति श्रीरामेश्वरविरचितायां हिल्लाजव्याख्यायां चूडामण्यभिधायां प्रभायुर्दायः समाप्तः।

No. 1029.

हेरामकरन्दः—गुणाकरः।

आ०—उदयशैलभुजंगफणामणि-
र्दिवसभूरुहनूतनपल्लवः।
दिशतु नः स गिरं महसां निधि-
र्बुसरसीसरसीरुहमुल्लसन्॥१॥

जयति विबुधशंसन्मानसावासहंसी
वचनमयशरीरा भारती हारगौरा ।
तदनु च विजयंते सूर्यमुख्या ग्रहेंद्रा-
स्तदपि च पदपद्मद्वंद्वमस्मद्गुरूणाम् ॥२॥
यो बादरायणवशिष्ठपराशराद्यै-
र्होराविधिर्विरचितो विविधांस्तदर्थान् ।
विज्ञाय सम्यगधुना वयमप्यविज्ञा
यत्कुर्महे किमपि भोत्र गुणास्तदीयाः ॥३॥
जडात्मके मद्धृदयेंदुबिंबे संमूर्छिता मोहमहांधकारम् ।
निरस्य शश्वन्मुदमावहंत्यो जयंति रम्या मिहिरस्य गावः॥४॥
होरोत्पले राजमृगांकगोभिर्विकासिते सत्यमलाभिरत्र ।
पुष्पंधयस्येव ममानुगीतिरियं सतां श्रोतृसुखाय किं तु ॥५॥
स्वतातपादांबुजचंचरीको गुणाकरः संप्रतिमुच्चिनोति ।
इयं हि होरामकरंदमाद्यानवद्यहोरासुमनश्चयेभ्यः ॥ ६ ॥

च०—श्रीनारायणसंज्ञको द्विजवरो विद्यावधूवल्लभः
श्रौतो येन विधिः कलौ कृतयुगोत्कर्षं परं प्रापितः ।
ग्रामोऽवंतिविभूषणैकतिलकः खर्जूरनामाह्वय-
स्तस्मिन्सद्गुणकेलिभूसुर[भूषण]मभूत्कौंडिन्यगोत्रोद्भवः ॥१६॥

तस्मादभूदमलसद्गुणरत्नसिंधोः श्रीभीपतिर्गणककैरवशीतरश्मिः ।
गोचक्रवालममलं सुमनश्चकोरा यस्यानिशं श्रवणचंचुपुटैः पिबंति॥१७
श्रीब्रह्मपुत्रार्यभटोत्पलाख्यवराहलल्लेषु दिवं गतेषु ।
निराश्रयेयं समवेक्ष्य वाणी विलासवासं रचयांचकार ॥१८॥
दृष्ट्वा यद्यशसेंदुपादमहसा शुक्लं त्रिलोकीतलं
ज्योत्स्नापानधिया धयंति परितो मुग्धाश्चकोरांगनाः ।

तत्पुत्रेण गुणाकरेण गणकानंदेंदुना जातकं
श्रीहोरामकरंदसंज्ञमरचि ज्योतिर्विदां प्रीतये ॥ १९ ॥
यदज्ञानान्नोक्तं कुकृतमिह यद्वाल्पमतितो
विदोषं तत्कर्तुं स्वयमपि यतंते सुमनसः ।
विनाशे दोषाणामभिलषति या त्रात [पद्मानि]सविता
न पर्जन्यः सम्यक् जनपदनिदाघक्षयकृते ॥ २० ॥

इति श्रीगुणाकरविरचिते होरामकरंदे जातके नष्टजातकनामैकत्रिंशोऽध्यायः समाप्तः ।

No. 1030.

होरारत्नम्—बलभद्रः ।

आ०—होरापाथोनिधेः पारं दुःपारं तर्तुमिच्छतः ।
महागणपतेः शुंडावलंबाय प्रजायते ॥ १ ॥
अस्ति श्रीमत्कान्यकुब्जाभिधानं सद्विप्राणां संभवे यन्निदानम् ।
तत्रैवाभूच्छ्रीभरद्वाजवंशे श्रीमल्लालः कीर्त्तिविद्याविशालः ॥२॥
तदात्मजोऽभूत्कृतिदेविदासो विद्यारमाकीर्त्तिसुखैकवासः ।
सत्पद्धतौ श्रीपतिनिर्मितायां व्यक्ते च टीकामकरोद्विचित्राम् ॥३॥
तस्माल्लघुर्ज्योतिषशास्त्रविज्ञः श्रीखेमकर्णः समभूद्विधिज्ञः ।
नारायणोऽभूच्च ततः कनिष्ठः सर्पाधिपोक्तौ सुतरां पटिष्ठः ॥४॥
ततोऽभवन्मिश्रचतुर्भुजाख्यः सत्तर्कवेदांतविदग्रगण्यः ।
समस्तभूमीपतिलब्धमानः श्रीरामभक्तौ विहितैकतानः ॥ ५ ॥
ततोऽभवद्रूपसभास्वजेयः कृती च दामोदरनामधेयः ।
श्रीभास्करोक्तावकरोन्मनोज्ञां टीकामपूर्वां बुधवृंदयोग्याम् ॥६॥
दामोदरस्य पुत्रौ जातौ बलभद्रहरिरामौ ।
बलभद्रेण कृतं प्राक् सवासनं टिप्पणं च मकरंदे ॥ ७ ॥

तद्विप्पणं भास्करीये च बीजे कृतं जातके वर्षरत्नं त्वपूर्वम् ।
निबंधं गुरोः पादपद्मप्रसादाद्यतो जातके सन्निबंधं करोमि ॥८॥

यद्यपि कृता निबंधाः सुविस्तरा जातके पूर्वैः ।
विद्वन् ततो विशेषा मयोदिता बुद्धिपूर्वकं वीक्ष्य ॥ ९ ॥

नत्वा दामोदरं तातं गुरुं श्रीरामसंज्ञकम् ।
होराबलं विन्मुदे[वितनुते] बलभद्रः सतां मुदे ॥ १० ॥

च०—वाशिष्ठगर्गादिमुनिप्रणीतान्वराहकल्याणकृताञ्चिरीक्ष्य ।
सज्जातकान् जन्मफलक्रमार्थं सुसंप्रदायाद्रचितं मयेदम् ॥१॥

औदार्यगांभीर्यविराजमानः स्वतेजसा[रिप्रह] ताभियानः ।
बलान्वितः सद्गुणताभिधानः पृथ्वीपतिः साहयुताधिनाथः॥२॥

तदंतिकस्थेन कृतं मयैतत्खचंद्रसप्तेंदुमितेऽब्दकाले ।
मधौ चतुर्थ्यां सितपक्षजायां विमत्सराणां कृतिनां सुखाय॥३॥

इति श्रीमद्दैवज्ञवर्यपंडितदामोदरात्मजबलभद्रविरचिते होरारत्ने स्त्रीजातकाध्यायो दशमः । समाप्तोऽयं ग्रंथः ॥

## No. 1115.

## कौतुकरत्नावली ।

आ०—अथ कौतुकरत्नावली लिख्यते । पर्वतरत्नावली तच्चिकित्सा लिख्यते । संयोगादीत(र)द्विविधं शौर्यवता राज्ञा व्यसननिरसनकौतुकावलोकनेनैव कालयापनं कर्तव्यमित्युक्तवंतः । प्राप्तावसराणि कौतुकानि संक्षेपतो निरूप्यंते । तान्येव कौतुकानि द्विविधानि । एके अर्थरूपाणि । अपरे शब्दरूपाणि । तत्र प्रथममर्थरूपाणि स्तंभनवशीकरणवाजीकरणकृत्रिमवस्तुकरणजनादृश्यकरणवृक्षदोहदादिभेदान्यनेकप्रकाराणि । शब्दरूपाणि । द्वितीयानि तु शब्दालंकारकृतगद्यपद्योभयात्मककाव्यरूपाणि...

अपूर्ण ।

No. 1120.

## गौतमीयतन्त्रम्।

भा०—सिद्धाभमे वसन्धीमान्कदाचिद्गौतमो मुनिः।
तपःस्वाध्यायनिरतो भक्तिमान्पुरुषोत्तमे ॥ १ ॥

च०—अस्यालोकनतश्चित्ते कृष्णात्मा संप्रसीदति ॥ १११ ॥

इति गौतमीयतंत्रे सर्वतन्त्रोत्तमे द्वात्रिंशत्तमोऽध्यायः ॥३२॥

No. 1137.

## मन्त्रचन्द्रिका—जनार्दनः।

भा०—आरक्ताभं त्रिनेत्रं पृथुतरजठरं वेदहस्तान्दधानं
बिभ्राणं मौलिदेशे हिमकरशकलं दामधाराग्रकुंभम्।
ब्रह्मेंद्राद्यैः समस्तैरमरपरिवृढैः सेवितं शुभ्रदंतं
भोगींद्राढ्यं प्रसन्नं सकलशुभकरं तं भजेऽहं गजास्यम्॥ १॥

उदितदिवाकरदेहां पुरहरवामांगकृतगेहाम्।
परिपूरितभक्तेहां सस्नेहां शैलजां वंदे ॥ २ ॥

पीयूषांशुकलां मनोज्ञमुकुटां शैवालतुल्यालकां
भालश्रीविजिताष्टमीशशधरां नीलारविंदेक्षणाम्।
चापं बाणगुणांकुशान्मृदुतरैः संबिभ्रती बाहुभिः
प्रत्यंगं सुमनोरमामरुणभां वंदे गिरींद्रात्मजाम् ॥ ३ ॥

कलिंदीकलकूलकेलिकलनानंदाकुलैः संततं
संवीतं शिशुवृंदकैर्मुनिवरैर्गीतं गुणैकालयम्।
लीला(नाशित)विश्वविश्वभयदाशेषान्नपानीककं
संसारैकमहाद्रुमस्य रुचिरं कंदं मुकुंदं भजे ॥ ४ ॥

मुरलीरवरंजितविश्वजनस्तनुभाविजितोत्तमनव्यघनः।
चलदृक्चपलानित्रयेन वृतस्तनुतां मम शर्म मुकुंदहितः ॥ ५ ॥

फुल्लंति वारिजगणा विहरंति लोकाः
कामं चरंति विहगाः सकलासु दिक्षु ।
शिष्याः पठंति च भवंति शुभानि लोके
यस्योदये तमहमाशु रविं नमामि ॥ ६ ॥
यः पंगुसारथिरथो रथमेकचक्र-
मारुह्य तत्र विनियोज्य च सप्त सप्तीन् ।
लोकत्रयेप्यटति चित्रचरित्रकारी
भानुः स भानुभिरहो मम पातु देहम् ॥ ७ ॥
यो योगिनामपि मनश्चपलीचकार
पुष्पेषुभिर्व्यथयति स्म यवीयसो यः ।
तं मंक्षु नेत्रशिखिना शमयांचकार
मारं हरं तमहमाशु नमामि भक्त्या ॥ ८ ॥
चलच्चरणताडितक्षितितलं सुपर्वापगो-
च्छलज्जलभृतांतरं भ्रमितभीमनेत्रत्रयम् ।
जटापटलभेदितोपरिचरांबुदं धूर्जटे-
स्तनोतु पटुतांडवं मम नवं नवं मंगलम् ॥ ९ ॥
आसीदागमशास्त्रकीरवसतेः सत्पंजरः सज्जन-
व्यूहानंदकरः कलानिधिकलाभालप्रियाकिंकरः ।
नानाशास्त्रविचारचारुकवितासंदोहविज्ञाखिल-
प्राज्ञस्तोमपरिष्टुतो बुधवरःश्रीश्रीनिवासः कृती ॥ १० ॥
आसीदशेषनरपालविशालभाल-
जालप्रमार्जितमनोरमसत्पयोजः ।
सर्वागमांबुनिधिमंथनमंदराद्रिः
श्रीश्रीनिवासतनयस्तु जगन्निवासः ॥ ११ ॥

तन्नंदनाः सुकृतिनः करुणार्द्रचित्ताः
शैलेंद्रजाचरणपंकजचंचरीकाः ।
ज्येष्ठः शिरोमणिरिति प्रथितः कनिष्ठ-
स्तस्माज्जनार्दन इति ह्यनुचक्रपाणिः ॥ १२ ॥
जनार्दनाभिधस्तेषु यथामति कुतूहलात् ।
तांत्रिकात्यंतबोधाय कुरुते मंत्रचंद्रिकाम् ॥ १३ ॥
मंत्राणि यानि ह शिवार्चनचंद्रिकायां
श्रीश्रीनिवासकृतिना प्रकटीकृतानि ।
सर्वाणि तानि मुनिचिंतनयुक्षडंग-
युक्तान्यविस्तरतयेह वदामि साधु ॥ १४ ॥
आदौ गणपतेर्मंत्राःशिवायास्तदनंतरम् ।
ततः कृष्णस्य सूर्यस्य शंभोश्चोक्ता यथाक्रमम् ॥ १५ ॥

च०—इति मंत्रचंद्रिकायां द्वादशः प्रकाशः।

यावत्सूर्यश्च सोमश्च यावत्तिष्ठंति देवताः ।
तावदास्तां धरामध्ये रुचिरा मंत्रचन्द्रिका ॥

No. 1167.

अजितशान्तिजिनस्तवटीका—जिनप्रभसूरिः ।

च०—संवद्विक्रमभूपतेः शरऋतूदर्चिःशशांकैर्मिते
पौषस्यासितपक्षभाजि शनिना युक्ते द्वितीयातिथौ ।
श्रीमाञ्श्रीजिनसिंहसूरिसुगुरोः पादाब्जपुष्पंधयः
पुर्यां दाशरथेर्जिनप्रभगुरुर्जैग्रन्थ टीकामिमाम् ॥ १ ॥

No. 1169.

अध्यात्मबिंदुः सटीकः—मू०टी० हर्षवर्धनः ।

टी०आ०—अनंतविज्ञानविभूतिशाली
सत्प्रातिहार्याद्भुतभूतिमाली ।

तीर्थांतरीयानवबुद्धयोगा-
गमार्थदेशी जयताज्जिनेंद्रः ॥ १ ॥

अथातः शुद्धात्मानुभवरसिकानामनेककदागमार्थश्रवणकुदृष्टयुपासनसंस्तवनादिक्रियाभासप्रक्रियापर्यायात्मतत्त्वविप्रतिपत्तीनां भव्यसत्त्वानामुपकाराय शुद्धात्मस्वरूपप्रतिपादनपटिष्ठाध्यात्मबिंदुप्रथमद्वात्रिंशकाविवरणं स्पष्टमुपक्रम्यते । तस्य चेदमादिपद्यम् ।

मू० आ०—ब्रूमः किमध्यात्ममहत्वमुच्चै-
र्यस्मात्परं स्वं च विभज्य सम्यक् ।
समूलघातं विनिहंत्यघानि
नाभेयभूः केवलमाससाद ॥ १ ॥

मू० च०—इत्येवं संप्रधार्य द्रुततरमखिलं भेदसंविद्बलेन
जीवाजीवप्रपंचं विदलति किल यो मोहराजानुवृत्तिम् ।
ज्ञानानंदस्वरूपे भगवति भजत्यात्मनि स्थैर्यमाशु
प्रक्षिप्याज्ञानभावं स भवति न चिराच्छुद्धबुद्धस्वरूपः॥३२॥

टी० च०—ज्ञानस्य परिपूर्णात्मसचेतनाभावात्परिपूर्णस्यैकस्यात्मनोपि ज्ञानं न सिद्धयेदिति ॥ ३२ ॥

इति स्वोपज्ञाध्यात्मबिंदुविवरणे सदुपाध्यायश्रीमद्धर्षवर्धनविरचिते प्रथमा द्वात्रिंशिका समाप्ता ।

No. 1174.

अष्टलक्षी वा अर्थरत्नावली—समयसुन्दरः ।

आ०—श्रीसूर्यः श्रेयसे भूयाद्भक्तितत्परभूसृशाम् ।
यस्य नामसहस्रस्य जपः पापहरो भवेत् ॥ १ ॥
सांनिध्यं कुरुते ब्राह्मी देवता वरदायिनी ।
सेवका यत्प्रसादेन साधयंतीप्सितं फलम् ॥

राजा नो ददते सौख्यमिति श्लोकैकपादस्य मया निजबुद्धिवृद्धिनिमित्तं अर्थाः क्रियंते। तत्र प्रथमं श्रीसूर्यदेववर्णनमाह।

राजा नो ददते सौख्यम् ॥
सावित्री भविता राजा विसृजो विधृणो विराट्।
सप्तार्चिः सप्ततुरगः सप्तलोकनमस्कृतः ॥ १ ॥

इति स्कंदपुराणे श्रीसूर्यसहस्रनामांतर्भणितत्वात्। राजा श्रीसूर्यः नोऽस्माकं सौख्यं ददते ददाति।

च०—अष्टलक्षार्थी संपूर्णा। अघटिताविसंवादिनी च ज्ञेया।
सर्वे ८०००० ॥ अथ प्रशस्तिः ॥

वर्धमानो जिनो जीयाद्वर्धमानो गुणव्रजैः।
तीर्थं यदीयमद्यापि जागर्ति जगतीतले ॥ १ ॥

श्रीगौतमाद्या गणधारिवर्या
यच्छंतु मे वाञ्छितमच्छबुद्धयः।
यद्वाक्यमुक्ताफलदाम रामं
कुर्वंति कंठे कृतिनः प्रकामम् ॥ २ ॥

श्रीहरिभद्रमुनींद्रप्रमुखा मां पूर्वसूरयः पांतु।
इमंजुण[शुद्धहृदयमंजूष]मध्ये यद्गुणरत्नानि धार्यंते ॥ ३ ॥

श्रीमद्देवाचार्याः पूर्वाचार्या प्रभूतगुणवर्याः।
समभूवन्भवसागरतरणे वरतरणचरणयुगः ॥ ४ ॥

तत्पट्टमलंचक्रे नेमिचंद्राख्यसूरिराट्।
यद्वचोऽमृतपानेन प्रापुर्निर्जरतां नराः ॥ ५ ॥

तदनु द्योतविद्योती सूरिरुद्योतनोऽभवत्।
उद्यद्विहारविख्यातः प्रद्योतन इवाद्भुतः ॥ ६ ॥

यकशोधयैंमासवै[यकःशोधयामास वै]सूरिमंत्रं
गिरींद्रार्बुदस्याद्भुते शृंगभागे।
विधायांष्टमं संनमन्नागनाथ-
स्ततोवर्धमानाभिधः सूरिरासीत् ॥ ७ ॥
श्रीमद्दुर्लभराजराजसदसि श्रीपत्तने पत्तने
वादं श्वेतपटैः प्रभूतकपटैः साकं सदा लंपटैः।
कृत्वा यः प्रकटीचकार वसतेर्मार्गं मनोहारिणं
सूरिजयो[सूरिर्भूरिजयो]जिनेश्वरगुरुर्जातो
जगद्विश्रुतः ॥ ८ ॥
संवेगरंगशाला येन कृता जगति लोकहितहेतुः।
जातः श्रीजिनचंद्रः सूरिस्तत्पट्टम[ग]श्चंद्रः ॥ ९ ॥
अतिचंगनवांगवृत्तिकार खरतरगणनायक सुगणधीर।
यशसायुत जय चिरमभयदेव भूरीश्वरकृतचरणसेव॥१०॥
कृत्वा समीपेऽभयदेवसूरि[रे]र्येनोपसंपद्ग्रहणं प्रमोदात्।
पपौ रहस्यामृतमागमानां सूरिस्ततः श्रीजिनवल्लभोऽभूत् ॥११
जिग्यिरे येन योगिन्यश्चतुःषष्टिर्यतींदुना।
सूरिः श्रीजिनदत्तोऽभूत्तत्पट्टांबुजभास्करः ॥ १२ ॥
ततस्तनुभृतां प्रियः समजनिष्ट शिष्टक्रियः
प्रणष्टतिमिरोत्करः सुजिनचंद्रसूरीश्वरः।
कवित्वसुममालिको नरमणीमनोज्ञालिको
तमभि[ततो नि]खिलनायकः प्रबलसौख्य-
संदायकः ॥ १३ ॥
जिनपतिसूरिजिनेश्वरसूरीश्वरजिनप्रबोधजिनचंद्राः।
तत्पट्टानुक्रमतोऽभूवन्भूपीठविख्याताः ॥ १४ ॥

यस्यादेशाद्वरतरवसत्याख्यचैत्यं प्रचक्रे
तेजःपालो विपुलविभवोपि स्वयं तत्र चैत्ये ।
---
यः प्रातिष्ठत्त्रिभुवनगुरोः शांतिनाथस्य बिंबम् ॥ १५ ॥
सोऽभूच्छ्रीमज्जिनकुशलराट् सूरिराजीतुराषाट्
---
---
--- ॥ १६ ॥
(प्राप्या)नेकविवेकसेकविलसत्क्ष्मापालजंबालज-
प्रत्यग्रप्रतिबोधबंधुररविः प्रत्यर्थिभूभृत्पविः ।
चक्रुर्बालसरस्वतीति सुतरां ख्यातिं क्षितौ प्राप्य न
---
---॥ १७ ॥
तदनु विगततंद्राः पश्चिमांभोधिमंद्रा
कुशलकुमुदचंद्रा प्रतभ[द्राःपूर्वभृ]त्यांगिभद्राः।
प्रणमदमरचंद्रा निर्जितश्लोकचंद्रा
इह भुवि जिनचंद्राः सूरिराजीसुरेंद्राः ॥ १८ ॥
यद्दीक्षिताः समभवन् यतिनः सुशिष्याः
श्रीद्वास्य[श्राद्धाश्च]संघपतयोर्पितवासयोगात् ।
प्राप्तोदयः प्रवरलब्धिसमृद्धिसिद्धेः
पात्रं ततोऽजनि जिनोदयसूरिराजः ॥ १९ ॥
रेजिरे राजराजास्या राजराजिनमस्कृताः ।
श्रीजिनराजसूरींद्रा भव्यराजीवभास्कराः ॥ २० ॥
श्रीमज्जेसलमेरुदुर्गनगरे जावालपुर्यां तथा
श्रीमद्देवगिरौ तथा अहिपुरे श्रीपत्तने पत्तने ।

भांडागारमवीभरद्वरतरैर्नानाविधैः पुस्तकैः
स श्रीमज्जिनभद्रसूरिसुगुरुर्भाग्याद्भुतोऽभूद्भुवि ॥ २१ ॥

ततः क्रमाच्छ्रीजिनचंद्रसूरिः
समुद्रसूरिर्जिनहंससूरिः ।
माणिक्यसूरिर्गुणरत्नसूरि-
र्जातस्ततः सारविचारसूरिः ॥ २२ ॥

तदीयपदपूर्वाद्रिप्रकाशनरविप्रभाः ।
श्रीजिनचंद्रसूरींद्रा जयंति जयिनोऽधुना ॥ २३ ॥

येभ्यो मुदादायि युगप्रधानपदं प्रभुश्रीमदकब्बरेण ।
प्रभूतभाग्योदयसुप्रसिद्धा जयंतु ते श्रीजिनचंद्रसूरयः॥ २४॥

श्रीसाहिवाक्यादुरुभिः प्रमोदा
(द्ये सं)यमाचार्यपदे प्रतिष्ठिताः ।
जाग्रद्यशोराशिविराजमाना
जयंतु ते श्रीजिनचंद्रसूरयः ॥ २५ ॥

तच्चारुचरणांभोजचंचरीकमनाः सना ।
गणिः सकलचंद्राख्यो विख्यातो मुख्यशैक्षकः ॥ २६ ॥

तच्छिष्योऽभ्यस्तिवृद्ध्यर्थं गणिः समयसुंदरः ।
वाचकः संव्यधात्तयक्षिम[दष्टलक्षीं]रत्नावलीमिमाम् ॥२७॥

श्रीजिनसिंहमुनीश्वरवाचकवरसमयराजगणिराजाम् ।
मद्विद्यैकगुरूणामनुग्रहो मेऽत्र विज्ञेयः ॥ २८ ॥

मत्सरेणाहतो मूर्खोऽसहमानः परोन्नतिम् ।
सच्छास्त्रं दूषयत्येव वारिकुंभमरिष्टवत् ॥ २९ ॥

मात्सर्यमुत्सार्य विचार्य सम्यग्
ज्ञात्वा प्रयासं समदुष्करत्वम् ।

कृत्वा प्रसादं कवयो गुणज्ञाः
प्रमाणयंतु स्फुटमेतदर्थान् ॥ ३० ॥
यदत्र काव्ये मतिमांद्यदोष-
वशादशुद्धं किमपि स्फुटं स्यात् ।
विशोधयंतुप्रधियो प्रसह्य[धियःप्रसह्य]
तृणं यथा निर्मलसौधकुंडन्[डात्] ॥ ३१ ॥
श्रीविक्रमनृपवर्षात्समये रसजलधिरागसो[गो]समेते ।
श्रीमल्लाभपुरेऽस्मिन् वृत्तिरियं पूर्णतां नीता ॥ ३२ ॥
अर्थरत्नावलीवृत्तिः कविकंठावलंबिनी ।
वाच्यमाना चिरं नंद्याद्यावच्चंद्रदिवाकरौ ॥ ३३ ॥

No. 1175.

## आचाराङ्गदीपिका—जिनहंससूरिः ।

आ०—॥ अर्हं ॥ शासनाधीश्वरो जीयाद्वर्धमानो जिनेश्वरः ।
भवन्ति सुखिनो भव्या यदीयवचनामृतैः ॥ १ ॥
शीलाङ्काचार्यरचिता वृत्तिरस्ति सविस्तरा ।
श्रीआचाराङ्गसूत्रस्य दुर्विगाहा परं ततः ॥ २ ॥
अनुग्रहार्थं सभ्यानां व्याख्यातॄणां सुखावहा ।
श्रीजिनहंससूरीन्द्रैः क्रियते स्म प्रदीपिका ॥ ३ ॥

च०—श्रीबृहत्खरतरगच्छे श्रीजिनसमुद्रसूरिपट्टालंकारश्रीजिनहंससूरिविरचितायां श्रीआचारांगदीपिकायां द्वितीयः श्रुतस्कंधः समाप्तः ॥

श्रीवीरशासने क्लेशनाशने जयिनि क्षितौ ।
सुधर्मस्वाम्यपत्यानि गणाः सन्ति सहस्रशः ॥ १ ॥

No 1178.

आराधनापताका—वीरभद्राचार्यः ।

आ०—नियसुचरियगुणमाहप्पदिप्पसुररायरिद्धिवित्थारो ।
जयइ सुररायपूइयगुणमाहप्पो महावीरो ॥ १ ॥
च०—इय सुंदराइं वीरभद्दभणियाइं पवयणाहिंतो ।
चिरमुंचिणि सुए एसा रइआ आराहणापडिया ॥ ८ ॥
वण्णाणमाणुपुव्वी गाहद्धपयाण पाययाणं च ।
कत्थइ कहिंचि रइया पुव्वपसिद्धाण समईए ॥ ८६ ॥
आराहणापसत्थंमि एत्थ सत्थंमि गंथपरिमाणं ।
नउयाइं नवसयाइं अत्था गाहंमि गाहाणं ॥ ८७ ॥
विक्कमनिवकालाउ अट्ठुत्तरिमे समासहस्संमि ।
एसा सव्वं गिहिआ गहिया गाहाहि सरलाहिं ॥ ८८ ॥
मोहेण मंदमइणा इमंमि जमणागमे मए लिहियं ।
तं महरिसिणो मरिसिंतु अहवा साहिंतु करणाए ॥८९॥
भवगहणभमणरीणा लहंति निव्वुइसुहं जमल्लीणा ।
तं कप्पहुमसुहयं नंदउ जिणसासणं सुइरं ॥ ९० ॥
आराधनापताका कृतिरियं श्रीवीरभद्राचार्यस्य ॥ छ ॥

No 1182.

आवश्यकलघुवृत्तिः—तिलकाचार्यः

च०—महोदयपदावाप्तिरिति ॥ छ ॥

इति श्रीश्रीतिलकाचार्यविरचितायामावश्यकलघुवृत्तौ प्रत्याख्यानाध्ययनं समाप्तम् ॥६९६॥ तत्समाप्तौ समाप्तेयमावश्यकलघुवृत्तिः ।

तीर्थे वीरविभोः सुधर्मगणभृत्संतानलब्धोन्नति-
श्चारित्रोज्ज्वलचंद्रगच्छजलधिप्रोल्लासशीतद्युतिः ।

साहित्यागमतर्कलक्षणमहाविद्यापगासागरः
श्रीचंद्रप्रभसूरिरद्भुतमहावादीभसिंहोऽभवत् ॥ १ ॥
तत्पट्टलक्ष्मीश्रवणावतंसाः श्रीधर्मघोषप्रभवो बभूवुः ।
यत्पादपद्मे कलहंसलीलां दधौ नृपः श्रीजयसिंहदेवः ॥ २ ॥
तत्पट्टोदयशैलशृंगमभजत्तेजस्विचूडामणिः
श्रीचक्रेश्वरसूरिरित्यभिधया कोऽप्यत्र भानुर्नवः ।
संप्राप्ताभ्युदयः सदैव तमसा नो जातु विच्छायितो
नैवोच्चंडरुचिः कदाचिदपि न प्राप्तोपरागस्ततः ॥ ३ ॥
विललास स्वैरं तत्पट्टप्रासादचंद्रशालायाम् ।
श्रीमान् शिवप्रभुगुरुः संयमकमलाकृतासक्तिः॥ ४ ॥
श्रीशिवप्रभसूरीणां तेषां शिष्योस्मि मंदधीः ।
नाम्ना श्रीतिलकाचार्यः श्रुताराधनगृद्धिभाक् ॥ ५ ॥
एतां वृत्तिं लघुमविषमां सोहमावश्यकीयां
तत्पादाब्जस्मरणमहसा मुग्धधीरप्यकार्षम् ।
तद्यत्किंचिद्भ्रमवशतो दृब्धमस्यामशुद्धं
तत्संशोध्यं मयि कृतकृपैः सूरिभिस्तत्त्वविद्भिः ॥ ६ ॥
वृत्तिं रचयता चैतां सुकृतं यन्मयार्जितम् ।
भवे भवेऽहं तेन स्यां श्रुताराधनतत्परः ॥ ७ ॥
शतद्वादशकेऽब्दानां गते विक्रमभूभुजः ।
संवत्सरे षण्णवतौ वृत्तिरेषा विनिर्ममे ॥ ८ ॥
शिष्या नः शस्यचारित्राः सर्वशास्त्राब्धिपारगाः ।
अस्यां सहायकं चक्रुः श्रीपद्मप्रभसूरयः ॥ ९ ॥
शिष्योस्माकमिमां वृत्तिमखिन्नः शास्त्रतत्त्ववित् ।
अलिखत्प्रथमादर्शं यशस्तिलकपंडितः ॥ १० ॥

संत्यस्यां द्वादशश्लोकसहस्राःषचतुःशताः ।
प्रत्यक्षरेण संख्यानादिति निश्चितवानहम् ॥ ११ ॥
यावद्विजयते तीर्थं श्रीमद्वीरजिनेशितुः ।
तावदेषा मरालीव खेलतात्कृतिमानाम[मानसे]॥ १२ ॥

No. 1187.

उत्तराध्यनसूत्रटीका—कीर्त्तिवल्लभगणिः ।

आ०—अहं भिक्षोर्विनयं प्रादुःकरिष्यामि प्रकटीकरिष्यामि आनुपूर्व्या क्रमेण मे मम विनयं कथयतो वदतो यूयं शृणुत ।

च०—२७२—इति समाप्तौ ब्रवीमि । सुधर्मस्वामी जंबूस्वामिनं प्रति प्राह । इत्युक्तं षट्त्रिंशाध्ययनं जीवो जीवविभक्त्याख्यम् ॥३६॥

इति श्रीउत्तराध्ययनवृत्तिः संपूर्णा ।

आसीच्छ्रीवीरपट्टे प्रवरगणधरः श्रीसुधर्माभिधान-
स्तत्पट्टे स्वामिजंबूप्रभवमुखमहासूरिराजा बभूवुः ।
सर्वेषा( मेव धाम्नां ) स्फुटपटुपदवीभारधर्त्ता महेंद्रः
सूरींद्राणामशेषक्षितितलविदितो मेरुतुंगो मुनींद्रः ॥ १ ॥
तत्पट्टांबुजराजहंससदृशो विद्यावतामीश्वरः
श्रीमच्छ्रीजयकीर्त्तिसूरिसुगुरुस्तत्पट्टचूडामणिः ।
सूरिः श्रीजयकेसरिप्रभुगुरुस्तत्पट्टधत्रेश्वरः
सिद्धांतानुगसागरो विजयते सूरीश्वरः सांप्रतम् ॥ २ ॥
तच्छिष्यो ननु कीर्त्तिवल्लभगणिर्मुग्धाग्रणी मोहतो
स्पष्टव्याकरणोक्तिवृत्तिमलिखन्मुग्धप्रबोधप्रदाम् ।
पूर्वैर्निर्मितदीपिकादिकमहाग्रंथानुसारी स्वक-
प्रज्ञावेदनश्च [नतो ह्य]सौ वसुगुरुप्रौढप्रसक्तेः पुनः ॥ ३ ॥

संवत्पंचदशे द्विपंचगणिते वर्षे च हर्षप्रदे
सुश्रीअहमदवादनाम्नि नगरे दीपोत्सवे निर्मिता ।
यावच्छ्रीजिनशासनं विजयते सर्वोत्सर्व (सर्व) त-
स्तावच्चंदतु वृत्तिका कविजनै(:सं) वाच्यमाना सदा ॥ ४ ॥
कार्यौत्सुक्यतया मया पुनरियं संशोधिता नास्ति भो
विद्वद्भिस्तु परोपकारनिरतैः शोध्या विशुद्धात्मभिः ।
बुद्धेस्तुच्छतया यदत्र किमपि न्यूनं तथा बाधिकं
तत्सर्वं क्षमितव्यमुत्तमतमैर्बद्धं विरुद्धं च यत् ॥ ५ ॥

अष्टौ सहस्रा द्विशती च षष्टिः श्लोकास्ततश्चोपरि पंचवर्णाः ।
प्रत्येकवर्णे परिमाणमेतद्ग्रंथस्य विज्ञायममेयशोभैः ॥ ६ ॥

इति उत्तराध्ययनवृत्तिः संपूर्णा ॥

No. 1204.

उपदेशसप्ततिका—सोमधर्मगणिः ।

आ०—श्रीसोमसुंदरगुरूज्ज्वलकीर्त्तिपूरः
श्रीवर्धमानजिन एष शिवाय वाग्नः ।
भव्या भवंति सुखिनो यदुदाहृतं श्री-
चारित्ररत्नममलं परिपालयंतः ॥ १ ॥

श्रीरत्नशेखरगुरुप्रवरा जयंतु
नैकक्षमाधरनिषेव्यपदारविंदाः ।
ऐदंयुगीनमुनिषु प्रवरक्रियेषु
श्रीसार्वभौमपदवीं दधतेऽथुना[ता]युः ॥ २ ॥

कथाप्रबंधादिषु भूरिविस्तरेष्वनादरं ते दधते ऽल्पमेधसः ।
हिताय तेषामुपदेशसप्ततिः प्रारभ्यते सर्वजनोपयोगिनी ॥ ३ ॥

च०—एवं देवज्ञानसाधारणादि द्रव्यं व्यक्त्या स्थापनीयं सुयुक्त्या ।
व्यापार्यं च भावकैस्तत्त्वविज्ञैर्निर्लेपत्वं स्यात्तथा चिंतनीयम्॥३३॥
इति पंचमेऽधिकारे सप्तदश उपदेशाः । मूलतः कथाः ॥ ७५

इति श्रीपरमगुरुतपाश्रीसोमसुंदरसूरिक्रमकमलमरालमहोपाध्याय-श्रीचारित्ररत्नगणितद्विनेय पं० सोमधर्मगणिविरचितायां श्रीउपदेशसप्ततौ पंचमोऽधिकारः । समाप्ता चेयं श्रीउपदेशसप्ततिका ॥ ग्रंथाग्रं ३०००॥

No. 1205.

उपसर्गहरस्तोत्रं सटीकम्—मू० भद्रबाहुः टी०पार्श्वदेवगणिः ।

टी०आ०—धरणेंद्रं नमस्कृत्य श्रीपार्श्वं मुनिपुंगवम् ।
उपसर्गहरस्तोत्रवृत्तिं वक्ष्ये समासतः ॥ १ ॥

मू०आ०—उवसग्गहरं पासं पासं वंदामि कम्मघणमुक्कं ।
विसहरविसनिन्नासं मंगलकल्लाणआवासं ॥ १ ॥

मू०च०—इय संथुउ महायस भत्तिब्भरनिब्भरेण हियएणं ।
ता देव देसु बोहिं भवे भवे पासजिणचंदो ॥ ५ ॥

टी०च०—सर्वकल्याणं संपद्दकरी यंत्रं भवति । द्विजपार्श्वदेवगणि-विरचिते यत्किमपि धरणेंद्रपार्श्वयक्षपद्मावतीप्रमुखाभिः स्वदेवताभिर्मम क्षमितव्यमिति । यच्च किंचिद्विरुद्धयंत्रं मंसित [मंत्रितं] सर्वस्य मिथ्या दुष्कृतमिति ॥ ॥ इति श्रीउवसग्गहरस्तोत्रस्य वृत्तिः समाप्ता ॥ संवत्सरे विक्रमनृपतौ सप्तनंदकाय भूयुते । वर्षे आश्विनमासे शुभ्रपक्षे दुर्गाष्टम्यां तिथौ लिखितं जगजीवनर्षिणा स्वात्महेतवे ॥.

No. 1209.

ऋषिमण्डलवृत्तिः—शुभवर्धनः ।

आ०—योऽभूद्युगादौ शिवशुद्धमार्गप्रकाशकत्वाद्रविरेव साक्षात् ।
गोभिःस्वकीयैः प्रहरंस्तमांसि स नाभिभूर्भूरिविभूतये वः ॥१॥

पत्रे ४१६ इति श्रीतपागच्छाधिराजे श्रीसोमसुंदरसूरिसंताने श्री-लक्ष्मीसागरसूरिश्रीसुमतिसाधुसूरिपट्टप्रतिष्ठपरमगुरुश्रीहेमविमलसूरि-विजयमानराज्ये पंडितप्रकांडमंडलीशिरोमणिपंडितश्रीसाधुविजय-गणिशिष्यपरमाणुपंडितशुभवर्धनगणिप्रणीतायां ऋषिमंडलवृत्तौ द्वित-यखंडे श्रीहल्लविहल्लर्षिसंबंधः ।

च०—अवसर्पिण्यां चरमं दुःसहं मुनिवृषभं दुःषमाचार्यं वंदे ।

ऋषिमंडलवृत्तिः संपूर्णा ।

इति श्रीतपागच्छाधिराजश्रीसोमसुंदरसूरिसंताने ---------

---------- ग्रंथाग्रं १८०००.

No. 1213.

ओघनिर्युक्तिः सटीका । मू०भद्रबाहुः । टी० द्रोणाचार्यः ।

टी०आ०—नमो अरिहंताणं...

अर्हत्त्रिभुवनराजपूजितेभ्यः
सिद्धेभ्यः सुतघनकर्मबंधनेभ्यः ।
आचार्यश्रुतधरसर्वसंयतेभ्यः
सिद्ध्यर्थी सततमहं नमस्करोमि ॥ १ ॥

मू०आ०—अरहंते वंदित्ता चउदसपुव्वी तहेव दसपुव्वी ।
एक्कारसंगसुत्तत्थधारए सव्वसाहू य ॥ १ ॥

मू०च०—एसा समायारी कहिया धीरपुरिसपन्नता ।
संजमतवट्ठगाणं निग्गंथाणं महरिसीणं ॥

टी०च०—सुगमा०—इय उघसमायारि जुंजंता चरणकरणमाउत्ता ।
साहू खवंति कम्मं अणेगभवसंचियमणंतं ॥

सुगमा०—एसा अणुग्गहत्था फुडवियडविसुद्धवंजणाइन्ना ।
इक्कारसहिं सएहिं एगुणवन्नेहिं सम्मत्ता ॥

सुगमा०—ओघनिर्युक्तिटीका समाप्ता ॥ कृतिरियं द्रोणाचार्यस्येति ।

No. 1216

कथारत्नाकरः—उत्तमर्षिः ।

आ०—पार्श्वनाथं जिनं नत्वा सद्गुरुं च विशेषतः ।
कथारत्नाकरं नाम क्रियते शर्महेतवे ॥ १ ॥

पत्रे७३ इति श्रीधर्मकथारत्नाकरोद्धारे श्रीमत्प्रवरपंडिते[तैः] सकलशास्त्रज्ञश्रीमदुत्तमर्षिभिः द्वितीयखंडस्संपूर्णीकृतः॥ २॥

च०—इति साधुनिंदायां रुक्मिणीपूर्वभवकथा २०९

अपूर्णः ।

No. 1218.

कर्मग्रन्थः—मा०देवेन्द्रसूरिः ।

च०—अइसुइरसयलजगसिहरगरुयनिरुवमसहावसिद्धिसुहा ।
अरिहा निव्वाबाहा तिरियं संसारअ[म]णुहवंति ॥ ९० ॥
दुरहिगमनिउणपरमत्थरुहिरबहुभमिदिट्ठिवाया ।
अत्थाणुसरियव्वा बंधोदयसंतकम्माणं ॥ ९१ ॥
जो जत्थ अपडिपुन्नो अत्थो अप्पागमेण बद्धुत्ति ।
तं खमिऊण बहुसुया पूरेऊणं परिकहंतु ॥ ९२ ॥
गाहग्गं सयरीए चंदमहत्तरमयाणुसारीए ।
टीकाइ नियमियाणं एगूणं होइ नवईउ ॥ ९३ ॥

इति सप्ततिकासूत्रं समाप्तम् ।

षट्कर्मग्रंथमिदं । संवत् १५६३ वर्षे आसाढवदि ५ दिने ।

No. 1223.

कल्पसूत्रम्—सावचूरि ।

च० ग्रं० १२१६ ॥ इति कल्पसूत्रं संपूर्णं लिखितं उंसारिग्रामे पं० लावण्यभद्रगणिना ॥

नागपुरनेमिभवनप्रतिष्ठया महितपाणिसौभाग्यः ।
अभवद्वीराचार्यस्त्रिभिः शतैः समधिकै राज्ञः॥ १ वि०३०० ॥

वत्सो नरसिंहसूरिरासीदतोऽखिलग्रंथपारगो येन ।
यक्षो नरसिंहपूरे मांसरतिं त्याजितः स्वगिरा॥ २ वि०११५५॥?

खोमाणराजकुलजो व समुद्रसूरि-
र्गच्छं शशास किल यः प्रवरः प्रमाणी ।
जित्वा तदा क्षपणकान्स्ववशं वितेने
नागह्रदे भुजगनाथनमस्यतीर्थे ॥ ३ ॥

विद्यासमुद्रहरिभद्रमुनींद्रमित्रं
सूरिर्बभूव पुनरेव हि मानदेवः ।
मांद्यात्प्रयातमपि योनघसूरिमंत्रं
लेभेंबिकामुखगिरा तपसोज्जयंते ॥ ४ वि० १११५ ॥?

दिनकृत्य ५ कर्मग्रंथसिद्धपंचाशिकासूत्रवृत्तयः धर्म्मरत्नवृत्तिसुदर्शनाचरित्रभाष्यादयः स्वकृताः ॥ पूर्वं श्रीविजयचंद्रसूरिणा । श्रीदेवेंद्रसूरिषु मालवकदेशं गतेषु गच्छावर्जननिमित्तं समस्तगीतार्थे पृथक् २ वस्त्रपट्टलिकाप्रदानं १ नित्यंविनद्ध ? त्यनुज्ञा २ चीवरक्षालनं ३ फलशाकग्रहणं ४ नीवीप्रत्याख्याने निर्वि तक ? ग्रहणं ५ साधूनां द्विविधाहारप्रत्याख्यानं ६ आर्यिकाविहृतभोगः ७ गृहस्थप्रतिक्रमणकारापणं ८ संविभागदिने गृहे गीतार्थगमनं ९ लेपसांनिध्यभावं १० तत्कालोष्णोदकग्रहणं ११ इति गोत्रिकवृद्धशालीयसमाचारी ॥ वि० ९९३ वि० ५२३ कालिकाचार्येण चतुर्थ्यां पर्युषणापर्वानीतं ९९४ तस्य स्वर्गः वि० १००० सुमित्रे १० पूर्वविच्छेदः ॥

## No. 1227.

कालसप्ततिः—सावचूरिः । मू० धर्मघोषः ।

आ०टी०—देवेंद्रनतं विद्यानंदमयं धर्मकीर्तिकुलभवनं

आ०मू०—देविंदणयं विज्जाणंदमयं धम्मकित्तिकुलभवणं

च०मू०—इय बारसारचक्कं कप्पो तेणंतपुग्गलपरावट्टो ।
तेऽणंतातीअद्धा अणेगयऽद्धा अणंतगुणा ॥ ७३ ॥
सिरिदेविंदमुणीसरविणेअसिरिधम्मघोससूरीहिं ।
अप्पपरजाणणट्ठा कालसरूवं किमवि भणिअं ॥७२॥

इति कालसप्ततिसूत्रम् ।

च०टी०—कल्पो भवति तैरनंतैः पुद्गलपरावर्तः तेऽनंता अतीताद्धा। ततोऽप्यनंतगुणा अनागताद्धा ॥ ७२ ॥ कालसप्तत्यवचूरिः।

## No. 1230.

कुमारपालप्रबन्धः—जिनमण्डनः ।

आ०—ॐ नमः श्रीमहावीरजिनेंद्राय परात्मने ।
परब्रह्मस्वरूपाय जगदानंददायिने ॥ १ ॥...

उक्तं च ।

आज्ञावर्त्तिषु मंडलेषु विपुलेष्वष्टादशस्वादरा-
दब्दान्येव चतुर्दश प्रशमरां मारिं निवार्यौजसा ।
कीर्तिस्तंभनिभान् चतुर्दशशतीसंख्यान्विहारांस्तथा
कृत्वा निर्मितवान् कुमारनृपतिर्जैनो निजैनोव्ययम् ॥ १ ॥

च०—संवत् ११४५ कार्तिकपूर्णिमानिशि जन्म श्रीहेमसूरीणां संवत् ११५४ दीक्षा सं० ११६६ सूरिपदं सं० १२२९ स्वर्गः ।...

प्रबंधो योजितः श्री(मत्)कुमारनृपतेरयम् ।
गद्यपद्यैर्नवैः कैश्चित्कैश्चित्प्राक्तननिर्मितैः ॥ ६ ॥

श्रीसोमसुंदरगुरोः शिष्येण यथाश्रुतानुसारेण ।
श्रीजिनमंडनगणिना ह्यंक १४९२ मनुप्रमितवत्सरे रुचिरः॥७

इति श्रीसोमसुंदरसूरीश्वरशिष्यश्रीजिनमंडनोपाध्यायैः श्रीकुमारपालप्रबंधो यथादृष्टश्रुतानुसारेण योजितः चिरं जीयात्॥

No. 1232.

क्षुल्लकभवावलिका—सावचूरिः—तथा

पुद्गलपरावर्त्तस्तोत्रं सावचूरि ।

आ० टी०—वंदित्ता० सुगमा नवरं क्षुल्लकभवानामावलिकानां च स्वरूपं कियंतो भवाः कियंत्यो वा आवलिका उच्छ्वासादौ कथं वा संभवंति

आ०मू०—वंदित्ता सिरिवीरं देविंदनरिंदमहियपयकमलं ।
खुड्डभवाण सरूवं आवलिआणं च वुच्छामि ॥१॥

च०मू०—एगभवावलिगुणिआ हरिआ विअ निअनिआवलिअ
२४ खुड्डा०

च०टी—सप्तसप्ततिगुणाकृता हताश्च निजनिजस्तोकावलिका भवंति यथा २४ खुड्डा० क्षुल्लकविचारोन्यथाभूतो विपरीतः शोध्यः॥ २५

इति क्षुल्लकभवावलिकावचूरिः समाप्ता ।

आ०टी०—हे श्रीवीतराग हे भगवन् मे मम पुद्गलावर्त्ता अभवन् कस्मिन्

आ०मू०—श्रीवीतरागभगवंस्तव समयालोकनं विनाभूवन् ।
द्रव्ये क्षेत्रे काले भावे मे पुद्गलावर्त्ताः॥ १ ॥

च० मू०—नानापुद्गलपुद्गलावलिपरावर्त्तानंतानहं
पूरं पूरमियच्चिरं कियदशं बाढं दृढं नोढवान् ।

दृष्टादृष्टिचरं भवंतमधुना भक्त्यार्थयामि प्रभो
तस्मान्मोचय रोचय स्वचरणं श्रेयःश्रियं प्रापय॥ ११॥

इति पुद्गलपरावर्त्तस्तोत्रं समाप्तम् ।

च०टी०—श्रेणयस्ता येन दृष्टादृष्टिचरं किं प्रार्थयामि तदेवाह ।
अमुखान्मोचय स्वचरणं रोचय मां श्रेयःश्रियं प्रापय॥११॥

इति श्रीपुद्गलपरावर्त्तस्तोत्रस्यावचूरिः समाप्ता ॥

No. 1239.

चन्द्रप्रभचरित्रम्—देवेन्द्राचार्यः ।

आ०—दृष्टोपि हृष्टजनलोचनचंद्रकांत-
मभ्रांतमांतरजलाविलमादधानः ।
चंद्रप्रभोर्जयति चंद्र इवेशमित्रं
चित्रं पुनः शुभशताय यदष्टमोपि ॥ १ ॥

च०—सुपार्श्वस्वामिनिर्वाणात् श्रीचंद्रप्रभनिर्वृतिः ।
शतेष्वर्णवकोटीनां व्यतीतेषु नवस्वरात् ॥ ३२

इति श्रीदेवेंद्राचार्यविरचिते श्रीचंद्रप्रभस्वामिचरिते भवत्रयवर्णनो नाम द्वितीयः परिच्छेदः ॥ २ ॥ ॥ समाप्तं चेदं चंद्रप्रभस्वामिचरित्रम् ॥

नागेंद्रगच्छे विख्याताः परमा(रा)न्वयोत्तमाः ।
श्रीवर्धमाननामानः सूरयोऽस्तारयोऽभवन् ॥ १ ॥

गुणग्रामाभिरामोऽथ रामसूरिर्बभूव सः ।
यदास्यकमलक्रोडे चिक्रीडुर्वचनाश्रियः ॥ २ ॥

सिद्धांतादित्यमाश्रित्य कलापूर्णः सुवृत्तभाक् ।
चंद्रवत्प्रीतिदः सोऽभूच्चंद्रसूरिस्ततः परम् ॥ ३ ॥

विद्यावल्लीवृक्षः संयमप्रतिमारथः ।
संसाराब्धिमहायानं देवसूरिगुरुस्ततः ॥ ४ ॥
सिद्धविद्यारसस्पर्शात्सुवर्णत्वमुपागतम् ।
शिवायाभयसूरीणां वचस्तारमुपास्महे ॥ ५ ॥
निर्वास्यान्यगिरश्चित्तान्यवष्टभ्य स्थिता नृणाम् ।
यद्वाक् सोऽभूज्जगत्ख्यातः श्रीमद्धनेश्वरः प्रभुः ॥ ६ ॥
यद्वाग्गंगा त्रिभिर्मार्गैस्तर्कसाहित्यलक्षणैः ।
पुनाति जीयाद्विजयसिंहसूरिः स भूतले ॥ ७ ॥
श्रीधनेशपदे सूरिर्देवेंद्राख्यः स्वभक्तितः ।
पुण्याय चरितं चक्रे श्रीमच्चन्द्रप्रभप्रभोः ॥ ८ ॥

अपूर्णम् ।

No. 1241.

चैत्यवन्दनवृत्तिः—हरिभद्रः ।

आ०—प्रणम्य भुवनालोकं महावीरं जिनोत्तमम् ।
चैत्यवंदनसूत्रस्य व्याख्येयमभिधीयते ॥ १ ॥
अनंतगमपर्यायं सर्वमेतज्जिनागमे ।
सूत्रं यतोऽस्य कात्स्न्र्येन व्याख्यां कः कर्तुमीश्वरः ॥२॥
यावत्तथापि विज्ञातमर्थजातं मया गुरोः ।
सकाशादल्पमतिना तावदेव ब्रवीम्यहम् ॥ ३ ॥
ये सत्त्वाः कर्मवशतो भक्तोपि जडबुद्धयः ।
तेषां हिताय गदतः सफलो मे परिश्रमः ॥ ४ ॥

च०—चिंतामणिरत्नेपि सम्यग्ज्ञानगुण एव श्रद्धातिशयभावतोऽविधिविरहेण महाकल्याणसिद्धिः । इत्यलं प्रसंगेन ।

आचार्यहरिभद्रेण दृष्ट्वा सद्न्यायसंगता ।
चैत्यवंदनसूत्रस्य वृत्तिर्ललितविस्तरा ॥ १ ॥
य एनां भावयत्युच्चैर्मध्यस्थेनांतरात्मना ।
स वंदनां सबीजं वा नियमादधिगच्छति ॥ २ ॥
पराभिप्रायमज्ञात्वा तत्कृतस्य च वस्तुनः ।
गुणदोषौ सन्तौ वाच्यौ प्रभ एव तु युज्यते ॥ ३ ॥
प्रष्टव्योऽन्यः परीक्षार्थमात्मनो वा परस्य च ।
ज्ञानस्य चाभिवृद्ध्यर्थं त्यागार्थं संशयस्य च ॥ ४ ॥
कृत्वा यदर्जितं पुण्यं मयैनां शुभभावतः ।
तेनास्तु सर्वलोकानां मात्सर्यविरहः परः ॥ ५ ॥
ललितविस्तरा नाम चैत्यवंदनवृत्तिः समाप्ता ।
कृतिरियं याकिनीधर्मसूनोराचार्यहरिभद्रस्येति ।
ग्रंथाग्रमनुष्टुप्छंदसा श्लोकशतानि द्वादश सप्तत्या समन्वितानि ॥

No. 1242.

जगत्सुन्दरीप्रयोगमाला—मुणिजसइत्ति ।

आ°—अथ कौतूहलाधिकारे योगा केचिदुच्यंते ॥
तियसगुरुजिणणाहं सिद्धत्थणरेंदकुलदीवं ।
सिद्धट्ठाणमुवगयं वीरं सिरसा णमिऊणं ॥ १ ॥ ...

प°१३७—इय जगसुंदरिपउंगमालाए मुणिजसइत्ति विरइए कोऊहलाहियारो णाम पंचतीसमो परिछेउ सम्मत्तो ३५ ॥ १५६ ॥ ...

प°१४३—इय ... मुणिजसइए जालागद्दाहियारो णाम छत्तीसमो ...

प० १४७—इय··· मुणिजसइत्ति विरइए लूआदिआरो णाम सत्ततीसमो परिच्छेउ सम्मत्तो १६४२

प० १६२—इय···मुणिजसइत्ति विरइए [ज]ईणायाहियारो णाम अडतीसमो सम्मत्तो ॥३८ । १८१९ ॥

अथ विषसमणप्रयोगाः केचित् ॥ ···

प० १७३—इय ··· विसत्तत्तसूअगु णाम एऊणचालीसमोहियारो समत्तो ३९ । २००४ ॥

अथ वश्याधिकारे प्रयोगाः केचित्

प० १८०—इय ···. कामतच्चसूयउ णाम चालीसमोहियारो समत्तो ॥ ४० । २१३३ ॥

अथ स्त्रीवंध्याधिकारः[रे]प्रयोगः[गाः]केचित् ···

प० १९९—इय··· तियज्जहियारो णाम इक्कतालीसमो सम्मत्तो ॥ ४१ । २३६६ ॥

प० २०९—इय ··· गंधजुत्ती करणाहियारो णाम बायालीसमो सम्मत्तो ॥ ४२ । २५४० ॥

प० २५६—इय जगसुंदरिपउगमालाए मुणिजसइत्ति विरइए सरोपइट्ठो व एस वण्णणो णाम तेयालीसमोहियारो परिच्छेउ सम्मत्तो ।

अपूर्णम् ।

No. 1248.

जयन्तकाव्यम्—अभयदेवः ।

आ०—श्रेयांसि विश्राणयतादजस्रं नाभेयदेवस्य पदांबुजं वः ।
समस्तसंपन्मधुबद्धरागा यत्र त्रिलोकी भ्रमरीव भाति ॥१॥

७३॥इति श्रीश्वेतांबरश्रीमदभयदेवाचार्यविरचिते जयंतविजयनाम्नि महाकाव्ये श्रीशब्दांके प्रस्तावनादिस्वरूपनिरूपणः प्रथमः सर्गः ॥ १ ॥

५२ ॥ इति··· पुत्रचिंतादिस्वरूपनिरूपणो नाम द्वितीयः सर्गः २

१०२ ॥ इति··· नमस्कारप्रभाववर्णनो नाम तृतीयः सर्गः ३

६९ ॥ इति··· सुरयोगींद्रविजयश्चतुर्थः सर्गः ४

७३ ॥ इति··· योगींद्रस्वरूपनिरूपणः पंचमः सर्गः ५

१०३ ॥ इति··· पुत्रजन्मोत्सवः षष्ठः सर्गः ६

७८ ॥ इति··· वसंतवर्णनः सप्तमः सर्गः ७

७६ ॥ इति··· दोलाविलासपुष्पावचयजलकेलिसूर्यास्तचंद्रादयोऽष्टमः सर्गः ८

७३ ॥ इति··· दूतोक्तिवर्णनो नाम नवमः सर्गः ९

७५ ॥ इति··· हरिराजपराजयो नाम दशमः सर्गः १०

९२ ॥ इति··· दिग्विजयो नाम एकादशः सर्गः ११

६१ ॥ इति··· कुमारधर्मप्रतिपत्तिवर्णनो नाम द्वादशः सर्गः १२

११३ ॥ इति··· विवाहोत्सववर्णनत्रयोदशः सर्गः १३

१११ ॥ इति··· दिव्यास्त्रायुधवर्णनो नाम चतुर्दशः सर्गः १४

७७ ॥ इति··· नरेंद्रसम्यक्त्वप्रतिपत्तिवर्णनो नाम पंचदशः सर्गः १५

९७ ॥ इति··· स्वयंवरवर्णनो नाम षोडशः सर्गः १६

६५ ॥ इति··· नरेंद्रपूर्वभववर्णनो नाम सप्तदशः सर्गः १७

६८ ॥ इति··· ऋतुत्रयवर्णनो नाम अष्टादशः सर्गः १८

८६ ॥ इति··· नरेंद्रराजस्थितिवर्णनो नाम एकोनविंशः सर्गः १९

ग्रंथाग्रं २२२० ॥

आसीच्चंद्रकुलांबरांबरमणिः श्रीवर्धमानप्रभोः
पादांभोरुहचंचिरीकचरितश्चारित्रिणामग्रणीः ।

स श्रीसूरिजिनेश्वरस्त्रिपथगापाथःप्रवाहैरिव
स्वैरं यस्य यशोभरैस्त्रिजगतः पावित्र्यमासूत्रितम्॥ १॥

अभवदभयदेवः सूरिरस्मात्स यस्य
प्रभुरभजत तोषं स्तंभने पार्श्वनाथः।
प्रकटितविकटार्था संघसाम्राज्यवृद्धयै
व्यधित निधिसमानां यश्च वृत्तिं नवांग्याः॥ २॥

तच्छिष्यौ जिनवल्लभः प्रभुरभूद्विश्वंभराभामिनी-
भास्वद्भाललललामकोमलयशस्तोमः शमारामभूः।
यस्य श्रीनरवर्मभूपतिशिरःकोटीररत्नांकुर-
ज्योतिर्जालजलैरपुष्यत सदा पादारविंदद्वयी॥ ३॥

कश्मीरानपहाय संततहिमव्यासंगवैराग्यतः
प्रोन्मीलद्गुणसंपदा परिचिते यस्यास्यपंकेरुहे।
सांद्रामोदतरंगिता भगवती वाग्देवता तस्थुषी
धारालामलभव्यकाव्यरचनाव्याजादनृत्यच्चिरम्॥ ४॥

तुंगस्तदंघ्रिकमले जिनशेखराह्वः
सूरिस्तपःप्रशमवर्मितकाययष्टिः।
जिग्ये जगत्त्रयजयप्रयतोपि येन
वीरव्रतं कलयता रतिजीवितेशः॥ ५॥

वैराग्यं याति रागे भजति विधुरतां क्रोध-----
---
---
--प्येषां जयाशां निभृतमपसृतं मोहराजेन दूरम्॥ ६॥

प्रगुणितकरुणः क्षमया विराजितश्चारुविग्रहस्तदनु।
अजनि वशीकृतविषयग्रामः पद्मेंदुमुनिराजः॥ ७॥

उत्फुल्लमल्लीप्रतिमल्लकांतिः
कीर्तिर्भ्रमंती भुवनेषु यस्य ।
श्रिया समं सौहृदकांक्षयैव
मुष्णाति विष्णोरपि कृष्णभावम् ॥ ८ ॥
विश्वत्रयप्रथितकीर्त्तिलतस्य तस्य
शिष्यः प्रशस्यमहिमाभयदेवसूरिः ।
काव्यं जयंतविजयं रचयांचकार
सारस्वतप्रसृमरप्रतिभाविलासः ॥ ९ ॥
दिक्करिकुलगिरिदिनकरधरिमितविक्रमनरेश्वरसमायाम् ।
द्वाविंशतिशतमानं शास्त्रमिदं निर्मितं जयतु ॥ १० ॥

No. 1251.

## जिनशतकं सटीकम्—मू° जम्बूः। टी° शम्बसाधुः।

टी°आ°—निष्क्रांतौ कृतपंचमुष्टिककचोत्पाटस्य ये संस्थिताः
मू°आ°—श्रीमद्भिः स्वैर्महोभिर्भुवनमविभुवत्तापयत्येष शश्वत्
मू°च°—युष्मान्मान्याग्रगस्याननवनजशया वागसौ द्राग्विधेयात् ॥ २५ ॥
टी°च°—युष्मान् दैन्यशून्यान्विधेयादिति ॥ २५ ॥

इति शंबसाधुविरचितायां जिनशतकपंजिकायां वाग्वर्णनो नाम चतुर्थपरिच्छेदः समाप्तः ॥

जंबूर्नाम गुरुर्गुरूत्तमगुणोऽभूच्चंद्रगच्छान्वये
विद्वत्संसदि लब्धगौरवपदः साधुक्रियासूद्यतः ।
किं वा तस्य निगद्यते मतिगुणो यस्येदृशी निर्गता
सुश्लिष्टा पदसंधिभिः सुघटितैः स्पष्टाक्षराली मुखात् ॥ १ ॥

तत्कृतस्यास्य शास्त्रस्य गंभीरार्थस्य मंदधीः ।
मादृशः कुरुते वृत्तिं किमस्मादस्ति दुष्करम् ॥ २ ॥
अशक्यानुष्ठानमिति भावः ।
किं त्वेषा बालकेनेव सन्मार्गेण धियाद्भुना ।
अभ्यासशक्त्यभावेपि क्रियते केवलं मया ॥ ३ ॥

ततश्च ।

ख्यातो भट्टिकदेशसंद्वि[धि]षु सदाभूत्पार्श्वनागाभिधः
श्राद्धस्तस्य सुतोऽत्र मल्हन इति ख्यातिं गतः सर्वतः ।
तत्पुत्रेण च दुर्गकेण सुधिया प्रोत्साहितेनादरा-
च्छ्रीनामेंद्रकुलोद्भवेन मुनिना सांबेन वृत्तिः कृता ॥ ४ ॥
यदत्र मात्रादिभिरर्थतो वा मया विहीनं विहितं कथंचन ।
मनीषिभिस्तत्परिशोधनीयं परोपकाराय सतां हि जीवितम् ॥५॥
शरदां सपंचविंशे शतदशके १०२५ स्वातिभे च रविवारे ।
विवरणमिदं समाप्तं वैशाखसितत्रयोदश्याम् ॥ ६ ॥
लीलावेल्लितलोचनें[नां]बुजयुगं या पुस्तकं वाचयं-
त्यालोच्येव सदर्म[समर्म] वस्तु दधती स्मेरं मुखं राजते ।
भक्त्या नम्रशिरोवतंसकपतत्पुष्पार्चितांघ्रिद्वया
देवस्त्रीभिरसौ सदा विजयतां वाग्देवता विश्रुता ॥ ७ ॥

इति श्रीजिनशतकपंजिकायां प्रशस्तिरियं समाप्ता सूत्रवृत्तिसमन्विता । ग्रंथाग्रं श्लोकसंख्यया १५५० ग्रंथकारेण कृतमस्ति ॥ शुभं भवतु ॥ संवत् १६४१ वर्षे भाद्रवा सुदि ४ शनौ ॥

No. 1256.

तीर्थकल्पः—जिनप्रभसूरिः ।

आ०—दिवभीपुंडरीकाख्यभूभृच्छिखरशेखरम् ।
अलंकरिष्णुः प्रासादं श्रिनाभेयः श्रियेस्तु वः ॥ १ ॥

प० ६—श्रीविक्रमाब्दे बाणाष्टविश्वेदेवमिते शितौ ।
सप्तम्यां तपसः काव्यदिवसेऽयं समर्थितः ॥ १३३ ॥

इति श्रीजिनप्रभसूरिविरचितः श्रीशत्रुंजयकल्पः समाप्तः ॥

प० ९—उज्जयंतकल्पः समाप्तः ॥ (मागधी)

प० ११—रैवतककल्पः ॥ (मा०)

प० १२—॥ ४१ ॥ इत्युज्जयंतस्तवः ॥ (जिनप्र०)

प० १४—श्रीअंबिकादेवीकल्पः ॥ (मा०)

प० १५—कपर्दियक्षकल्पः ॥ (मा०)

प० १८—॥ ७४ ॥ इति श्रीपार्श्वनाथस्य कल्पसंक्षेपः॥ (मा०)

प० २०—अहिच्छत्राकल्पः ॥ (मा०)

प० २१—राजानकश्रीधांधूके क्रुद्धं श्रीगूर्जरेश्वरम् ।
प्रसाद्य भक्त्या तं चित्रकूटादानव्य[नीय] तद्गिरा ॥३९॥
वैक्रमे वसुवस्वाशा १०८८ मितेऽब्दे भूरिरैव्ययात् ।
सत्प्रासादं सविमलवसत्याह्वं व्यधापयत् ॥ ४० ॥...
वैक्रमे वसुवस्वर्क १२८८ मितेऽब्दे नेमिमंदिरम् ।
निर्ममे लूणिगवसत्याह्वयं सचिवेंदुना ॥ ४३ ॥
कषोपलमयं बिंबं श्रीतेजःपालमंत्रिराट् ।
तत्र न्यास्थत्स्तंभतीर्थे निष्पन्नं दृक्सुधांजनम् ॥ ४४ ॥
मूर्त्तीः स्वपूर्ववंश्यानां हस्तिशालं च तत्र सः ।
न्यवीविशद्विशांपत्युः श्रीसोमस्य निदेशतः ॥ ४५ ॥
अहो शोभनदेवस्य सूत्रधारशिरोमणेः ।
तच्चैत्यरचनाशिल्पाद्भुतं लेभे यथार्थताम् ॥ ४६ ॥...
तीर्थद्वयेऽपि भग्नेऽस्मिन् दैवान्म्लेच्छैः प्रचक्रतुः ।
अस्योद्धारं द्वौ शकाब्दे वह्निवेदार्कसंमिते १२४३—४८॥

तत्राद्यतीर्थस्योद्धर्त्ता लल्लो महणसिंहभूः ।
पीथडस्त्वितरस्याभूद्भ्यवहच्चंडसिंहजः ॥ ४९ ॥
कुमारपालभूपालश्चौलुक्यकुलचंद्रमाः ।
श्रीवीरचैत्यमस्योच्चैः शिखरे निरमीमपत् ॥ ५० ॥ ...

५२ श्रीअर्बुदकल्पः समाप्तः ॥ ( जिनप्र० )

प० २५—तेण आमरायसेविअकमकमलेण सिरिबप्पहट्टसूरिणा अट्ठमहुराए ठाविअं अट्ठसयछवीसे विक्कमसंवच्छरे सिरबिंबं

प० २६—श्रीमथुराकल्पः समाप्तः । जिनप्र० ( मा० )

प० २९—अंश्चावबोधकल्पः जिनप्र० ( मा० ) ...

वर्षे सिद्धा सरद्रस [स्तुतिः षड्रस] शिखिकुमिते वैक्रमे तीर्थमौले(:)
सेवांहेवाकिनां श्रीर्वितरतरोद [श्रीवितरद्धरतरोर्दे] वतासेवितस्य ।
वैभारक्षोणिभर्तुर्गुणगणभणनव्यापृता भक्तियुक्तैः
सूक्तिर्जैनप्रभीयं मृदुविशदपदा धीयतां धीरधीभिः॥२९ ॥
इति वैभारगिरिमहातीर्थकल्पः ॥ (जिनप्र०) श्लोकबद्धः ॥

प० ३१—कौशांबीकल्पः । जिनप्र० ( मा० )

प० ३३—श्रीअयोध्याकल्पः समाप्तः ॥ ( मा० )

प० ३३—॥ ४ इति श्रीअपापाकल्पः ॥

प० ३४—इति कलिकुंडेश्वरकल्पः । जिनप्र० ( मा० )

प० ३५—इति श्रीहस्तिनापुरतीर्थकल्पः समाप्तः ॥ ( मा० )

प० ३७—सच्चउरे वीरमुक्खाउ छव्वाससएहिं महंतं कारिअं अब्भंलिहसिहरं चेइअं । तत्थ पइट्ठाविआ पित्तलमई सिरिमहावीरपडिमा जज्जिगसूरीहिं

प० ३८—तेण य सच्चेण विक्कमाउ अट्ठहिं सएहिं पणयालेहिं वरिसाणं गएहिं भंजिऊण सों राया मारिउं गउ सट्ठाणं

हम्मीरो तउ अन्नया अन्नो गज्जणवई गुज्जरं भंजित्ता तउं चलंतो पत्तो सच्चउरे स(त्त)सयइक्कासीए विक्कमवरिसे मच्छराउं—दिट्ठं तत्थ मणोहरं वीरभवणं पविहा हणहंणत्ति भणि रामिलभिरकुणा तउ गयउरे ज्जुन्नित्वा वीरसामी ता णिउं··· अल्लावदीणराएण सो चेव अणप्पमाहप्पो भयवं वीरसामी तेरसय सत्तसट्ठे विक्कमाइच्चसंवच्छरे दिल्लीए आणित्ता आसायणाभायणं कउ ···

प० ३८—इति श्रीसत्यपुरकल्पः ॥

प० ४०—२४ श्रीअष्टापदमहातीर्थकल्पः कृतिरियं श्रीधर्मघोषसूरीणाम् ॥ ( संस्कृते श्लोकबद्धः )

प० ४१—अज्जमहागिरिसीसो कोडिन्नगुत्तो असामित्तो सिरिवीरनिव्वाणउं वीसुत्तरे वाससयदुगे—वोलीणे··· चउत्थो निह्नवो जाउ··· इति श्रीमिथिलातीर्थकल्पः ॥

प० ४३—इति श्रीधर्मनाथजन्मभूमिरत्नपुरतीर्थकल्पः ( जिनप्र० सं० गद्य० )

प० ५१—सत्तरिसमहिए वाससए गए थूलिभद्दंमि सग्गइए···
मह मुक्ख गमणाउं पालयनंदचंदगुत्ताइराईसु वोलीणेसु चउसय सत्तरे[रि]हि विक्कमाइच्चो राया होही, तत्थ सट्ठीवरिसाणं पालगस्स रज्जं पणपण्णं सयं नंदाणं अट्ठोत्तरं सयं मोरियवंसाणं तीसं पूसमित्तस्स सट्ठी बलमित्तभाणुमित्ताणं वात्रीसं नरवाहणस्स तेरस गर्दभिल्लस्स चत्तारि सगस्स तउं विक्कमाइच्चो सो साहियसुवण्णपुरिसो पुहविं अरिणं काउं नियसंवच्छरं पवत्तेही ।
तह गद्दभिल्लरज्जस्स च्छेयगो कालगायरिउं होही ।
तेवण्णचउसएहिं गुणसयकलिउं सुअपउत्तो ॥ १ ॥ ···

प०५९—इय पावापुरिकप्पो दीवमहुप्पत्तिभणणरमणिज्जो ।
जिणप्पहसूरीहिं कउ ठिएहिं सिरिदेवगिरिनयरे ॥ १ ॥
तेरहसत्तासीए विक्कमवरिसंमि भद्दवयबहुले ।
पुसक्कबारसीए समत्थिउ पसमत्थिकरो ॥ २ ॥
समाप्तोयं श्रीअपापाबृहत्कल्पो दीपोत्सवकल्पो वा ॥...
चा(वा)लदेसावयंसे कण्णा[ङ्गा]णयनयरे विक्कम्मपुरवात्थव्व-
पहुजिणवइसूरितुल्लपिउं साहु माणदेवकाराविअ[आ]बा-
रहसयतित्तीसे विक्कमवरिसे आखाडसुद्धदशमीगुरुदिवसे
सिरिवइसूरीहिं अम्ह चेय पुव्वायरिएहिं पइट्ठिया । ... ।
बारहसय अडयाले विक्कमाइच्चसंवच्छरे चाहुयाणकुलपईपुढ-
विरायनरिंदसुरत्ताणसाहवदीणेण नीए रज्जपहाणेण परमसा-
वए(ण) सिद्धिरामदेवेण सावयसंघस्स लेदो पेसिउ जहा तुरय
रज्जसंज्जासं जायं सिरि महावीरपडिमा पच्छन्नं धारियव्वा।

द्वि०प०५९—ढिल्लीसाहापुरे खरयरगच्छालंकारसिरिजिणसिंहसूरिप-
रिठिया सिरिजिणप्पहसूरिणो कमेण महारायसभाए पंडिय
गुट्ठिए एत्थु आसको नाम विसिट्ठयरा पडिउत्ति । रायरायेण
पुट्ठे जोइसि धाराधरेण तेसिं गुणत्थुई पारद्धा । ...

६१ श्रीकात्यायनीयमहावीरकल्पः वा कल्याणपुरकल्पः ॥ ॥...
अन्वितत्रिनवतेर्नवशत्या अत्ययेत्र शरदां जिनमोक्षात् ।
कालको व्यधित वार्षिकमार्यः पूर्वभाद्रपदशुक्लचतुर्थ्याम् ॥४॥..
शातवाहनपुरःसरा नृपाश्चित्रकारिचरिता इहाभवन् ।
दैवतैर्बहुविधैरधिष्ठिते चाञ्चसत्रसदनान्यनेकशः ॥ ५ ॥
कपिलात्रेयबृहस्पतिपंचाला ह महीभृदुपरोधात् ।
न्यस्तस्वस्वचतुर्लक्षमंथार्थश्लोकमेकमग्रथन(म्) ॥७॥

॥ स चायं श्लोकः ॥

जीर्णे भोजनमात्रेयः कपिलः प्राणिनां दया ।
बृहस्पतिरविश्वासः पंचालः स्त्रीषु मार्दवम् ॥ १ ॥

प० ६२–१९ श्रीप्रतिष्ठानपत्तनकल्पः ॥(जिनप्र०) श्लोकबद्धः ।

प० ६४–(४८) नंदीश्वरकल्पः ( पूर्ववत् )

प० ६५–कप्पं पढंतु असढा इय भणइ जिणप्पहो सूरी॥१॥[१३]

श्रीकांपिल्यपुरकल्पः ॥ ( मा० गद्यबद्धः । )

प० ६६–बंभाणगच्छमंडणसिरिजसोभद्दसूरिणो खंभाइत्तो नयरो-वरि विहरंता तत्थ आगया लोगेहिं विन्नवियं भयवं तित्थं उल्लयिउ गंतुं न कप्पइ पूरउ तेंहि सूरीहिं तत्थ ताउ नमं-सियाउं पडिमाउ मग्गसिरिपुन्निमाए धयारोवे महुसव-पुव्वं कउ । अज्ज वि पइवरिसं तमेव दिणे धयारोवो कीरइ । सो धयारोवमहूसवो विक्कमाइच्चाउ पंचसु सए दुरत्तेसु वरिसाणं अइक्कंतेसु संवुत्तो ॥ तउ अट्ठसयेसु दुरुत्तरेसु विक्कमवासेसु अणहिल्लगोव्वालपरिक्खियए एसो लक्खारट्ठाणो पट्टणं चउक्कडवंसमुत्ताहलेण वणरायराइणो निवेसिअं । तत्थ वणरायजोगरायखेमरायभूअडवयरसीह-रयणाइच्चसामंतसीहनामाणो सव्वचाउक्कडवंसरायणो जाया, तउ तत्थेव पुरे चालुक्कवंसे मूलरायचामुंडरायवल्लहरायदु-ल्लहरायभीमदेवकच्चजयसिंहदेवकुमारपालदेवाजयदेवमूल-रायभीमदेवाभिहाणा एगारसनरेंदा । तउ वाघेला अच्चए लूणयसा य वीरधवलवीसलदेवसारंगदेवकण्णदेवनरिंदा संजाया । तत्तो अल्लावदीणरसुत्ताणेण गुज्जरधरित्तीए आणा पयट्टा ॥…॥ अरिष्टनेमिकल्पः ॥ (जिनप्र०) ॥

प० ६७–श्रीशंखपुरकल्पः ॥ (मा०) ॥

प० ७०–श्रीनासिक्यपुरकल्पः ॥ जिनप्र० ॥ (मा०)

प० ७१–हरिकंखीनगरकृतवसतेः श्रीपार्श्वनाथस्य कल्पः ॥ जिनप्र० ॥ (मा०)

प० ७२–कपर्दियक्षकल्पः ॥ जिनप्र० (मा०)

प० ७३–शुद्धदंतीपार्श्वनाथकल्पः ॥ जिनप्र० ( मा० )

प० ७४–अभयकीर्त्तिभानुकीर्त्तिअंबाराजकुलास्तत्रमठपत्याचार्याश्चैत्यचिंतां कुर्वतः। अथ प्राग्वाटोवंशावतंसेन महात्मना साधुहालाकेन निरपत्येन पुत्रार्थिना विरचितमुपयाचितकमिदम्। मम सूनुर्जनिता तदात्र चैत्यमुच्चैस्तरमिति। क्रमेणाधिष्ठायकात्रिदशसांनिध्यतः पुत्रस्तस्योदपद्यत कामदेवाख्यः तथा चैत्यमुच्चैस्तरशिखरमचीकरत्साधुहालाकः क्रमात्साधुभावडस्य दुहितरं परिणायितः कामदेवः पित्रापि डाहग्रामादाहूय मलयसिंहादयो देवार्चकाः स्थापिताः....

७५ श्रीअभिनंदनस्य कल्पः ॥ जिनप्र० ॥

७८ इति प्रतिष्ठानपत्तनकल्पः ॥ ( शातवाहनराजोत्पत्तिः )

८४ तत्रैव—शातवाहनकथालेशश्च ॥

८५ विक्रमादित्यवर्षेषु षष्ट्यधिकत्रयोदशशतेष्वतिक्रांतेषु लक्षणावती हम्मीरश्रीसुरत्राणसमदीनः शंकरपुरदुर्गोपयोगिपाषाणग्रहणार्थं प्रतोलीं पातयित्वा कपाटसंपुटमग्रहीत् ॥

८६ चंपापुरकल्पः ॥ जिनप्र० ॥

९१ पाटलीपुत्रपुरकल्पः ॥ जिनप्र० ॥ (पाटलीपुत्रपुरोत्पत्तिः)

९३ श्रावस्तीकल्पः ॥ जिनप्र० ॥ ( मा० )

९७ वाराणसीकल्पः ॥ जिनप्र० ॥

१०० इति श्रीमहावीरगणधरकल्पः ॥ ( मा० )

प०११०१—इत्थेव चेइय परिसरत्ति एहिं हत्थेहिं फलही चिट्ठ इत्ति खणिऊण लद्धा फलही कारियं निरुवमरूवं पासनाथ-बिंबं वारससयच्छासट्ठे विक्कमसंवच्छरे देवाणंदसूरिहिं पइट्ठिअं ठाविअं चेइए पसिद्धं च कोकापासनाहुत्ति ॥ कोकापार्श्वनाथकल्पः समाप्तः ॥ ( मा० )

प०११०२—कोटिशिलातीर्थकल्पः ॥ ( मा० )

प०११०४—वस्तुपालतेजपालयोः कल्पः ११०४ ॥ जिनप्रभ० ॥

प०११०९—चेल्लणापार्श्वनाथकल्पः ॥ जिनप्रभः—तत्कृतस्तोत्रान्ते

शशधरऋषीकाक्षिक्षोणीमिते शकवत्सरे
गृहमणिमहे संघान्विता उपेत्य पुरीमिमाम् ।
मुदितमनसस्तीर्थ[र्थेशस्य]प्रभावमहोदधि-
रिति विरचयांचक्रुःस्तोत्रं जिनप्रभसूरयः ॥ १ ॥

॥ टिंपुरीस्तोत्रम् ॥

प०१११—समाप्तस्तीर्थनामधेयसंग्रहकल्पः ॥ जिनप्र० ॥ (मा०)

प०११३—समवसरणरचनाकल्पः ॥ जिनप्र०॥ ( मा० )

प०११५—सरोडाप्रभृतिग्रामाणां षट्पंचाशतं श्रीकुंडगेश्वरऋषभ-देवाय शासनेन स्वनिश्रेयसार्थमदात् ॥ ततः शासन-पट्टिका ॥ श्रीमदुज्जयिन्यां संवत् १ चैत्रसुदि १ गुरौ भाढदेशी महाक्षपटलिकपरमार्हतश्वेतांबरोपासकः ब्राह्मण-गौतमसुतकात्यायनेन राजाऽलेखयत् ॥ ...

श्रीकुंडगेश्वरयुगादिदेवकल्पः ॥ जिनप्र० ॥

प०११६-१४—इति व्याघ्रीकल्पः संस्कृतश्लोकबद्धः ॥ जिनप्र०।

प० १२०—इति अष्टापदकल्पः ॥ ( मा० ) ( तदंते )

नंदानेकपशक्तिशीतगुमिते श्रीविक्रमोर्वीपते—
र्वर्षे भाद्रपदस्य मास्यवरजे सौम्ये दशम्यां तिथौ ।
श्रीहम्मीरमहम्मदे प्रतपति क्ष्मामंडलाखंडले
ग्रंथोऽयं परिपूर्णतामभजत श्रीयोगिनीपत्तने ॥ १ ॥

प० १२१ इत्थं पृथत्क[थक्क]विषयार्कमिते शकाब्दे
वैशाखमासि सितपक्षगषष्ठितिथ्याम् ।
यात्रोत्सवोपनतसंघयुतो यतींद्रः
स्तोत्रं व्यधाद्गजपुरस्य जिनप्रभाख्यः ॥ २० ॥

इति हस्तिनापुरस्तवनकृतिः श्रीजिनप्रभसूरीणाम् ॥

अह विज्जातिलयमुणी आएसा संघतिलयसूरीणं ।
परिसेसलवं जंपइ वन्नाणय वीरकप्पस्स ॥ १ ॥

प० १२२ ताणं चेव गुरूणं सीसुत्तमेहिं रायसभामंडणेहिं
गुरुगुणालंकिअदेहेहिं सिरिजिणदेवसूरीहिं

प० १२४ पातसाहिणा तउ तेरससयनवासियवरिसे आसाढ
कण्हसत्तमीए मुमहत्ते महं सयं नरिंदेणदाविज्जमाणम-
हादानं गाइज्जमाणमंगलं पविट्ठा पोसहसालं भट्टारया ॥

प० १२६ कात्यायनीयश्रीमहावीरकल्पः ॥ ( मा० )

१२८ श्रीआरामकुंडपद्मावतीदेवीकल्पः ॥ जिनप्र० ॥

प० १३०—माणिक्यदेवकल्पः ॥ जिनप्र० ॥ ( मा० )

प० १३२—अंतरिक्षपार्श्वनाथकल्पः ॥ जिनप्र० ॥ ( मा० )

प० १३४—स्तंभनकल्पशिलोंछः ॥ ( मा० )

प० १३५—कलिकुंडकुकुडेश्वरकल्पः ॥ जिनप्र० ॥ (मा० )

प० १३६ एगारससएसु इक्कासीइसमहिएसु विक्कमाइवरिसेसु
अइक्कंतेसु रायगच्छमंडणसिरिसीलभद्दसूरिपट्टपइट्ठिएहिं मह-

वाइदिअंवरगुणवंदविजयपत्व[ इ ]पइडेहिं सिरिधम्मघोससूरिहिं पासनाहचेईअसिहरे चउव्विहसंघसमरक्खं पइट्ठा कथा ॥ इति फलवर्धिपार्श्वनाथकल्पः । जिनप्रभकृतः ॥ मा० ॥

प० १३८ कोहंडीयदेवकप्पो ॥ ( मा० )

प० १३९ अंबियदेवीकप्पो ॥ ( मा० )

इति खरतरगच्छालंकारजिनप्रभसूरिविरचितस्तीर्थकल्पः समाप्तः ॥

No. 1263.

## दशाश्रुतस्कन्धचूर्णी ।

आ०—वंदामि भद्दबाहुं पाईणं चरिमसयलसुयनाणिं ।
सुत्तस्स कारगमिसिं दसासुकप्पे य ववहारो ॥ १ ॥
आउविवागज्झयणाणि भावउ दव्वउ

च०—नालंधो वा जात्यंधः सेसं कंठं । जावणियाव जावकरणउं । सव्वेसिंपि णयाणं गाथा० ॥ दशानां चूर्णी सम्मत्ता॥

No. 1268.

## धर्मपरीक्षाकथा—रामचन्द्रः ।

आ०—प्रणिपत्य जिनं भक्त्या स्याद्वादवरनायकम् ।
कथां धर्मपरीक्षाख्यामभिधास्ये यथागमम् ॥ १ ॥

च०—वासुपूज्यकेवलिनं स्तुत्वा स्वावासं गतौ सुखेन स्थितौ ।
इति श्रीरामचंद्रेण मुनिना गुणशालिना ।
ख्याता धर्मपरीक्षा सा कृता कृतिरियं ततः ॥ १ ॥
श्रीपूज्यपादसद्वंशे जातोऽसौ मुनिपुंगवः ।
पद्मनंदी इति ख्यातो भव्यव्यूहप्रवंदितः ॥ २ ॥
तच्छिष्यो देवचंद्राख्यो भद्रश्चारुगुणान्वितः ।
वेदिता सर्वशास्त्राणां ख्यातो धर्मरताशयः ॥ ३ ॥

स च शुद्धव्रतोपेतः समयादिविवर्जितः ।
समयः सर्वसत्त्वानां तत्प्रार्थनवशाद्वरः ॥ ४ ॥
यावद्व्योम्नि प्रवर्त्तेते शशांकरवितारकाः ।
तावद्धर्मपरीक्षेयं वर्त्तिष्यति सदाशये ॥ ५ ॥
पद्मनिवासभूता हि कथा पद्मायनी वरा ॥
तथा धर्मपरीक्षा च मिथ्यात्वाज्ञानध्वंसिनी । ६ ॥

इति धर्मपरीक्षा कथा समाप्ता ।

No. 1271.

नमस्कारस्तवः सटीकः—मू०टी०जिनकीर्त्तिसूरिः।

टी० आ०—जिनं विश्वत्रयीवंद्यमभिवंद्य विधीयते ।
परमेष्ठिस्तवव्याख्या गणितप्रक्रियान्विता ॥ १ ॥

तत्रादावभिधेयगर्भां समुचितेष्टदेवतानमस्काररूपमंगलप्रतिपादिकां गाथामाह ॥ परमिट्ठि० ॥ व्याख्या । परमेष्ठिनोऽर्हदादयस्तेषां नमस्कारः ।

मू० आ०—परमिट्ठिनमुक्कारं थुणामि भत्तीइ तन्नवपयाणं ।
पत्थार१ भंगसंख्या२ नट्ठु३ दिट्ठा४ इ५ कहणेण ॥ १ ॥

मू० च०—तवगच्छमंडणाणं सीसो सिरिसोमसुंदरगुरूणं ।
परमपयसंपत्थी जंपइ नवपयथयं एअं ॥ ३० ॥
पंचनमुक्कारथयं एयं सेयं करंति संझमवि ।
जोडाएइ लहइ सो जिणकित्तियमहिमसिद्धिसुहं ॥ ३१ ॥
॥ इति० ॥

टी० च०—श्रीमत्तपागणनभस्तरणेर्विनेयः
श्रीसोमसुंदरगुरोर्जिनकीर्त्तिसूरिः ।

स्वोपज्ञपंचपरमेष्ठिमहास्तवस्य
वृत्तिं व्यधाज्जलधिनंदमनुप्रमेऽब्दे ॥ १ ॥
इति जिनकीर्त्तिसूरिविरचितनमस्कारस्तववृत्तिः ॥

## No. 1272.

नयप्रकाशाष्टकं सटीकम्—मू०टी०पद्मसागरः ।

आ०टी०—गंगाप्रवाहा इव वाग्विलासा
जयंति यस्य स्फुरदंगिरंगाः ।
स्वयं पवित्रा इति पूतविश्वाः
सोस्तु श्रिये श्रीजिनवर्धमानः ॥ १ ॥

आ०मू०—तस्मै नमः श्रीजिनशासनाय
सत्सप्तभंगीनयवासनाय ।
आसाद्य माद्यंति यदीयदेश-
मप्यक्षपादादिकदर्शनानि ॥ १ ॥

च०मू०—जगत्यसौ श्रीजिनशासनस्तवः
साद्वादतात्पर्यनि(बंध)बंधुरः ।
नयप्रकाशाष्टकनामधारकः
स्वार्थं कृतः पंडितपद्मसागरैः ॥ १ ॥

च०टी०—सुकरमेवेदं नवमवृत्तमिति समाप्तेयं श्रीनयप्रकाशवृत्तिः।
स्याद्वादवादनिष्णातचक्रिचक्रशिरोमणिः ।
अतुच्छस्वच्छसद्गच्छतपोगच्छप्रभुं प्रभुः ॥ १ ॥
श्रीहीरविजयाभिख्यः सूरिर्जयति भूतले ।
यद्वचनग्रामपीयूषास्वादवान्विबुधो जनः ॥ २ ॥
राज्ये तदीयेऽखिलशास्त्रवेदिनः श्रीवाचकाग्रेसरधर्मसागराः ।
जयंति तेषां चरणप्रसत्त्या नयप्रकाशो विहितो मयायम् ॥३॥

चक्रे शास्त्रमिदं यत्नात् त्र्यभिषट्चंद्रवत्सरे ।
पद्मसागरसंज्ञेन बुधेन स्वात्मबुद्धये ॥ ४ ॥

No. 1278.

नेमिनिर्वाणकाव्यम्—वाग्भट्टः ।

आ०—श्रीनाभिसूनोः पदपद्मयुग्म-
नखाः सुखानि प्रथयंतु ते वः ।
समन्ना [ समानमन्ना ]किशिरःकिरीट-
संघट्टविश्रस्तमणीयितं यैः ॥ १ ॥

च०—सर्वासु दिक्षु विरचय्य स धर्ममेव-
मेकातपत्रमवसादितमोहशत्रु(ः) ।
विच्छिन्नकर्मनिगडः सह मुक्तिवध्वा
भेजे सुखानि भगवानविनश्वराणि ॥ ८४ ॥

इति श्रीनेमिनिर्वाणे वाग्भट्टविरचिते महाकाव्ये मुक्तिगमनवर्णनो नाम पंचदशः सर्गः ॥

No. 1279.

पञ्चकल्पभाष्यम्—संघदासः ।

आ०—वंदामि भद्दबाहुं पाईणं चरिमसयलसुयणाणीं ।
सुत्तत्थकारगमिसिं दसाणकप्पे य ववहारे ॥
कप्पंति णाम णिप्पण्णं महत्थं वत्तु कामतो ।
णिज्जूहगस्स भत्तीय मंगलट्ठा य संथुई ।

च०—कप्पपणगस्स भेदो परुविउ मोक्खसाहणट्ठाए ।
जं चरिऊण सुविहिया करेंति दुक्खक्खयं धीरा ॥

पंचविहसुत्तकप्पाण विभासावित्थरं पमोत्तूणं ।
गहिया सीसहियट्ठा भव्वोछित्तट्ठया चेव ॥
महत्पंचकल्पभाष्यं संघदासक्षमाश्रमणविरचितं समाप्तमिति ॥छ
गाहग्गेणं पंचवीससयाइं चउहत्तराइं ॥ २५७४ श्लोक ग्रंथाग्रं ३१८५छ

No. 1280.

पञ्चसूत्रं सटीकम्—हरिभद्रः ।

टी०आ०—प्रणम्य परमात्मानं महावीरं जिनेश्वरम् ।
सत्पंचसूत्रकव्याख्या समासेन विधीयते ॥ १ ॥

आह किमिदं पंचकसूत्रकं नाम उच्यते । पापप्रतिघातगुणबीजाधानसूत्रादीनि पंचसूत्राण्येव । तद्यथा । पापप्रतिघातगुणबीजाधानसूत्रम् १ । साधुधर्मपरिभावनासूत्रम् २ । प्रव्रज्याग्रहणविधिसूत्रम् ३ । प्रव्रज्यापरिपालनासूत्रम् ४ । प्रव्रज्याफलसूत्रमिति ५ ॥

मू०—आ०—णमो वीअरागाणं सव्वण्णूणं देविंदपूइआणं
मू०—च०—तिलोयनाहबहुमाणेणं निस्सेअससाहिगत्ति
पवज्जाफलसुत्तं ५ समाप्तं पंचसूत्रकम् ।

कृतं चिरंतनाचार्यैर्विवृतं च जाकिनीमहत्तरासूनुश्रीहरिभद्राचार्यैः ॥

टी०च०—सर्वानुभावादौचित्येन मे धर्मे प्रवृत्तिर्भवतु सर्वे सत्त्वाः सुखिनः संतु ॥ इति पंचसूत्रटीका समाप्ता । कृतिः श्वेतांबराचार्यहरिभद्रस्य धीमतः । जाकिनीमहत्तरासूनोः । ग्रंथाग्रमनुष्टुप्छंदोद्वेशतः शतान्यष्टावशीत्यधिकानि ॥

No. 1281.

पद्मचरित्रम्—विमलः ।

आ०—सिद्धं सुरनरकिंनरदणुवइभुयगेंदचंदपरिमहिअं ।
उसभं जिणवरवसभं उवसप्पणिआइतित्थयरं ॥ १ ॥...

णामावलिनिबद्धं आयरियपरंपरागयं तत्थं ।
वोच्छामि पउमचरियं जहाणुपुव्विं समासेण ॥ ८ ॥
को वण्णिऊण तीरइ नीसेसं पउमचरियसंबंधं ।
मोत्तूण केवलिजिणं तिकालणाणं हवति जस्स ॥ ९ ॥
जिनवरमुहाउ अत्थो जो पुव्विं णिग्गउ बहुवियप्पो ॥
सो गणधरेहि धरिउं संखेवमिणो अ उवदिट्ठो ॥ १० ॥...
एअं अट्ठमरामदेवचरियं वीरेण सिट्ठं पुरा
पच्छा उत्तमसाहवेहि धरियं लोगस्स उब्भासियं ।
एत्ताहे विमलेण पायडफुडं गाहाणिबद्धं कयं
सुत्तत्थं णिसुणंतु संपइ महापूतं पवित्तक्खरं ॥

इति श्रीपउमचरिए सुत्तत्थविहाणो णाम उद्देसो पढमो-सम्मत्तो ॥ ॥...

एवं वीरजिणेण रामचरिअं सिट्ठं महत्थं पुरा
पच्छाखंडलभूतिणा उ कहिअं सिस्साण धम्मासयं ।
भूयो साहुपरंपराइ सयलं लोए ठिअं पायडं
एत्ताहे विमलेण सुत्तसहिअं गाहानिबद्धं कयं ॥ २ ॥
पंचेव य वाससया दुसमाए तीसवरिससंजुत्ता ।
वीरेहि सिद्धिमुवगए तउ निबद्धं इमं चरिअं ॥ ३ ॥
हलहरचक्कहराणं समयं लंकाहिवेण जं वृत्तं ।
विसयामिससत्ताणं इत्थिनिमित्तं रणं परमं ॥ ४ ॥
चउजुवतिसहस्सेहि ण य पत्तो उवसमं मयणमूढो ।
सो विज्जाहरराया गतो अ णरयं असिमिअप्पा ॥ ५ ॥
जाणे अ पईणीहिं णालिज्जंतो वि ण गतो तित्तिं ।
कह पुण अण्णे तुट्ठिं उव्विहिति थोवाविलयाहिं ॥ ६ ॥

जे विसयसुहासत्ता पुरिसा तवनिअमसंजमविहूणा ।
ते उज्झिऊण रयणं गिण्हंति ह कागणीं मूढा ॥ ७ ॥
एअं वेरनिमित्तं परनारीसंसिअं सुणे ऊणे ।
होह परलोअकंखा परविलयं चेव वा वज्जह ॥ ८ ॥
सुकयफलेण मनुस्सो पावति ठाणं सुसंपयनिहाणं ।
दुकयफलेण य कुगतिं लहति सहावो इमो लोए ॥ ९ ॥
ण य देंति कोंति कस्सति [देंति कोवि कस्सवि]
आरोग्गधणं तहेव परमाउं ।
जे होंति सुरा लोए तेहे किं दुक्खिआ बहवे ॥ १० ॥
कामत्थधम्ममोक्खो एत्थ पुराणंमि वण्णिआ सव्वे ।
अगुणे मोत्तूण गुणे एह हंजे तुम्ह हिअजणणे ॥ ११ ॥
बहुएण किं व कीरइ अव्वो भणिअव्वएण लोगंमि ।
एकपयम्मि विसया उज्जमह जिणवरमयंमि ॥ १२ ॥
ऊणं अतिरित्तं वा जं एत्थ कयं पमायदोसेणं ।
तं से पडिपूरेउं खमंत मह पंडिआ सव्वं ॥ १३ ॥
बहुनामा आयरिउ ससमयपरसमयगहिअसब्भावो ।
विजउ तस्स उ सीसो नाइल्लकुवलयंसणंदिअरो ॥ १४ ॥
सीसेण तस्स रइअं राहवचरिअं तु सूरि विमलेणं ।
सोऊणं पुव्वगए णारायणरामचरिआइं ॥ १५ ॥
जेहिं सुअं ववगमच्छरेहिं सब्भत्तिभाविअमणेहिं ।
ताणं वि देउ बोहिं सुविमलचरिआण जिणयंदो ॥ १६ ॥

श्रीपउमचरियं संमत्तं ॥

No. 1286.

पार्श्वनाथचरित्रम्—भावदेवसूरिः ।

नाभेयाय नमस्तस्मै यस्य क्रमनखांशवः ।
मौलौ दधति नम्राणां मांगल्यामक्षतश्रियम् ॥ १ ॥

च०—विश्वातिशायिमहिमा धरणोरगेंद्र-
पद्मावतीसततसेवितपादपीठः ।
अंतर्बहिश्च दुरितच्छिदनंतशर्मा
देव(:)क्रियादुदयिनीं शुभभावलक्ष्मीम् ॥ ७४ ॥

इति कालिकाचार्यश्रीसंतानीयश्रीभावदेवविरचिते श्रीपार्श्वनाथचरित्रे महाकाव्ये अष्टसर्गे भावांके भगवद्विहारवर्णनो नाम अष्टमः सर्गः ॥ संवत् १५३२ वर्षे आश्विनसुदि ११ सोमवासरे अवंत्यां श्रीतपापक्षे श्रीलक्ष्मीसागरसूरि०

No. 1291.

प्रतिक्रमक्रमविधिः—जयचन्द्रः ।

आ०—श्रीवर्धमानमानम्य श्रीगुरूंश्च गुणैर्गुरून् ।
प्रतिक्रांतेः क्रमः कोपि यथावगममुच्यते ॥ १ ॥

च०—इत्युक्तं निरतिचाराणामपि प्रतिक्रमणकारणम् । एताः श्लोकमय्यो दृष्टांतकथाः श्रीआवश्यकलघुवृत्तितो लिखिता ज्ञेयाः।

इत्थं सहेतुककथाक्रमसूत्रयुक्त्या
साधुः प्रतिक्रमणकृन्निजकर्मजालम् ।
सद्यो विभिद्य वृतकेवलिविक्रमेण
मुक्तिं भजेत भृशमक्षयसौख्यलक्ष्मीः ॥ १ ॥
श्रीजयचंद्रगणींद्रैः प्रतिक्रमक्रमविधिर्यथावगमम् ।
लिखितस्तत्रोत्सूत्रं यन्मिथ्या दुष्कृतं तस्य ॥ २ ॥
एवं श्रीयुतसोमसुंदरगुरुश्रीपट्टपूर्वाचला-
दित्यश्रीजयचंद्र (सूरि) गुरुभिः श्रीमत्तपागच्छपैः।
किंचिद्धेतुमयः प्रतिक्रमविधिर्वर्षैरसद्योतिथि १५०६
संख्यैर्दाक्षजनप्रबोधविषये कृत्प्रश्चिरं नंदतात् ॥ ३ ॥

No. 1293.

प्रतिक्रमणसूत्रलघुवृत्तिः—तिलकसूरिः।

आ०—श्रीवीरजिनवरेंद्रं वंदित्वा चैत्यवंदनादीनि ।
अल्परुचिसत्त्वहेतोर्विवरिष्ये गमनिकामात्रम् ॥ १ ॥

इह चैत्यवंदनादीनां वृत्तिरारब्धा परं इरियावहियाए अप्पडिहुंताए न कप्पइ किंचि चेइय वंदण सज्झाया इत्यागमात् प्रथममीर्यापथिकीसूत्रं व्याख्यायते, तच्चेदं इच्छामीत्यादि ॥

च०—नमस्करोमीत्यर्थः ॥ ५० ॥प्रतिक्रमणविवरणम् ॥

चक्रेशसूरिगुरुपट्टमठो[हो]दयाद्रि-
प्रद्योतनोपमशिवप्रभसूरिशिष्यः ।
श्रीप्राक्पदास्तिलकसूरिरधीधनोपि
श्राद्धप्रतिक्रमणसूत्रमिदं विवव्रे ॥ १ ॥

इति श्रीतिलकाचार्यविरचिता श्लोकशतद्वयप्रमाणा प्रतिक्रमणसूत्रलघुवृत्तिः समर्थयांचक्रे [ समाप्ता ]।

No. 1299.

प्रश्नोत्तररत्नमाला सटीका—मू० विमलसूरिः।
टी० देवेन्द्रसूरिः।

टी०आ०—श्रीनाभिभूर्जिनवरःकुशलाय वः स्या-
द्यस्यांसयोरुपरि कुंतलभारदंभात् ।
भव्यांगिनां भवसमुद्भवतापशांत्यै
कादंबिनी किमु समुन्नतिमाततान ॥ १ ॥
द्वाविंशतिस्तीर्थकृतोऽजिताद्याः
पार्श्वावसाना ददतु श्रियं वः ।
यन्नाममंत्रस्मृतिमात्रतोपि
प्रयाति पापाहिभयं भियेव ॥ २ ॥

चरमतीर्थकरोस्तु सदा मुदे
यदवदानकदंबकमंजसा ।
श्रवणसंपुटमध्यमुपागतं
वद तनोति न कस्य चमत्कृतिम् ॥ ३ ॥
श्रीगौतमस्तान्मम लब्धिसिद्धये
यः केवलज्ञानपयोधिपुत्र्या ।
स्वयं वियुक्तोपि परं परेषा-
मेतत्प्रदोऽहो महतां स्वभावः ॥ ४ ॥
विश्वप्रशस्यगुणरत्नसमुद्ररुद्र-
पल्लीयगच्छगगनांगणशीतभासः ।
चारित्रपात्रमतिमात्रशमैकसत्रं
श्रीसंघपूर्वतिलका गुरवो जयंति ॥ ५ ॥
तत्पट्टांभोजतिग्मांशुः श्रीदेवेंद्रमुनीश्वरः ।
भोलाखेताभिधभ्रातृयुगेनात्यर्थमर्थितः ॥ ६ ॥
प्रश्नोत्तररत्नमालां विमलाचार्यनिर्मिताम् ॥
विवृणोति सुदृष्टांतैर्ह्युपकारी सतां श्रमः ॥ ७ ॥

च० -नरं नारीं वा शृंगारयतीत्यार्थार्थः ( २९ ) समाप्ता चेयं प्रश्नोत्तररत्नमालावृत्तिः ॥ ॥ ग्रंथसंख्या ७९२२ ॥

*No. 1304.*

भक्तामरस्तवः सटीकः—मू० मानतुङ्गाचार्यः ।
टी० कनककुशलः ।

आ० टी०—प्रणम्य परमानंददायकं परमेश्वरम् ।
वृत्तिं भक्तामरस्याहं कुर्वे बालहितैषिणीम् ॥१॥

च०—टी०—मानतुंग इति स्वनामनिबंधननिगडाद्युपद्रवनाशो राजप्रसादश्चास्तूचि ॥ समुपैति समंतात्पार्श्वमायातीति मंगलम् ॥४४॥

श्रीमत्तपगणगगनांगणदिनमणिहीरविजयसूरीणाम् ।
शिष्याणुना विरचिता वृत्तिरियं कनककुशलेन॥ १ ॥
नयनशररसेंदुमिते १६५२ वर्षे विराट्नाम्नि वडनगरे।
बालजनविबोधनार्थं विजयदशम्यां हि समाप्ता ॥२॥युग्मम् ।
श्लोकानां षट्शती षोडशोत्तरा समजायत ॥
प्रत्यक्षरं गणनया वृत्तौ संख्या निवेदिता ॥ १ ॥

No. 1306.

भरतेश्वरबाहुबली वृत्तिः—शुभशीलगणिः ।

आ०—युगादौ व्यवहाराध्वा सर्वो येन प्रकाशितः ।
स श्रीवृषभयोगींद्रो दद्याद्वोऽव्ययसंपदम् ॥ १ ॥

च०—श्रीमतीकथा तपसि समाप्ता ।

श्रीचंद्रगच्छांबरभूषकोभू-
त्तपागणो सानुविद्दीप्ति [भानुरिवातिदीप्तिमान्] ।
प्रबोधयन् भव्यजनांबजालां [ऽबुजानि]
स्वगोविलासैरिव साधुवर्गम् ॥ १ ॥

तत्राभवन् वरगुणगणमणिरोहणमहीधरप्रतिमाः ।
परमगुरुसोमसुंदरगुरवः संयमरमायतयः ॥ २ ॥
तच्छिष्या मुनिसुंदरगुरवो जयचंद्रसूरयोऽभूवन् ।
पारंगतागमजलनिधिपारं गता रुचिरगुणनिलयाः॥ ३ ॥
तच्छिष्या विजयंते दधते श्रीसूरिमंत्रमहिमभरः[रम्] ।
श्रीयुक्तरत्नशेखरगुरव उदयनंदिसूरिवराः॥ ४ ॥
लक्ष्मीसागरसूरीशाः सोमदेवाह्वसूरयः ।
विजयंते लसद्विद्यावार्धिमंथनमंदराः ॥ ५ ॥
श्रीमन्मुनीशमुनिसुंदरसूरिराज-
शिष्या[ष्यो] मनीषिशुभशील इति प्रमूर्खः ।

एतां कथां वितनुते स्म नवांबरेषु
चंद्रप्रमाणसमये किल विक्रमार्कात् ॥ ६ ॥
भरहेसरबाहुबली वृत्तिः शुभशीलविबुधरचितेयम् ।
शोध्या सुबुद्धिसद्भिर्विबुधैः कूटापसारणतः ॥ ७ ॥
अनाभोगादिना किंचिद्यदत्रोत्सूत्ररोपणम् ।
चक्रे तदस्तु मे मिथ्यातमोऽर्हदादिसाक्षिकम् ॥ ८ ॥

इति श्रीमत्तपागच्छाधिराजश्रीमुनिसुंदरसूरिशिष्यपंडितश्रीशुभशीलगणिविरचिते भरहेसरबाहुबलीवृत्तिनाम्नि कथाकोशे द्वितीयो महासत्त्वाधिकारः संपूर्णः ॥

No. 1318.

रत्नशेखरनरपतिकथा—जिनहर्षः ।

आ०—अर्हं ॥ कल्लाणत्थिनिलयं नमिऊणं वद्धमाणजिनचंदं ।
पव्वतिहीण विआरं भणामि अ णिआनुसारेण ॥२॥

च०—सुणिऊणमेव मेयं चरिअं सिरिरयणसेहरनिवस्स ।
पंचसु पव्वेसु सया कायव्वो उज्जमो धम्मो ॥ ३९ ॥
एवं रयणवईए चरिअं तह रयणसेहरनिवस्स ।
निसुणिज्जंतं जायइ भविआणं बोहिलाभइं ॥ ४० ॥
सिरि चित्तकूटनयरे जिणभवणसएहिं सव्वउं भरिए ।
सिरिजयचंदमुणीसरसीसेण सुअस्स भत्तीए ॥ ४१ ॥
पागयबंधेण कहा लिहिआ जिणहरिससाहुणा एसा ।
ता नंदउ जियलोए जाव जयइ वीरजिणतित्थं ॥ ४२ ॥

इति श्रीरत्नशेखरनरपतिकथा संपूर्णा ॥ संवत् १६१४

No. 1322.

लोकतत्त्वनिर्णयः—हरिभद्रः ।

आ०—प्रणिपत्यैकमनेकं केवलरूपं जिनोत्तमं भक्त्या ।
भव्यजनबोधार्थं नृतत्त्वनिगमं प्रवक्ष्यामि ॥ १ ॥

अ०—तस्मादनाद्यनिधनं व्यसनोरुभीमं
जन्मारदोषदृढनेमि च रागतुंबम् ।
घोरं स्वकर्मपवनेरितलोकचक्रं
भ्राम्यत्यनारतमिदं हि किमीश्वरेण ॥ १३७ ॥

इति लोकतत्त्वनिर्णयः । भगवतः श्रीहरिभद्रसूरेः कृतिरियम् ॥

सं० २२१

No. 1328.

विंशतिस्थानकविचारामृतसंग्रहः—जिनहर्षगणिः ।

आ०—श्रीभूर्भुवः स्वस्त्रितयं पुनाना
द्रव्याभिधानाकृतिभावरूपैः ।
त्रिकालवर्त्तिस्थितयो जिनेंद्रा
सृजंतु सर्वाद्भुतसौख्यलक्ष्मीम् ॥ १ ॥
जिनेंद्रपदवीप्राप्तिनिमित्तं सुदृशां तपः ।
विंशतिस्थानकाह्वानं जयति श्रीजिनागमे ॥ २ ॥

च०—तपागच्छेऽभवद्भूम्ना महिम्ना विश्वविश्रुतः ।
जगच्चंद्रगुरुः श्रीमान् सम्यग्ज्ञानक्रियानिधिः ॥४॥
श्रीदेवेंद्रगुरुस्तस्य पट्टेऽभूत्प्रकटप्रभुः ।
[वादेना] [वादेनास] समाजेशवस्तुपालसभापतिः॥ ५ ॥
तस्य शिष्याः क्षितिख्याता विद्यानंदमुनीश्वराः ।
अजायंत जगत्पूज्या योगज्ञानक्रियागुणैः ॥ ६ ॥
तत्पट्टोदयभास्वानासीन्निःसीमतेजसां राशिः ।
श्रीधर्मघोष मेणमृत[ऋषिराट्]सच्चक्रानंदिगोविभवः ॥७॥
ततश्च श्रीसोमप्रभ सूरिंइत्याः [रिः] सीमा महात्मनाम् ।
व्यधाद्विगौतमं वीरशासनं यो निजश्रिया ॥ ८ ॥

ततः श्रीशक्रनृस्तुत्यः श्रीसोमतिलकाह्वयः ।
सूरिर्भूरियशा जज्ञे विज्ञेषु प्रथितो धुरि ॥ ९ ॥
श्रीदेवसुंदरगुरुर्गरिमांबुराशि-
र्विध्वंसितारिरभवद्भुवनातिशायी ।
तत्पट्टपंकजरविः पाणितेजी [प्रथितोरुतेजा]
भूजानिवंदितपदः शिवमार्गदर्शी ॥ १० ॥
सूरिर्युगोत्तमसमोऽजनि तस्य पट्टे
श्रीसोमसुंदरगुरुर्गुरुभाग्यशाली ।
यं श्रीसुधर्मगुरुणा गणभृत्पुरोगं
सर्वांगचंगिमगुणैस्तुलयंति संतः ॥ ११ ॥
तच्छिष्यः प्रथमः समर्थमहिमा त्रैविद्यगोष्ठीगुरुः
सूरिः श्रीमुनिसुंदरः सुरगुरुः ख्यातः क्षितौ प्रज्ञया ।
अस्ति प्रास्ततमोभरस्तदपरः सूरिस्तु भूरिप्रभा-
शाली श्रीजयचंद्र इत्यभिधया सर्वत्र लब्धोदयः ॥ १२ ॥
यो विश्वाद्भुतलब्धिभिः सुमनसामाश्चर्यकृद्भिः कलौ
सौभाग्यांबुधिराससाद पदवीं श्रीगौतमस्वामिनः ।
स श्रीमद्गुरुसोमसुंदरपदांभोजाकराहर्पति-
र्जीयाच्छ्रीजयचंद्रसूरिरचना[रवनौ]सूरीश्वरग्रामणीः ॥ १३ ॥
विंशतिस्थानकाचारविचारामृतसंग्रहः ।
गच्छेशश्रीजयचंद्रसूरिशिष्येण निर्मितः ॥ १४ ॥
वीरमगामाख्यपुरे युग्मब्ध्योर्मेदुपंचभिः ।
प्रमिते वत्सरे हर्षाज्जिनहर्षेण साधुना ॥ १५ ॥
ग्रंथस्यास्य पवित्रस्य वाचनश्रवणादिभिः ।
लभंते प्राणिनः प्रौढां श्रीजिनेश्वरसंपदम् ॥ १६ ॥

ग्रंथोष्टाविंशतिशतानुमितः सर्वसंज्ञया ।
जीयादयं बुधश्रेणिवाच्यमानो निरंतरम् ॥ १७ ॥
इति श्रीविंशतिस्थानकविचारामृतसंग्रहः संपूर्णः ॥

## No. 1333.

### विधिमार्गप्रपा—जिनप्रभसूरिः ।

आ०—नमिय महावीरजिणं सम्मं सरिउं गुरूवएसं च ।
सावयमुणिकिच्चाणं समायारीं लिहामि अहं ॥ १ ॥

च० —जिणदत्तसूरिसंताणतिलयजिणसिंहसूरिसीसेण ।
गुत्तिरसकिरियठाणप्पमिए विक्कमनिवइवरिसे ॥ ९ ॥
विजयदसमीइ एसा सिरिजिणपहसूरिणा समायारी ।
सवरोवयारहेउं समाणिया कोसलानयरे ॥ १० ॥
सिरिजिणवल्लहजिणदत्तसूरिजिणचंदजिणवइमुणिंदा ।
सुगुरुजिणेसरजिणसिंहसूरिणो मह पसीयंतु ॥ ११ ॥
वाइयसयलसुएणं वाणायरिएण अब्भसीसेण ।
उदयाकरेण गणिणा पढमायरिसे कया एसा ॥ १२ ॥
जीए पसायाउ नरा सुकईसरसत्थवल्लहा हुंति ।
सा सरसई य पउमावई य मे दिंतु सुयरिद्धिं ॥ १३ ॥
ससिसूरपईवा जाव भुवणभवणोदरं पभासेंति ।
एसा समायारी सफलिज्जउ ताव सूरीहिं ॥ १४ ॥
पचक्खरगणणाए पाएण कयं पमाणमेईए ।
चउहत्तरीसमहिया पणतीससया सिलोयाणं ॥ १५ ॥
विहिमग्गपवानामं सामायारी इमा चिरं जयउ ।
पल्हायंती हिययं सिद्धिपुरीपंथियजणाणं ॥ १६ ॥

संवत् १६६६ अंकतोपि ग्रंथाग्रं ३५७४

## No. 1334.

विवेकविलासः—जिनदत्तसूरिः ।

च०—१३३०॥ ग्रंथाग्रं सर्वसंख्यया ॥ १३६१ ॥

इति श्रीजिनदत्तसूरिविरचिते द्वादशोल्लासे श्रीविवेकविलासे ग्रंथस्य प्रशस्तिः । संपूर्णोऽयं विवेकविलासः ॥ संवत् १६८५ वर्षे फाल्गुनमासे शुक्लपक्षे द्वितीयातिथौ सोमवासरे मीनलग्ने वहमाने शुभवेलायां भट्टारकश्री १९ श्रीविजयदेवसूरिराज्ये श्रीशत्रुंजयकरमोचनाद्यनेकशुभकृतकारि श्री श्री श्री श्री श्री भानुचंद्रगणितच्छिष्यसोमचंद्रगणिनाऽलेखि ॥

## No. 1340.

शतपदीसारोद्धारः—मेरुतुङ्गाचार्यः ।

आ०—श्रीअर्हं तं जिनं नत्वा भव्यानां हितकाम्यया ।
शतपद्याः समुद्धृत्य लिख्यते सारसंग्रहः ॥ १ ॥

इह यद्यपि परमार्हतश्रीकुमारपालभूपालप्रणतपादारविंदकलिकालसर्वज्ञप्रभुश्रीहेमाचार्यप्रतिष्ठितविधिपक्षमुख्याभिधानसिद्धांतप्रणीतसामाचारीप्रधाननिर्निदानतपःक्रियारंजितचक्रेश्वरीशासनदेवताविहितसान्निध्यसुधासेकसंजायमानशतशाखाविस्तारसारश्रीमदंचलगच्छनायकप्रभुश्रीधर्मघोषसूरिसुगुरुविरचितः शतपदीनामा प्रतिपदमनेकसिद्धांतालापकबहुलो विंशत्युत्तरशतप्रश्नोत्तरविचाररुचिरो द्विपंचाशच्छतप्रमाणो महाग्रंथः समस्त्येव । तथापि संक्षेपरुचिसत्त्वानुकंपया शतपदीग्रंथादुद्धृत्य कतिपयानि विशेषोपयोगीनि लिख्यंते ॥

च०—तत्र श्रीआर्यरक्षितसूरीणां दंताणीग्रामे श्रे० द्रोणः पिता श्रा० देदी माता सं० ११३६ जन्म ११४२ व्रतं १२२६ प-

रलोकः सर्वायुर्वर्ष ९१॥ श्रीजयसिंहसूरीणां सोपारके श्री० दाहड-पिता श्रे० नेढा माता संवत् ११७९ जन्म ११९७ व्रतं १२०२ सूरिपदं १२५८ स्वर्गः सर्वायुर्वर्ष ८० ॥ तत्पट्टे धर्मघोषसूरीणां मरुदेशे माहवपुरे श्रीचंद्रः पिता श्री० राजलदे माता संवत्१२०८ जन्म १२२६ व्रतं १२३४ सूरिपदं १२६८ स्वर्गः सर्वायुः ७६ तेषां पदे प्राप्त आगमकलामुखबिरुदा मुखपाठेनैव सर्वसिद्धांता-ध्यापकाः श्रीमद्देंद्रसूरयो ऽजायंत । यैस्तिमिरवाटके ग्लानवासस्थैर्वै-दनार्थमागतस्य जावालीपुरीयसंघस्य व्यशीतिः संदेहा पृष्टा अप्येक-व्याख्यानेनैव भग्ना द्वौ संदेहौ त्वेकांते भग्नाविति । तेषां च सरनगरे सा० देवप्रसादः पिता सा० स्थिरदेवी माता । संवत् १२२८ जन्म १२३७ दीक्षा १२६३ सूरिपदं १२७१ गच्छेशपदं १३०९ स्वर्गः सर्वायुर्वर्ष ॥ ८२ ॥ तत्पट्टे श्रीसिंहप्रभसूरयः यैः प्रव्रज्यार्थमुत्सव्य दीक्षाक्षणेविरक्तेज्येष्ठभ्रातरि सिंहपराक्रमेण दीक्षां स्वीकृत्य सूत्राण्यधी-यद्भिः प्रतिपदं प्रतिलोमसूत्रपरावर्त्तनेन दाक्षिणात्यो महावादी जिग्ये । तेषां वीजापुरे श्रे०अरिसिंहः पिता प्रीतिमती माता संवत्१२८३जन्म १२९१ दीक्षा १३०९ सूरिपदं १३१३ स्वर्गः सर्वायुर्वर्ष ३१ ॥ ततः श्रीअजितसिंहसूरयः जाबालिपुरे यद्वंदनार्थमागच्छद्भिरपूर्वा-पूर्वैः श्रावकसंघैः प्राभृतेषु क्रियमाणेषु किमि( मे )तदिति पृच्छते[ता] राउलसमरसिंहेन षष्ठाष्टमविकृतित्यागादि घोरं यत्तपः श्रुत्वा नंतुमागच्छता प्रबुद्धेन स्वदेशे सत्त्वमात्रामारिः कारिता।आचार्यादीनि च महतोत्सवेन पंत्रदशपदानि स्थापितानि । ततश्च राज्ञि धर्मिष्ठे सर्ववर्णानां गलितांभोव्यापारे नमस्कारस्मरणादिधर्मकृत्ये प्रव-र्त्तत्वात् शाणादिग्रामा धर्मक्षेत्राणीत्यद्यापि प्रसिद्धा इति । डोड-ग्रामे सा० जिनदेवः पिता जिनमती माता संवत् १२८३ जन्म १२९१ दीक्षा १३१४ सूरिपदं १३१६ गच्छेशपदं १३३९ स्वर्गः

सर्वायुर्वर्ष ५७ ॥ तत्पट्टे श्रीदेवेंद्रसिंहसूरयः यद्व्याख्यानश्रवणार्थमनेकदेशेभ्यः समेत्याचार्योपाध्यायादिभिरेव पूर्णायां सभायामेत्य श्रोतृणां स्थानमेव नाभवत् । पाल्हणपुरे व्य० सांतूपिता श्रा० संतोषश्रीमाता १२९९ जन्म १३०६ दीक्षा १३२३ सूरिपदं १३३९ गच्छेशत्वं १३७१ स्वर्गः सर्वायुर्वर्ष ७२ ॥ ततः श्रीधर्मप्रभसूरयः येषां समयाधिविशिष्टतपःक्रियावतां चरणोदकेनापि सर्वदोषव्याधिशांतिरजनिष्ट । प्रसन्नतया प्रोक्तेन वचसापि सर्वार्थसिद्धिश्च । भिन्नमाले व्य० लीबा पिता व्य० बीजलदेवी माता संवत् १३३१ जन्म १३४१ दीक्षा १३५९ सूरिपदं १३७१ गच्छेशपदं १३९३ स्वर्गसर्वायुर्वर्ष ६३ ॥ ततः श्रीसिंहतिलकसूरयः । आदित्यवाटके श्रे० आसधरपिता चांपलदेवी माता संवत् १३४५ जन्म १३५९ दीक्षा १३७१ सूरिपदं १३९३ गच्छेशपदं १३९५ स्वर्गः सर्वायुर्वर्ष ५१॥ तेषां पट्टे पूज्याराध्यश्रीमहेंद्रप्रभसूरयः वडग्रामे परी० आभा पिता परी० लीबिणि माता संवत् १३६३ जन्म १३७५ दीक्षा १३९३ सूरिपदं १३९८ गच्छेशपदं १४४३ स्वर्गः सर्वायुर्वर्ष ८१ यैश्च संवत् १४०९ वर्षे नागीग्रामे वर्षास्वनागतासु ४० दिनैर्वित्रं विज्ञाय सर्वत्र धर्मध्यानं कारयद्भिः अश्वयुग्वदि ८ रात्रौ कालसर्पदष्टैः श्रीपार्श्वनाथचैत्ये सूरिमंत्रध्यानात्सर्वांगप्रसृतं दशभिर्यामैर्दुष्टविषं मुखेनैव वांतं । ततः प्रातः सहसैवोत्थितेषु येषु सहस्रसंख्ये मिलिते लोकेऽहो कलिकालेपि सम्यक् ध्यानानुभाव इति भावनां भावयति महोत्सवपूर्वकं सं० चूणामुख्यश्रावकैः शीलव्रतस्वीकारादि पुण्यलाभोऽग्रहि । सहस्रापि प्रोक्तं यैर्वचः कस्य नाम न फलितम् । ये च स्वभावतः कल्पद्रुमादिभ्योऽप्यधिकमाहात्म्यभाजो जगति व्यंजयंतः ॥ तत्पट्टकमले राजमराला इव सांप्रतं श्रीमेरुतुंगसूरींद्रा जयंति जगतीतले ॥ १ ॥

सुकुमारमतीनां तैः सुखाय व्यरचि स्वयम् ।
शतपद्याः समुद्धारस्त्रिपंचाशीतिवत्सरे ॥ २ ॥

इति शतपदीग्रंथसमुद्धारः ॥ ग्रंथाग्रं १५७०

अस्मिन् पंचदशश्लोकशती सप्ततिसंयुता ।
शतपद्याः समुद्धारे ग्रंथमानं विनिश्चितम् ॥१॥ संवत् १६१०

No. 1348.

श्रीपालचरित्रम्—मा०—हेमचंद्रः ।

आ०—अरिहाइं नवपयाइं हाइत्ता हिययकमलमज्झंमि ।
सिरिसिद्धचक्कमाहप्पमुत्तमं किंपि जंपेमि ॥ १ ॥

च०—सिरि वज्जसेणगणहरपट्टप्पहुहेमतिलयसूरीणं ।
सीसेहिं रयणसेहरसूरीहिं इमा ऊण संकलिया ॥ ३८ ॥
तस्सीसहेमचंदेण साहुणा विक्कमस्स वरिसंमि ।
चउदस अट्ठावीसे लिहिआ गुरुभत्तिकलिएणं ॥ ३९ ॥
सायरमेरू जा महियलंमि जा नहयलंमि ससिसुर ॥
वट्टंति ताव नंदउ वाइज्ज्यंता कहा एसा ॥ ४० ॥

इति श्रीश्रीपालचरित्रं श्रीसिद्धचक्रमहिमायुतं समाप्तम् ॥

No. 1358.

संदेहदोलावलीप्रकरणं लघुटीकासहितम्—

मू०जिनदत्तसूरिः । टी०जयसागरोपाध्यायः ।

आ०—जयति जगत्त्रितयगुरुः सकलमनोवांछितार्थकल्पतरुः ।
लब्धभवोदधितीरस्तत्त्वज्ञाता महावीरः ॥ १ ॥
तदनु गुरुसंप्रदायः सदुपायः सर्वथापि निरपायः ।
मम विमलहृदयकमले कलयतु कलहंस इव केलिम्॥२॥
श्रीजिनदत्तयतींद्रा युगप्रधानागमा जयंत्येते ।
संदेहतिमिरतरणि यैरेतत्प्रकरणं चक्रे ॥ ३ ॥
जीयासुः श्रुतवृद्धाः प्रबोधचंद्रगणिवाचनाचार्याः ।
तस्मिन्विदधुर्विवरणमंजूषामर्थमहतीं ये ॥ ४ ॥

तद्विवरणमंजूषामनुसृत्य पदार्थमात्रसारेयम् ।
संक्षिप्तरुचिहितार्थं विधिरत्नकरंडिका क्रियते ॥ ५ ॥

इह हि परोपकारकृतधियो विशुद्धसिद्धांताचारशृंगारितचारित्रश्रियः श्रीजिनदत्तसूरयस्तथाविधविषमदुःखमासमुल्लसदसदुपदेशदायकवचनश्रवणान्यान्यक्रियानुष्ठानदर्शनोद्भूतप्रभूतसंदेहावर्त्तपतितलोककमालोक्य कतिचित्तमुद्धर्त्तुमनसः स्वपरसंभावितप्रश्नतदनुसारितादृगुत्तरदानप्रधानसंशयपदप्रश्नोत्तरनामकं संदेहदोलावली तद्वितीयनामप्रसिद्धं प्रकरणमकार्षुः ॥ अत्र चायं वृद्धवादः । श्रीवीठणहिंडानगरवास्तव्या काचित्पुण्यमती परमखरतरश्राविकात्मगुरूपदिष्टधर्मानुष्ठाननिरता वसति स्म । अथ विविधगच्छवासिसाधुजननवनवोक्तिभिः संशयापन्ना सती सम्यगुत्तरलाभार्थं कानिचित्संदेहपदानि विज्ञप्तिकायां लिखित्वा श्रीमदंबिकादेवताप्रकाशितयुगप्रधानतावभासितनाम्नां श्रीजिनदत्तसूरीणां पादमूले प्रेषितवती श्रीपूज्यश्च तद्वाचनानंतरं तत्कालमेव तस्या भाविलोकानां चोपकारार्धशतगाथाप्रमाणमिदं प्रकरणं विरचितमिति ॥ तत्रादौ शिष्टसमयपरिपालनार्थमभीष्टदेवतानमस्कारादित्रितयप्रतिपादनार्थं गाथा द्वयमाहुः ॥

पडिबिंबियपणयजयं जस्संहिरुहोरुमउरमालासु ।
सरणागयं व नज्जइ तं नमिय जिणेसरं वीरं ॥ १ ॥
कइवयसंदेहपयाणमुत्तरं सुगुरुसंपयाएण ।
वुच्छं मिच्छत्तमओतमच्छहा होइ संसइयं ॥ २ ॥ व्याख्या०

च०—युगप्रवरागमजिनवल्लभसूरिशिष्येणोक्तमन्यथा तु सकलजगत्कल्याणकामकुंभेन त्रिभुवनस्पृहणीयमहामहिम्ना सर्वत्रातिख्यातिमारूढेन श्रीजिनदत्तसूरिनाम्नैव साध्यसिद्धिः संपनीपद्यत इति भावः ॥ १९० ॥

इति विधिरत्नकरंडिका नाम संदेहदोलावलीलघुटीका समाप्ता ।

विक्रमतः पंचनवत्यधिकचतुर्दशशतेषु वर्षेषु १४९५ ।
ग्रथितेयं श्लोकैरिह पंचदशशतानि सार्धानि ॥ १ ॥
अंकतोऽपि ॥ १५९० ॥

आसीदिह चंद्रकुले नवांगसिद्धांतविवरणविधातुः ।
श्रीअभयदेवसूरेः संताने सूरिजिनराजः ॥ २ ॥
ज्ञानदर्शनचारित्रत्रयी येन समर्पिता ।
पितामहायेव नमस्तस्मै हितविधायिने ॥ ३ ॥
तदंतेवास्युपाध्यायो नाम्ना श्रीजयसागरः ।
स इमां विदधे टीकां विधिरत्नकरंडिकाम् ॥ ४ ॥
विधिरत्नकरंडिकया करतलगतयानया रयादेव ।
श्रुतसंमतविधिनाढ्यंभविष्णवः संतु मुनयोपि ॥ ५ ॥
तस्मिंश्च प्रकरणे यदहंकृतवान् विवरणमणीयः ।
सोयं मम[हा]नुभावः प्रागभिहितमूलवृत्तिकृतः ॥ ६ ॥
जैनेंद्रागमतत्त्ववेदिभिरभिप्रेतार्थकल्पद्रुभिः
सद्भिः श्रीजिनभद्रसूरिभिरियं वृत्तिर्विशुद्धीकृता ।
तद्वत्तार्किकचक्रिभिः श्रुतपथाध्वन्यैर्महावादिभिः
प्रामाण्यं गमिता विचार्य च तपोरत्नैः पुरावाचकैः ॥ ७ ॥
सोमकुंजरनामास्ति विनेयो विनयी हि नः ।
न्यधित प्रथमादर्शं ग्रथमेनमनाकुलः ॥ ८ ॥
असंशयं धर्मपदं दधानः यथास्थितार्थप्रथनैकताना ।
संदेहदोलावलिवृत्तिरेषा स्थेयाज्जिनाज्ञेव सतां मनस्सु ॥९॥

इति संदेहदोलावलीलघुटीकाप्रशस्तिः कृतिरियं जयसागरोपाध्यायानाम् । संवत् १६५२ वर्षे ज्येष्ठवदि ९ तिथौ गुरुवारे लिखिता ॥

No. 1359.

संयममञ्जरी—मू० मा० महेश्वरसूरिः ।

टी०हेमहंससूरिशिष्यः ।

टी०आ०—श्रीअरिहंताय नमः

सिरिरिसहाइजिणिंदे सासयसासइअसव्वजिणचंदे ।
केवलकमलालोए तिजयविजयसिरितिलयं ॥
अइसयसयपाडिहेरगुणनिलयं निमिरसुपाससुपासं
----सिरिपासं नमउं सिरिपासं ॥ १ ॥

सरसइसरससुवयणे सुवयणि
वियरेसु मज्ज मयनयणि ।
सुररमणि माणिपमोइणि
कवि जणाणि अ हंसगयगमणि ॥ २ ॥

सिरिपुन्नचंदसुरीसरपट्टोवयपद्मयंमि सहसयरा ।
सिरिहेमहंससूरिवर सुपसन्ना हुंतु सहसपथं ॥ ३ ॥
तेसि सुगुरूणचरणंऽभोअपसाएण सीसलेसोवि ।
संजममंजरिसंजमरि वित्तिं भणामि अहं ॥ ४ ॥

तथा हि

उपसमासमाभिरामा[उपशमशमाभिरामं] संवेगरंगशालविशालप्रस्तरणं विद्वज्जनमनोवशीकरणं भव्यजनहृदयानंदसमुल्लासनसुधाकरकिरणं कषायप्रततिततिसमूलोन्मूलनकरिणं श्रोतृजनरंजितकरणं चातुर्गतिकभवभ्रमणदुःखांभोधिप्रवहणं निर्जितजन्मजरामरणं सकर्णजनरंजितश्रवणं मिथ्यात्वांध्यध्वांतविध्वंसनतरुणतरणिं संयममंजरिप्रकरणं यैः स्वसमयपरसमयविद्वद्भिश्चिदमितरहस्यप्रशस्याद्भुतरसोल्लासप्रमुद्भिः श्रीमहेश्वरसूरिभिर्विरचितमासीत्तस्याः संयममंजर्या विवरणं किंचिल्लवलेशमात्रं यथात्मधियाऽज्ञानतया स्वस्य स्वांतस्य धृतिमतिहेतवे परेषामपि सुखावबोधाय विरच्यते । अत्र प्रकरणे श्रीमहेश्व-

रसूरिभिः श्रीपार्श्वजिनेश्वरस्य नमस्कारगर्भिता प्रथमगाथा प्रकाशितास्ति सा प्रोच्यते । तथा हि ।

निमिऊण नमिरतिअसिंदविंदसिरिमउडलीढपयवीढं ।
पासजिणे संयमसुरूवसंकित्तणं काहं ॥ १ ॥

टी० च०—अथ संयममंजर्यप्रकरणस्य समाप्तिद्योधकमाह ।

समणहभूसण गयवसण संजममंजरि एह ।
[सिरि]महेसरसूरिगुरुकन्नि कुणंत सुहेण ॥१४०॥

इति संयममंजरीवृत्तिः समाप्ता ॥ सं० १५६१ मार्गशुदि - - श्रीपिप्पलगच्छे तालध्वजीयभट्टारक श्रीश्रीशांतिसूरिभिर्लिखापिता । श्रीगंधारमंदिरे ॥ स्वस्ति

यैश्च प्रोन्नतिकारकैर्जिनमतस्योद्धृत्य साधुक्रियां
नूत्नं श्रीविधिपक्षगच्छमचिरात्संस्थाप्य च प्रोद्य(मात्)।
नानानेकजनाः सुबोधसहिताः श्राद्धीकृता लक्षश-
स्ते श्रीसूरिवरार्यरक्षितगणाधीशा बभूवुर्भृशम् ॥

तदन्ववाये

श्री(म)ज्जैज्जदिवाकरा वसुमतीप्रीतिं समुल्लासय-
न्ते[तो]विद्वज्जनकोटिमौलिमुकुटा मोहारिसंमर्दनाः ।
शश्वत्सिद्धिसमृद्धिवृद्धिसुविधिप्रोद्बुद्धिसंसेविता-
स्ते सूरींद्रवरप्रभा गणधराः श्रीमेरुतुंगोत्तराः ॥

No. 1360.

दानशीलतपोभावनाप्रकरणम्—अशोकमुनिः संवेगचूडामणिश्च ।

आ०—देवाहिदेवं नमिऊण वीरं संपत्तसंसारसमुद्दतीरं ।
वन्नेमिदाणं गुणसंनिहाणं पावेमि जेणं सिवसुक्खठाणं ॥१॥

च०—छंदाइ सत्थेण अयाणएणं
असोमनामा मुनिपुंगवेणं ।
सिद्धंतनिस्सायरयेमि जेणं
हीणाहियं सूरि खमंतु एणं ॥ ५० ॥
इति श्रीदानशीलतपोभावनाप्रकरणम्

आ०—नमिऊण तित्थनाहं भगउ वद्धमाणजिणवसहं ।
संवेगसरूवाणं वोछामि गुरूवएसेणं ॥ १ ॥
च०—धम्मेण चेह जयइ धम्मेण दुरुत्तरं न भवउहं ।
धम्मेणमणंतसुहं लहइ जीउ सासयं ठाणं ॥ ५२ ॥
इति संवेगचूडामणिप्रकरणं संपूर्णम् ॥

No. 1361.

समरादित्यचरित्रं श्लोकबद्धम्—प्रद्युम्नसूरिः ।

आ०—चित्रभानुसुधाभानुचंडभानुप्रभाधिकम् ।
शाश्वतं जयति ज्योतिः परमं पथमंगलम् ॥
च०—चंद्रप्रभप्रभुरभूदिह चंद्रगच्छे
तस्माद्गुरुश्च समभूत्पुरि पद्मदेव्याः ।
श्रीमान्धनेश्वर इति प्रथितोऽस्य शिष्यः
श्रीशांतिसूरिरभवज्जितवादिविद्यः ॥ ६४ ॥
अक्षावलिप्रवरपुस्तकधर्मचिह्न-
श्वेतांबुजस्वरविपंचि करे यदीये ।
शब्दानुशासनविरंचिरितः स देवा-
नंदप्रभुः पुरुषरूपगिरीश्वरोभूत् ॥ ६५ ॥
श्रीरत्नप्रभपरमानंदौ कनकप्रभप्रभुस्तस्मात् ।
श्रीपरमानंदविभोर्जगति जयसिंहसूरि(रुदि)याय ॥ ६६ ॥

शिष्यः श्रीकनकप्रभस्य सुकविः श्रीबालचंद्रानुजो
ज्यायान् श्रीजयसिंहतः प्रतिभया श्रीवस्तुपालस्तुतः ।
विश्वाल्हादनडिंडुरान्वयगुरुर्गत्या सभासंमतं[तः]
सोमुं[सोयं ग्रंथ] कवित्वशोधनविधौ प्रद्युम्नसूरी रविः॥६७॥
वर्षे वारिधिपक्षयक्षणणीते[यक्षलक्षणमिते]श्रीवर्धमानस्थित-
श्चक्रेमुं प्रथमं लिलेख तु जगच्चंद्रः सुधीः पुस्तके ।
प्राग्वाटान्वयमंत्रिचाहडसुतश्रीराणिगस्यांगजो
ग्रंथार्थं रणमल्लसेगविये[सेगविजयौ]स्वं प्रार्थयेतां गुरुम्॥६८॥
यावद्ग्रंथरथाश्चतुर्दशशती श्रीहारिभद्रा इमे
वर्त्तंते किल पारियात्रिकतया सिद्धयध्वयानेंगिनाम् ।
तावत्पुष्परथः स एष समरादित्यस्य मन्निर्मितः
संक्षेपस्तदनुप्लवः प्रचरतु क्रीडाकृते धीमताम्॥ ६९ ॥

यस्मिंश्चक्राणि रत्नत्रितयमृषिगृहिश्रेयसीबोधियुग्यं
कारुण्यं स्थालमुच्चैरितरयमचतुष्काष्ठिकागाढनद्धम् ।
संवेगः स्वच्छभावः शिखरकलसकः शुद्धबुद्धिः पताका-
साधुश्राद्धौ च धुर्यौ जयति शमयुगः स्यंदनः सैष शास्त्रम्॥७०॥

त्रिलोकवसुदेवांके चिद्वृद्धिमिहाधिकाम् ।
आद्यंतयोश्चतुर्युक्तां सप्ताशीतिमनुष्टुभाम् ॥७१॥ ४८७४

No. 1374.

सिद्धान्तरत्नावली—हेमसूरिशिष्यः ।

आ०—यः कुग्राहनिवारणे पटुतरस्साक्षाद्गिरा गीष्पतिः
सत्सिद्धांतनिरूपणैकरसिको भव्यात्मनां शर्मदः ।
स्याद्वादामृतपानरक्तमनसामानंदवल्लीघन-
स्तं वंदे गुणसागरं निजगुरुं श्रीहेमसूरीश्वरम् ॥ १ ॥

च०—गच्छे श्रीमति भास्वरां[राः] खरतराचार्याभिधे बिभ्रति
स्याद्वादेप्यतिगाधलिप्सुनिपुणा धर्मार्थमोक्षप्रदाः ।
भूपालप्रभृतिप्रसिद्धयशसस्साक्षाद्धि कल्पद्रुमाः
श्रीमंतो जिनचंद्रसूरिगुरवोऽभूवन्सतां प्रीतये ॥ ३० ॥
तत्पट्टाद्रिविरोचनाः प्ररुचिराचारप्रचारक्रियाः
प्रोद्योतप्रकृतिप्रभावपटलप्रारंभकास्सर्वदा ।
धर्मध्यानविधानबुद्धिविभवास्सर्वज्ञधर्मादरा
ह्यासन् श्रीजिनपूर्वकोदयगणाधीशाः जगद्वत्सलाः ॥ ३१ ॥
तत्पट्टे विदितागमार्थनिधयः श्रीहेमसूरीश्वराः
राजंते महनीयकीर्त्तिविभवास्संवस्स मांगल्यदाः।
तत्पादांबुजचंचरीकसदृशशिष्योहमेनां शुभां
पद्यैस्वल्पतरैश्चकार कृतिमान्सिद्धांतरत्नावलीम्॥ ३२ ॥
इति श्रीसिद्धांतरत्नावली संपूर्णा ॥

No. 1382.

स्याद्वादमञ्जरी सटीका—मू०हेमचन्द्रः । टी०मल्लिषेणः।

टी०आ०—यस्य ज्ञानमनंतवस्तुविषयं यः पूज्यते देवतैः...

इह हि विषमदुःखमारजनितिरस्कारभास्करानुकारिणा वसुधातलावतीर्णसुधासारणीदेश्यदेशनाविताननपारमार्हतीकृतकुमारपालक्ष्मापालप्रवर्त्तिताभयदानाभिधानजीवानुसंजीवितनानाजीवप्रदत्ताशिर्वादमाहात्म्यकल्पावधिस्थायिविशदयशःशरीरेण निर्विद्य[ निरवद्य ]चातुर्विद्यनिर्माणैकब्रह्मणा श्रीहेमचंद्रसूरिणा जगत्प्रसिद्धश्रीसिद्धसेनदिवाकरविरचितद्वात्रिंशद्द्वात्रिंशिकानुसारिश्रीवर्धमानजिनस्तुतिरूपमयोगव्यवच्छेदान्ययोगव्यवच्छेदाभिधानं द्वात्रिंशिकाद्वितयं विद्वज्जनमनस्तत्त्वावबोधनिबंधनं विदधे । तत्र प्रथमद्वात्रिंशिकायाः सुखोन्ने-

यत्वाद्याख्यानमुपेक्ष्य द्वितीयस्यास्तस्या निःशेषदुर्वादिपरिषदधिक्षेप-दक्षायाः कतिपयपदार्थविवरणकरणेन स्वस्मृतिबीजप्रबोधविधिर्विधीयते । तस्याश्चेदमादिकाव्यम् ॥

मू०—आ०—अनंतविज्ञानमतीतदोषमबोध्यसिद्धांतममर्त्यपूज्यम् ।

मू०—च०—तदुद्धर्तुं शक्तो नियतमविसंवादिवचन-
स्त्वमेवातस्त्रातस्त्वयि कृतसपर्याः कृतधियः ॥३२॥

टी०—च०—कृतसपर्याः आराध्यांतरपरित्यागेन त्वय्येव सेवाहेवाकितां परिशीलयंतीति शिखरिणीछंदोलंकृतकाव्यार्थः।

समाप्ता चेयमन्ययोगव्यवच्छेदद्वात्रिंशकास्तवनटीका ।

येषामुज्ज्वलहेतुहेतिरुचिरः प्रामाणिकाध्वस्पृशां
हेमाचार्यसमुद्भवस्तवनभूरर्थः समर्थः सखा ।
तेषां दुर्नयदस्युसंभवभयात्स्पष्टात्मनां संभव-
त्यायासेन विना जिनागमपुरप्राप्तिः शिवश्रीप्रदा ॥ १॥

चार्तुर्विद्यमहोदधेर्भगवतः श्रीहेमसूरेर्गिरां
गंभीरार्थविलोकने यदभवद्दृष्टिः प्रकृष्टा मम ।
द्राधीयःसमयादराग्रहपराभूतप्रभूतावमं
तन्नूनं गुरुपादरेणुकणिकासिद्धांजनस्योर्जितम् ॥ २॥

अन्योन्यशास्त्रतरुसंगतचित्तहारि-
पुष्पोपमेयकतिचिन्निचितप्रमेयैः ।
दृब्धां मयांतिमजिनस्तुतिवृत्तिमेनां
मालामिवामलहृदो हृदये वहंतु ॥ ३ ॥

प्रमाणसिद्धांतविरुद्धमत्र
यत्किंचिदुक्तं मतिमांद्यदोषात् ।

मात्सर्यमुत्सार्य तदार्यचित्ताः
प्रसादमाधाय विशोधयंतु ॥ ४ ॥
उर्व्यामेष सुधाभुजां गुरुरिति त्रैलोक्यविस्तारिणो
यत्रेयं प्रतिभाभरादनुमितिर्निर्दैभमुज्जृंभते ।
किंचामी विबुधाः सुधेति वचनोद्गारं यदीयं मुदा
शंसंतः प्रथयंति तामतितमां संवादमेदस्विनीम् ॥ ५ ॥
नागेंद्रगच्छगोविंदवक्षोलंकारकौस्तुभाः ।
ते विश्ववंद्या नंद्यासुरुदयप्रभसूरयः ॥ ६ ॥
श्रीमल्लिषेणसूरिभिरकारि तत्पट्टगगनदिनमणिभिः ।
वृत्तिरियं मनुरविमितशाकाब्दे दीपमहसि शमौ ॥ ७ ॥
श्रीजिनप्रभसूरीणां साहाय्योद्भिन्नसौरभा ।
श्रुतावुत्तंसतु सतां वृत्तिः स्याद्वादमंजरी ॥ ८ ॥
बिभ्राणे कलिनिर्जयाज्जिनतुलां श्रीहेमचंद्रप्रभौ
तद्दृब्धस्तुतिवृत्तिनिर्मितिमिषाद् भक्तिर्मयाविष्कृता ।
निर्णेतुं गुणदूषणे निजगिरां तत्रार्थये सज्जनान्
तस्यास्तत्त्वमकृत्रिमा बहुमतिः सास्त्यत्र सम्यग्यतः ॥ ९ ॥
इति स्याद्वादमंजरीग्रंथः समाप्तः ॥ संवत् १५२० वर्षे

No. 1389.

कर्मग्रन्थान्तर्गतशतकप्रकरणम्—मां°शिवशर्मसूरिः ।

आ°—अरहंते भगवंते अणुत्तरपरक्कमे पणमिऊणं ।
बंधसयगे निबद्धं संगहमिणमो पवक्खामि ॥ १ ॥
सुणह इह जीवगुणे संति एसु गणेसु सारजुत्ताओ ।
वोछं कइवइयाओ गाहाओ दिट्ठिवायाओ ॥ २ ॥

उवओगा जोगविही जेसु य ठाणेसु जत्तिया अत्थि ।
जं पचइओ बंधो होइ जहा जेसु ठाणेसु ॥ ३ ॥
बंधउदयमुदीरणविहिं च तिण्हंपि तेसु संजोगं ।
बंधविहाणे य तहा किंवि समासं पवक्खामि ॥४॥

च०—एसो बंधसमासो पिंडक्खवेण वन्निउ कोइ ।
कम्मप्पवायसुयसागरस्स निस्संदमित्तोउ ॥१०६॥
बंधविहाणसमासो रइउ अप्पमंदमइणाउ ।
तं बंधमोक्खनिउणा पूरेऊणं परिकहेंति ॥१०७॥
इय कम्मयडिए गयं संखेवुद्दिट्ठ निच्छयमहत्थं ॥
जो उवउंजइ बहुसो सो नाही बंधमोक्खत्थं ॥१०८॥

No. 1390.

तस्यैव भाष्यं गाथाबद्धम् ।

आ०—नमिऊण जिणं वुच्छामि बंधसयगे चउविहबंधाणं ।
दाराणि तहा संखामित्तनिविट्ठा य पयडीउ ॥ १ ॥

च०—सुखगइ असायचउरो सुराउ नरयाउ नारयदुगाणि ।
दुन्निउ आहारदुगं पंचसुए वेदुव्विदुगतित्था ॥ २५ ॥

शतकभाष्यं समाप्तम् ॥

No. 1391.

कर्मग्रन्थान्तर्गतसप्ततिकाख्यं प्रकरणं सटीकम्—

मू०मा०—टी० मलयगिरिः ।

टी० आ०—अशेषकर्मांशतमःसमूह-
क्षयाय भास्वानिव दीप्ततेजाः ।
प्रकाशितांशेषजगत्स्वरूपः
प्रभुः स जीयाज्जिनवर्धमानः ॥ १ ॥

जीयाज्जिनेशसिद्धांतो मुक्तिकामप्रदीपनः ।
कुभ्रुत्यातपतप्तानां सांद्रो मलयमारुतः ॥ २ ॥

चूर्णयो नावगम्यंते सप्ततेर्मंदबुद्धिभिः ।
ततः स्पष्टावबोधार्थं तस्याष्टीकां करोम्यहम् ॥ ३ ॥

अहर्निशं चूर्णिविचारयोगान्
मंदोपि शक्तो विवृतिं विधातुम् ।
निरंतरं कुंभनिघर्षयोगाद्-
भावोपि कूपे समुपैति घर्षम् ॥ ४ ॥

इह यच्छास्त्रं प्रकरणं वा सर्वविन्मूलं तत्प्रेक्षावतामुपादेयं भवति नान्यत् । ततः सप्ततिकाख्यं प्रकरणमारभमाणः आचार्यः प्रेक्षावतां प्रकरणविषये उपादेयबुद्धिपरिग्रहार्थं प्रकरणस्य सर्वविन्मूलतां तथा सर्वविन्मूलत्वेपि न प्रेक्षापूर्वकारिणोऽभिधेयादिपरिज्ञानमंतरेण यथाकथंचित्प्रवर्त्तते प्रेक्षावत्ताक्षतिप्रसंगात् । ततस्तेषां प्रवृत्त्यर्थमभिधेयादिकं च प्रति षिपादयिषुरिदमाह ॥

मू०—सिद्धपएहिं महत्थं बंधोदयसंतपयडिगणाणं ।
वोच्छं सुण संखेवं नीसंदं दिट्ठिवायस्स ॥ १ ॥

मू०—च०—जो जत्थ अपडिपुन्नो अत्थो अप्पागमेण बद्धोत्ति ।
तं खमिऊण बहुसुया पूरेऊणं परिकहंतु ॥ (९२)॥

टी०—च०—परिपूर्णमर्थं पूरयित्वा शिष्येभ्यः कथयंतु ॥ (९२)॥

निरुपममनंतमनघं शिवपदमधिरूढमपगतकलंकम् ।
दर्शितशिवपुरमार्गं वीरजिनं नमत परमशिवम् ॥१॥

यस्योपांतेपि संप्राप्ते प्राप्यंते संपदो ऽनघाः ।
नमस्तस्मै जिनेशश्रीवीरसिद्धांतसिंधवे ॥ २ ॥

यैरेषा विषमार्था सप्ततिका सुस्फुटा कृता सम्यक् ।
अनुपकृतपरोपकृतश्चूर्णिकृतस्तान्नमस्कुर्वे ॥ ३ ॥
मकरणमेतद्विषमं सप्ततिकाख्यं विवृण्वता कुशलम् ।
यदवापि मलयगिरिणा सिद्धिं तेनाश्नुतां लोकः ॥ ४ ॥
अर्हतो मंगलं सिद्धान्मंगलं संयतानहम् ।
अशिश्रियं जिनाख्यातं धर्मं परममंगलम् ॥ ५ ॥

श्रीसत्तरीवृत्तिः । ग्रं० ३७८० ॥ सं० १४९० वर्षे चैत्र शुदि १० शनौ श्रीमति श्रीस्तंभतीर्थे श्रीखरतरगच्छे श्रीजिनराजसूरिपट्टे श्रीजिनभद्रसूरिराज्ये सा० गूर्जरसुत सा० धरणाकेन सत्तरीवृत्तिर्लिखापिता । पु० हरीयाकेन लिखितं । शुभं भवतु ॥

No. 1392.

शतकवृत्तिः—हेमचन्द्रः ।

आ०—See Dr. Keilhorn, Report 1881, Page 41.

च०-श्रीहेमचंद्रसूरिभिरियमनुरचिता शतकवृत्तिः॥ १० ॥ ग्रंथाग्रं ३७०० शतकसूत्रग्रंथगाथा ११० ॥ शतकभाष्यगाथा ॥ २५ ॥ ग्रंथाग्रं सर्वसंख्या ३८६६ ॥ शुभं भवतु ॥ सं० १४९० वर्षे चैत्रसुदि पंचम्यां तिथौ रविवारे श्रीमति श्रीस्तंभतीर्थे अविचलत्रिकालज्ञाज्ञापालनपटुतरे विजयिनि श्रीमत्खरतरगच्छे श्रीजिनराजसूरिपट्टे लब्धिलीलानिलयबंधुरबहुबुद्धिबोधितभूवलयकृतपापपूरप्रलयचारुचारित्रचंदनतरुमलययुगप्रवरोपमभिथ्यात्वतिमिरनिकरदिनकरप्रसरसमश्रीमद्गच्छेशभट्टारकश्रीजिनभद्रसूरीश्वराणामुपदेशेन परीक्ष्यसा० गू० जरसुतेन रेखाग्रामसुश्रावकेन सा० परीक्ष्य धरणाकेन पुत्र सा० साइयासहितेन श्रीसिद्धांतकोशो लेखितः स्वश्रेयसे ॥

यावन्मेरुः पवित्रो जिनवरजननस्नानसंभूततोयै-
र्यावद्दिव्या विमानस्थितिरतिसुखदा सिद्धिसंस्थाश्च सिद्धाः ।
यावल्लोकप्रकाशं सकलजनहितं जैनसिद्धांततत्त्वं
विद्वद्भिर्वाच्यमानं चिरमवनितले पुस्तकं तावदास्ताम् ॥
श्रीसंघस्य कल्याणः ॥

No. 1395.

अध्यात्मकमलमार्तण्डः—राजमल्लः ।

आ०—प्रणम्य भावं विशदं चिदात्मकं
समस्ततत्त्वार्थविदं स्वभावतः ।
प्रमाणसिद्धं नययुक्तिसंयुतं
विमुक्तदोषावरणं समंततः ॥ १ ॥
अनंतधर्मं समयं ह्यतींद्रियं
कुवादिवादप्रहतस्वलक्षणम् ।
ब्रुवे ऽपवर्गस्य च हेतुमद्धुतं
पदार्थतत्त्वं भवतापशांतये ॥ २ ॥ युग्मम् ।

च०—अर्थाश्चाद्यवसानवर्जितनवः सिद्धाः स्वयं मानत-
स्तल्लक्ष्मप्रतिपादकाश्च शब्दा[श्च नियमा]न्निष्पन्नरूपाः किल।
भो विज्ञाः परमार्थतः कृतिरियं शब्दार्थयोश्च स्वतो
नव्यं काव्यमिदं कृतं न विदुषा तद्राजमल्लेन हि ॥२०॥

इति श्रीमदध्यात्मकमलमार्तंडाभिधाने शास्त्रे सप्ततत्त्वनवपदार्थप्रतिपादकश्चतुर्थः श्रुतस्कंधः समाप्तः ॥ ४ ॥

ग्रंथाग्रसंख्या २०५ संवत् १६६३ वर्षे वैशाखसुदि १३ शनिवासरे भट्टारकश्रीगुणभद्रसूरिदेवतत्पट्टेभट्टारकश्रीभानुकीर्त्तिदेव-

तत्पट्टे भट्टारकश्रीकुमारसेणि तदाम्नाये अग्रोतकान्वये गोइलगोत्रे साहुपीथू तद्भार्या सूराही तत्पुत्र पंडित छजमल अध्यात्मकमलकी प्रत्ति लिक्षापितं । लिखितं पंडित सोहिलु ॥

ज्ञानवान् ज्ञानदानेन निर्भयो ऽभयदानतः ।
अन्नदानात्सुखी नित्यं निर्व्याधिर्भेषजाद्भवेत् ॥ १ ॥

No. 1396.

अनन्तनाथपूजा—गुणचन्द्रः ।

आ०—श्रीसर्वज्ञं नमस्कृत्य सिद्धं साधूंस्त्रिधा पुनः ।
अनंतव्रतमुख्यस्य पूजां कुर्वे यथाक्रमम् ॥ १ ॥

च०—इत्यनंतविधेः पूजां व्यरचद्गुणचंद्रकः ।
श्लोकसप्तशतीं पंचसप्तन्यूनां यतीश्वरः ॥ १ ॥
संवत्षोडशत्रिंशतैष्यपलके पक्षेत्रदाते तिथौ
पक्षत्यां गुरुवारके पुरुजिनेट्श्रीशांकमार्गे पुरे ।
श्रीमद्कुंबडवंशपद्मसविता हर्षाख्यदुर्गी वणिक्
सोयं कारितवाननंतजिनसत्पूजां वरे वाग्वरे ॥ २ ॥

श्रीमूलसंघे ऽघविघातिनीह
प्रद्योतमाने ऽन्यमतानि नेशुः ।
सारस्वतो गच्छ इहैव नंद्या-
च्छ्रीमद्बलात्कारगणाभियुक्तः ॥ ३ ॥

श्रीरत्नकीरिभगवज्जगतां वरेण्य-
श्चारित्ररत्ननिवहस्य बभार भारम् ।
तद्दीक्षितो यतिवरो यशकीर्तिकीर्ति-
श्चारित्ररंजितजनोद्गहितासुकीर्त्तिः ॥ ४ ॥

तच्छिष्यो गुणचंद्रसूरिरभवच्चारित्रचेतोहर-
स्तेनेदं वरपूजनं जिनवरानंतस्य युक्तयाऽरचि ।
येत्र ज्ञानविकारिणो यतिवरास्तैः शोध्यमेतद्ध्रुवं
नंद्यादारविचंद्रमक्षयतरं संघस्य मांगल्यकृत् ॥ ९ ॥
इत्याचार्यगुणचंद्रविरचिता श्रीअनंतनाथपूजा उद्यापनसहिता समाप्ता ॥ श्रीमदनंतव्रतस्योद्यापनं समाप्तम् ॥

No. 1400.

उपदेशरत्नमाला—सकलभूषणः ।

आ०—वंदे श्रीवृषभं देवं दिव्यलक्षणलक्षितम् ।
प्रीणितप्राणिसद्वर्गं युगादिपुरुषोत्तमम् ॥ १ ॥
च०—श्रीमूलसंघतिलके वरनंदिसंघे
गच्छे सरस्वतिसुनाम्नि जगत्प्रसिद्धे ।
श्रीकुंदकुंदगुरुपट्टपरंपरायां
श्रीपद्मनंदिमुनिपः समभूज्जिताक्षः ॥ २६ ॥
तत्पट्टधारी जनचित्तहारी
पुराणमुख्योत्तमशास्त्रकारी ।
भट्टारकः श्रीसकलादिकीर्तिः
प्रसिद्धनामाऽजनि पुण्यमूर्त्तिः ॥ २७ ॥
भुवनकीर्त्तिगुरुस्तत ऊर्ज्जितो
भुवनभासनशासनमंडनः ।
अजनि तीव्रतपश्चरणक्षमो
विबुधधर्मसमृद्धिसुदेशकः ॥ २८ ॥
श्रीज्ञानभूषापरिभूषितांगः
प्रसिद्धपांडित्यकलानिधानः ।

श्रीज्ञानभूषाख्यगुरुस्तदीयः
पट्टोदयाद्राविव भानुरासीत् ॥ २९ ॥
भट्टारकश्रीविजयादिकीर्त्ति-
स्तदीयपट्टे परिलब्धकीर्तिः ।
महामना मोहसुखाभिलाषी
बभूव जैनावनिपार्श्वपादः ॥ ३० ॥
भट्टारकश्रीशुभचंद्रसूरि-
स्तत्पट्टपंकेरुहतिग्मरश्मिः ।
त्रैविद्यविद्यः सकलप्रसिद्धो
वादीभसिंहो जयताद्धरित्र्याम् ॥ ३१ ॥
पट्टे तस्य प्रीणितप्राणिवर्गः
शांतो दांतः शीलशाली सुधीमान् ।
जीयात्सूरिः श्रीसुमत्यादिकीर्त्ति-
र्गच्छाधीशः कम्रकांतिः कलावान् ॥ ३२ ॥
तस्याभूच्च गुरुभ्राता नाम्ना सकलभूषणः ।
सूरिर्जिनमते लीनमनाः संतोषपोषकः ॥ ३३ ॥
तेनोपदेशसद्रत्नमालासंज्ञो मनोहरः ।
कृतः कृतिजनानंदनिमित्तं ग्रंथ एषकः ॥ ३४ ॥
श्रीनेमिचंद्राचार्यादियतीनामाग्रहात्कृतः ।
सद्वर्धमानाटोलादिप्रार्थनातो मयैषकः ॥ ३५ ॥
सप्तविंशत्यधिके षोडशशतवत्सरे सुविक्रमतः ।
श्रावणमासे शुक्लपक्षे षष्ठ्यां कृतो ग्रंथः ॥ ३६ ॥
न मया ख्यातिनिमित्तं न चाभिमानेन विरचितो ग्रंथः ।
धर्मरतानां गृहिणां हिताय च स्वस्य पुण्याय ॥ ३७ ॥

यावत्सिद्धाः सिद्धिधाममप्रपन्ना
मेर्वाद्या वै भूरिधरा भूरिसंख्याः ॥
चंद्रादित्याद्याश्च खे ऽसंख्यसंख्या
संतिष्ठंते तावदास्तां ममायम् ॥ ३८ ।
श्रीवीरगौतमाद्यैश्च श्रेणिकस्य पुरः पुरा ।
यदुक्तं तच्च संक्षिप्य मयापीह निरूपितम् ॥ ३९ ॥
सिद्धांतशब्दयुक्त्यादिविरुद्धं यन्मयोदितम् ।
क्षमितव्यं मुनीशैस्तत्सर्वशास्त्राब्धिपारगैः ॥ ४० ॥
न्यूनमक्षरमात्राद्यैरज्ञानान्मयकात्र यत् ।
प्रोक्तं क्षमस्व तद्देवि सारदे श्रीजिनास्यजे ॥ ४१ ॥
जिनसिद्धसूरिपाठकसाधुमुनींद्राश्चतुर्विधस्य संघस्य ।
विदधतु मंगलमतुलं मुक्तिं मुक्तिं च यच्छंतु ॥ ४२ ॥
सहस्रत्रितयं चैव त्रिशतं त्र्यशीतिसं[शी व्या]युतम् ।
अनुष्टुप्छंदसां चास्य प्रमाणं निश्चितं बुधैः ॥ ४३ ॥

इति श्रीभट्टारक श्रीशुभचंद्रशिष्याचार्य श्रीसकलभूषणविरचितायामुपदेशरत्नमालायां पुण्यषट्कर्मप्रकाशिकायां तपोदानमाहात्म्यवर्णनोनामाष्टादशपरिच्छेदः संपूर्णः ॥ संवत् १७८३ वर्षे ज्येष्ठमासे शुक्लपक्षे सप्तम्यां तिथौ गुरुवासरे ॥ शुभं भवतु ॥ संवत् १७८३ वर्षे शाके १६४८ प्रवर्तमाने आषाढमासे कृष्णपक्षे पंचमीतिथौ बृहस्पतिवारे श्रीसांगानेरनगरमध्ये महाराजाधिराजमहाराजा श्रीसवाई जेसिंहजीचिरंजी० राज्ये प्रवर्त्तमाने पुस्तकं लिखापितं । श्रीमूलसंघे बलात्कारगणे सस्वतीगच्छे कुंदकुंदाचार्यान्वये नंद्याम्नाये बलात्कारगणे भट्टारकश्रीचंद्रकीर्तिस्तत्पट्टे भट्टारकश्रीदेवेंद्रकीर्तिस्तत्पट्टे भट्टारकश्रीनरेंद्रकीर्तिस्तत्पट्टे भट्टारकश्रीसुरेंद्रकीर्तिस्तत्पट्टे

भट्टारकश्रीजगत्कीर्त्तिजी तत्पट्टे भट्टारकश्रीश्रीदेवेंद्रकीर्त्तिजी तदाम्नाये सावडागोत्रे ----------

No. 1401.

उपासकाध्ययनम्—वसुनंदिः।

आसीत् स्वसमयपरसमयविद् श्रीकुन्दकुन्दसंताने
आसी ससमयपरसमयविदू सिरीकुंदकुंदसंताणे।
भव्यजनकुमुदवनशिशिरकरः श्रीनन्दिनाम्ना
भव्वयणकुमुयवणसिसिरयरो सिरिणंदिणामेण ॥ ४१ ॥
कीर्त्तिर्यस्येन्दुशुभ्रा सकलभुवनमध्ये यथेच्छं भ्रमित्वा
कित्ती जस्सिंदुसुब्भा सयलभुवणमज्झे जहिच्छं भमित्ता।
नित्यं सा सज्जनानां हृदयवदनश्रोत्रे निवासं करोति
णिच्चं सा सज्जणाणं हिययवयणसोए णिवासं करेइ।
यः सिद्धान्ताम्बुराशिं सुनयतरणं आसाद्य लीलावतीर्णो
जो सिद्धंतंबुरासिं सुणयतरणमासेज्ज लीलावतिण्णो।
वर्णयितुं कः समर्थः सकलगुणगणं तस्य प्रगल्भोऽपि लोके
वण्णेउं को समत्थो सयलगुणगणं से वियड्ढो वि लोए ॥ ४२॥
शिष्यः तस्य जिनेन्द्रशासनरतः सिद्धान्तपारंगतः
सिस्सो तस्स जिणिंदसासणरओ सिद्धंतपारंगओ
क्षान्तिमार्दवलाघवादिदशधा धर्मे नित्योद्युक्तः
खंतीमद्दवलाहवाइदसहा धम्मम्मि णिच्चुज्जुओ।
पूर्णेन्दूज्ज्वलकीर्त्तिपूरितजगच्चारित्रलक्ष्मीधरः
पुण्णिंदुज्जलकित्तिपूरियजओ चारित्तलच्छीहरो
संजातः नयनन्दिनाममुनिः भव्याशयानन्ददः
संजाओ णयनंदिनाममुणिणो भव्वासयाणंदओ ॥ ४३॥

शिष्यः तस्य जिनागमजलनिधिवेलातरङ्गधौतमनाः
सिस्सो तस्स जिणायमजलनिहिवेलातरंगधोयमणो ।
संजातः सकलजगति विख्यातः नेमिचन्द्र इति
संजाओ सयलजए विक्खाउ णेमिचंदु त्ति ॥ ४४॥
तस्य प्रसादेन मया आचार्यपरंपरागतं शास्त्रं
तस्स पसाएण मए आयरियपरंपरागयं सत्थं ।
वात्सल्यादररचितं भविकानामुपासकाध्ययनम्
वच्छल्लायररइयं भवियाणमुवासयज्झयणं ॥ ४५ ॥
यत् किमपि अत्र भणितं अज्ञायमानेन प्रवचनविरुद्धं
जं किंपि एत्थ भणियं अयाणमाणेण पवणयविरुद्धं ।
क्षमित्वा प्रवचनानि शोधयित्वा तानि प्रकाशयन्तु
खमिऊण पवयणाणं सोहित्ता तं पयासंतु ॥ ४६ ॥
षट् शतानि पञ्चाशदुत्तराणि एतस्य ग्रन्थपरिमाणं
छच्चसया पण्णसुत्तराणि एयस्स गन्थपरिमाणं ।
वसुनन्दिना निबद्धं विस्तरितव्यं विदग्धैः
वसुणंदिणा णिबद्धं वित्थरियव्वं वियड्ढेहिं ॥ ४७ ॥
इत्युपासकाध्ययनं वसुनंदिना कृतमिदं समाप्तम् ॥

No. 1402.

उपासकाध्ययनं सटीकम्—मू० समन्तभद्रः । टी० प्रभाचन्द्रः ।

टी० आ०—समंतभद्रं निखिलात्मबोधनं
जिनं प्रणम्याखिलकर्मशोधनम् ।
निबंधनं रत्नकरंडके परं
करोमि भव्यप्रतिबोधनाकरम् ॥ १ ॥

मू०आ०—नमः श्रीवर्धमानाय निर्धूतकलिलात्मने ।
सालोकानां त्रिलोकानां यद्विद्या दर्पणायते ॥ १ ॥

मू०च०—जिनपतिपदपद्मप्रेक्षिणी दृष्टि लक्ष्मीः ॥ १४५ ॥

टी०च०—दृष्टिलक्ष्मीरपि गुणभूषा अष्टमूलगुणैरलंकृता सम्यक् पुनीतादिति ॥

येनाज्ञानतमो विनाश्य निखिलं भव्यात्मचेतोगतं
सम्यग्ज्ञानमहांशुभिः प्रकटितः सागारमार्गोऽखिलः ।
स श्रीरत्नकरंडकामलरविः संसृत्सरिच्छोषको
जीयादेव समंतभद्रमुनिपः श्रीमत्प्रभेंदुर्जिनः ॥१॥

इति प्रभाचंद्रविरचितायां समंतभद्रविरचितोपासकाध्ययनटीकायां पंचमः परिच्छेदः ॥ ॥

No. 1404.

## ऋषभनाथचरित्रम्—सकलकीर्त्तिः ।

आ०—श्रीमंतं त्रिजगन्नाथमादितीर्थंकरं परम् ।
फणींद्रेंद्रनरेंद्रार्च्यं वंदेऽनंतगुणार्णवम् ॥ १ ॥

च०—अष्टाविंशाधिका भोः षट्चत्वारिंशच्छतप्रमाः ।
अस्याद्यर्हच्चरित्रस्य स्युः श्लोकाः पिंडिता बुधैः ॥ १८१ ॥

इति श्रीवृषभनाथचरिते भट्टारकश्रीसकलकीर्तिविरचिते वृषभनाथनिर्वाणगमनवर्णनो नाम विंशः सर्गः ॥ ग्रंथसंख्या ॥४६२८॥

स्वस्तिश्री । अथसंवत्सरेऽस्मिन् श्रीनृपतिविक्रमादित्यराज्ये संवत् १७१० वर्षे शाके १५७६ प्रवर्त्तमाने मार्गशिरमासे कृष्णपक्षे प्रतिपदातिथौ बुधवासरे मृगशिरनक्षत्रे सिद्धियोगे श्रीमूलसंघे नंद्याम्नाये बलात्कारगणे सरस्वतीगच्छे

कुंदकुंदाचार्यान्वये भट्टारकश्रीपद्मनंदिदेवास्तत्पट्टे भट्टारकश्रीशुभचंद्रदेवास्तत्पट्टे भट्टारकश्रीजिनचंद्रदेवास्तत्पट्टे-भट्टारकश्रीप्रभाचंद्रदेवाः द्वितीयशिष्यमंडलाचार्यश्रीभुवनकीर्तिदेवास्तत्पट्टे मंडलाचार्यश्रीधर्मकीर्त्तिदेवास्तत्पट्टे मंडलाचार्यविशालकीर्तिदेवास्तत्पट्टे मंडलाचार्यश्रीलक्ष्मीचंद्रदेवास्तत्पट्टे मंडलाचार्यश्रीसहस्रकीर्तिदेवास्तत्पट्टे मंडलाचार्यश्रीनेमिचंद्रदेवास्तत्पट्टे मंडलाचार्यविद्याप्रधानचारुचारित्रोद्दहनवादीभकुंभविदारणैककेसरिस्मरसारंगविदारणैकमृगेंद्रपंचाचारचरणचतुरभेदाभेदरत्नत्रयाराधकश्रीयशःकीर्त्तिदेवास्तत्पट्टे मंडलाचार्यसर्वसत्यदयोपेताः शश्वद्धर्मोपदेशका विकथादिविनिर्मुक्ताः तृणहेमसमोपमाः श्रीभानुकीर्तिदेवास्तत्पट्टे मंडलाचार्यमौनव्रतधारणधीराः सर्वांगश्रुतसागराः क्षमादिदशधाधर्मयुक्ता जितपरीषहाः सकलगुणमणिगणाभरणभूषितविग्रहाः श्रीश्री १०८ श्रीश्रीभूषणजी, तदाम्नाये खंडेलवालान्वये राहणिवास्तव्ये पतिसाह श्रीस्याहज्यहां विजयराजराज्ये राजाधिराजमहाराजश्रीजसवंतसिंहराज्ये राठोडगोत्रे विख्यातविराजमाने धरातलविख्यातपाटणीगोत्रे साहडवर तस्य भार्याडालमदे(वी)तयोः पुत्राः षट् ... श्रीभूषणजीतच्छिष्यब्रह्मरूपचंद्रः तस्मै प्रदत्तम् ॥

No. 1405.

आराधनाकथाकोशः—ब्रह्मनेमिदत्तः ।

आ०—श्रीमद्भव्याब्जसद्भानूल्लोकालोकप्रकाशकान् ।
आराधनाकथाकोशं वक्ष्ये नत्वा जिनेश्वरान् ॥ १ ॥

नमस्तस्मै[स्यै]सरस्वत्यै सर्वविज्ञानचक्षुषे ।
यस्याः संप्राप्यते नाम्ना पारं संज्ञानवारिधेः॥ २ ॥
रत्नत्रयपवित्राणां मुनीनां गुणशालिनाम् ।
वंदेऽहं बोधसिंधूनां पादपद्मद्वयं सदा ॥ ३ ॥
इत्याप्तभारतीसाधुपादपद्मस्य चिंतनम् ।
अस्तु मे सत्कथारंभप्रासादकलशश्रिये ॥ ४ ॥

श्रीमूलसंघे वरभारतीये
गच्छे बलात्कारगणेऽतिरम्ये ।
श्रीकुंदकुंदाख्यमुनींद्रवंशे
जातः प्रभाचंद्रमहायतींद्रः ॥ ५ ॥
देवेंद्रचंद्रार्कसमर्चितेन
तेन प्रभाचंद्रमुनीश्वरेण ।
अनुग्रहार्थं रचितः सुवाक्यै-
राराधनासारकथाप्रबंधः ॥ ६ ॥

तेन क्रमेणैव मया स्वशक्त्या
श्लोकैः प्रसिद्धैश्च निगद्यते सः ।
मार्गे न किं भानुकरप्रकाशे
स्वलीलया गच्छति सर्वलोकः॥ ७ ॥

अथ श्रीजिनसूत्रेण कथ्यते विमलश्रिये ।
आराधनेति किं नाम सतां संतोषहेतवे ॥ ८ ॥
सम्यग्दर्शनबोधवृत्ततपसां संसारविच्छेदिनां
शक्त्या भक्तिभरेण सद्गुरुमतात्स्वर्गापवर्गश्रिये ।
उद्योतोद्यमने तथा च नितरां निर्वाहनं साधनं
पूतं निस्तरणं महामुनिवरैराराधनेतीरिता ॥ ९ ॥

च०—यातः[जातः]श्रीमति मूलसंघतिलके सारस्वते सच्छुभे
गच्छे स्वच्छतरे प्रसिद्धमहिमा श्रीकुंदकुंदान्वये ।
श्रीजैनागमसिंधुवर्धनविधुर्विद्वज्जनैः सेवितः
श्रीमत्सूरिमतल्लिका गुणनिधिर्जीयात्प्रभाचंद्रवाक्[चंद्रकः]॥६९

श्रीमज्जैनपदाब्जसारमधुकृच्छ्रीमूलसंघाग्रणीः
सम्यग्दर्शनसाधुबोधविलसच्चारित्रचूडामणिः ।
विद्यानंदिगुरुप्रपट्टकमलोल्लासप्रदो भास्करः
श्रीभट्टारकमल्लिभूषणगुरुर्भूयात्सदा शर्मणे ॥ ७० ॥

श्रीसर्वज्ञविशुद्धभक्तिनिरतो भव्यौघसंबोधकः
कामक्रूरकरींद्रदर्पदलने कंठीरवो निष्ठुरः ।
ज्ञानध्यानरतः प्रसिद्धमहिमा रत्नत्रयालंकृतः
कुर्याच्छर्म सतां प्रमोदजनकः श्रीसिंहनंदी गुरुः ॥ ७१॥

प्रोद्यत्सम्यक्त्वरत्नो जिनकथितमहासप्तभंगीतरंगै-
र्निधूतैकांतमिथ्यामतमलनिकरः क्रोधनक्रादिदूरः ।
श्रीमज्जैनेंद्रवाक्यामृतविशदरसः श्रीजिनेंदुप्रवृद्धि-
र्जीयान्मे सूरिवर्यो व्रतनिचयलसत्पुण्यपण्यःश्रुताब्धिः॥७२

तेषां पादपयोजयुग्मकृपया श्रीजैनसूत्रोचिताः
सम्यग्दर्शनबोधवृत्ततपसामाराधनासत्कथाः ।
भव्यानां वरशांतिकांतिविलसत्कीर्तिप्रमोदं श्रियं
कुर्युः संरचिता विशुद्धशुभदाः श्रीनेमिदत्तेन वै॥७३॥

इति कथाकोशे भट्टारकश्रीमल्लिभूषणशिष्यब्रह्मनेमिदत्तविरचिते श्रीजिनपादपूजाफलदृष्टांतकथावर्णनायां चतुर्थः परिच्छेदः समाप्तः॥
संवत् १६१४ वर्षे महासुदि ८ भृगुवासरे

No. 1407.

करकण्डुचरित्रम्—जिनेन्द्रभूषणः ।

आ०—पार्श्वनाथजिनं वंदे विश्वविघ्नौघनाशनम् ।
कमठोपसर्गदैत्यारिनाशनं सौख्यकारणम् ॥ १ ॥

च०—वक्तुं सर्वमिह क्षमः किल भवेत्कस्योत्तमा भारती॥१५॥

इति श्रीमुमुक्षुसिद्धांतचक्रवर्त्तिश्रीकुंदकुंदाचार्यानुक्रमेण श्रीभट्टारकविश्वभूषणपट्टाभरणश्रीब्रह्महर्षसागरात्मजश्रीभट्टारकजिनेंद्रभूषणविरचिते श्रीमज्जिनेंद्रपुराणांतर्गतभगवत्पूजाफलव्यावर्णने श्रीकरकंडुसहस्रारकाप्तिवर्णनो नाम चतुर्थोधिकारः संपूर्णः ॥

करकंडुकथा संपूर्णा ॥

No. 1409.

कार्त्तिकेयानुप्रेक्षा सटीका—मू० मा० कार्त्तिकेयसाधुः ।

टी०शुभचन्द्रः ।

टी० आ०—शुभचंद्रं जिनं नत्वानंतानंतगुणार्णवम् ।
कार्त्तिकेयानुप्रेक्षायाष्टीकां वक्ष्ये शुभश्रिये ॥१॥

अथ स्वामिकार्त्तिकेयो मुनींद्रोऽनुप्रेक्षां व्याख्यातुकामः मलगालनमंगलावाप्तिलक्षणमाचष्टे ।

मू० आ०—तिहुवणतिलयं देवं वंदित्ता तिहुवणिंदपरिपुज्जं ।
वोच्छं अणुपेहाउ भवियजणाणंदजणणीओ ॥१॥

मू०च०—बारस अणुवेक्खाउ भणिया हु जिणागमानुसारेण ।
जो पढइ सुणइ भावइ सो पावइ उत्तमं सोक्खं ॥४८८

टी०च०—श्रीमूलसंघेऽजनि नंदिसंघ-
वरो बलात्कारगणः प्रसिद्धः ।

श्रीकुंदकुंदो वरसूरिवर्यो
विभाति भाभूषणभूषितांगः ॥ २॥
तदन्वये श्रीमुनिपद्मनंदी
ततोऽभवच्छीसकलादिकीर्तिः ।
तत्पट्टधारी भुवनादिकीर्त्तिः
श्रीज्ञानभूषो वरचित्तभूषः ॥ ३ ॥
तदन्वये श्रीविजयादिकीर्त्ति-
स्तत्पट्टधारी शुभचंद्रदेवः ।
तेनेयमाकारि विशुद्धटीका
श्रीमत्सुमत्यादिसुकीर्त्तिकीर्त्तिः ॥ ४ ॥

सूरिश्रीशुभचंद्रेण वादिपर्वतवज्रिणा ॥
त्रिविद्येनानुप्रेक्षाया वृत्तिर्विरचिता वरा ॥ ५ ॥
श्रीमद्विक्रमभूपतेः परिमिते वर्षे शते षोडशे
माघे मासि दशाग्रवह्निमहिते ख्याते दशम्यां तिथौ ।
श्रीमच्छ्रीमहिसारसारनगरे चैत्यालये श्रीगुरोः
श्रीमच्छ्रीशुभचंद्रदेवविहिता टीका सदा नंदतु ॥६॥
वर्णिश्रीक्षेमचंद्रेण विनयेन कृतार्थना ॥
शुभचंद्रगुरो स्वामिन् कुरु टीकां मनोहराम् ॥७॥
तेन श्रीशुभचंद्रेण त्रैविद्येन गणेशिना ।
कार्त्तिकेयानुप्रेक्षाया वृत्तिर्विरचिता वरा ॥८॥
तथा साधुसुमत्यादिकीर्त्तिना कृतप्रार्थना [प्रार्थना कृता] ।
सार्थीकृता समर्थेन शुभचंद्रेण सूरिणा ॥९॥
भट्टारकपदाधीशा मूलसंघे विदांवराः ।
रमावीरेंदुचिद्रूपगुरवो हि गणेशिनः ॥१०॥

लक्ष्मीचंद्रगुरुः स्वामी शिष्यस्तस्य सुधीयशाः ।
वृत्तिर्विस्तारिता तेन श्रीशुभेंदुप्रसादतः ॥ ११ ॥

इति श्रीस्वामिकार्त्तिकेयटीकायां त्रिविद्यविद्याधरषट्भाषाकविचक्रवर्त्तिभट्टारकश्रीशुभचंद्रविरचितायां धर्म्मानुप्रेक्षायां द्वादशोऽधिकारः ॥ १२ ॥

No. 1418.

जम्बूद्वीपप्रज्ञप्तिसंग्रहः—मा० पद्मनन्दिः।

आ०—देवासुरिंदमहिदे दसद्धरूवूणकम्मपरिहीणे ।
केवलणाणालोए सद्धम्मुवएसदा अरुहे ॥ १ ॥...
ते वंदिऊण सिरसा वोच्छामि जहाक्कमेण जिणदिट्ठं ।
अयरियपरंपरया पण्णत्तिं दीवजलधीणं ॥ ६ ॥

च०—विबुधवहूमउडमणिगणकरसलिलसुद्धे[धो]यचारुपयकमलं ।
वरपउमणंदिणमियं वीरजिणंदं णमंसामि ॥ १७५ ॥

इय जंबूदीवपण्णत्तिसंगहे पमाणपरिच्छेदो नाम तेरसो उद्देसो सम्मत्तो ॥ १३ ॥

No. 1420.

जम्बूस्वामिचरित्रम्-जिनदासः।

आ०—श्रीवर्धमानतीर्थेशं वंदे मुक्तिवधूवरम् ।
कारुण्यजलधिं देवं देवाधिपनमस्कृतम् ॥ १ ॥

च०—श्रीकुंदकुंदान्वयमौलिरत्नं
श्रीपासनंदिर्विदितः पृथिव्याम् ।
सरस्वतीगच्छविभूषणं च
बभूव भव्यालिसरोजहंसः ॥ २३ ॥
ततोऽभवत्तस्य जगत्प्रसिद्धे
पट्टे मनोज्ञे सकलादिकीर्त्तिः ।

महाकविः शुद्धचरित्रधारी
निर्मथ्यराजा जगति प्रतापी ॥ २४ ॥
जयति सकलकीर्त्ति[र्तेः ]पादपंकेजभानु-
र्जगति भुवनकीर्त्तिर्विश्वविख्यातकीर्त्तिः ।
बहुयतिजनयुक्तः सर्वसावद्यमुक्तः
कुसुमशरविजेता भव्यसन्मार्गनेता ॥ २५ ॥
विबुधजननिषेव्यः सत्कृतानेककाव्यः
परमगुणनिवासः सद्वृतालीविलासः ।
विजितकरणमारः प्राप्तसंसारपारः
स भवतु गतदोषः शर्मणे वः सतोषः॥२६॥
षष्ठाष्टमादेस्तपसो विधाता
क्षमाभिधः श्रीनिलयं धरित्र्याम् ।
जीयाज्जितानेकपरीषहारिः
संबोधयन् भव्यगणं चिरं सः ॥ २७ ॥
भ्रातास्ति तस्य प्रथितः पृथिव्यां
सद्ब्रह्मचारी जिनदासनामा ।
तेनेति तेने चरितं पवित्रं
जंब्वादिनामा [म्नो] मुनिसत्तमस्य॥२८॥
देशे विदेशे सततं विहारं
वितन्वता येन कृताः सुलोकाः ।
विशुद्धसर्वज्ञमतप्रवीणाः
परोपकारव्रततत्परेण ॥ २९ ॥
स ब्रह्मचारी किल धर्मदास-
स्तस्यास्ति शिष्यः कविबद्धसख्यः ।

सौजन्यवल्लीजलदः कृतोऽयं
तद्योगतो व्याकरणप्रवीणः ॥ ३० ॥
कविर्महादेव(इति)प्रसिद्ध-
स्तन्मित्रमास्ते द्विजवंशरत्नम् ।
महीतले नूनमसौ कृतश्च
साहाय्यतस्तस्य सुधर्महेतोः ॥ ३१ ॥
ग्रंथः कृतोऽयं जिननाथभक्त्या
गुणानुरागात्[रागाच्च]महामुनीनाम् ।
पूजाभिधानाद्रहितेन नित्यं
महाप्रशस्तः परमार्थबुद्ध्या ॥ ३२ ॥

ये शृण्वंति चरित्रमुत्तममिदं श्रीजंबूनाम्नो मुने-
र्नानाचित्रकथाविभूषितमतिप्रावीण्यसंबोधनम् ।
तेषां स्याद्बहुपुण्यकर्मनिपुणा बुद्धिः शुभं भूरि च
त्यक्त्वाशेषभवप्रसूतसुखसार्थस्याशु धर्मास्पद(म्) ॥ ३३ ॥

पठनीयं पाठनीयं शास्त्रमेतन्मुनीश्वरैः ।
जंबूस्वामिचरित्राढ्यं रोमांचजननं नृणाम् ॥ ३४ ॥
क्षंतव्यं शारदे देवि यदत्र स्खलितं मया ।
मोहप्रमादवशतः श्रुताब्धौ[श्रुताब्धौ]को न मुह्यति ॥ ३५ ॥
जंबूस्वामी जिनाधीशो भूयान्मांगल्यसिद्धये ।
भवतां भुवि भो भव्याः श्रीवीरांतिमकेवली ॥ ३६ ॥
एकविंशप्रमाणानि शतानि च चरित्रके ।
त्रिंशद्युक्तानि श्लोकानां शुभानां संति निश्चितम् ॥ ३७ ॥

इति श्रीजंबूस्वामिचरित्रे विद्युच्चरमहामुनिसर्वार्थसिद्धिगमनो
नामैकादशः सर्गः ॥ ११ ॥ सं० ३० वर्षे चैत्रसुदि १ रविवारे

No. 1423.

ज्ञानार्णवगद्यटीका—श्रुतसागरः ।

आ०—शिवोऽयं वैनतेयश्च स्मरश्चास्यैव कीर्त्तितः ।
अणिमादिगुणानर्घ्यरत्नवार्धिर्बुधैर्मतः ॥ १ ॥

च०—आचार्यैरिह शुद्धतत्त्वमतिभिः श्रीसिंहनंद्याह्वयैः
संप्रार्थ्य श्रुतसागरं कृतिवरं भाष्यं शुभं कारितम् ।
गद्यानां गुणवत्प्रियं विनयतो ज्ञानार्णवस्यांतरे
विद्यानंदिगुरुप्रसादजनितं देयादमेयं सुखम् ॥

इति श्रीज्ञानार्णवस्थितगद्यटीका तत्त्वत्रयप्रकाशिनी समाप्ता ॥ ॥

No. 1429.

त्रिषष्टिलक्षणमहापुराणसंग्रहः—

गुणभद्राचार्यः ।

आ०—श्रीमान् जिनोऽजितो जीयाद्यद्वचांस्यमलान्यलम् ।
क्षालयंति जलानीव विनेयानां मनोमलम् ॥ १ ॥

च०—श्रीकालवर्षभूपाले पालयत्यखिलामिलाम् ।
तस्मिन्विध्वस्तनिःशेषद्विषि धर्मयशोजुषि ॥ ३१ ॥
पद्मालयमुकुलकुलं[1] प्रविकाशत्स्वप्रतापततमहसि ।
श्रीमति लोकादित्ये प्रध्वस्तप्रचितशत्रुमत्तमसि ॥ ३२ ॥
चेल्लपताके चेल्लध्वजानुजे चेल्लकेतनतनूजे ।
जैनेंद्रधर्मवृद्धेर्विधायिनि स्वविधुवीध्रपृथुयशसि ॥ ३३ ॥
वनवासदेशमखिलं भुंजति[2] निःकंटकं सुखं सुचिरम् ।
तत्पितृनिजनामकृते[3] ख्याते वंकापुरे पुरेष्वधिके ॥ ३४ ॥

१ पद्मालया राजानस्त एव मुकुलकुलं कमलकुड्मलसमूहं. २ कर्णाटदेशं प्रतिपालयति सति राज्ञि चतुःपुत्रसहिते. ३ °कालवर्षस्य पिता वंकराजः तस्य निजनाम्ना कृते वासिते.

शकनृपकालाभ्यंतरविंशत्यधिकाष्टशतमिताब्दांते ।
मंगलमहार्थकारिणि पिंगलनामनि[1] समस्तजनसुखदे ॥३५॥
पंचम्यामाश्विने गोयुजि[2] दिवसवरे मंत्रिवारे[3] बुधांशे
पूर्वायां[4] सिंहलग्ने धनुषि धरणिजे[5] वृश्चिकार्के[6] तुलायाम् ।
सार्पे[7] शुक्रे कुलीरे[8] रविजसुरगुरौ[9] निष्ठितं भव्यवर्यैः
प्राप्तेज्यं शास्त्रसारं जगति विजयते पुण्यमेतत्पुराणम् ॥३६॥

यावद्धराजलनिधिर्गगनं हिमांशु-
स्तिग्मद्युतिः सुरगिरिः ककुभां विभागाः ।
तावत्सतां वचसि चेतसि पूतमेत-
च्छ्रोतव्यतास्थितिमुपैति महापुरणम् ॥ ३७ ॥

धर्मोत्र मुक्तिपदमत्र ( कवित्वमत्र )
तीर्थेशिनां चरितमत्र महापुराणे ।
यद्वा कवींद्रजिनसेनमुखारविंद-
निर्यद्वचांसि न मनांसि हरंति केषाम् ॥ ३८ ॥

महापुराणस्य पुराणपुंसः
पुरा पुराणे तदकारि किंचित् ।
कवीशिनानेन यथा न काव्य-
चर्चासु चेतोविकलाः कवींद्राः ॥ ३९ ॥

कविवरजिनसेनाचार्यवर्यार्यमासौ
मधुरिमणि न वाच्यं नाभिसूनोः पुराणे ।
तदनु च गुणभद्राचार्यवाचो विचित्राः
सकलकविकरींद्रव्रातसिंह्यो जयंति ॥४०॥

---

१. एकपंचाशत्तमे संवत्सरे वर्त्तमाने. २. किरणयुक्ते—अर्थादाश्विनशुक्लपञ्चम्याम्. ३. गुरुवारे. ४ कन्याख्ये-पूर्वाषाढनक्षत्रे. ५ धनराशौ मंगले स्थिते चंद्रे च स्थिते सति. ६. वृश्चिकसंक्रातौ. ७. सार्पे राहौ सति बुधे च सति. ८. कर्कराशौ शुक्रे सति. ९. रविजेन शनिनोपलक्षितः सुरगुरुस्तस्मिन्.

यदि सकलकवींद्रप्रोक्तसूक्तप्रचार-
श्रवणसरसचेतास्तत्त्वमेवं सखेऽस्याः ।
कविवरजिनसेनाचार्यवक्त्रारविंद-
प्रणिगदितपुराणाकर्णनाभ्यर्णकर्णः॥ ४१ ॥

धर्मः कश्चिदिहास्ति नैतदुचितं वक्तुं पुराणं महत्
भव्याः किं तु कथात्रिषष्टिपुरुषाख्यानं चरित्रार्णवः ।
कोऽप्यस्मिन्कवितागुणोस्ति कवयोऽप्येतद्वचोब्जालयः
कोऽसावत्र कविः कवींद्रगुणभद्राचार्यवर्यः स्वयम् ॥४२॥

इत्यार्षे भगवद्गुणभद्राचार्यप्रणीते त्रिषष्टिलक्षणमहापुराण-
संग्रहे गुरुक्रमवर्णनो नाम सप्तसप्ततितमं पर्व ॥७७॥

समाप्तमिदं महापुराणम् ॥ १७७४ वर्षे

No. 1399.

स एव—स एव ।

च०—४२इत्यार्षे त्रिषष्टिलक्षणमहापुराणसंग्रहे भगवद्गुणभद्राचार्य-प्रणीते प्रशस्तिव्याख्यानं नाम सप्तसप्ततितमं पर्व समाप्तं च महापुराणमिति ॥ संवत् १६३२ वर्षे मार्गसुदि एकादशी तिथौ रविवासर उत्तराभाद्रपदानक्षत्रे श्रीमूलसंघे नंद्यान्नाये बलात्कारगणे सरस्वतीगच्छे श्रीकुंदकुंदाचार्यान्वये भ० श्रीपद्मनंदिदेवास्तत्पट्टे भ० श्रीशुभचंद्रदेवास्तत्पट्टे भ० श्रीजिनचंद्रदेवास्तत्पट्टे भ० श्रीप्रभाचंद्रदेवास्तच्छिष्यभ० श्रीधर्मचंद्रदेवास्तच्छिष्यभ० श्रीललितकीर्तिदेवास्तच्छिष्यमंडलाचार्यश्रीचंद्रकीर्तिदेवास्तदाम्नाये खंडेलवालान्वये श्रीपार्श्वनाथजिनचैत्यालये मालापुरवास्तव्ये समस्तश्राविकाभिः ज्ञानकल्याणकार्थं लेखाप्य भ० श्रीचंद्रकीर्तितच्छिष्यब्रह्मदासाय दत्तम् ॥

No. 1430.

त्रैलोक्यप्रज्ञप्तिः—मू० मा० शुभचन्द्रः ।

आ०—अट्ठविहकम्मवियला णिट्ठियकज्जा पणट्ठसंसारा ।
दिट्ठसयलत्थसारा सिद्धा सिद्धिं मम दिसंतु ॥ १ ॥

च०—चुण्णिसरूवं अत्थं करणसरूवपमाण होइ किं जत्तं ।
अट्ठसहस्सपमाणं तिलोयपण्णत्तिणामाए ॥ ८० ॥ ८००० ॥
एवमाइ य परंपरागइ तिलोयपण्णत्तीए सिद्धो ।
लोयसरूवणिरूवणपण्णत्ती णाम णवमो महाहियारो सम्मत्तो
मग्गप्पभावणट्ठं पवयणभत्तिं पबोधिदेन मया ।
भणिदं गंथं पवरं सोहंतु बहुसुदा इरिया ॥
तिलोयपण्णत्ती सम्मत्ता ॥

अथ प्रशस्तिपाठः ।

वृषभो वः श्रियं कुर्याद्वृषभांको वृषाग्रणीः ।
